CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

॥श्रीगणेशायनमः॥ श्रुत्वाहनूमतोवाक्यंयथावदभिभाषितं॥रामःप्रीतिसमायुक्तोवाक्यमुत्तरमब्रवीत्॥१॥कृतं
हनूमताकार्यंसुमहद्दुर्विदुर्लभं॥ मनसापियदन्येननशक्यंधरणीतले॥२॥नहितंपरिपश्यामियस्तरेतमहोदधिं॥अ
न्यत्रगरुडाद्वायोरन्यत्रचहनूमतः॥३॥देवदानवयक्षाणांगंधर्वोरगरक्षसां॥अप्रधृष्यांपुरींलंकांरावणेनसुरक्षितां॥४
॥प्रविष्टंसत्वमाश्रित्यजीवन्कोनामनिष्क्रमेत्॥कोविशेत्तु दुराधर्षांराक्षसैश्चसुरक्षितां॥५॥योवीर्यबलसंपन्नोनसमः
स्याद्धनूमतः॥भृत्यकार्येहनुमतासुग्रीवस्यकृतंमहत्॥एवंविधायस्यबलंसदृशंविक्रमस्यच॥६॥योहिभृत्योनियुक्तःसन्
भर्त्रीकर्मणिदुष्करे॥कुर्यात्तदनुरागेणतमाहुःपुरुषोत्तमं॥७॥योनियुक्तःपरंकार्यंनकुर्यान्नृपतेःप्रियं॥भृत्योयुक्तःसमर्थ
श्चतमाहुर्मध्यमंनरं॥८॥नियुक्तोनृपतेकार्यंनकुर्याद्यःसमाहितः॥भृत्योयुक्तःसमर्थश्चतमाहुःपुरुषाधमं॥९॥तन्नियोगेनियु
क्तेनकृतंकृत्यहनुमता॥नचात्मालघुतांनीतःसुग्रीवश्चापितोषितः॥१०॥अहंचरघुवंशश्चलक्ष्मणश्चमहाबलः॥वैदेह्यादर्श
नेनाद्यधर्मतःपरिरक्षिताः॥११॥इदंतुममदीनस्यमनोभूयःप्रकर्षति॥यदिहास्यप्रियाख्यातुर्नकुर्मिसदृशंप्रियं॥१२॥एषसर्व
स्वभूतस्तुपरिष्वंगोहनूमतः॥मयाकालमिमंप्राप्यदत्तस्तस्यमहात्मनः॥१३॥इत्युक्त्वाप्रीतिहृष्टोरामस्तंपरिषस्वजे॥हनूमंतं
कृतात्मानंकृतवाक्यमुपागतं॥१४॥ध्यात्वापुनरुवाचेदंवचनंरघुसत्तमः हरीणामीश्वरस्यापिसुग्रीवस्योपशृण्वतः॥१५॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

सर्वथासुकृतंतावत्सीतायाःपरिमार्गणं॥सागरंतुसमासाद्यपुनर्नष्टंमनोमम॥१२॥कथंनामसमुद्रस्यदुष्पारस्यमहांभसः॥
हरयोदक्षिणंपारंगमिष्यंतिसमागताः॥१३॥यद्यप्येषतुवृत्तांतोवैदेह्यागदितोमम॥समुद्रपारगमनेहरीणांकिमिवोत्तरं॥
१४॥इत्युत्कांशोकसंभ्रांतोरामःशत्रुनिबर्हणः॥हनूमंतंमहाबाहुस्ततोध्यानमुपागमत्॥१५॥इत्यार्षेश्रीरामायणे वाल्मी
कीयेयुद्धकांडेप्रथमःसर्गः॥१॥तंतुशोकपरिद्यूनंरामंदशरथात्मजं॥उवाचवचनंश्रीमान्सुग्रीवःशोकनाशनं॥१॥किंत्व
यातप्यतेवीरयथान्यःप्राकृतस्तथा॥मैवंभूस्त्वंजसंतापंकृतघ्नइवसौहृदं॥२॥संतापस्यचनेस्थानंनहिपश्यामिराघव॥
प्रवृत्तावुपलब्धायांज्ञातेचनिलयेरिपो॥३॥मतिमांछास्त्रवित्प्राज्ञःपंडितश्चासिराघव॥त्यजेमांप्राकृतांबुद्धिंकृतार्थेवा
र्थदूषिणी॥४॥समुद्रंलंघयित्वातुमहानक्रसमाकुलं॥लंकामारोहयिष्यामोहनिष्यामश्चतेरिपुं॥५॥निरुत्साहस्यदीनस्य
शोकपर्याकुलात्मनः॥सर्वथाव्यवसीदंतिव्यसनंचाधिगच्छति॥६॥इमेशूराःसमर्थाश्चसर्वतोहरियूथपाः॥त्वत्प्रियार्थंकृतोत्सा
हाःप्रवेष्टुमपिपावकं॥७॥ एषांहर्षेणजानामितर्कश्चापिदृढोमम॥८॥विक्रमेणसमानिष्येसीतांहत्वायथारिपुं॥रावणंपाप
कर्माणंतथात्वंकर्तुमर्हसि॥९॥सेतुरत्रयथाबध्येद्यथापश्येमतांपुरीं॥तस्यराक्षसराजस्यतथात्वंकुरुराघव॥१०॥दृष्ट्वातांहिपु
रीलंकांत्रिकूटशिखरेस्थितां॥हतंचरावणंयुद्धेदर्शनादवधारय॥११॥अबध्वासागरेसेतुंघोरेचवरुणालये॥लंकानमर्द्दि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

तुंशक्यासैंद्रैरपिसुरासुरैः॥सेतुबंधःसमुद्रेचयावल्लंकासमीपतः॥सर्वेतीर्णेचमेसैन्यंजितमित्युपधारय॥तथाहिसमरेवीराहरय
कामरूपिणः॥१३॥तलंदलंविक्लवांबुद्धिंराजन्सर्वार्थनाशनीं॥पुरुषहिलोकेस्मिन्शोकःशौर्यापकर्षणः॥१४॥यत्तुकार्यमनुष्ये
णशौडीर्यमवलंब्यतां॥तदलंकारणायैवकर्तुर्भवतिसत्वरं॥१५॥अस्मिन्कालेमहाप्राज्ञसत्वमातिष्ठतेजसा॥शूराणांहि
मनुष्याणांलब्धिधानांमहात्मनां॥विनष्टेवाप्रनष्टेवाशोकःसर्वार्थनाशनः॥१६॥तत्वंबुद्धिमतांश्रेष्ठःसर्वशास्त्रार्थकोविदः
मद्विधैःसचिवैःसार्द्धंमरिंजेतुंसमर्हसि॥१७॥नहिपश्याम्यहंकंचित्त्रिलोकेषुराघव॥गृहीतधनुषयस्तेतिष्ठेदभिमुखोर
णे॥१८॥वानरेषुसमासक्तंनतेकार्यंविपत्स्यते॥अचिराद्द्रक्ष्यसेसीतांतीर्त्वासागरमक्षयं॥१९॥तदलंशोकमालंबक्रोधमालं
बभूपते॥निश्चेष्टाःक्षत्रियामंदाःसर्वेचंडस्यबिभ्यति॥२०॥लंघनार्थेचघोरस्यसमुद्रस्यनदीपतेः॥सहास्माभिरिहोपेतःसूक्ष्म
बुद्धिर्विचारय॥२१॥लंघितेतत्रतैसैन्यैर्जितमित्येवनिश्चिनु॥सर्वेतीर्णेचमेसैन्यंजितमित्यवधारय॥२२॥इमेहिहरयःशूराःस
मरेकामरूपिणः॥तानरीन्विधमिष्यंतिशिलापादपवृष्टिभिः॥२३॥कथंचित्सरिपश्यामिलंघितंवरुणालयं॥हतमित्येवतंमन्येयु
द्धेशत्रुनिबर्हणः॥२४॥किमुक्त्वाबहुधाचापिसर्वथाविजयीभवान्॥निमित्तानिचपश्यामिमनोमेसंप्रहृष्यति॥२५॥इत्यार्षेश्री
रामायणेवाल्मीकीयेयुद्धकांडेद्वितीयःसर्गः॥१॥सुग्रीवस्यवचःश्रुत्वाहेतुमत्सरमार्थवित्॥प्रतिजग्राहकाकुत्स्थोहनूमंतम्

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

थाब्रवीत्॥१॥तपसासेतुबंधेनसागरोच्छोषणेनच॥सर्वथापिसमर्थोस्मिसागरस्यास्यलंघने॥२॥कतिदुर्गाणिदुर्गायालंका
यास्तद्वदीहिमे॥ज्ञातुमिच्छामितत्सर्वंदर्शनादिववानर॥३॥बलस्यपरिमाणंचद्वारदुर्गक्रियामपि॥गुप्तिकर्मचलंकायारक्षसां
सदनानिच॥४॥यथासुखंयथावच्चलंकायामपिदृष्टवान्॥सर्वमाचक्ष्वतत्त्वेनसर्वथाकुशलोह्यसि॥५॥श्रुत्वारामस्यवचनंह
नूमान्मारुतात्मजः॥वाक्यंवाक्यविदांश्रेष्ठोरामंपुनरथाब्रवीत्॥६॥श्रूयतांसर्वमाख्यास्येदुर्गकर्मविधानतः॥गुप्तापुरीयथा
लंकारक्षिताचयथाबले॥७॥राक्षसाश्चयथास्निग्धारावणस्यचतेजसा॥परांसमृद्धिंलंकायासागरस्यचभीमतां॥८॥विभागंच
बलौघस्यनिर्देशंवाहनस्यच॥एवमुक्त्वाकपिश्रेष्ठकथयामासतत्त्ववित्॥९॥हृष्टप्रमुदितालंकामत्तद्विपसमाकुला॥महती
रथसंपूर्णारक्षोगणनिषेविता॥१०॥दृढवद्धकपाटानिमहापरिघवंतिच॥चत्वारिविपुलान्यस्याद्वाराणिसुमहांतिच॥११॥तत्रे
षूपलयंत्राणिबलवंतिमहांतिच॥आगतंप्रतिसैन्यंतैस्तत्रप्रतिनिवार्यते॥१२॥द्वारेषुसंस्कृताभीमाःकालायसमयाःशिताः
शतशोरचितावीरैःशतघ्योरक्षसांगणैः॥१३॥सौवर्णैःसुमहांस्तस्याःप्राकारोदुरधर्षणः॥मणिविद्रुमवैडूर्यमुक्ताविरचितांतरः
१४॥सर्वतश्चमहाभीमाःशीततोयामहाशुभाः॥अगाधाग्राहवत्यश्चपरिखामानसेविताः॥१५॥द्वारेषुतासांचत्वारःसंक्रमाःपर
मायताः॥यंत्रैरुपेताबहुभिःमहद्भिर्गृहपंक्तिभिः॥१६॥त्रायंतेसंक्रमास्तत्रपरसैन्यागमेसति॥यंत्रैस्तैरवकीर्यंतेपरिखासुसमंततः

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

१७॥एकस्त्वकंप्योबलवान्संक्रमःसुमहादृढः॥कांचनैर्बहुभिस्तंभैर्वेदिकाभिश्चशोभितः॥१८॥स्वयंप्रकृतिमापन्नोयुयुत्सूराम
रावणः॥उत्थितश्चाप्रमत्तश्चबल नामनुदर्शने॥१९॥लंकापुनर्निरालंबादेवदुर्गाभयावहा॥नादेयंपार्वतंचान्यंकृत्रिमंचचतुर्वि
धं॥२०॥स्थितापरेसमुद्रस्यदूरपारस्यराघव॥नौपथश्चापिनास्त्यत्रनिरुद्देशश्चसर्वशः॥२१॥शैलाग्रेरचितादुर्गासापूर्देवपुरोप
मा॥वाजिवारणसंपूर्णालंकापरमदुर्जया॥२२॥परिखाश्चशतघ्न्यश्चयंत्राणिविविधानिच॥शोभयंतीपुरींलंकांरावणस्यदुरा
त्मनः॥२३॥अयुतंरक्षसामत्रपूर्वद्वारसमाश्रितं॥शूलहस्तादुराधर्षासर्वेखड्गायुधोद्यताः॥२४॥नियुतंरक्षसामत्रदक्षिणद्वा
रमाश्रितं॥चतुरंगेणसैन्येनयोधास्तत्राप्यनुत्तमाः॥२५॥प्रयुतंरक्षसामत्रपश्चिमद्वारमाश्रितं॥चर्मखड्गधराःसर्वेतथासर्वा
स्त्रकोविदाः॥२६॥न्यर्बुदंरक्षसामत्रउत्तरद्वारमाश्रितं॥रथिनश्चाश्ववाहाश्चकुलपुत्राःसुपूजिताः॥२७॥शतशोथसहस्रा
णिमध्यमंस्कंधमाश्रिताः॥यातुधानादुराधर्षाःसाग्रकोटिश्चराक्षसाः॥२८॥तेमयासंक्रमाभग्नाःपरिखाश्चावपूरिताः॥दग्धा
चनगरीलंकाप्राकाराश्चावसादिताः॥२९॥येनकेनतुमार्गेणनरामवरुणालयं॥हतेतिनगरीलंकावानरैरुपधार्यतां॥३०॥अंग
दोद्विविदोमैंदोजांबवान्पनसोनलः॥नीलःसेनापतिश्चैवबलशेषेणकिंतव॥३१॥त्वमानाहिगत्वातांरावणस्यमहापुरीं॥
सपर्वतवनांभित्वासखातांचसतोरणां॥३२॥सप्राकारांसभवनांआनयिष्यंतिराघवं॥३३॥एवमाज्ञापयक्षिप्रंबलानांसर्वसं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

ग्रहं मुहूर्तेनतुयुक्तेनप्रस्थानमभिरोचय॥३४॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेतृतीयःसर्गः॥३॥श्रुत्वाहनुमतोवा
क्यंयथावदनुपूर्वशः॥ततोब्रवीन्महातेजारामःसत्यपराक्रमः॥१॥यन्निवेदयसेलंकांपुरींभीमस्यरक्षसः॥क्षिप्रमेतांवधिष्या
मिसत्यमेतद्ब्रवीमिते॥२॥अस्मिन्मुहूर्तेसुग्रीवप्रयाणमभिरोचय॥युक्तोमुहूर्तेविजयेप्राप्तोमध्यंदिवाकरः॥३॥सीतांहृत्वातु
नद्यातुक्वासौयास्यतिजीवितः॥सीताश्रुत्वाभियानंमेआशामेष्यतिजीविते॥जीवितांतेमृतंस्पृष्ट्वापीत्वामृतमिवातुरः॥४॥उत्तरा
फाल्गुनीह्यद्यश्वस्तुहस्तेनयोक्ष्यते॥अभिप्रयामसुग्रीवसर्वानीकसमावृताः॥५॥निमित्तानिचपश्यामियानिप्रादुर्भवंति वि
निहत्यरावणंसीतामानयिष्यामिजानकीं॥६॥उपरिष्टाद्धिनयनंस्फुरमाणमिमंमम॥विजयंसमनुप्राप्तंशंसतीवमनोरथं॥
७॥ततोवानरराजेनलक्ष्मणेनसुपूजितः॥उवाचरामोधर्मात्मापुनरप्यर्थकोविदः॥८॥अग्रेयातुबलस्यास्यनीलोमार्गमवेक्षि
तुं॥वृतःशतसहस्रेणवानराणांतरस्विनां॥९॥फलमूलवतानीलशीतकाननवारिणा॥तथामधुमताचाशुसेनांसेनापतेन
या॥१०॥दूषयेयुर्दुरात्मानःपथिमूलफलोदकं॥राक्षसापथिरक्षेथास्तेभ्यस्त्वंनित्यमुद्यतः॥११॥निम्नेषुवनदुर्गेषुवनेषुचवनौ
कसः॥अभिप्लुत्याभिपश्येयुःपरेषांनिहितंबलं॥१२॥यतुफल्गुबलंकिंचित्तदत्रैवोपपद्यतां॥एतद्धिकृत्यंघोरंनोविक्रमेणप्रयु
तां॥१३॥सागरौघनिभंभीमंमद्यानीकंमहाबलाः॥कपिसिंहाःप्रकर्षंतुशतशोथसहस्रशः॥१४॥गजाश्चगिरिसंकाशागवयश्चमहा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

बलः॥गवाक्षश्चाग्रतोयातुगवांदृप्तइवर्षभः॥१४॥यातुवानरवाहिन्याबानरःप्लवतांपतिः॥पालयन्दक्षिणंपार्श्वमृषभोवान
रर्षभः॥१५॥गंधहस्तीवदुर्द्धर्षस्तरस्वीगंधमादनः॥यातुवानरवाहिन्याःसव्यंपार्श्वमधिष्ठितः॥१६॥यास्यामिबलमध्येहंबलौ
घमभिहर्षयन्॥अधिरुह्यहनूमंतंऐरावतमिवेश्वरः॥१७॥अंगदेनैषसंयातुलक्ष्मणश्चांतकोपमः॥सार्वभौमेनभूतेशेइवि
णाधिपतिर्यथा॥१८॥जांबवांश्चसुषेणश्चवेगदर्शीचवानरः॥ऋक्षराजोमहाबाहुःकुक्षिंरक्षंतुतेत्रयः॥१९॥रघवस्यवचः
श्रुत्वासुग्रीवोवाहिनीपतिः॥आदिदेशमहावीर्योवानरान्वानरर्षभः॥२०॥तेवानरगणाःसर्वेसमुत्पत्यमहौजसः॥गुहाभ्यःशि
खरेभ्यश्चआशुपुप्लुविरेतदा॥२१॥ततोवानरराजेनलक्ष्मणेनचपूजितः॥जगामरामोधर्मात्मासमैन्योदक्षिणांदिशं॥२२॥श
तैःशतसहस्रैश्चकोटिभिश्चायुतैरपि॥वारणाभैश्चहरिभिर्ययौपरिवृतस्तदा॥२३॥तंयांतमनुयांतीसामहतीहरिवाहिनी॥हृ
ष्टाःप्रमुदिताःसर्वेसुग्रीवेणाभिपालिताः॥२४॥आप्लवंतःप्लवंतश्चगर्जंतश्चप्लवंगमाः॥क्ष्वेलंतोनिनदंतश्चजग्मुर्वैदक्षिणांदि
शं॥२५॥भक्षयंतःसुगंधीनिमधूनिचफलानिच॥उद्वहंतोमहावृक्षान्मंजरीपुंजधारिणः॥२६॥अन्योन्यंसहसादृप्तानिर्वहंति
क्षिपंतिच॥पतंतश्चोत्पतंत्यन्येपातयंत्यपरेपरान्॥२७॥राक्षसानोनिहंतव्यःसर्वेचरजनीचराः॥इतिगर्जंतिहरयोराघवस्यस
मीपतः॥२८॥पुरस्तादृषभोनीलोवीरःकुमुदएवच॥पंथानंशोधयंतिस्मवानरैर्बहुभिःसह॥२९॥मध्येतुराजासुग्रीवोरामोल

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

क्ष्मणएवच॥वलिभिर्बहुभिर्भीमैर्वृतःशत्रुनिबर्हणः॥३१॥हरिःशतबलिवीरःकोटिभिर्दशभिर्वृतः॥सर्वामेकोत्यवष्टभ्यरर
क्षहरिवाहिनीं॥३२॥कोटीशतपरीवारःकेसरीपनसोगजः॥अर्कश्चबहुभिःपार्श्वमेकंतस्याभिरक्षति॥३२॥सुषेणोजांबवांश्चै
वऋक्षैर्बहुभिरावृतौ॥सुग्रीवंपुरतःकृत्वाजघनंपरिरक्षतुः॥३३॥तेषांसेनापतिवीरोनीलोवानरपुंगवः॥संयतश्चरतांश्रेष्ठः
तद्बलंपर्यवारयत्॥३४॥बलीसुरवप्रजंघश्चजंभोथरभसःकपिः॥सर्वतश्चययुवीरास्त्वरयंतःप्लवंगमान्॥३५॥एवंतेहरिशा
र्दूलागच्छंतिबलदर्पिताः॥अपश्यंतगिरिश्रेष्ठंसत्वंगिरिशतायुतं॥३६॥सरांसिचसुफुल्लानितटाकानिवराणिच॥रामस्यशा
सनंज्ञात्वाभीमकोपस्यभीतवत्॥३७॥वर्जयन्नगराभ्याशांस्तथाजनपदानपि॥सागरौघनिभंभीमंतद्वानरबलंमहत्॥३८॥निःस
र्पमहाघोरंभीमघोषमिवार्णवं॥तस्यदाशरथेपार्श्वेशूरास्तेकपिकुंजराः॥३९॥तूर्णमापुप्लुवुःसर्वेसदश्वाइवचोदिताः॥कपिभा
मूह्यमानौतौशुशुभातेनरर्षभौ॥४०॥महद्भ्यामिवसंस्पृष्टौग्रहाभ्यांचंद्रभास्करौ॥ततोवानरराजेनलक्ष्मणेनसुपूजितः॥४१॥
जगामरामोधर्मात्मासुसैन्योदक्षिणांदिशं॥तमंगदगतोरामंलक्ष्मणःशुभयागिरा॥४२॥उवाचपरिपूर्णार्थंपूर्णार्थप्रतिभानवा
न्॥हतामवाप्यवैदेहींक्षिप्रंहत्वाचरावणं॥४३॥समृद्धार्थःसमृद्धार्थामयोध्यांप्रतियास्यसि॥महांतिनिमित्तानिदिवंभूमौच
राघव॥४४॥शुभानितवपश्यामिसर्वाण्येवार्थसिद्धये॥अनुवातिशिवोवायुःसेनांमृदुहितःसुखी॥४५॥पूर्णचंद्रास्वराश्चेमेप्रव

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

दंतिमृगद्विजाश्च प्रसन्नाश्च दिशः सर्वा विमलाश्च दिवाकरः॥४४॥ उशना च प्रसन्नार्चिरनुत्वा भार्गवो गतः॥ ब्रह्मराशिर्विशुद्ध
श्च शुद्धाश्च परमर्षयः॥ अर्चिष्मंतः प्रकाशंते ध्रुवं सर्वे प्रदक्षिणं॥४५॥ त्रिशंकुर्विमलो भाति राजर्षिस्तु पुरोहितः॥ पितामहपुरो
स्माकं इक्ष्वाकूणां महात्मनां॥४६॥ विमले च प्रकाशेते विशाखे निरुपद्रवे॥ नक्षत्रं परमस्माकं इक्ष्वाकूणां महात्मनां॥४७॥ नैर्ऋ
तं नैर्ऋतानां च नक्षत्रमतिपीड्यते॥ मूलो मूलवतास्पष्टो धूप्यते धूमकेतुना॥४८॥ सर्वं चैतद्विनाशाय राक्षसानामुपस्थितं॥ का
लेकालगृहीतानां नक्षत्रं ग्रहपीडितं॥४९॥ प्रसन्नासुरसाश्चापो वनानि फलवंति च॥ प्रवांति नाधिकागंधा यथर्तुकुसुमद्रुमा॥५०
व्यूढानि कपिसैन्यानि प्रकाशंते धिकं प्रभो॥ देवानामिव सैन्यानि संग्रामे तारकामये॥ एवमार्य समीक्ष्यैतत्प्रीतो भवितुमर्हसि
५१॥ इति भ्रातरमाश्वस्य हृष्टः सौमित्रिरब्रवीत्॥ अथावृत्य महीं कृत्स्नां जगाम हरिवाहिनी॥५२॥ ऋक्षवानरशार्दूलैर्नखदंष्ट्रा
युधैरपि॥ कराग्रैश्चरणाग्रैश्च वानरैरुद्धतं रजः॥५३॥ भीममंतर्दधे लोकं निवार्य सवितुः प्रभां॥ सपर्वतवनाकाशं दक्षिणां हरि
वाहिनी॥५४॥ छादयंती ययौ भीमा द्यामिवांबुदसंततिः॥ उन्नरंत्या श्च सेनायाः सततं बहुयोजनं॥५५॥ नदीस्रोतांसि सर्वाणि स
स्वदुर्विपरीतवत्॥ सरांसि विमलाभांसि द्रुमाकीर्णाश्च पर्वताः॥५६॥ समा भूमिप्रदेशाश्च वनानि फलवंति च॥ मध्येन च समंता
च तिर्यक् चाधश्च सा विशत्॥५७॥ समावृत्य महीं कृत्स्नां जगाम महती चमूः॥ नेहुष्टवदनाः सर्वे जग्मुर्मारुतरंहसः॥५८॥ हरयो राघ

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वस्यार्थे समारोपितविक्रमा॥ हर्षवीर्यबलोद्रेकान्दर्शयंतः परस्परं॥ ६१॥ यौवनोत्सेकजाद्दर्पान्विविधांश्चक्रुरध्वनि॥ तत्रके
चिद्द्रुतं जग्मुरुत्पेतुश्चतथापरे॥ ६२॥ केचित्किलकिलां चक्रुर्वानरा वनगोचराः॥ आस्फोटयंश्च पुच्छानि संनिजग्मुः परान्पि॥
६३॥ भुजान्विक्षिप्य शैलांश्च द्रुमानन्येव भंजिरे॥ आरोहंतश्च शृंगाणि गिरीणां गिरिगोचराः॥ ६४॥ महानादान्प्रमुंचंति क्ष्वेडामन्ये
प्रचक्रिरे॥ उरुवेगैश्च मृदुर्लताजालान्यनेकशः॥ ६५॥ जृंभमाणाश्च विक्रांता विचिक्रीडुः शिलाद्रुमैः॥ ततः शतसहस्रैश्च कोटि
भिश्च सहस्रशः॥ ६६॥ वानराणां सुघोराणां श्रीमत्परिवृता महीं॥ सास्मयाति दिवारात्रं महती हरिवाहिनी॥ ६७॥ प्रहृष्टमुदिताः सर्वे
सुग्रीवेणाभिपालिताः॥ वानरास्त्वरितायांति सर्वे युद्धाभिनंदिनः॥ प्रमोक्षयिष्यवः सीतां मुहूर्तं क्वापि नावसन्॥ ६८॥ ततः पादपसंबा
धं नानावनसमायुतं॥ सत्यपर्वतमासाद्य वानरास्तं समारुहत्॥ ६९॥ कांचनानि विचित्राणि नदीप्रस्रवणानि च॥ पश्यन्नपि य
योरामः सत्यस्य मलयस्य च॥ ७०॥ चंपकांस्तिलकान्चूतान्प्रसेकान्सिंदुवारकान्॥ तिमिशान्करवीरांश्च भजंति स्म प्लवंगमाः
७१॥ अशोकांश्च करंजांश्च प्लक्षान्न्यग्रोधपादपान्॥ जंबुकामलकान्नागान्भजंति स्म प्लवंगमाः॥ ७२॥ प्रस्तरेषु चरम्येषु विविधाः का
ननद्रुमाः॥ वायुवेगप्रचलिताः पुष्पैरवकिरंति तान्॥ ७३॥ मारुतः सुखसंस्पर्शो वाति चंदनशीतलः॥ षट्पदैरनुकूजद्भिर्वनेषु मधुगं
धिषु॥ ७४॥ अधिकं शैलराजस्तु धातुभिः सुविभूषितः॥ धातुभ्यः प्रसृतो रेणुर्वायुवेगेन घट्टितः॥ ७५॥ स महद्वानरानीकं छादयामास स

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

र्वतः॥गिरिप्रस्थेषुरम्येषुसर्वतःसंप्रपुष्पिताः॥७६॥केतक्यसिंदुवाराश्चवासंत्यश्चमनोरमाः॥माधव्योगंधपूर्णाश्चकुंदगु
ल्माश्चपुष्पिताः॥७७॥चिरिबिल्वामधूकाश्चजंबुलावकुलास्तथा॥रजकास्तिलकाश्चैवनागवृक्षाश्चपुष्पिताः॥७८॥चूताःपाट
लिकाश्चैवकोविदाराश्चपुष्पिताः॥मुचुलिंदार्जुनाश्चैवशिंशपाःकुरजास्तथा॥७९॥हिंतालास्तिमिशाश्चैवचूर्णकानीपकास्त
था॥नीलाशोकाश्चसरलाःअंकोलाःपद्मकास्तथा॥८०॥प्रीयमाणैःप्लवंगैस्तुसर्वेपर्याकुलीकृताः॥वाप्यस्तस्मिन्गिरौरम्याः
पल्वलानितथैवच॥८१॥चक्रवाकानुचरिताःकारंडवनिषेविताः॥प्लवैःक्रौंचैश्चसंकीर्णावराहमृगसेविताः॥८२॥ऋक्षस्तरक्षुभिः
सिंहैःशार्दूलैश्चभयावहैः॥व्यालैश्चबहुभिर्भीमैःसेव्यमानासमंततः॥८३॥पद्मैःसौगंधिकैःफुल्लैःकुमुदैश्चोत्पलैस्तथा॥वारिजै
र्विविधैःपुष्पैरम्यास्तत्रजलाशयाः॥८४॥तस्यसानुषुकुंजंतिनानाद्विजगणास्तथा॥स्नात्वापीत्वोदकान्यत्रजलेक्रीडंतिवानराः
८५॥अन्योन्यंप्लावयंतीस्मशैलमारुह्यवानराः॥फलान्यमृतगंधीनिमूलानिकुसुमानिच॥चभंजुर्वानरास्तत्रपादपानांमदो
त्कटाः॥द्रोणमात्रप्रमाणानिप्लवमानानिवानराः॥८७॥ययुःपिबंतःस्वस्यास्तेमधूनिमधुपिंगलाः॥पादपानवभंजंतोविकर्षंतस्त
थालताः॥८८॥विधमंतोगिरिवरान्प्रययुःप्लवगर्षभाः॥वृक्षेभ्योन्येतुकपयोनदंतोमधुहर्षिताः॥८९॥अन्येवृक्षान्प्रपद्यंतेप्रपिबं
त्यपिचापरे॥चभूववसुधातेस्तुसंपूर्णाहरिपुंगवैः॥यथाकलमकेदारैःपक्वैरिवसुंधरा॥९०॥महेंद्रमथसंप्राप्यरामोराजीवलो

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

चनः॥आरुरोह महाबाहुः शिखरं द्रुमभूषितं॥९४॥ततः शिखरमारुह्य रामो दशरथात्मजः॥कूर्ममीनसमाकीर्णमपश्यत्सलि-
लाकुलं॥९५॥ते समुद्रं समतिक्रम्य मलयं च महागिरिं॥आसेदुरानुपूर्व्येण समुद्रं भीमनिस्वनं॥९६॥अवरुह्य जगामाशु वेलावन
मनुत्तमं॥रामो रमयतां श्रेष्ठः ससुग्रीवः सलक्ष्मणः॥९७॥अथ धौतोपलतलां तोयौघैः सहसोत्थितैः॥वेलामासाद्य विपुलां रामो व
चनमब्रवीत्॥९८॥एते वयमनुप्राप्ताः सुग्रीव वरुणालयं॥इहेदानीं विचिंतास्या नः पूर्वमुपस्थिता॥९९॥अतः परमतीरोयं सागरः
सरितां पतिः॥न चायमनुपायेन शक्यस्तरितुमर्णवः॥१००॥तदिहैव निवेशोस्तु मंत्रः प्रस्तूयतामिह॥यथेदं वानरबलं परं पारम
वाप्नुयात्॥१०१॥इतीव समहाबाहुः सीताहरणकर्शितः॥रामः सागरमासाद्य वासमाज्ञापयत्तदा॥१०२॥सर्वाः सेनानिवेश्यंतां
वेलायां हरिपुंगव॥संप्राप्तो मंत्रकालो नः सागरस्येह लंघने॥१०३॥स्वांस्वां सेनां समुत्सृज्य माचकश्चित्कुतोव्रजेत्॥गच्छंतु वा
नराः शूराज्ञेयं छन्नं भयं च नः॥१०४॥रामस्य वचनं श्रुत्वा सुग्रीवः सहलक्ष्मणः॥सेनां न्यवेशयत्तीरे सागरस्य द्रुमायुते॥१०५॥विरा
जसमीपस्थं सागरस्य च तद्बलं॥मधुपांडुजलः श्रीमान् द्वितीय इव सागरः॥१०६॥वेलावनमुपागम्य ततस्ते हरिपुंगवाः॥निवि
शश्चापरं पारं कांक्षमाणा महोदधेः॥१०७॥तेषां निविशमानानां सैन्यं सन्नाहनिस्वनः॥अंतर्धायि महानादो मर्णवस्य प्रसुश्रुवे॥
१०८॥सा वानराणां ध्वजिनी सुग्रीवेणाभिपालिता॥त्रिधा निविष्टा महती रामस्यार्थपराभवत्॥१०९॥सा महार्णवमासाद्य हृष्टा वानर

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वाहिनी॥वायुवेगसमाधूतंपश्यमानामहार्णवं॥७॥दूरपारमसंबाधंरक्षोगणनिषेवितं॥पश्यंतोवरुणावासंनिषेदुर्हरि
यूथपाः॥८॥चंडनक्रग्राहघोरंक्षपाहोदिवसक्षये॥हसंतमिवफेनौघैर्नृत्यंतमिववीचिभिः॥९॥चंद्रोदयेसमुद्भूतंप्रति
चंद्रसमाकुलं॥चंडानिलमहाग्राहैःकीर्णंतिमितिमंगलैः॥१०॥दीप्तभोगैरिवाकीर्णंभुजंगैर्वरुणालयं॥अवगाहंमहासत्वै
र्नानाशैलसमाकुलं॥११॥सुदुर्गंदुर्गमार्गंतमगाधमसुरालयं॥मकरैर्नागभोगैश्चविगाढावातलोलिताः॥१२॥उत्पेतुश्चनिपे
तुश्चप्रहृष्टाजलराशयः॥अग्निचूर्णमिवाविद्धंभास्वरंबुमहोरगं॥१३॥सुरारिनिलयंघोरंपातालविषयंसदा॥१४॥सागरंचं
बरप्रख्यमंबरंसागरोपमं॥सागरंचांबरंचेतिनिर्विशेषमदृश्यत॥१४॥संपृक्तंनभसाप्यंभःसंपृक्तंचनभोंभसा॥तादृग्रूपेसमदृ
श्येतेनारारत्नसमाकुले॥१५॥समुत्पतितमेघस्यवीचिमालाकुलस्यच॥विशेषोनदृश्योरासीत्सागरस्यांबरस्यच॥१६॥अन्यो
न्यैराहताःसक्ताःसस्वनुभ्रमनिस्वनाः॥ऊर्मयःसिंधुराजस्यमहाभेर्यइवांबरे॥१७॥रत्नौघजलसंनादंविपक्तमिववायुना॥क
स्यतंतमिवक्रुद्धंयादोगणसमाकुलं॥१८॥ददृशुस्तेमहात्मानोवाताहतजलाशयं॥अनिलोद्धूतमाकाशेप्रलपंतमिवोर्मिभिः
१९॥ततोविस्मयमापन्नाहरयोददृशुस्थिताः॥भ्रांतोर्मिभिर्लसन्नादंप्रलोलमिवसागरं॥२०॥इत्यार्षेश्रीरामायणेवाल्मीकी
येयुद्धकांडेचतुर्थःसर्गः॥४॥सातुनीलेनविधिवत्स्वारक्षासुसमाहिता॥सागरस्योत्तरेतीरेसाधुसाविनिवेशिताः॥१॥मैंद

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

श्च हि विदश्चो भौ तत्र वानरपुंगवौ ॥ विचेरतुश्च तां सेनां रक्षार्थं सर्वतो दिशं ॥ ३ ॥ निविष्टायां तु सेनायां तीरे नदनदीपतेः ॥ पा
र्श्वस्थं लक्ष्मणं दृष्ट्वा रामो वचनमब्रवीत् ॥ ४ ॥ शोकश्च किल कालेन गच्छता त्यपगच्छति ॥ मम चापश्यतः कांतामदस्मद्दहति वर्द्ध
ते ॥ ४ ॥ न मे दुःखं प्रिया दूरे न मे दुःखं हृते ति च ॥ एतदेवानुशोचामि वयोस्यात्यतिवर्तते ॥ ५ ॥ वाहि वात यतो कांता तां स्पृष्ट्वा माम
पि स्पृश ॥ त्वयि मे गात्रसंस्पर्शश्चंद्रे दृष्टिसमागमः ॥ ६ ॥ तन्मे दहति गात्राणि विषं पीतमिवाशये ॥ हा नाथेति प्रिया सा मां ह्रियमा
णा यदब्रवीत् ॥ ७ ॥ तद्वियोगेंधनवता तच्चिंताविमलार्चिषा ॥ रात्रिंदिवं शरीरं मे दह्यते मदनाग्निना ॥ ८ ॥ अवगाह्यार्णवं सौम्य
सौमित्रे भवता विना ॥ एवं च मज्जलं कामो न मां सुतं जलेदहेत् ॥ ९ ॥ वह्नेस्तु कामयानस्य शक्यमेतेन जीवितुं ॥ यदहं साचवामेरू
रेकां धरणिमाश्रितौ ॥ ४५ ॥ केदारस्येव केदारः सोदकस्य निरुदकः ॥ उपस्नेहेन जीवामि जीवंती यच्छृणोमि तां ॥ ११ ॥ कदानुख
लु सुश्रोणी शतपत्रायतेक्षणा ॥ विजित्य शत्रून् द्रक्ष्यामि सीतां स्फीतामिव श्रियं ॥ १२ ॥ कदा सुचारुदंतौष्ठं तस्याः पद्ममिवाननं
समुन्नाम्य प्रपास्यामि रसायनमिवातुरः ॥ १३ ॥ तौ तस्याः सहितौ पीनौ स्तनौ तालफलोपमौ ॥ कदानुखलु सोत्कंपौ हंस्यामो भजि
ष्यतः ॥ १४ ॥ सानूनमसि तापांगी रक्षोमध्यगता सती ॥ मन्नाथा नाथहीनेव त्रातारं नाधिगच्छति ॥ १५ ॥ कथं जनकराजस्य दुहि
ता मम च प्रिया ॥ राक्षसीमध्यगा शेते स्नुषा दशरथस्य च ॥ १६ ॥ अविक्षोभ्याणि रक्षांसि सविधूयोत्पतिष्यति ॥ विधूय जलदावली

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

लाङ्गूलशिलेरवाशरत्सिव॥१४॥स्वभावतनुकानूनंशोकेनानशनेनच॥भूयस्तनुतरासीतादेशकालविपर्ययात्॥१५॥कदानु
राक्षसेंद्रस्यनिधायोरसिसायकान्॥शोकंप्रत्याहरिष्यामिशोकमुत्सृज्यमानसं॥१६॥कदानुखलुमेसाध्वीसीतासुरसुतोपमा
सोत्कंठाकंठमालंब्यमोक्षत्यानंदजंजलं॥१७॥कदाशोकमिमंघोरंमैथिलीविप्रयोगजं॥सहसाविप्रमोक्ष्यामिवासःशुक्लेत
रंयथा॥१८॥एवंविलपतस्तस्यतत्रारामस्यधीमतः॥दिनक्षयान्मंदरवपुःभास्करोस्तमुपागतः॥१९॥आश्वासितोलक्ष्मणेनरामः
संध्यामुपासतः॥स्मरन्कमलपत्राक्षींसीतांशोकाकुलीकृतः॥२०॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेपंचमःसर्गः॥५
लंकायांतुकृतंकर्मघोरंदृष्ट्वाभयावहं॥राक्षसेंद्रोहनुमताशक्रेणेवमहात्मना॥अब्रवीद्राक्षसान्सर्वान्क्रियांकिंचिदवा
ङ्मुखः॥१॥धर्षिताचप्रविष्टाचलंकादुष्प्रसहापुरी॥तेनवानरमात्रेणदृष्टासीताचजानकी॥२॥घातासोधर्षितश्चैत्यःप्रवराराक्ष
ससाहताः॥आविलाचपुरीलंकासर्वाहनुमताकृता॥३॥किंकरिष्यामिभद्रंवःकिंवोयुक्तमनंतरं॥ब्रूयतोनःसमर्थंयत्कृतंचसु
कृतंभवेत्॥४॥मंत्रमूलंचविजयंप्रवदंतिमनस्विनः॥तस्माद्वोरोचयेमंत्रंरामंप्रतिमहाबलाः॥५॥त्रिविधाःपुरुषालोकेउ
त्तमाधममध्यमाः॥तेषांतुसमवेतानांगुणदोषौवदाम्यहं॥६॥मंत्रस्त्रिभिर्हिसंयुक्तःसमर्थैर्मंत्रनिर्णये॥मित्रैर्वापिसमाना
र्थैर्वाबांधवैरपिवाधिकैः॥७॥सहितोमंत्रयित्वायःकर्मारंभान्प्रवर्तयेत्॥दैवेचकुरुतेयत्नंतमाहुःपुरुषोत्तमं॥८॥एकोर्थंविम

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

शेदेकोधर्मेप्रकुरुतेमनः॥एकःकार्याणिकुरुतेतमाहुर्मध्यमंनरं॥९॥गुणदोषौननिश्चित्यत्यक्त्वादैवव्यपाश्रयं॥करिष्या
मीतियःकार्यमुपेक्षेत्सनराधमः॥१०॥यथेमेपुरुषानित्यमुत्तमाधममध्यमाः॥एवंमंत्रोपिविज्ञेयउत्तमाधममध्यमः॥११॥
ऐकमत्यमुपागम्यशास्त्रदृष्टेनचक्षुषा॥मंत्रिणोयत्रनिरतास्तमाहुर्मंत्रमुत्तमं॥१२॥बह्वीरपिमतीर्गत्वामंत्रिणामर्थनिर्ण
यः॥पुनर्यत्रैकतांप्राप्तःसमंत्रोमध्यमःस्मृतः॥१३॥अन्योन्यमतिमास्थाययत्रसंप्रतिभाष्यते॥नचैकमत्येश्रेयोस्तिमंत्र
सोधमउच्यते॥१४॥तस्मात्सुमंत्रितंसाधुभवंतोमतिमुत्तमाः॥कार्यंसंप्रतिपद्यंतांएतत्कृत्यंमतंमम॥१५॥वानराणांहिधी
राणांसहस्रैःपरिवारितः॥रामोभ्येतिपुरींलंकामस्माकमुपरोधकः॥१६॥नरिष्यतिचसुभ्रूरंराघवःसागरःसुखं॥तरसायु
क्तरूपेणसानुजःसबलानुगः॥१७॥समुद्रमुच्छोषयतिवीर्येणान्यत्करोतिवा॥तस्मिन्नेवंविधेकार्येविरुद्धेवानरैःसह॥हितंपु
रचसैन्येचसर्वंमंत्रतांमम॥१८॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेषष्ठःसर्गः॥इत्युक्तारक्षसेंद्रेणराक्षसास्तेमहाबल
ाः॥ऊचुःप्रांजलयःसर्वेरावणंराक्षसेश्वरं॥१॥द्विषत्यक्षमविज्ञायनीतिवाक्यास्त्वबुद्धयः॥राजन्परिघशक्त्यृष्टिशूलपट्टि
शकुंतलं॥२॥सुमहन्नोबलंकस्माद्विषादंभजतेभवान्॥त्वयाभोगवतींगत्वानिर्जिताःपन्नगायुधि॥३॥कैलासशिखराचाप
यक्षैर्बहुभिरावृतः सुमहत्कदनंकृत्वावरयक्षेधनदःकृतः॥४॥समहेश्वरसख्येनश्लाघमानस्त्वयाविभो॥निर्जितःसमरेरोषा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

स्त्रोकपालोमहाबलः॥१५॥विनिपात्यचपक्षौघान्विक्षोभ्यविनिगृह्यच॥त्वयाकैलासशिखराद्विमानमिदमाहृतं॥घ्नमयेनदानवें
द्रेणत्वद्भयात्सख्यमिच्छता॥दुहितातवभार्यार्थेदत्तारक्षसपुंगव॥१७॥दानवेंद्रोमहाबाहोवीर्योत्सिक्तोदुरासदः॥विगृह्यवशमा
नीतःकुंभीनस्याःसुखावहः॥१८॥निर्जितास्तेमहाबाहोनागगन्धर्वरक्षसातलं॥वासुकिस्तक्षकःशंखोजटीचवशमाहृताः॥१९॥अ
क्षयाबलवंतश्चशूरालब्धवराःपुनः॥त्वयासंवत्सरंयुध्वासमरेदानवाविभो॥२०॥स्वबलंसमुपाश्रित्यसीतावशमरिंदम॥मा२
याश्चाधिगतास्तत्रवह्नेर्वैराक्षसाधिप॥२१॥शूराश्चबलवंतश्चवरुणस्यसुतारणे॥निर्जितास्तेमहाभागचतुर्विधबलानुगाः
२२॥मृत्युदंडमहाग्राहंशाल्मलीद्रुममंडितं॥कालपाशमहावीचिंयमकिंकरपन्नगं॥२३॥महाज्वरेणदुर्धर्षंयमलोकमहार्ण
वं॥अवगाह्यत्वयाराजन्यमस्यबलसागरः॥जयश्चविपुलःप्राप्तोमृत्युश्चप्रतिषेधितः॥सुयुद्धेनचतेसर्वेलोकास्तत्रसुतोषि
ताः॥२५॥क्षत्रियैर्बहुभिर्वीरैःशक्रतुल्यपराक्रमैः॥आसीद्वसुमतीपूर्णामहद्भिरिवपादपैः॥२६॥तेषांवीर्यगुणोत्साहैर्नसमोरा
घवोरणे॥प्रसह्यतेत्वयाराजन्हताःसमरदुर्जयाः॥२७॥तिरश्चांकिंमहाराजश्रमेणतवदानवान्॥अयमेकोमहाराजइंद्रजि
त्संपक्षिष्यति॥२८॥अनेनचमहाराजमाहेश्वरमनुत्तमं॥इष्टायज्ञंवरोलब्धोलोकेपरमदुर्लभः॥२९॥शक्तितोमरमीनंचवि
निकीर्णंत्रशैवलं॥गजकच्छपसंबाधमश्वमंडूकसंकुलं॥३०॥रुद्रा[illegible]दित्यमहाग्राहंमरुद्वस्तुमहोरगं॥रथाश्वगजतोयौघंप

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

दातिपुलिनंमहत्॥२१॥अनेनहिसमासाद्यदेवानांबलसागरं॥गृहीतोदेवतपतिर्लंकांवापिप्रवेशितः॥२२॥पितामहानि-
योगाच्चमुक्तःशंबरवृत्रहा॥गतस्त्रिविष्टपंराजन्सर्वदेवनमस्कृतः॥२३॥तमेवत्वंमहाराजविसृजेंद्रजितंसुतं॥यावद्वानर
सेनांतांसरामंनयतिक्षयं॥२४॥राजन्नापदयुक्तेयमागतास्मृताज्ञानात्॥हृदिनैवत्वयाकार्यात्वंवधिष्यसिराघवं॥२५॥इ
त्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेसप्तमःसर्गः॥७॥ततोनीलांबुदप्रख्यप्रहस्तोनामराक्षसः॥अब्रवीत्प्रांजलिर्वाक्यं
शूरःसेनापतिस्तदा॥देवदानवगंधर्वाःपिशाचपतगोरगाः॥सर्वेधर्षयितुंशक्याःकिंपुनर्मानवौरणे॥१॥सर्वेप्रमत्ताविश्वस्ता
वंचितास्महनूमता॥नहिमेजीवतोगच्छेज्जीवन्सवनगोचराः॥२॥सर्वोसागरपर्यंतांसशैलवनकाननां॥करोम्यवानरांभूमि
माज्ञापयितुमांभवान्॥३॥रक्षांचैवविधास्यामिवानराद्रजनीचरा॥नागमिष्यतितेदुःखंकिंचिदात्मापराधजं॥४॥अब्रवीत
मसंक्रुद्धोदुर्मुखोनामराक्षसः॥इदंनक्षमणीयंहिसर्वेषांनःप्रधर्षणं॥५॥अयंपरिभवोभूयःपुरस्यांतःपुरस्यच॥श्रीमतो-
राक्षसेंद्रस्यवानरेंद्रप्रधर्षणं॥६॥अस्मिन्मुहूर्त्तेगत्वैकोनिवर्त्तिष्यामिवानरान्॥प्रविष्टान्सागरंभीममंबरंवारसातलं॥७॥त
तोब्रवीत्सुसंक्रुद्धोवज्रदंष्ट्रोमहाबलः॥प्रगृह्यपरिघंघोरंमांसशोणितदूषितं॥८॥किन्नोहनुमताकार्यंकृपणेनतपस्विना
रामेतिष्ठतिदुर्द्धर्षेसुग्रीवेपिसलक्ष्मणे॥९॥अद्यरामंससुग्रीवंपरिघेणसलक्ष्मणं॥आगमिष्यामिहत्वैकोविक्षोभ्यहरिवा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

हिनी॥२१॥इदं ममापरं वाक्यं शृणुराजन्यदिच्छसि॥उपायकुशलोह्येवजयेच्छत्रूनतंद्रितः॥२२॥कामरूपधराः शूराः सुभीमाभीम
दर्शनाः॥राक्षसानांसहस्राणिराक्षसाधिपनिश्चिताः॥२३॥काकुत्स्थमुपसंगम्यविवृत्तंमानुषंवपुः॥सर्वेह्यसंभ्रमाभूत्वाब्रुवं
तुरघुसत्तमं॥२४॥प्रेषिताभरतेनैवभ्रात्रातवयवीयसा॥सहिसेनासमुत्थाप्यक्षिप्रमेवोपयास्यति॥२५॥ततोवयमितस्तूर्णंशू
लशक्तिगदाधराः॥चापबाणासिहस्ताश्चत्वरितास्तत्रयामहे॥२६॥आकाशेगणशःस्थित्वाहत्वातांहरिवाहिनीं॥अस्मशस्त्रम
हावृष्ट्याप्रापयामयमक्षयं॥२७॥एवंचेदुपसर्पेतामनयंरामलक्ष्मणौ॥अवश्यमपनीतेनजहतामेवजीवितं॥२८॥कौंभकर्णि
स्ततोवीरोनिकुंभोनामवीर्यवान्॥अब्रवीत्परमक्रुद्धोरावणंलोकरावणं॥२९॥सर्वेभवंतस्तिष्ठंतुमहाराजेनसंगताः॥अहमे
कोहनिष्यामिराघवंसहलक्ष्मणं॥३०॥सुग्रीवंसहहनूमंतंसर्वांश्चैवात्रवानरान्॥ततोवज्रहनोनामराक्षसःपर्वतोपमः॥३१
क्रुद्धःपरिलिहन्वक्त्रंजिह्वयावाक्यमब्रवीत्॥स्वैरंकुर्वंतुकार्याणिभवंतोविगतज्वराः॥३२॥एकोहंभक्षयिष्यामितांसेनांह
रिवाहिनीं॥ततोमहोदरःक्रुद्धोरावणंवाक्यमब्रवीत्॥३३॥संस्थाःक्रीडंतुनिश्चिंताःपिबंतुमधुवारुणीं॥अहमेकोहनिष्या
मिसुग्रीवंसहलक्ष्मणं॥३४॥सांगदंचहनूमंतंरामंचरणकुंजरं॥३५॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेअष्टमसर्गः॥८॥
ततोनिकुंभोरभसःसूर्यशत्रुर्महाबलः॥सुप्तघ्नोयज्ञकोपश्चमहापार्श्वमहोदरौ॥१॥अग्निकेतुश्चदुर्धर्षोरश्मिकेतुश्चराक्ष

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

सः॥इंद्रजिच्चमहातेजाबलवान्रावणात्मजः॥२॥प्रहस्तोथविरूपाक्षोवज्रदंष्ट्रोमहाबलः॥धूम्राक्षोथनिकुंभश्चदुर्मुख
श्चैवराक्षसः॥३॥परिघान्पट्टिशान्शूलान्प्रासान्शक्तिपरश्वधान्॥चापानिचसुबाणानिखड्गांश्चविपुलांशुभान्॥४॥प्रगृ
ह्यपरमक्रुद्धाःसमुत्पचराक्षसाः॥अब्रुवन्रावणंसर्वेप्रहीप्राद्रवतेजसा॥५॥अद्यरामंवधिष्यामःसुग्रीवंचसलक्ष्मणं॥कृ
पणंचहनुमंतंलंकायेनप्रधर्षिता॥६॥तान्गृहीतायुधान्सर्वान्वारयित्वाविभीषणः॥अब्रवीत्प्रांजलिर्वाक्यंपुनःप्रत्युप
वेशयतान्॥अपुपायैस्त्रिभिस्तातयोर्थःप्राप्तुंनशक्यते॥तस्यविक्रमकालास्तान्युक्तानादुर्मनीषिणः॥८॥प्रमत्तेष्वभियुक्ते
षुदैवेनप्रहृतेषुच॥विक्रमास्तेतुसिध्यंतिपरिक्ष्यविधिनाऽकृताः॥९॥अप्रमत्तंकथंतंतुविजिगीषुंबलेस्थितं॥जितरोषंदुरा
धर्षंप्रधर्षयितुमिच्छथः॥१०॥समुद्रंलंघयित्वातुघोरंनदनदीपतिं॥गतिंहनूमतोलोकेकोविद्यात्तर्कयेतवा॥११॥बलान्यपरि
मेयानिसवीर्याणिनिशाचराः॥परेषांसहसाऽवज्ञानकर्तव्याकथंचन॥१२॥किंचराक्षसराजस्यरामेणापकृतंपुरा॥आजहा
रजनस्थानात्तस्यभार्यांयशस्विनः॥१३॥खरोयद्यतिहृतस्तुरामेणनिहतोरणे॥अवश्यंप्राणिनांप्राणारक्षितव्यायथाबलं
१४॥अयशस्यमनायुष्यंपरदाराभिमर्शनं॥अर्थक्षयकरंघोरंपापस्यचपुनर्भवं॥१५॥एतन्निमित्तंवैदेह्याभयंनःसुमहद्भवे
त्॥आहृतासापुरात्याज्याकलहार्थेकृतेनकिं॥१६॥ननःक्षमंवीर्यवतातेनधर्मानुवर्तिना॥वैरंनिरर्थकंकर्तुंदीयतामस्यमै

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

थिली॥१५॥यावन्नसगजांसाश्वांबहुरत्नसमाकुलां॥पुरीदारयतेबाणैर्दश्यतामस्यमैथिली॥१६॥यावत्सुघोरामहतीदुर्धर्षाह
रिवाहिनी॥नावस्कंदतिनोलंकांदीयतामस्यमैथिली॥१७॥विनश्येद्धिपुरीलंकाशूराःसर्वेचराक्षसाः॥रामस्यदयितापत्नीस्वयंय
दिनदीयते॥१८॥प्रसादयेत्वांवंधुत्वाकुरुष्ववचनंमम॥हितंतथ्यमहंब्रूमिदीयतामस्यमैथिली॥१९॥पुराशरान्सूर्यमरीचिसं
निभान्नवाग्रपुंखान्सुदृढान्नृपात्मजः॥सृजत्यमोघान्निशितान्चधायतेप्रदीयतांदाशरथायमैथिली॥२०॥त्यजस्वकोपंकुल
वंशनाशनंभजस्वधर्मंरतिकीर्तिवर्धनं॥प्रसीदजीवेमसपुत्रबांधवाःप्रदीयतांदाशरथायमैथिली॥२१॥विभीषणवच
श्रुत्वारावणोराक्षसेश्वरः॥विसर्जयित्वातान्सर्वान्प्रविवेशगृहंस्वकं॥२२॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेन
वमःसर्गः॥९॥ततःप्रत्युषसिप्राप्तेप्राप्तधर्मार्थनिश्चयः॥राक्षसाधिपतेर्वेश्मभीमकर्मविभीषणः॥१॥शैलाग्रचयसंकाशं
शैलशृंगमिवोन्नतं॥सुविभक्तंमहाकक्ष्यंमहाजनपरिग्रहं॥२॥मतिमद्भिर्महामात्रैरनुरक्तैरधिष्ठितं॥राक्षसैश्चाप्रपर्या
प्तैःसर्वतःपरिरक्षितं॥३॥मत्तमातंगनिश्वासैर्व्याकुलीकृतमारुतं॥शंखघोषमहाघोषंतूर्यसन्नादनादितं॥४॥प्रमदाजनसं
बाधंप्रजल्पितमहापथं॥तप्तकांचननिर्यूहंभूषणोत्तमभूषितं॥५॥गंधर्वाणामिवावासमालयंमरुतामिव॥रत्नसंचयसं
[redacted]संबाधंभवनंभोगिनामिव॥६॥तंमहाभ्रमिवादित्यस्तेजोविस्तृतरश्मिवान्॥प्रभञ्जन्सालयंवीरःप्रविवेशमहाद्युतिः॥७॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

पुण्यान्पुण्याहघोषांश्चवेदविद्भिरुदाहृतान्॥ शुश्रावसुमहातेजाभ्रातुर्विजयसंश्रितान्॥ ९॥ पूजितान्तिलपात्रैश्चस
र्पिभिःसुमनोक्षतैः॥ मंत्रवेदविदोविप्रान्ददर्शसमहाबलः॥ १०॥ सपूज्यमानोरक्षोभिर्दिव्यमानःतेजसा॥ आसनस्थंमहाबा
हुर्ववंदेधनदानुजं॥ ११॥ सराजदृष्टिसंपन्नमासनंहेमभूषितं॥ जगामसमुदाचारंप्रयुज्याचारकोविदः॥ १२॥ सरावणंमहात्मा
नंविजनेमंत्रिसन्निधौ॥ उवाचहितमत्यर्थंवचनंहेतुनिश्चितं॥ १३॥ त्वमद्यभ्रातरंज्येष्ठंसांत्वेनोपस्थितक्रमः॥ देशकालार्थ
संवादिदृष्टलोकपरावरः॥ १४॥ यदाप्रभृतिवैदेहीसंप्राप्तेहपरंतप॥ तदाप्रभृतिदृश्यंतेनिमित्तान्यशुभानिनः॥ १५॥ सस्फुलिं
गासधूमार्चिःसधूमकलुषोदयः॥ मंत्रसंध्युक्षितोप्यग्निर्नसम्यगभिवर्धते॥ अग्निष्वेघशिवाश्चालाषुतथाब्रह्मस्थलीषुच॥ १६
सरीसृपाश्चदृश्यंतेहव्येषुचपिपीलिकाः॥ गवांपयांसिरक्तानिविमदावरकुंजराः॥ १७॥ दीनमश्वाप्रहेषंतेनचग्रामाभिनंदि
नः॥ खरोष्ट्राश्वतराराजन्भिन्नरोमाःस्रवंतिच॥ १८॥ नस्वभावेनतिष्ठंतिविधानैरपिचिंतिताः॥ वायसासंघशःक्रूराःप्राहरं
तिसमंततः॥ १९॥ समवेताश्चदृश्यंतेविमानाग्रेषुसंघशः॥ गृध्राश्चैवप्रलीयंतेपुरीमुपरिपिंडिताः॥ २०॥ उपपन्नाश्चसंधेद्वेया
हरंत्यशिवंशिवाः॥ कव्यादानांमृगाणांचपुरद्वारेषुसर्वशः॥ २१॥ श्रूयंतेविपुलाघोषाःसविस्फूर्जथुनिस्वनाः॥ तदेवंप्रस्फुते
कार्येप्रायश्चित्तमिदंक्षमं॥ २२॥ रोचतेयदिवैदेहीराघवायप्रदीयते॥ इदंचयदिवामोहाल्लोभाद्वाप्याहृतंमया॥ २३॥ तत्रापिच

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

महाराजनदोषंकर्तुमर्हसि॥अयंहिदोषःसर्वस्यजनस्यास्योपलक्षये॥२४॥रक्षसांराक्षसीनांचपुरस्यांतःपुरस्यच॥श्रा
वणेचास्यमंत्रस्यनिहताःसर्वमंत्रिणः॥२५॥अवश्यंचमयावाच्यंयद्दृष्टमथवाश्रुतं॥संप्रधार्यंयथान्यायंतद्भवान्कर्तुमर्ह
ति॥२६॥इतिस्वमंत्रिणांमध्येभ्रातास्वभ्रातरमूचिवान्॥रावणंरक्षसांश्रेष्ठंपथ्यमेतद्विभीषणः॥२७॥हितंमुहूर्तमृदुहेतुसंहि
तंव्यतीतकालायतिसंप्रतिक्षमं॥निशम्यतद्वाक्यमुपस्थितज्वरःप्रसंगवानुत्तरमेतदब्रवीत्॥२८॥यथाहंनपश्यामिकु
तश्चिदप्यहंनराघवःप्राप्स्यतिजातुमैथिलीं॥सुरैःसहेंद्रैरपिसंगतःकथंममाग्रतःस्थास्यतिलक्ष्मणाग्रजः॥२९॥इत्येवमु
क्त्वाऽसुरसैन्यनाशनोमहाबलःसंयतिचंडविक्रमः॥दशाननोभ्रातरमाप्तवादिनंविसर्जयामासगृहाद्विभीषणं॥३०॥इ
त्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेदशमःसर्गः॥१०॥सबभूवततोराजामैथिलीकाममोहितः॥असम्मानाच्चसुहृदांप
पःपापेनकर्मणा॥१॥अतीवकामसंपन्नोवैदेहीमनुचिंतयन्॥अतीतकालसमयेतस्मिन्नहनिरावणः॥२॥अमात्यैश्चसुहृद्भि
श्चमंत्रकालममन्यत॥सहेमजालविततंमणिविद्रुमभूषितं॥३॥उपगम्यविनीताश्वमारुरोहमहारथं॥तमास्थायरथश्रेष्ठं
महामेघसमस्वनं॥४॥प्रययौरक्षसांश्रेष्ठोदशग्रीवसभांप्रति॥असिचर्मधरायोधाःसर्वायुधधरास्ततः॥५॥राक्षसाराक्षसें
द्रस्यपुरस्तात्संप्रतस्थिरे॥नानातिकृतवेषाश्चनानाभूषणभूषिताः॥६॥पार्श्वतःपृष्ठतश्चैनंपरिवार्ययुस्तदा॥रथैश्चातिरथा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

शीघ्रमनैश्चवरवारणैः ॥ ७ ॥ अनूत्पेतुर्हयग्रीवमाक्रीडद्भिश्च वाजिभिः ॥ गदापरिघहस्ताश्च शक्तितोमरपाणयः ॥ ८ ॥ परस्वध
धराश्चान्येतथान्येशूलपाणयः ॥ ततस्तूर्यसहस्राणां संजज्ञे निस्वनोमहान् ॥ ९ ॥ तुमुलः शंखशब्दैश्च सभांगच्छतिरावणे ॥ स
नेमिघोषेणमहान्सहसाभिनिनादयन् ॥ १० ॥ राजमार्गंश्रियाजुष्टं प्रतिपेदेमहारथः ॥ विमलं चातपत्राणं प्रगृहीतमशोभत ॥
११ ॥ पांडुरंराक्षसेंद्रस्य पूर्णस्ताराधिपोयथा ॥ हेममंजरिगर्भेच शुद्धस्फटिकविग्रहे ॥ १२ ॥ चामरव्यजनेतस्यरेजतुः सव्यदक्षि
णे ॥ तेकृतांजलयः सर्वेरथस्थंपृथिवीस्थिताः ॥ १३ ॥ राक्षसाराक्षसश्रेष्ठंशिरोभिस्तंववंदिरे ॥ राक्षसैस्तूयमानः सन्जयाशीर्भि
ररिंदमः ॥ १४ ॥ आससादमहातेजाः सभांविरचितांशुभां ॥ सुवर्णरजताकीर्णेविशुद्धस्फटिकांतरां ॥ १५ ॥ विराजमानंवपुषारुक्ष
मपद्मोत्तरच्छदां ॥ तांपिशाचशतैः षड्भिरभिगुप्तांसभांतदा ॥ १६ ॥ प्रविवेशमहातेजाः सुकृतांविश्वकर्मणा ॥ तस्यांसवैडूर्यमयं
प्रियकाजिनसंवृतं ॥ १७ ॥ महत्सोपाश्रयंभेजेरावणः परमासनं ॥ ततः शशासैश्वरवद्दूतांश्चलघुविक्रमान् ॥ १८ ॥ समानेयतमेहि
तंइहैतान्राक्षसानिति ॥ कृत्यमस्तिमहज्ज्ञातंसामर्थ्यमितिनोमहत् ॥ १९ ॥ राक्षसास्तद्वचः श्रुत्वालंकायांपरिचक्रमुः ॥ अनुगे
हमवस्थायविहारशयनेषुच ॥ २० ॥ उद्यानेषुचरक्षांसिचोदयंतोत्वभीतवत् ॥ तेरथान्रुचिरानेकेदृष्टानेकेदृथग्द्वयान् ॥ २१ ॥
नागानेकेरुरुहुर्जग्मुश्चैकेपदातयः ॥ सापुरीपरमाकीर्णारथकुंजरवाजिभिः ॥ २२ ॥ संपतद्भिर्विरुरुचेगरुत्मद्भिरिवांबरं ॥ ते

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वाहनान्यवस्थाप्ययानानिविविधानिच॥२३॥सभांपद्भिःप्रविविशुःसिंहागिरिगुहामिव॥राज्ञःपादौगृहीत्वातुराज्ञानेप्रतिपू
जिताः॥२४॥पीठेचान्येवसीचान्येभूमौकेचिदुपाविशन्॥तेसमेत्यसभायांवैराक्षसाराजशासनात्॥२५॥यथार्हमुपतस्थुस्तेरावणंरा
क्षसाधिपं॥मंत्रिणश्चयथामुख्यानिश्चयार्थेतुपंडिताः॥२६॥अमात्याश्चगुणोपेताःसर्वज्ञाबुद्धिदर्शनाः॥समेयुस्तत्रशतशः
शूराश्चबहवस्तथा॥२७॥सभायांहेमवर्णायांसर्वार्थस्यसुखायच॥रम्यायांराक्षसेंद्रस्यसमीयुस्तत्रसंघशः॥२८॥ततोमहात्मा
विपुलंसुयुग्यंवराईजांबुनदचित्रितांगं॥रथंसमास्थाययौयशस्वीविभीषणःसंसदमग्रजस्य॥२९॥सपूर्वजायावरजः
शशंसनामाथपश्चाच्चरणौववंदे॥शुकंग्रहस्तौचतथैवतेभ्योददौयथार्हंपृथगासनानि॥३०॥सुवर्णनानामणिभूषणानां
सुवाससांसंसदिराक्षसानां॥तेषांपरार्ध्यागुरुचंदनानांस्रजांचगंधाःप्रववुःसमंतात्॥३१॥नचुक्रुधुर्नानृतमाहकश्चित्स
भासदोनापिजजल्पुरुच्चैः॥संसिद्धार्थाःसर्वएवोग्रवीर्याभर्तुःसर्वेदृदृशुश्चाननंते॥३२॥सरावणःशस्त्रभृतांमनस्विनांम
हाबलानांसमितौमनस्वी॥तस्यांसभायांप्रभयाचकाशेमध्येवसूनामिववज्रहस्तः॥३३॥इत्यार्षेश्रीरामायणेवाल्मीकी
येयुद्धकांडेएकादशःसर्गः॥११॥सतांपरिषदंकृत्स्नांसमीक्ष्यसमितिंजयः॥प्रचोदयामासतदाग्रहस्तंवाहिनीपतिं॥१॥सेना
पतेयथातेस्युःकृतविद्याश्चतुर्विधाः॥योधानगररक्षायांतथाप्यादेष्टुमर्हसि॥२॥सग्रहस्तःप्रणीतात्माचिकीर्षेराजशासनं॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

द्विनिक्षिप्यबलंसर्वंबहिरंतश्चमंदिरे॥३॥ततोविनिक्षिप्यबलंपृथङ्गरगुप्तये॥प्रहस्तप्रमुखेराज्ञोविषसादजगादच॥४॥
विहितंबहिरंतश्चबलंबलवतस्तव॥कुरुद्वाविमनाःकार्यंयदभिप्रेतमस्तिते॥५॥प्रहस्तस्यवचःश्रुत्वाराजाराज्यहितैषि-
णः॥सुखेसुःसुहृदांमध्येप्राजहारसरावणः॥६॥प्रियाप्रियेसुखेदुःखेलाभालाभौहिताहितौ॥धर्मकामार्थकृच्छ्रेषुयूपमर्हथ
वेदितुं॥७॥सर्वकृत्यानियुक्ताभिःसमारब्धानिसर्वदा॥मंत्रकर्मनियुक्ताभिनजातुविफलानिमे॥८॥ससोमग्रहनक्षत्रैमरु
द्भिरिववासवः॥भवद्भिरहमत्यर्थंहृतःश्रियमवाप्नुयां॥९॥अहंतुखलुसर्वेभ्यःसमर्थयितुमुद्यतः॥कुंभकर्णस्यतुस्वप्नानेम
मर्थमचोदयं॥१०॥अयंहिसुप्तःषण्मासान्कुंभकर्णोमहाबलः॥सर्वशस्त्रभृतांमुख्यःसइदानीमुपस्थितः॥११॥इयंचदंडका
रण्याद्रामस्यमहिषीप्रिया॥रक्षोभिश्चरितोद्देशादानीताजनकात्मजा॥१२॥समेनशय्यामारोढुमिच्छत्यलसगामिनी॥त्रिषुलो
केषुचान्यामेनसीतासदृशीतथा॥१३॥ननुमध्याएषुश्रोणीशारदेंदुनिभानना॥हेमबिंबनिभासौम्यामायेवमयनिर्मिता
१४॥सुलोहितातलौश्लक्ष्णौचरणौसुप्रतिष्ठितौ॥दृष्ट्वाताम्रनखौतस्यादीप्यतेमेशरीरजः॥१५॥हुताग्निरर्चिःसंकाशामेनौ
रीमिवप्रभां॥उन्नसंवदनंबल्गुविमलंचारुलोचनं॥१६॥पश्यंस्तदवशस्तस्यकामस्यवशमेयिवान्॥क्रोधहर्षसमानेनदुर्व
र्णकरणेनच॥१७॥शोकसंतापनित्येनकामेनकलुषीकृतः॥सातुसंवत्सरंकालंमामयाचतभामिनी॥१८॥प्रतीक्षमाणाभर्ता

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

रंराममायतलोचना॥तन्मयाचारुनेत्रायाःप्रतिज्ञातंवचःशुभं॥१९॥श्रोतोहंसततंकामाद्यातोहयइवाध्वनि॥कथंसागरम
क्षोभ्यंतरिष्यतिवनौकसः॥२०॥बहुसत्वसमाकीर्णंतौवादशरथात्मजौ॥अथवाकपिनैकेनकृतंनःकदनंमहत्॥२१॥दुर्ज्ञेया
कार्यगतयोद्यूतयस्यथामति॥मानुषान्नोभयंनास्तितथापितुविमृश्यतां॥२२॥तदादेवासुरैर्युद्धेयुष्माभिःसहितोजयं ते
मेभवंतश्चतथासुग्रीवप्रमुखान्हरीन्॥२३॥परेपारेसमुद्रस्यपुरस्कृत्यनृपात्मजौ॥सीतायाःपदवीवीरौसंप्राप्तौवरुणाल
यं॥२४॥अदेयाचप्रियथासीतावध्यौदशरथात्मजौ॥भवद्भिर्मंत्र्यतांमंत्रःसुनीतंचाभिधीयतां॥२५॥नहिशक्तिंप्रपश्यामिज
गत्यन्यस्यकस्यचित्॥सागरंवानरैस्तीर्त्वानिश्चयेनजयोमम॥२६॥तस्यकामपरीतस्यनिशम्यपरिदेवितं॥कुंभकर्णःप्रचुक्रो
धवचनंचेदमब्रवीत्॥२७॥यदातुरामस्यसुलक्ष्मणप्रसत्यसीतारवलुसाइहाहृता॥सकृत्समीक्ष्यैवसुनिश्चितंतदाभजे
तचिंतयमुनेवयामुनं॥२८॥सर्वमेतन्महाराजकृतमप्रतिमंतव॥विधीयेतसहास्माभिरादावेवास्यकर्मणः॥२९॥न्यायेन
राजकार्याणियःकरोतिदशानन॥नससंतप्यतेतस्मान्निश्चितार्थमतिर्नृपः॥३०॥अनुपायेनकर्माणिविपरीतानियानि
च॥क्रियमाणानिदूष्यंतिहवींष्यग्नयइवाध्वरे॥३१॥यःपश्चात्पूर्वकार्याणिकर्माण्यभिचिकीर्षति॥पूर्वंचापरकार्याणिनसवे
दनयानयौ॥३२॥चपलस्यतुकृत्येषुप्रसमीक्ष्याधिकंबलं॥क्षिप्रमन्येप्रपद्यंतेक्रौंचस्यरवमिवद्विजाः॥३३॥त्वयेदंमहदारब्धंका

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

र्यमप्रतिचिंतितं॥ दिष्ट्यात्वांनावधीद्रामोविषमिश्रमिवामिषं॥३४॥तस्मात्वर्यसमारब्धंकर्मत्यप्रतिमंपरैः॥अहंसमीकरिष्या
मिहत्वाशत्रूंस्तवानघ॥३५॥अहमुत्पाटयिष्यामिशत्रूंस्तवविशांपते॥यदिशक्रविवस्वंतौयदिपावकमारुतौ॥३६॥तावहं
योधयिष्यामिकुबेरवरुणावपि॥गिरिमात्रशरीरस्यशितशूलधरस्यच॥३७॥नर्दंतस्तीक्ष्णदंष्ट्रस्यविभीयाद्वैपुरंदरः॥पुनर्मो
सद्वितीयेनशरेणनिहनिष्यति॥३८॥ततोहंतस्यपास्यामिरुधिरंकाममाश्वसं॥वधेनवैदाशरथेःसुखावहंजयंतवाहतुं
महंयतिष्ये॥हत्वाचरामंसहलक्ष्मणेनखादामिसर्वान्हरियूथमुख्यान॥३९॥रमस्वकामंपिबचाग्रवारुणीकुरुष्वकार्यो
णिहितानिविज्वरः॥मयातुरामेगमितेयमक्षयंचिरायसीतावशगाभविष्यति॥४०॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकां
डेद्वादशःसर्गः॥१२॥रावणंक्रुद्धमायंतंमहापार्श्वोमहाबलः॥मुहूर्तमनुसंचिंत्यप्राञ्जलिर्वाक्यमब्रवीत्॥१॥यःखल्वपिवनेप्रा
प्यमृगव्यालनिषेवितं॥नपिबेन्मधुसंप्राप्यसनरोबालिशोभवेत्॥२॥ईश्वरस्येश्वरःकोस्तितवशत्रुनिबर्हणं॥रमस्वसहवै
देह्यशत्रूनाक्रम्यमूर्धसु॥३॥बलान्कुकूटवृत्तेनवर्तस्वसुमहाबल॥आक्रम्याक्रम्यसीतांवैत्वंभुंक्ष्वचरमस्वच॥४॥लब्धका
मस्यतेपश्चादागमिष्यतिकिंभयं॥प्राप्तमप्राप्तकालंवासर्वंप्रतिसहीष्यसि॥५॥कुंभकर्णसहास्मारिंइंद्रजिच्चमहाबलः॥प्रति
षेधयितुंशक्तोसवज्रमपिवज्रिणं॥६॥उपप्रदानेसांत्वंवाभेदंवाकुशलैःकृतं॥समतिक्रम्यदंडेनसिद्धिमर्थेषुरोचय॥७॥इ

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

हयाप्राप्त्यर्थं सत्वं छत्रुस्तवमहाबल॥ वशे शस्त्रप्रपातेन करिष्यामो न संशयः॥ ५॥ एवमुक्तस्तदा राजा महापार्श्वेण रावणः॥ त
स्य संपूजयन्वाक्यमिदं वचनमब्रवीत्॥ ६॥ महापार्श्वाद्यवदतो रहस्यं किंचिदात्मनः॥ चिरवृत्तं तदाख्यास्ये यदवाप्तं पुरा मया
१७॥ पितामहस्य भवनं गच्छंती पुंजिकस्थला॥ चंचूर्यमाणा मद्राक्षमाकाशे ग्निशिखामिव॥ १८॥ सा मत्सत्यमया भुक्ता कृत्वा विव
सनं तत॥ स्वयंभोर्भवनं प्राप्ता लोलितानलिनी यथा॥ १९॥ न च तस्य तदा मन्ये ज्ञातमासीन्महात्मनः॥ अथ संकुपितो देवो मामि
दं वाक्यमब्रवीत्॥ २०॥ अद्य प्रभृति यामन्यां बलान्नारीं गमिष्यसि॥ तदा ते शतधा मूर्धा भविष्यति न संशयः॥ २१॥ इत्यहं तस्य शा
पस्य भीतः प्रसभमेवतां॥ नारोहयेबलात्सीतां वैदेहीं शयने शुभे॥ २२॥ सागरस्येव मे वेगो मारुतस्येव मे गतिः॥ नैतदाशीविषैर्दष्टा
सादयति तेन माम्॥ २३॥ को हि सिंहमिवासीनं सुप्तं गिरिगुहाशये॥ कुद्धं मृत्युमिवासीनं संबोधयितुमिच्छति॥ २४॥ न मतो निर्गता
न्बाणान्द्विजिह्वान्पन्नगानिव॥ रामः पश्यति संग्रामे तेन मामभिगर्जति॥ २५॥ क्षिप्रं वज्रोपमैर्बाणैः शतधा कार्मुकच्युतैः॥
राममादीपयिष्यामि उल्काभिरिव कुंजरं॥ २६॥ न चास्य बलमाहास्ये बलेन महता वृतः उदयन्सविता कालेनक्षत्राणां प्रभामि
व॥ २७॥ न वासवेनापि सहस्रचक्षुषा युधा स्मि शक्यो वरुणेन वा पुनः॥ मया त्वियं बाहुबलेन निर्जिता पुरा पुरी वैश्रवणेन पालि
ता॥ २८॥ इत्यार्षे श्रीरामायणे वाल्मीकीये युद्धकांडे त्रयोदशः सर्गः॥ १३॥ निशाचरेंद्रस्य निशम्य वाक्यं सकुंभकर्णस्य च गर्जितं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

तानि विभीषणोराक्षसराजमुख्यमुवाचवाक्यंहितमर्थयुक्तं॥१॥हृतोहिवाङ्कंतरभोगराशिश्चिंताविषःसुस्मितनीक्ष्णदंष्ट्रः
पंचांगुलिःपंचशिरोतिकायःसीतामहाहिस्तवकेनराजन्॥२॥यावन्नलंकांसमभिद्रवंतिबलीमुखाःपर्वतकूटमात्राः॥दं
ष्ट्रायुधाश्चैवनखायुधाश्चप्रदीयतांदाशरथायमैथिली॥३॥यावन्नगृह्णंतिशिरांसिबाणारामेरितारक्षसपुंगवानां॥
वज्रोपमावायुसमानवेगाःप्रदीयतांदाशरथायमैथिली॥४॥नकुंभकर्णेंद्रजितौचराजन्नतथामहापार्श्वमहोदरौच
निकुंभकुंभौचतथातिकायःस्थातुंसमर्थायुधिराघवस्य॥५॥जीवंस्तुरामस्यनमोक्ष्यसेत्वंगुप्तःसवित्राप्यथवामरुद्भिः
नवासवस्यांकगतोनमृत्योर्नभोनपातालमनुप्रविष्टः॥६॥निशम्यवाक्यंतुविभीषणस्यततःप्रहस्तोवचनंबभाषे॥नोभ
यंविद्यतेदेवतेभ्योनदानवेभ्यस्त्वथवाकदाचित्॥७॥नयक्षगंधर्वमहोरगेभ्योभयंनसंख्येपतगोत्तमेभ्यः॥कथंनुरामा
द्भविताभयंनोनरेंद्रपुत्रात्समरेकदाचित्॥८॥प्रहस्तवाक्यंतुहितंनिशम्यविभीषणोराजहिताभिकांक्षी॥ततोमहार्थं
वचनंबभाषेधर्मार्थकामेषुनिविष्टबुद्धिः॥९॥प्रहस्तराजाचमहोदरश्चत्वंकुंभकर्णश्चयथार्थजातं॥ब्रवीषिरामंप्रतितत्
नशक्यंयथागतिःस्वर्गमधर्मबुद्धेः॥१०॥मधस्तुरामस्यमयात्वयावाप्रहस्तसर्वैरपिराक्षसैर्वा॥कथंभवेदर्थविशारदस्य
महार्णवंतर्तुमिवप्लवस्य॥११॥धर्मप्रधानस्यमहारथस्यइक्ष्वाकुवंशप्रभवस्यराज्ञः॥प्रहस्तदेवाश्चतथाविधस्यकृते

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

पुत्रशक्रस्य भवंति मूढाः ॥१२॥ तीक्ष्णानतावत्नवकंकपत्रा दुरासदा राघवविप्रमुक्ताः ॥ भित्वा शरीरं प्रपतंति बाणाः प्रहस्ततेनै
वविकत्थसे त्वं ॥१३॥ भित्वा नतावत्प्रविशंति कायं प्राणांतिकास्ते शनितुल्यवेगाः ॥ शिताः शरा राघवविप्रमुक्ताः प्रहस्तते
नैवविकत्थसे त्वं ॥१४॥ नरावणो नातिबलस्त्रिशीर्षो नकुंभकर्णस्य सुतो निकुंभः ॥ न चेंद्रजिद्दाशरथिं प्रसोढुं त्वं वारणेश
क्रसमं समर्थः ॥१५॥ देवांतको वापि नरांतको वा तथातिकायो तिरथो महात्मा ॥ अकंपनश्चाद्रिसमानसारः स्थातुं न शक्ता
युधि राघवस्य ॥१६॥ अयं हि राजा व्यसनाभिभूतो मित्रैरमित्रप्रतिमैर्भवद्भिः ॥ अन्वास्यते राक्षसनाशनार्थं तीक्ष्णः प्रकृत्या
त्यसमीक्ष्यकारी ॥१७॥ अनंतभोगेन सहस्रमूर्ध्ना नागेन भीमेन महाबलेन ॥ बलात्परिक्षिप्तमिमं भवंतो राजानमुत्क्षिप्य
विमोचयंतु ॥१८॥ यावद्विकेशग्रहणात्सुहृद्भिः समेत्य सर्वैः परिपूर्णकामैः ॥ निगृह्य राजा परिरक्षितव्यो भूतैर्यथा भीमब
लैर्गृहीतः ॥१९॥ सुवारिणा राघवसागरेण प्रसाद्यमानस्तरसा भवद्भिः ॥ युक्तस्त्वयं तारयितं समेत्य काकुत्स्थ पाताल मुखे
पतन्सः ॥२०॥ इदं पुरस्यास्य सराक्षसस्य राज्ञश्च पथ्यं सुहृज्जनस्य ॥ सम्यग्धि वाक्यं त्वमतं ब्रवीमि नरेंद्रपुत्राय ददाम
मैथिलीं ॥२१॥ परस्य वीर्यं स्वबलं च बुध्वा स्थानं क्षयं चैव तथैव वृद्धिं ॥ तथात्मपक्षेप्यनुमृष्य बुध्या वदेत्समं स्वामिहि
तं च मंत्री ॥२२॥ इत्यार्षे श्रीरामायणे वाल्मीकीये युद्धकांडे चतुर्दशः सर्गः ॥१४॥ बृहस्पतेस्तुल्यमतेर्वचस्तन्निशम्य यत्ते

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नविभीषणस्य॥ततोमहात्मावचनंवभाषेतत्रेंद्रजिन्नैर्ऋतयोधमुख्यः॥१॥किंनामतेतातकनिष्ठवाक्यमनर्थकंचैव
सुभीतवच्च॥अस्मिन्कुलेयोपिभवेन्नजातःसोपीदृशंनैववदेन्नकुर्यात्॥२॥सत्वेनवीर्येणपराक्रमेणधैर्येणशौर्येण
चतेजसाच॥एकःकुलेस्मिन्पुरुषोविमुक्तोविभीषणस्तातकनिष्ठएष॥३॥किन्नामतोराक्षसराजपुत्रावस्माकमे
केनहिराक्षसेन॥सुप्राकृतेनापिनिहंतुमेतौराक्यौकुतोभीषयसेमेभीरो॥४॥त्रिलोकनाथोननुदेवराजःशक्रोभया
भूमितलेनिविष्टः॥भयार्पिताश्चापिदिशःप्रपन्नाःसर्वेतदादेवगणाःसमग्राः॥५॥ऐरावतोविस्वनमुन्नदन्सनिपातितोभूमित
लेमयातु॥विहृष्यदंतौतुमयाप्रसह्यवित्रासितादेवगणाःसमग्राः॥६॥सोहंसुराणामपिदर्पहंताऽदैत्योत्तमानामपिशोकदा
ता॥कथंनरेंद्रात्मजयोर्नशक्तोमनुष्ययोःप्राकृतयोःसुवीर्यः॥७॥अथेंद्रकल्पस्यदुरासदस्यमहौजसस्तद्वचनंनिशम्य त
तोमहार्थंवचनंवभाषेविभीषणःशस्त्रभृतांवरिष्ठः॥८॥नतातमंत्रेतवनिश्चयोस्तिबालस्त्वमद्याप्यविवेकबुद्धिः॥तस्मात्त
यात्यात्मविनाशनायवचोर्थहीनंबहुविप्रलप्तं॥९॥पुत्रप्रवादेनतुरावणस्यत्वमिंद्रजिन्मित्रमुखोसिशत्रुः॥यस्येदृशंरा
घवतोविनाशंनिशम्यमोहादनुमन्यसेत्वं॥१०॥त्वमेववध्यश्चसुदुर्मतिश्चसचापिवध्योयइहानयेत्वां॥बालंदृढंसाहसिकं
चयोद्यप्रावेशयन्मंत्रकृतांसमीपं॥११॥मूढप्रगल्भोऽविनयोपपन्नस्तीक्ष्णप्रतापस्समतिर्दुरात्मा॥मूर्खस्त्वमत्यंतसुदुर्मतिश्च

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

त्वमिंद्रजिद्बालतयाब्रवीषि॥१२॥कोब्रह्मदंडप्रतिमप्रकाशानर्चिष्मतःकालनिकाशरूपान्॥सहेतबाणान्यमदंडकल्पा
नसमीक्ष्यमुक्तान्युधिराघवेण॥१३॥धनानिरत्नानिसभूषणानिवासांसिदिव्यानिमणिविचित्रान्॥सीतांचरामायनिवेद्य
देवींवसेमराजन्निहवीतशोकाः॥१४॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेपंचदशःसर्गः॥१४॥सुनिविष्टमिदंवा
क्यंउक्तवंतंविभीषणं॥अब्रवीत्परुषंवाक्यंरावणःकालचोदितः॥१॥वसेत्सहसपत्नेनक्रुद्धेनाशीविषेणवा॥नतुमित्र
प्रवादेनसंवसेच्छत्रुसेविना॥२॥जानामिशीलंज्ञातीनांसर्वलोकेषुराक्षसाः॥हृष्यंतिव्यसनेषेतेज्ञातीनांज्ञातयःसदा॥३॥
प्रधानंसाधनंवैद्यंधर्मशीलंचराक्षसाः॥ज्ञातयोप्यवमन्यंतेभूशंपरिभवंतिच॥४॥नित्यमन्योन्यसंहृष्टाव्यसनेष्वाततायिनः
प्रच्छन्नहृदयाघोराज्ञातयस्तुभयावहाः॥५॥श्रूयंतेहस्तिभिर्गीताःलोकापद्यवनेक्वचित्॥पाशाहस्तान्नरान्दृष्ट्वाशृणुष्वगद
तोमम॥६॥नाग्निनांन्यानिशस्त्राणिननःपाशाभयावहाः॥घोराःस्वार्थप्रयुक्तास्तुज्ञातयोमेभयावहाः॥७॥उपायमेतेवक्ष्यं
तिग्रहणेनात्रसंशयः॥कृत्वाद्वयाज्ञानिभयंसुकष्टंविदितंचनः॥८॥विद्यतेगोषुसंपन्नंविद्यतेब्राह्मणेदमः॥विद्यतेस्त्रिषु
चापद्यंविद्यतेज्ञातितोभयं॥९॥ततोनेष्टमिदंसौम्यपरहंलोकसत्कृतं॥ऐश्वर्यमभिजातश्चरिपूणांमूर्धनिस्थितः॥१०॥य

थापुष्करपत्रेषुपतितास्तोयबिंदवः॥नश्लेषामुपगच्छंतितथानार्येषुसौहृदं॥११॥यथाशरदिमेघानांसिंचतामपिगर्जतां

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नभवेत्यंबुसंक्लेदस्तथाऽनार्येषुसंगतं॥१२॥यथामधुकरस्तर्षाद्रसंबिंदन्निहंति॥तथात्वमपितत्रैवतथाऽनार्येषुसंगतं॥१३
यथामधुकरस्तर्षात्कांशपुष्पपिबन्नपि॥रसमत्रनविंदेततथाऽनार्येषुसौहृदं॥१४॥यथापूर्वंगजस्तात्वागृह्यहस्तेनवैरजः
दूषयत्यात्मनोदेहंतथानार्येषुसौहृदं॥१५॥योन्यस्त्वेयंविधंब्रूयाद्वाक्यमेतन्निशाचर॥अस्मिन्मुहूर्तेनभवेत्वांतुधिक्कुल
पांसनं॥१६॥इत्युक्तपरुषंवाक्यंन्यायवादीविभीषणः॥उत्पपातगदापाणिश्चतुर्भिःसहराक्षसैः॥१७॥अब्रवीच्चतदावाक्यं
जातक्रोधोविभीषणः॥अंतरिक्षगतःश्रीमान्भ्रातरंराक्षसाधिपं॥१८॥सत्वंभ्रातासिमेराजन्ब्रूहिमांयद्यदिच्छसि॥ज्येष्ठो
मान्यःपितृसमोनचधर्मपथेस्थितः॥१९॥इदंतुपरुषंवाक्यंनक्षमाम्यग्रजस्यते॥सुनीतंहितकामेनवाक्यमुक्तंदशानन॥२०
नगृह्णंत्यकृतात्मानःकालस्यवशमागताः॥सुलभाःपुरुषाराजन्सततंप्रियवादिनः॥२१॥अप्रियस्यचपथ्यस्यवक्ताश्रोताच
दुर्लभः॥वद्धंकालस्यपाशेनसर्वभूतापहारिणा॥२२॥ननश्यंतुमुपेक्षेयंत्वदीप्तंसारणंयथा॥दीप्तपावकसंकाशैःशितैःकांच
नभूषणैः॥२३॥नत्वामिच्छाम्यहंद्रष्टुंरामेणनिहतंशरैः॥शूराश्चबलवंतश्चकृतास्त्राश्चनरारणे॥२४॥कालाभिपन्नाःसीदंति
यथासैकतसेतवः॥नमर्षयतुयच्चोक्तंगुरुत्वाद्धितमिच्छता॥२५॥आत्मानंसर्वथारक्षपुरीचेमांसराक्षसां॥स्वस्तितेस्तुगमिष्या
मिसुखीभवमयाविना॥२६॥निवार्यमाणास्तुमयाहितैषिणानरोचतेतेवचनंनिशाचर॥परीतकालेहिगतायुषोनराहितंनगृ

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

हुंतिसुहृद्भिरीरितं॥२७॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेषोडशःसर्गः॥१६॥इत्युक्तापरुषंवाक्यंरावणंरावणानुजः॥
आजगामसुहूर्तेनयत्ररामसलक्ष्मणः॥१॥तंमेरुशिखराकारंप्रदीप्तमिवतेजसा॥गगनस्थंमहीस्थास्तेददृशुर्वानरर्षभाः॥२॥सहि
मेघाचलप्रख्योवज्रायुधसमप्रभः॥वरायुधधरोवीरोदिव्याभरणभूषितः॥३॥येचाप्यनुचरास्तस्यचत्वारोभीमविक्रमाः॥तेपि
वर्मायुधोपेताभूषणोत्तमभूषिताः॥४॥तमात्मपंचमंदृष्ट्वासुग्रीवोवानराधिपः॥वानरैःसहदुर्धर्षैश्चिंतयामासबुद्धिमान्
॥५॥चिंतयित्वामुहूर्तंतुवानरांस्तानुवाचह॥हनुमत्प्रमुखान्सर्वान्निदंवचनमब्रवीत्॥६॥एषसर्वायुधोपेतश्चतुर्भिःसहरा
क्षसैः॥राक्षसोतिपरश्चध्वंअस्माद्धंतुंनसंशयः॥७॥सुग्रीवस्यवचःश्रुत्वासर्वेतेवानरोत्तमाः॥सालानुद्यम्यशैलांश्चइदंवचनम
ब्रुवन्॥८॥शीघ्रंआदिशनोराजन्वधायैषांदुरात्मनां॥निपतंतुहताश्चैतेधरण्यामल्पतेजसः॥९॥तेषांसंभाषमाणानामन्योन्यं
सविभीषणः॥उत्तरंतीरमासाद्यखस्थएवव्यतिष्ठत॥१०॥उवाचचमहाप्राज्ञःस्वरेणमहतामहान्॥सुग्रीवंतांश्चसंप्रेक्ष्यखस्थ
एवविभीषणः॥११॥रावणोनामदुर्वृत्तोराक्षसोराक्षसेश्वरः॥तस्याहमनुजोभ्राताविभीषणइतिश्रुतः॥१२॥तेनसीताजनस्था
नाद्धृताहत्वाजटायुषं॥रुद्धाचविवशादीनाराक्षसीभिःसुरक्षिता॥१३॥तमहंहेतुभिर्वाक्यैर्विविधैश्चन्यदर्शयं॥साधुनिर्या
त्यतांसीतारामायेतिपुनःपुनः॥१४॥सचनप्रतिजग्राहरावणःकालचोदितः॥उच्यमानंहितंवाक्यंविपरीतइवौषधं॥१५॥साहं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

परुषितस्तेनदासवच्चावमानितः॥त्यक्तापुत्रांश्चदारांश्चराघवंशरणंगतः॥१६॥सर्वलोकशरण्यायराघवायमहात्मने॥
निवेदयतमांक्षिप्रंविभीषणमुपस्थितं॥१७॥एतत्तुवचनंश्रुत्वासुग्रीवोलघुविक्रमः॥लक्ष्मणस्याग्रतोरामंसंरब्धमिदमब्रवी
त्॥१८॥मंत्रेव्यूहेनयेचारेयुक्तोभवितुमर्हसि॥वानराणांचभद्रंतेपरेषांचपरंतप॥१९॥अंतर्धानगतास्त्वेतेराक्षसाःकामरूपि
णः॥शूराश्चनिकृतिज्ञाश्चतेषुजातुनविश्वसे॥२०॥प्रणिधीराक्षसेंद्रस्यरावणस्यभवेदयं॥अनुप्रविश्यसोस्मासुभेदंकुर्या
न्नसंशयः॥२१॥अथवास्वयमेवैषछिद्रमासाद्यवीर्यवान्॥अनुप्रविश्यविश्वस्तःकदाचित्प्रहरेदपि॥२२॥मित्राद्दपिबलंचैव
मौलंभृत्यबलंतथा॥सर्वमेतद्बलंग्राह्यंवर्जयित्वाद्विषद्बलं॥२३॥प्रकृत्याराक्षसोह्येषभ्रातामित्रस्यवैप्रभो॥आगतस्तवरिपो
पक्षात्कथमस्मिंश्चविश्वसे॥२४॥रावणस्यानुजोभ्रातावीभीषणइतिश्रुतः॥चतुर्भिःसहरक्षोभिर्भवंतंशरणंगतः॥२५॥रावणे
नप्रणिहितंतमवैद्धिविभीषणं॥तस्याहंनिग्रहंमन्येक्षमंक्षमवतांवर॥२६॥राक्षसोजिह्मयाबुद्ध्यासंदिशेयमिहागतः॥प्रहर्तु
मायथाछन्नोविश्वस्तेत्वयिवानघ॥२७॥प्रविष्टःशत्रुसैन्यंहिप्राप्तःशत्रुरतर्कितः॥निहन्यादंतरंलब्ध्वाउलूकइववायसान्॥२८
बध्यतामेषतीव्रेणदंडेनसचिवैःसह॥रावणस्यनृशंसस्यभ्रातास्त्वेषविभीषणः॥२९॥एवमुक्त्वातुतंरामंसंरब्धोवाहिनीपतिः॥वा
क्यज्ञोवाक्यकुशलंततोमौनमुपागमत्॥३०॥सुग्रीवस्यतुतद्वाक्यंश्रुत्वारामोमहाबलः॥समीपस्थानुवाचेदंहनुमत्प्रमुखा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

हरीन्॥३१॥यदुक्तंकपिराजेनरावणावरजंप्रति॥वाक्यंहेतुमदर्थ्यंचभवद्भिरपितच्छ्रुतं॥३२॥सुहृदांह्यर्थकृच्छ्रेषुयुक्तंबुद्धिमतासता॥३३॥समर्थेनापिसंदेष्टुंशाश्वतींभूतिमिच्छता॥३४॥इत्येवंपरिपृष्टास्तेस्वस्वंमतमतेहिता॥सोपचारमिदंवाक्यमूचुर्हितचिकीर्षवः॥३५॥अज्ञातंनास्तितेकिंचित्त्रिषुलोकेषुराघव॥आत्मानंपूजयन्रामपृच्छस्यस्मान्सुहृत्तया॥३६॥वंहिसत्यव्रतःशूरोधर्मात्मादृढविक्रमः॥परीक्ष्यकारीस्मृतिमान्निसृष्टात्मासुहृत्सुच॥३७॥तस्मादेकैकशस्तावद्ब्रुवंतुसचिवास्तव॥हेततोमतिसंपन्नाःसमर्थाश्चपुनस्तथा॥इत्युक्तोराघवायाथमतिमानंगदोयतः॥विभीषणपरीक्षार्थमुवाचवचनंहरिः॥३९॥शत्रोःसकाशात्संप्राप्तःसर्वथाशंक्यएवहि॥विश्वासनीयःसहसानकर्तव्योविभीषणः॥३९॥छादयित्वात्मभावंहिचरंतिशठबुद्धयः॥प्रहरंतिचरंध्रेषुसोनर्थसुमहान्भवेत्॥४०॥अर्थानर्थौविनिश्चित्यव्यवसायंभजेदिह॥गुणतःसंग्रहंकुर्याद्दोषतस्तुविसर्जयेत्॥४१॥यदिदोषोमहांस्तस्मिंस्त्यज्यतामविशंकतः॥गुणान्दुर्गुणान्ज्ञात्वासंग्रहःक्रियतांनृप॥४२॥शरभस्त्वथनिश्चित्यसाध्यंवचनमब्रवीत्॥क्षिप्रमस्मिन्नरव्याघ्रचारःप्रतिविधीयतां॥४३॥प्रणिधायहिचारेणयथावत्सूक्ष्मबुद्धिना॥परीक्ष्यचततःकार्य्योयथान्यायंपरिग्रहः॥४४॥जांबवांस्त्वथसंप्रेक्ष्यशास्त्रबुद्ध्याविचक्षणः॥वाक्यंविज्ञापयामासगुणवद्दोषवर्जितं॥४५॥बद्धवैराच्चपापाच्चराक्षसेंद्राद्विभीषणः॥अदेशकालेसंप्राप्तःसर्वथाशंक्यतामयं॥४६॥ततोमैत्रंसंप्रेक्ष्यनयापन

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

यकोविदः॥ वाक्यवचनसंपन्नो बभाषे हेतुमुत्तरं॥४७॥ वचनं नामतस्यैष रावणस्य विभीषणः॥ पृच्छ्यतां मधुरेणायं शनैर्नरवरात्मज॥४८॥ भावमस्य तु विज्ञाय तत्त्वतस्त्वं करिष्यति॥ यदि दुष्टो न दुष्टो वा बुद्धिपूर्वं नरर्षभ॥४९॥ अथ संस्कारसंपन्नो हनुमान्सचिवोत्तमः॥ उवाच वचनं श्लक्ष्णमर्थवन्मधुरं लघु॥५०॥ नमो भवंतमतिश्रेष्ठं समर्थं वदतां वरं॥ अतिशापयितुं शक्तो बृहस्पतिरपि ब्रुवन्॥५१॥ न वा दानापि संघर्षान्नाधिक्यान्न च कामतः॥ वक्ष्यामि वचनं राजन्यथार्थं रामगौरवात्॥५२॥ अर्थानर्थौ निमित्तं हि यदुक्तं सचिवैस्तव॥ तत्र दोषं प्रपश्यामि क्रियानत्युपपद्यते॥५३॥ ऋते नियोगात्सामर्थ्यं अववादं न शक्यते॥ सहसा विनियोगो हि दोषवान्प्रतिभाति मां॥५४॥ चारप्रणिहितं युक्तं यदुक्तं सचिवैस्तव॥ अर्थस्यासंभवात्तत्र कारणं नोपपद्यते॥५५॥ अदेशकाले संप्राप्तं दूत्यं यद्विभीषणः॥ विवक्षा चात्र मे स्तीयं तां निबोध यथामति॥५६॥ सर्वे देशः कालश्च भवंतीह यथातथा॥ पुरुषात्पुरुषं प्राप्य तथा दोषगुणावपि॥५७॥ दोषात्संरावणे दृष्ट्वा विक्रमं च तथा त्वयि॥ युक्तमागमनं तस्य विमृशानस्य बुद्धितः॥५८॥ अज्ञातरूपैः पुरुषैः सराजन्पृच्छ्यतामिति॥ यदुक्तमत्र मे प्रेक्षा काचिदस्ति समीक्षिता॥५९॥ पृच्छ्यमानो विशंकेत सहसा बुद्धिमान्नरः॥ तत्र मित्रं प्रदुष्येत मिथ्या पृष्टं सुखागतं॥६०॥ अशक्यः सहसा राजन्भावो वेत्तुं परस्य वै॥ अंतःस्वभावैगूढैस्तैस्तैर्नैपुण्यपर्यायैः॥६१॥ न त्वस्य ब्रुवतो जातु लक्ष्यते [illegible] दुष्टभावता॥ प्रसन्नं वदनं चापि तस्मान्मे नास्ति संशयः॥६२॥ अशंकितमतिः स्वस्थो

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नश्राठः परिसर्पति॥ नचास्य दुष्टवागस्ति तस्मान्मे नास्ति संशयः॥ ६३॥ आकारश्छाद्यमानोपि न शक्यो विनिगूहितुं॥ बलाद्धि विवृणो
त्येव भावमंतर्गतं नृणां॥ ६४॥ देशकालोपपन्नं च कार्यं कार्यविदां वर॥ स्वफलं कुरुते क्षिप्रं प्रयोगेणापि संहितं॥ ६५॥ उद्योगं तव संप्रे
क्ष्य मिथ्यावृत्तं च रावणं॥ वालिनं च हतं श्रुत्वा सुग्रीवं चाभिषेचितं॥ ६६॥ राज्यं प्रार्थयमानश्च बुद्धिपूर्वमिहागतः॥ एतावत्तु पुरस्कृ
त्य युज्यते तस्य संग्रहः॥ ६७॥ यथाशक्ति मयोक्तं तु राक्षसस्यार्जवं प्रति॥ प्रमाणं त्वं हि सर्वस्य श्रुत्वा बुद्धिमतां वर॥ ६८॥ इत्यार्षे श्रीरा
मायणे वाल्मीकीये युद्धकांडे सप्तदशः सर्गः॥ १७॥ अथ रामः प्रसन्नात्मा श्रुत्वा वायुसुतस्य ह॥ प्रत्यभाषत दुर्धर्षः श्रुत्वा वानात्म
निस्थितं॥ १॥ ममापि तु विवक्षास्ति काचित्प्रतिविभीषणं॥ श्रोतुमिच्छामि तत्सर्वं भवद्भिः श्रेयसि स्थितैः॥ २॥ मित्रभावेन संप्राप्तं
न त्यजेयं कथंचन॥ दोषो यस्यपि तस्यस्यात्सतामेतद्गर्हितं॥ ३॥ सुग्रीवस्त्वथ तद्वाक्यमाभाष्य च विमृश्य च॥ ततः शुभतरं वाक्यमु
वाच हरिपुंगवः॥ ४॥ सुदुष्टो वाप्यदुष्टो वा किमेष रजनीचरः॥ ईदृशं व्यसनं प्राप्तं भ्रातरं यः परित्यजेत्॥ ५॥ कोनामसभवेत्तस्य यमे
षन परित्यजेत्॥ वानराधिपतेर्वाक्यं श्रुत्वा सर्वानुदीक्ष्य च॥ ६॥ ईषदुत्स्मयमानस्तु लक्ष्मणं शुभलक्षणं॥ इति होवाच काकुत्स्थो
वाक्यं सत्यपराक्रमः॥ ७॥ अनधीत्य च शास्त्राणि वृद्धाननुपसेव्य च॥ नशक्यमीदृशं वक्तुं यदुवाच हरीश्वर॥ ८॥ अस्ति सूक्ष्मतरं
किंचिद्यदत्र प्रतिभाति मां॥ प्रत्यक्षं लौकिकं वापि विद्यते सर्वराजसु॥ ९॥ अमित्रास्त्वत्कुलीनाश्च प्रातिदेश्याः प्रकीर्तिताः॥ व्यसने

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

पुत्रहर्त्तारस्तस्मादयमिहागत॥१०॥अपापास्तत्कुलीनाश्चमानयंतिस्वकान्हितान्॥एषआयोनरेंद्राणांशंकनीयस्तुशोभनः
१०॥यस्तुदोषस्त्वयाप्रोक्तोत्याहानेरिबलस्यच॥तत्रतेकीर्तयिष्यामियथाशास्त्रमिदंशृणु॥१०॥नवयंतत्कुलीनाश्चराज्यकं
क्षीचराक्षसः॥पंडिताहिभवंत्यंतितस्माद्भ्रात्योविभीषणः॥१३॥अन्यग्राम्यप्रदुष्टाश्चनभविष्यंतिसंगताः॥त्राणादश्चमहानेषत
तोस्यभयमागतं॥१४॥इतिभेदंगमिष्यंतितस्माद्भ्रात्योविभीषणः॥नसर्वेभ्रातरस्तातभवंतिभरतोपमाः॥१५॥सद्विधावापितुःपु
त्राःसुहृदोवाभवद्विधाः॥एवमुक्तस्तुरामेणसुग्रीवःसहलक्ष्मणः॥१६॥उत्थायेदंमहाप्राज्ञःप्रणतोवाक्यमब्रवीत्॥रावणेनप्रणि
हितंतमवैहिनिशाचरं॥१७॥तस्माहंनिग्रहंमन्येक्षमंक्षमवतांवर॥राक्षसोजिह्मयाबुद्ध्यासंदिष्टोयमिहागतः॥१८॥प्रहर्तुंत्वयि
विश्वस्तेप्रच्छन्नोमयिवानघ॥लक्ष्मणेवामहाबाहोसवध्यःसचिवैःसह॥१९॥रावणस्यनृशंसस्यभ्रातात्वेषविभीषणः॥एवमुक्ता
हरिश्रेष्ठःसुग्रीवोवाहिनीपतिः॥२०॥वाक्यज्ञोवाक्यकुशलस्ततोमौनमुपागमत्॥सुग्रीवस्यसतद्वाक्यंरामःश्रुत्वाविमृश्यच
२१॥ततःशुभतरंवाक्यमुवाचहरिपुंगवं॥सुदुष्टोवाप्यदुष्टोवाकिमेषरजनीचरः॥२२॥सूक्ष्ममप्यहितंकर्तुंममशक्तःकथंचन॥
पिशाचान्दानवान्यक्षान्पृथिव्यांयेचराक्षसाः॥२३॥अंगुल्यग्रेणतान्हन्मिछन्हरिगणेश्वर॥श्रूयतेहिकपोतेनशत्रुःशरणा
मागतः॥२४॥अर्चितश्चयथान्यायंस्वैःश्चमांसैर्निमंत्रितः॥सहितंप्रतिजग्राहभार्याहर्त्तारमागतं॥२५॥कपोतोवानरश्रेष्ठकिंपुन

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

मेद्विधोजन॥ऋषेःकण्वस्यपुत्रेणकंडुनापरमर्षिणा॥२६॥शृणुगाथांपुरागीतांधर्मिष्ठांसत्यवादिनीं॥बद्धांजलिपुटंदीनंयाचं
तंशरणागतं॥२७॥नहन्यादानृशंस्यार्थमपिशत्रुंपरंतप॥आर्तोवायदिवादृप्तःपरेषांशरणागतः॥२८॥अरिःप्राणान्परित्यज्यर
क्षितव्यःकृतात्मना॥सचेद्भयाद्वामोहाद्वाकामाद्वापिनरक्षति॥२९॥त्वयाशक्त्यायथासत्वंतत्पापंलोकगर्हितं॥विनष्टापश्य
तस्तस्यरक्षिणःशरणागतः॥३०॥आरायसुकृतंतस्यसर्वंगच्छेदरक्षितः॥एवंदोषोमहानत्रप्रपन्नामेनोरक्षणे॥३१॥अस्वर्ग्यंचा
यशस्यंचबलवीर्यविनाशनं॥करिष्यामियथार्थंतुकंडोर्वचनमुत्तमं॥३२॥धर्मिष्ठंचयशस्यंचस्वर्गस्यात्फलोदयं॥अभयं
सर्वभूतेभ्योददाम्येतद्व्रतंमम॥३३॥सकृदेवप्रपन्नायतवास्मीतिचयाचते॥आनयैनंहरिश्रेष्ठदत्तमस्याभयंमया॥३४॥विभी
षणोवासुग्रीवयदिवारावणःस्वयं॥राघवस्यवचःश्रुत्वासुग्रीवःप्लवगेश्वरः॥३५॥प्रत्यभाषतकाकुत्स्थंसौहार्देनाभिचोदि
तः॥किमत्रचित्रंधर्मिष्ठलोकनाथसुखावह॥३६॥यत्वमार्यंप्रभाषेथाःसत्वान्सत्यधियस्थितः॥ममचाप्येतदात्मायंशुद्धंवे
त्तिविभीषणं॥३७॥अनुमानाच्चभावाच्चसर्वतःसुपरीक्षितः॥तस्मात्क्षिप्रंसहास्माभिस्तुल्योभवतुराघव॥३८॥विभीषणोमहा
प्राज्ञःसखित्वंचाभ्युपैतुनः॥ततस्तुसुग्रीववचोनिशम्यतद्धरीश्वरेणाभिहितंनरेश्वरः॥विभीषणोनानुजगामसंगमंपतत्रिरा
जेनयथापुरंदरः॥४०॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेअष्टादशःसर्गः॥१८॥राघवेणाभयेदत्तेसन्नतोरावणानुजः

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

विभीषणो महाप्राज्ञो भूमिं समवलोकयन्॥४॥ततस्तपातवनिर्हृष्टो भक्तैरनुचरैः सह॥समभ्यगमस्य धर्मात्मानिपपातविभीषणः
॥५॥पादयोः शरणान्वेषी चतुर्भिः सह राक्षसैः॥अब्रवीच्च तदा वाक्यं रामं प्रतिविभीषणः॥६॥धर्मयुक्तं च युक्तं च सांप्रतं संप्रहर्षणं
अनुजो रावणस्याहं तेन चास्मि वमानितः॥७॥भवंतं सर्वभूतानां शरण्यं शरणं गतः॥परित्यक्ता मया लंका मित्राणि च धनानि च॥
८॥भवद्गतं च राज्यं च जीवितं च सुखानि च॥तस्य तद्वचनं श्रुत्वा रामो वचनमब्रवीत्॥९॥वचसा सांत्वयित्वैनं लोचनाभ्यां पिबन्नि
व॥आख्याहि मम तत्त्वेन राक्षसानां बलाबलं॥१०॥एवमुक्तस्तदा रक्षो रामेणाक्लिष्टकर्मणा॥रावणस्य बलं सर्वमाख्यातुमुपचक्र
मे॥११॥अवध्यः सर्वभूतानां देवगंधर्वराक्षसां॥राजपुत्र दशग्रीवो वरदानात्स्वयंभुवः॥१२॥रावणो वरजो भ्राता मम ज्येष्ठश्च वीर्य
वान्॥कुंभकर्णो महातेजाः शक्रप्रतिबलो युधि॥१३॥रामसेनापतिस्तस्य प्रहस्तो यदि वा श्रुतः॥कैलासे येन संग्रामे माणिभद्रः प
राजितः॥१४॥वज्रगोलागुलित्राणो त्र्यवध्यकवचो युधि॥धनुरादाय यस्तिष्ठन्नदृश्यो भवतीन्द्रजित्॥१५॥संग्रामे सुमहद्व्यूहे तर्पयि
त्वाहुताशनं॥अंतर्धानगतः शत्रूनिंद्रजिद्धंति राघव॥१६॥महोदरमहापार्श्वौ राक्षसश्चाप्यकंपनः॥अनीकस्यास्य तस्येते लो
कपालसमा युधि॥१७॥दशकोटिसहस्राणां रक्षसां कामरूपिणां॥मांसशोणितभक्ष्याणां लंकापुरनिवासिनां॥१८॥एतैस्तु सहितो राजा लोकपालनयोधयत्॥सहदेवैस्तु तैर्भग्ना रावणेन दुरात्मना॥१९॥विभीषणस्य तु वचस्तच्छ्रुत्वा रघुसत्तमः॥अब्रवीत्तम

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नसासर्वैमिदंवचनमब्रवीत्॥१७॥यानिकर्माणिदानानिरावणस्यविभीषणः॥आख्यातानिचतत्सर्वंनस्यवगच्छामितान्यहं॥१८॥अहंहत्वा
दशग्रीवंसप्रहस्तंसहात्मजं॥राजानंत्वांकरिष्यामिसत्यमेतद्ब्रवीमिते॥१९॥रसातलंवाप्रविशेत्पातालंवापिरावणः॥पितामहस
काशंवानमेजीवन्विमोक्ष्यते॥२०॥अहत्वारावणंसंख्येसपुत्रजनबांधवं॥अयोध्यांनप्रवेक्ष्यामित्रिभिस्तैभ्रातृभिःसपे॥२१॥
श्रुत्वातुवचनंतस्यरामस्याक्लिष्टकर्मणः॥शिरसावंद्यधर्मात्मावक्तुमेवोपचक्रमे॥२२॥राक्षसानांवधेसाह्यंलंकायाश्चप्रधर्ष
णे करिष्यामियथाप्राणंप्रवेक्ष्यामिचवाहिनीं॥२३॥इतिब्रुवाणंरामस्तुपरिष्वज्यविभीषणं॥अब्रवीत्लक्ष्मणंप्रीतःसमुद्राज्जल
मानय॥२४॥तेनचेमंमहाप्राज्ञमभिषिंचविभीषणं॥राजानंराक्षसानांहिप्रेषसन्नेमयिमानद॥२५॥एवमुक्तस्तुसौमित्रिरभिषिचद्वि
भीषणं॥मध्येवानरमुख्यानांराजानंरामशासनात्॥२६॥तत्रसारंतुरामस्यदृष्ट्वासद्यःप्लवंगमाः॥प्रचुक्रुशुर्महात्मानंसाधुसाधि
तिचाब्रुवन्॥२७॥अब्रवीच्चहनूमांश्चसुग्रीवश्चविभीषणं॥कथंसागरमक्षोभ्यंतरामवरुणालयं॥२८॥सैन्यैःपरिवृताःसर्वेवानरा
णांमहौजसां॥उपायैरधिगच्छामोयथानदनदीपतिं॥२९॥रावणस्तुरसासर्वंससैन्यावरुणालयं॥एवमुक्तस्तुधर्मात्माप्रत्युवाच
विभीषणः॥३०॥समुद्रंराघवोराजाशरणंगंतुमर्हसि॥रवानितःसगरेणायंअप्रमेयोमहोदधिः॥३१॥कर्तुमर्हतिरामस्यज्ञातेका
र्यमहामतिः॥एवंविभीषणोनोक्तंराक्षसेनविपश्चिता॥३२॥आजगामाथसुग्रीवोयत्ररामःसलक्ष्मणः॥ततश्चारब्धमारेभेविभी

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

षणवचःशुभं॥३३॥सुग्रीवोविपुलग्रीवःसागरस्योपवेशने॥प्रकृत्याधर्मशीलस्यराघवस्याप्यरोचत॥३४॥सलक्ष्मणंमहातेजाः
सुग्रीवंचहरीश्वरं॥सत्क्रियार्थंक्रियादक्षःस्मितपूर्वमभाषत॥३५॥विभीषणस्यमंत्रोयंममलक्ष्मणरोचते॥ब्रूहित्वंसहसुग्रीव
स्तवापियदिरोचते॥३६॥सुग्रीवःपंडितोनित्यंभवान्मंत्रविचक्षणः॥उभाभ्यांसंप्रधार्यार्थंरोचतेयत्तदुच्यतां॥३७॥एवमुक्तस्ततोवी
रावुभौसुग्रीवलक्ष्मणौ॥समुदाचारसंयुक्तमिदंवचनमूचतुः॥३८॥किमर्थंनौनरव्याघ्रनरोचिष्यतिराघव॥विभीषणेनयूक्तम
स्मिन्कालेसुखावहं॥३९॥अवध्यासागरेसेतुंघोरेस्मिन्वरुणालये॥लंकानासादितुंशक्यासेंद्रैरपिसुरासुरैः॥४०॥विभीषणस्यशू
रस्ययथार्थंक्रियतांवचः॥अलंकालात्ययंकृत्वासमुद्रोयंनियुज्यतां॥४१॥यथासैन्येनगच्छामःपुरींरावणपालितां॥एवमुक्तकु
शास्तीर्णेतीरेनदनदीपतेः॥४२॥संविवेशतदारामोवेद्यामिवहुताशनः॥४३॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेएको
नविंशःसर्गः॥१९॥ततोनिविष्टांध्वजिनींसुग्रीवेणाभिपालितां॥ददर्शराक्षसोभ्येत्यशार्दूलोनामवीर्यवान्॥१॥चारोराक्षसराज
स्यरावणस्यदुरात्मनः॥तंदृष्ट्वासर्वतोव्यग्रंप्रतिगम्यसराक्षसः॥२॥आविश्यलंकांवेगेनराज्ञानमिदमब्रवीत्॥एषावानररक्षो
घोलंकांसमभिवर्तते॥३॥अगाधश्चाप्रमेयश्चद्वितीयइवसागरः॥पुत्रौदशरथस्येमौभ्रातरौरामलक्ष्मणौ॥उत्तमायुधसंपन्नौ
सीतायापदमागतौ॥एतौसागरमासाद्यसन्निविष्टौमहाद्युती॥४॥बलंचाकाशमावृत्यसर्वतोदशयोजनं॥तत्वमेतन्महाराजसि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

प्रवेदितुमर्हसि॥६॥तवदूतामहाराजक्षिप्रंवेदितुमर्हति॥उपप्रदानंसांत्वंवाभेदोवात्रप्रयुज्यतां॥७॥शार्दूलस्यवचःश्रुत्वारावणो
राक्षसेश्वरः॥उवाचसहसाव्यग्रःसंप्रधार्यार्थमात्मनः॥८॥शुकंनामतदारक्षोवाक्यमर्थविदांवरं॥सुग्रीवंब्रूहिगत्वाशुराज्ञानेव
चनान्मम॥९॥यथासंदेशमक्लीबंश्लक्ष्णयापरयागिरा॥१०॥त्वंवैमहाराजकुलप्रसूतोमहाबलश्चर्क्षरजःसुतश्च॥नकश्चनार्थ
स्तवनास्त्यनर्थस्तथापिमेभ्रातृसमोहरीश॥११॥अहंयद्यहरेर्भार्यांराजपुत्रस्यधीमतः॥किंतत्रतवसुग्रीवकिष्किंधांप्रतिगम्य
तां॥१२॥नहीयंहरिभिर्लंकाप्राप्तुंशक्याकथंचन॥देवैरपिसगंधर्वैःकिंपुनर्नरवानरैः॥१३॥सतथाराक्षसेंद्रेणसंदिष्टोरजनीच
रः॥शुकोविहंगमोभूत्वातूर्णमाप्लुत्यचांबरं॥१४॥सगत्वादूरमध्वानमपर्युपरिसागरं॥संस्थितोत्यंबरेवाक्यंसुग्रीवमिदम
ब्रवीत्॥१५॥सर्वमुक्तंयथादिष्टंरावणेनदुरात्मना॥तत्रापर्यंतंवचनंतूर्णमाप्लुत्यवानराः॥१६॥प्रारभंतततदाक्षिप्तंलोष्टमुष्टिं
मुष्टिभिः॥सतैःप्लवंगैःप्रसभंनिगृहीतोनिशाचरः॥१७॥गगनात्भूतलेचाशुप्रतिगृह्यावतारितः॥वानरैःपीड्यमानस्तुशुको
वचनमब्रवीत्॥१८॥नदूतांघ्नंतिकाकुत्स्थवार्यंतांसाधुवानराः॥यस्तुहित्वामतंभर्तुःस्वमतंप्रतिभाषते॥१९॥अनुक्तवादीदूतः
सन्सदूतोवधमर्हति॥शुकस्यवचनंरामःश्रुत्वासपरिदेवितं॥२०॥उवाचमावधिष्टेतिशाखामृगगणांस्ततः॥सचपक्षलघूर्भूत्वा
हरिभिर्दर्शितेभये॥२१॥अंतरिक्षेस्थितोभूत्वाशुकोवचनमब्रवीत्॥सुग्रीवसत्वसंपन्नमहाबलपराक्रम॥२२॥किंमयाखलुवक्त

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

योरावणोलोकरावणः॥२३॥सएवमुक्तःप्लवगाधिपस्तदाप्लवंगमानामृषभोमहाबलः॥उवाचवाक्यंरजनीचरस्यचारंशुकंदी
नमदीनसत्त्वः॥२४॥नमेस्तिमित्रंनतथानुकंप्योनचोपकर्तासिनमेप्रियोसि॥अरिश्चरामस्यसहानुबंधःसमोसिवालीववधा
र्हवध्यः॥२५॥निहन्म्यहंत्वांससुतंसबंधुंसज्ञातिवर्गंरजनीचरेश लंकांचसर्वांमहताबलेनक्षिप्रंकरिष्यामिसमेत्यभस्म॥२६॥न
मोक्ष्यसेरावणराघवस्यसर्वैःसहैर्दैरपिमूढगुप्तः॥अंतर्हितःसूर्यपथंगतोपितथैवपातालमनुप्रविष्टः॥२७॥तस्यतेत्रिषुलोकेषु
नपिशाचंनराक्षसं॥त्रातारंनानुपश्यामिनगंधर्वंनचासुरं॥२८॥अवधीस्त्वंजराद्वृद्धंगृध्रराजंजटायुषं॥किंनुतेरामसांनिध्येस
कालेलक्ष्मणस्यच॥२९॥हृतासीताविशालाक्षीयांत्वंगृह्यनबुध्यसे॥महाबलंमहात्मानंदुराधर्षंसुरैरपि॥३०॥नबुध्यसेरघुश्रेष्ठं
यस्तेप्राणान्हरिष्यति॥ततोब्रवीद्वालिसुतोत्त्वंगदोहरिसत्तमः॥३१॥नायंदूतोमहाप्राज्ञचारिकःप्रतिभातिमे॥तुलितंहिबलं
सर्वंअनेनतवतिष्ठता॥३२॥गृह्यतांमागमल्लंकामेतद्धिममरोचते॥ततोराज्ञासमादिष्टाःसमुत्पत्यबलीमुखाः॥३३॥जगृहु
श्चबबंधुस्तंविलपंतमनाथवत्॥शुकस्तुवानरैश्चंडैस्तत्रतैःसंप्रपीडितः॥३४॥याचुक्रोशमहात्मानंरामंदशरथात्मजं॥लुप्य
तेमेबलात्पक्षौभिद्येतेमेतथाक्षिणी॥३५॥मांचरात्रिंमरिष्यामिजायेरात्रिंचयाम्यहं॥एतस्मिन्नंतरेकालेयन्मयात्वाशुभंकृतं
३६॥सर्वंतदुपपद्येथाजल्पंचेद्यदिजीवितं॥नाघातयत्तदारामःश्रुत्वातत्परिदेवितं॥३७॥वानरानब्रवीद्रामोमुच्यतांदूतआग

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

तः॥३०॥इत्यार्षे श्रीरामायणे वाल्मीकीये युद्धकांडे विंशः सर्गः॥२०॥ततः सागरवेलायां दर्भानास्तीर्य राघवः॥अंजलिं प्राङ्मुखः कृत्वा प्र
तिशिश्ये महोदधेः॥१॥बाहुं भुजंगभोगाभमुपधायारिसूदनः॥जातरूपमयैश्चैव भूषणैर्भूषितं पुरा॥२॥मणिकांचनकेयूरमुक्ता
प्रवरभूषणैः॥भुजैः परमनारीणामभिमृष्टमनेकधा॥३॥चंदनागरुभिश्चैव पुरस्तादधिवासितं॥बालसूर्यप्रकाशैश्च चंदनैरुप
शोभितं॥४॥शयने चोत्तमांगेन सीतायाः शोभितं पुरा॥तक्षकस्येव संभोगं गंगाजलनिषेवितं॥५॥संयुगे युगसंकाशं शत्रूणां शो
कवर्धनं॥सुहृदां नंदनं दीर्घं सागरांतव्यपाश्रयं॥६॥अस्य ताच पुनः सव्यं ज्याघातविहतत्वचं॥दक्षिणं दक्षिणं बाहुं महापरिघ
सन्निभं॥७॥गोसहस्रप्रदातारं उपधाय भुजोत्तमं॥अद्य मे मरणं वापि तरणं [illegible] सागरस्य वा॥८॥इति रामो मतिं कृत्वा महाबाहु
र्महोदधिं॥अधिशिश्ये च विधिवत्प्रयतो नियतो मुनिः॥९॥तस्य रामस्य सुप्तस्य कुशास्तीर्णे महीतले॥नियमादप्रमत्तस्य निशा सप्त
स्रोतिचक्रमुः॥१०॥सत्रिरात्रे षितस्तत्र नयज्ञो धर्मवत्सलः॥उपासत तदा रामः सागरं सरितां पतिं॥११॥न च दर्शयते रूपं तदा रामस्य
सागरः॥प्रपते नाथिरामेण यथार्हमपि पूजितः॥१२॥समुद्रस्य ततः क्रुद्धो रामो रक्तांतलोचनः॥समीपस्थ [illegible] मुवाचेदं लक्ष्मणं पुण्य
लक्षणं॥१३॥अवलेपः समुद्रस्य न दर्शयति यस्त्वयं॥प्रशमश्चक्षमा चैव आर्जवं प्रियवादिता॥१४॥असामर्थ्यफलात्येते निगुणे
षु सतां गुणाः॥आत्मा प्रशंसिनं दुष्टं धृष्टं विपरिधावकं॥१५॥सर्वत्रोत्सृष्टदंडं च लोकः सत्कुरुते नरं॥न सामा शक्यते कीर्त्तिर्न सामा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

शक्यतेयशः॥१६॥ग्राम्यंलक्ष्मणलोकेस्मिन्जयोवारणमूर्धनि॥अद्यमद्बाणनिर्भिन्नैर्मकरैर्मकरालयं॥१७॥निरुद्धतोयंसौमित्रे
प्लवङ्गैःपश्यसर्वतः॥भोगिनांपश्यभोगानिमयाभिन्नानिलक्ष्मण॥१८॥महाभोगानिमत्स्यानांनागानांचकरानिह॥सशंखशुक्ति
काजालंसमीनमकरंशरैः॥१९॥अद्ययुद्धेनमहतासमुद्रंपरिशोषये॥क्षयाहिसमायुक्तंमामयंमकरालयः॥२०॥असमर्थंवि
जानातिधिक्क्षमामीदृशेजने॥नदर्शयतिसाम्नामेसागरोरूपमात्मनः॥२१॥चापमानयसौमित्रेशराञ्छ्रीविषोपमान्॥समुद्रं
शोषयिष्यामिपद्भ्यांयातुप्लवंगमाः॥२२॥अद्याक्षोभ्यमपिक्रुद्धःक्षोभयिष्यामिसागरं॥वेलामुक्तमर्यादंसहस्रोर्मिसमाकुलं॥२३
निर्मर्यादंकरिष्यामिसायकैर्वरुणालयं॥महार्णवंक्षोभयिष्येमहादानवसंकुलं॥२४॥एवमुक्त्वाधनुष्पाणिःक्रोधविस्फारितेक्ष
णः॥बभूवरामोदुर्धर्षोयुगांताग्निरिवज्वलन्॥२५॥संपीड्यचधनुर्घोरंकंपयित्वाशरैर्जगत्॥मुमोचविशिखानुग्रान्वज्रानिवश
तक्रतुः॥२६॥तेज्वलंतोमहावेगास्तेजसासायकोत्तमाः॥प्रविशंतिसमुद्रसमीनमकरोमहान्॥संबभूवमहाघोरःसमारुतरवस्तथा
महोर्मिजालविततःशंखजालसमावृतः॥सधूमपरिवृत्तोर्मिःसहसासीन्महोदधिः॥२९॥व्यथितापन्नगाश्चासन्दीप्तास्याद्री
प्तलोचनाः॥दानवाश्चमहावीर्याःपातालतलवासिनः॥३०॥ऊर्मयःसिंधुराजस्यसनक्रमकरास्तथा॥विंध्यमंदरसंकाशाःसमु
त्पेतुःसमंततः॥३१॥आघूर्णिततरंगौघःसंभ्रांतोरगराक्षसः॥उद्वर्तितमहाग्राहःसघोषोवरुणालयः॥३२॥ततस्तुतंराघवमुग्रवे

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

घुम्रे

गंप्रकर्षमाणंधनुरप्रमेयं॥सौमित्रिरुत्पत्यविनिश्चसंतंमामेतिचोक्त्वाधनुराललंबे॥३३॥एतद्धिनापिक्षुब्धेस्तवान्यत्संपत्स्यतेवी
रतमस्यकार्यं॥भवद्विधाःक्रोधवशंनयांतिदीर्घंभवान्पश्यतुसाधुवृत्तं॥३४॥अंतर्हितैश्चापितथांतरिक्षेब्रह्मर्षिभिश्चैवसुरर्षि
भिश्च॥शरैःकृतःकष्टइतिब्रुवद्भिर्मामेतिचोक्त्वामहतास्वरेण॥३५॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेएकविंशःस
र्गः॥२१॥अथोवाचरघुश्रेष्ठःसागरंदारुणंवचः॥अद्यत्वांशोषयिष्यामिसपातालंमहार्णवं॥१॥शरैर्निर्दग्धसत्त्वस्यपरिशुष्कस्यसा
गर॥मयाशोषितोयस्यपांसुरुत्पत्स्यतेमहान्॥२॥मत्कार्मुकनिसृष्टैश्चरवर्षेणसागर॥पारंतेद्यगमिष्यंतिपक्षिरेवप्लवंगमाः
॥३॥विचिन्वन्नभिजानासिपौरुषंन्नापिविक्रमं॥दानवालयसंतापंमत्तोनावगमिष्यसि॥४॥ब्राह्मणास्त्रेणसंयोज्यब्रह्मदंडनि
भंशरं॥संयोज्यधनुषिश्रेष्ठेविचकर्षमहाबलः॥५॥तस्मिन्विसृष्टेसहसाराघवेणशरासने॥रोदसीसंपफालेवपर्वताश्चचकंपि
रे॥तमश्चलोकमावव्रेदिशश्चनचकाशिरे॥परिचुक्षुभिरेचाम्भुसरांसिसरितस्तदा॥६॥तिर्यक्चसहनक्षत्रैःसंगतौचंद्रभास्क
रौ॥भास्करांशुभिरादित्तंतमसाचसमावृतं॥७॥प्रचकाशेतदाकाशमुल्काशतविदीपितं॥अंतरिक्षाच्चनिर्घोनिर्जग्मुरतुस्वैलेना॥
८॥आस्फुटंश्चपुनर्दिव्यादिविमारुतपंक्तयः॥बभंजचतदावृक्षान्जलदानुहहन्मुहुः॥९॥आरुजंश्चैवशैलाग्राछिखराणिप्र
भंजन॥दिविचस्मुमहावेगाःसंहताःसमहास्वनाः॥१०॥मुमुचुर्वैद्युतानग्निस्तेमहाशनयस्तदा॥पानिभूतानिदृश्यानिचुक्रुशुश्चा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

शनैः समं ॥१२॥ अदृश्यानि च भूतानि मुमुचुर्भैरवस्वनं ॥ शिशिरे चापि भूतानि संत्रस्तान्युद्विजंति च ॥१३॥ संप्रविव्यथिरे चापि न
चपश्यंदिरे भयात् ॥ सहभूतैः सतेर्यौर्मिः सनागः सहराक्षसः ॥१४॥ सहसा भूततोवेगाद्भीमवेगो महोदधिः ॥ योजनंव्यतिचक्रा
मवेलावेलामन्यत्रसंस्रवात् ॥१५॥ तंतथासमतिक्रांतं नातिचक्राम राघवः ॥ समुद्रतमभित्रघोरामीनदनदीपतिं ॥१६॥ ततोम
ध्यात्समुद्रस्य सागरः स्वयमुत्थितः ॥ उदयाद्रिमहावेलान्मेरोरिव दिवाकरः ॥१७॥ पन्नगैः सहदीप्तास्यैः समुद्रः प्रत्यदृश्यतः ॥
स्निग्धवैडूर्यसंकाशो जांबूनदविभूषणः ॥१८॥ रक्तमाल्यांबरधरः पद्मपत्रनिभेक्षणः ॥ सर्वपुष्पमयीं दिव्यां शिरसाधारयत्स्र
जं ॥ जातरूपमयैश्चैव तपनीयविभूषणैः ॥ आत्मजानां च रत्नानां भूषितो भूषणोत्तमैः ॥१९॥ भ्रातृभिर्मंडितः शैलो विविधैर्हि
मवानिव ॥ एकावलीमध्यगतं तरलं पाटलप्रभं ॥२०॥ विपुलेनोरसा बिभ्रत्कौस्तुभस्य सहोदरं ॥ आघूर्णिततरंगौघः कालिका
निलसंकुलः ॥२१॥ उद्वर्तितमहाग्राहः संभ्रांतोरगराक्षसः ॥ देवतानां स्वरूपाभिर्नानारूपाभिरंबुराट् ॥२२॥ गंगासिंधुप्रधानाभि
रापगाभिः समावृतः ॥ सागरः समुपक्रम्य पूर्वमामंत्र्य वीर्यवान् ॥२३॥ अब्रवीत्प्रांजलिर्वाक्यं राघवं शरपाणिनं ॥ पृथिवी वायु
राकाशमापो ज्योतिश्च राघव ॥२४॥ स्वभावे सौम्यतिष्ठंति शाश्वते मार्गमाश्रिताः ॥ तत्स्वभावो ममाप्येष यदगाधोहमप्लवः ॥२५
विकारस्तु भवेद्गाधः एतत्ते प्रवदाम्यहं ॥ नकामान्न च लोभाद्वा न भयात्पार्थिवात्मज ॥२६॥ नाहं नक्राकुलजलः स्तंभयेयं कथं च ॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

न॥विधास्येयेनगंतासिविषहिष्येयहंतथा॥२८॥ग्राहानत्राहरिष्यंतियावत्सेनातरिष्यति॥हरीणांतरणेरामकरिष्यामि
यथास्थलं॥२९॥तमब्रवीतदारामःशृणुमेवरुणालय॥अमोघोयंमहाबाणःकस्मिन्देशेनिपात्यतां॥३०॥रामस्यवचनंश्रुत्वातं
चदृष्ट्वामहाशरं॥महोदधिर्महातेजाराघवंवाक्यमब्रवीत॥३१॥उत्तरेणावकाशोस्तिकश्चित्पुण्यतरोमम॥द्रुमकल्पइति
ख्यातोलोकेख्यातोयथाभवान॥३२॥उग्रदर्शनकर्माणोबहवस्तत्रदस्यवः॥आभीरप्रमुखाःपापापिबंतिसलिलंमम॥
३३॥तैर्नसंस्पर्शनंरामसहेयंपापकर्मभिः॥अमोघक्रियतांरामत्वयातत्रशरोत्तमः॥३४॥तस्यतद्वचनंश्रुत्वासागरस्यसराघ
वः॥मुमोचतंशरंदीप्तंवीरःसागरदर्शनात॥३५॥तेनतन्मरुकांतारंस्थिरांखलुविश्रुतं॥निपपातशरोयत्रवज्राशनिसमप्र
भः॥३६॥ननादचतदातत्रवसुधाशल्यपीडिता॥तस्माद्व्रणमुखात्तायमुत्पपातरसातलात॥३७॥सबभूवतदाकूपोव्रणइत्ये
वविश्रुतः॥सततंचोत्थितंतोयंसमुद्रस्येवदृश्यते॥३८॥अवदारणशृंगाद्यैरुदारुणःसमपद्यत॥तस्माद्बाणपपातेनत्वपःकु
क्षिंबशोषयत॥३९॥विख्यातंत्रिषुलोकेषुमरुकांतारमेवच॥शोषयित्वातुतांकुक्षिंरामोदशरथात्मजः॥४०॥वरंतस्मैददौप
श्चान्मरवेऽमरविक्रमः॥पशवश्चात्मरोगश्चफलमूलरसायुतः॥४१॥बहुस्नेहोबहुक्षीरःसुगंधिविविधौषधिः॥एवमेतैश्चसं
युक्तोबहुभिःसयुतोमरुः॥४२॥रामस्यवरदानाच्चशिवःपंथाबभूवह॥तस्मिन्दग्धेतदाकूपेसमुद्रःसरितांपतिः॥४३॥राघवंस

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

र्वशास्त्रज्ञमिदंवचनमब्रवीत॥अयंसौम्यनलोनामतनयोविश्वकर्मणः॥४४॥पित्रादत्तवरःश्रीमान्प्रीतिमान्विश्वकर्मणा॥
एषसेतुंमहोत्साहंकरोतुमयिवानर॥४५॥नमहंधारयिष्यामियथान्येषुपितातथा॥एवमुक्तोदधिनेष्टःसमुत्थायनलस्तदा
४६॥अब्रवीद्वानरश्रेष्ठोवाक्यंरामंमहाबलं॥अहंसेतुंकरिष्यामिविस्तीर्णंवरुणालये॥पितुःसामर्थ्यमासाद्यतत्त्वमाहमहो
दधिः॥दंडएवपरोलोकेपुरुषस्येतिमेमति॥४८॥धिक्क्षमामकृतज्ञेषुसांत्वदानमथापिवा॥अयंहिसागरोभीमःसेतुकर्मदि
दृक्षया॥४९॥दर्दौदंडभयाद्राधेराघवायमहोदधिः॥स्मारितोस्म्यहमेतेनतत्त्वमाहमहोदधिः॥५०॥ममभ्रातुर्वरोदत्तोमंदरेवि
श्वकर्मणा॥मयातुसदृशःपुत्रस्तवदेविभविष्यति॥५१॥औरसस्तवपुत्रोहंसदृशोविश्वकर्मणा॥नचाप्यहंतुशक्नोमिगुणा
न्वक्तुमिहात्मनः॥५२॥समर्थश्चाप्यहंसेतुंकर्तुंवैवरुणालये॥काममद्यैववध्नंतुसेतुंवानरपुंगवाः॥५३॥ततोविसृष्टारामेण
सर्वतोहरिपुंगवाः॥५४॥उत्पेतुस्तेमहारण्यंहृष्टाःशतसहस्रशः॥५५॥तेनगान्नगसंकाशाःशाखामृगगणर्षभाः॥बभंजुःपादपां
स्तत्रप्रचकर्षुश्चसागरं॥५६॥तेसालैश्चाश्वकर्णैश्चधवैर्वंशैश्चवानराः॥कुटजैरर्जुनस्तालैस्तिलकैस्तिमिशैरपि॥५७॥विल्वकैः
सप्तपर्णैश्चकर्णिकारैश्चपुष्पितैः॥चूतैश्चाशोकवृक्षैश्चसागरंसागरंसमपूरयन्॥५८॥समूलांश्चविमूलांश्चपादपान्हरिसत्तमाः
इंदुकेतूनिवोद्यम्यप्रतिजह्रुरितस्ततः॥५९॥तालान्दाडिमगुल्मांश्चनालिकेरविभीतकान्॥करीषान्वकुलांश्चिंवान्समाजह्रुरि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

तस्ततः॥५॥हस्तिमात्रान्महाकायाः पाषाणांश्च महाबलाः॥६॥पर्वतांश्च समुत्पाट्य यंत्रैः परिवहंति च॥६॥प्रक्षिप्यमाणैरचलैः सहसा
जग्मुरुद्धतं॥समुत्तस्थुरसर्पंचाकाशमवासर्पन्ततः पुनः॥६॥समुद्रं क्षोभयामासुर्निपेतुस्तत्र समंततः॥सूत्राण्यन्येषु गृह्णंति व्यापतंश्च
तथोजनं॥६॥नलश्चक्रे महासेतुं मध्ये नदनदीपतेः॥सतदा क्रियते सेतुर्वानरैर्घोरकर्मभिः॥६॥दंडानन्ये प्रगृह्णंति विचि
न्वंति तथापरे॥वानरैः शतशस्तत्र रामस्याज्ञापुरःसरैः॥६॥मेघाभैः पर्वताभैश्च तृणैः काष्ठैर्बबंधिरे॥पुष्पितायैश्च तरुभिः से
तुबध्नंति वानराः॥६५॥पाषाणांश्च गिरिप्रख्यान् गिरीणां शिखराणि च॥दृश्यंते परिधावंतो गृह्य वारणसन्निभाः॥६६॥शैलानां क्षि
प्यमाणानां शैलानां तत्र पात्यतां॥बभूवतुमुलः शब्दस्तदा तस्मिन्महोदधौ॥६७॥महेंद्रं हनुमान् शैलं यं यं विपुलमाक्षिपत्॥तं तं
करेण वामेन सलिलं जगृहे नलः॥६८॥कृतानि प्रथमेनाह्ना योजनानि चतुर्दश॥प्रहृष्टैर्गजसंकाशैस्त्वरमाणैः प्लवंगमैः॥६९॥द्वि
तीयेन तथैवाह्ना योजनानि तु विंशतिः॥कृतानि प्लवगैस्तूर्णं भीमकायैर्महाबलैः॥७०॥अह्नातृतीयेन तथा योजनानि तु सा-
गरे॥त्वरमाणैर्महाकायैरेकविंशतिरेव च॥७१॥चतुर्थेन तथाचाह्ना द्वाविंशतिस्तथापि च॥योजनानि महावेगैः कृतानि त्वरित
स्ततः॥७२॥पंचमेन तथाचाह्ना प्लवगैः क्षिप्रकर्मभिः॥योजनानि त्रयोविंशत्सुवेलमधिकृत्य वै॥७३॥सवानरवरश्रीमान् विश्व
कर्मात्मजो बली॥बबंध सागरे सेतुं यथा चास्य पिता तथा॥७४॥ सनलेन कृतः सेतुः सागरे वरुणालये॥शुशुभे सुभगः श्रीमान्

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

स्वातीपथइवांबरे॥७५॥ततोदेवाःसगंधर्वाःसिद्धाश्चपरमर्षयः॥आगम्यगगनेतस्थुर्द्रष्टुकामास्तदद्भुतं॥७६॥दशयोज
नविस्तीर्णंशतयोजनमायतं॥ददृशुर्देवगंधर्वानलसेतुंसुदुष्करं॥७७॥आप्लवंतःप्लवंतश्चगर्जंतश्चप्लवंगमाः॥तमचिं
त्यमसत्यंचत्यद्भुतंरोमहर्षणं॥७८॥ददृशुःसर्वभूतानिसागरेसेतुबंधनं॥तानिकोटिसहस्राणिवानराणांमहौजसां॥७९
बध्नंतःसागरेसेतुंजग्मुःपारंमहोदधेः॥विशालःसुकृतःश्रीमान्सभूमिःसुसमाहितः॥८०॥अशोभतमहान्सेतुःसीमंतइव
सागरे॥ततःपारेसमुद्रस्यगदापाणिर्विभीषणः॥८१॥परेषामभिघातार्थमतिष्ठत्सचिवैःसह॥सुग्रीवस्तुततःप्राहरामंसत्यप
राक्रमं॥८२॥हनुमंतंत्वमारोहत्वंगदंत्वथलक्ष्मणः॥अहंहिविपुलोवीरःसागरोमकरालयः॥८३॥विहायसोयुवामेतौवानरौ
तारयिष्यतः॥अग्रतस्तस्यसैन्यस्यश्रीमान्रामःसलक्ष्मणः॥८४॥जगामधन्वीधर्मात्मासुग्रीवेणसमन्वितः॥अन्येमध्येनगच्छं
पार्श्वतोन्येप्लवंगमाः॥८५॥सलिलेप्रपतंत्यन्येमार्गमन्येनलेभिरे॥किंचिद्वैहायसगताःसुपर्णाइवपुप्लुवुः॥८६॥घोषेणमहता
घोषंसागरस्यसमुच्छ्रितं॥भीममंतर्दधेभीमातरंतीहरिवाहिनी॥८७॥वानराणांहिसातीर्णावाहिनीनलसेतुना॥तीरेनिविविशे
राज्ञावहुमूलफलोदके॥८८॥तदद्भुतंराघवकर्मदुष्करंसमीक्ष्यदेवाःसहसिद्धचारणैः॥उपेत्यरामंसहसामहर्षिभिःसमभ्य
षिंचन्सुशुभैर्जलैःपृथक्॥८९॥जयस्वशत्रूंनरदेवमेदिनींससागरांपालयशाश्वतीःसमाः॥इतीवरामंनरदेवसत्कृतंशुभैर्व

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

चोभिर्विविधैरभूजयन्॥२०॥इत्यार्षे श्रीरामायणे वाल्मीकीये युद्धकांडे द्वाविंशः सर्गः॥२२॥निमित्तानि निमित्तज्ञो दृष्ट्वा लक्ष्मणपू
र्वजः सौमित्रिं संपरिष्वज्य इदं वचनमब्रवीत्॥१॥परिगृह्योदकं शीतं वनानि फलवंति च॥बलौघं संविभज्येमं मृत्युतिष्ठे मलक्ष्म
ण॥२॥लोकक्षयकरं भीमं भयं पश्याम्युपस्थितं॥निबर्हणं प्रवीराणां रक्षवानररक्षसां॥३॥वाताश्च कलुषा वांति कंपते च वसुं
धरा॥पर्वताग्राणि वेपंते पतंति च महीरुहाः॥४॥निघाः क्रव्यादसंकाशाः परुषाः परुषस्वनाः॥क्रूराः क्रूरं प्रवर्षंति मिश्रं शोणित
बिंदुभिः॥५॥रक्तचंदनसंकाशा संध्या परमदारुणा॥ज्वलितं प्रपतत्येतदादित्यादग्निमंडलं॥६॥दीनादीनतराः क्रूराः सर्वतो मृ
गपक्षिणः॥प्रत्यादित्यं विनर्दंति जनयंतो महद्भयं॥७॥रजन्यामप्रकाशस्तु संतापयति चंद्रमाः॥रूक्षरक्तांसुपर्यंतो लोकक्ष
यइवोदितः॥८॥ह्रस्वो रूक्षोप्रकाशस्तु परिवेषः सुलोहितः॥आदित्ये विमले नीलं लक्ष्यते लक्ष्मण दृश्यते॥९॥रजसा महता चापि
नक्षत्राण्यावृतानि च॥युगांतमिव लोकानां पश्य शंसंति लक्ष्मण॥१०॥काकाः श्येनास्तथा नीचैर्गृध्राः परिपतंति च॥शिवाश्चा
प्यशुभान्नादान्नदंति सुमहाभयान्॥११॥शैलैः शूलैश्च खड्गैश्च विमुक्तैः कपिराक्षसैः॥भविष्यत्याहता भूमिर्मांसशोणितकर्दमा॥१२
क्षिप्रमद्यैव दुर्धर्षा पुरी रावणपालिता॥अभियामो जवेनैव सर्वैर्हरिभिरावृताः॥१३॥इत्येवमुक्त्वा धन्वी शः रामः संग्रामदुर्धर्षणः
प्रतस्थे परतो रामो लंकामभिमुखो विभुः॥१४॥स विभीषणसुग्रीवाः सर्वे ते वानरर्षभाः॥प्रतस्थिरे विनर्दंतो निश्चिता द्विषतां वधे

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

१५॥ राघवस्य प्रियार्थं तु धृतानां वीर्यशालिनां॥ हरीणां लोकचेष्टाभिस्तुतोषं रघुनंदनः॥१६॥ इत्यार्षे श्रीरामायणे वाल्मीकीये
युद्धकांडे त्रयोविंशः सर्गः॥२३॥ सा वीरसमितिराज्ञा विरराज व्यवस्थिता॥ शशिना शुभनक्षत्रा पौर्णमासीव शारदी॥१॥ प्रचचा-
ल च वेगेन वितत्रासवसुंधरा॥ पीड्यमाना बलौघेन तेन सागरवर्चसा॥२॥ ततः शुश्रुवुराकुष्टं लंकायां काननौकसः॥ भेरीमृदंग
संघुष्टं तुमुलं लोमहर्षणं॥३॥ बभूवुस्तेन घोषेण संहृष्टा हरियूथपाः॥ अमृष्यमाणास्तं घोषं विनेदुर्घोषवत्तरं॥४॥ राक्षसास्तत्र
लंकायां शुश्रुवुस्ते च गर्जितं॥ नर्दतामिव दृप्तानां मेघानां संबरेष्वनं॥५॥ दृष्ट्वा दाशरथिर्लंकां चित्रध्वजपताकिनीं॥ जगाम
मनसा सीतां दूयमानेन चेतसा॥६॥ अत्र सा मृगशावाक्षी रावणेनोपरुध्यते॥ अभिभूता ग्रहेणेव बलोहितां गेन रोहिणी॥७॥ हर्ष
मुत्सृज्य च निश्वस्य समुद्वीक्ष्य च लक्ष्मणं॥ उवाच वचनं वीरस्तत्कालहितमात्मनः॥८॥ आलिखंतीमिवाकाशमुत्थितां पश्य लक्ष्म-
ण॥ मनसेव कृतां लंकां नगाग्रे विश्वकर्मणा॥९॥ विमानैर्बहुभिर्लंका संकीर्णा हि विराजते॥ विष्णोः पदमिवाकाशं छादितं पांडुभि
र्घनैः॥१०॥ पुष्पितैः शोभितालंकावनैश्चैत्ररथोपमैः॥ नानाविहगसंघुष्टैः फलपुष्पोपमैः शुभैः॥११॥ पश्य मत्तविहंगानि वनानि
नभमराणि च॥ कोकिलाकुलखंडानि रोधवीविशिखानि च॥१२॥ इति दाशरथी रामो लक्ष्मणं समभाषत॥ बलं चतत्र विभ-
ज्य छाद्यस्व दृष्टेन कर्मणा॥१३॥ शासकपिसेनानां बलमादाय वीर्यवान्॥ अंगदः सहनीलेन तिष्ठेद्दुरसि दुर्जयः॥१४॥ तिष्ठेद्वानर

CC-0.Courtesy Shri K.S.Parihar, Librarian Government District Library Varanasi. Digitized by eGangotri

वाहिन्यांवानरौघसमावृत॥आश्रितोदक्षिणंपार्श्वमृषभोनामवानर॥१५॥गंधहस्तीवदुर्धर्षस्तरस्वीगंधमादन॥तिष्ठद्वानर
वाहिन्याःसव्यंपार्श्वमधिष्ठित॥१६॥मूर्ध्निस्थास्याम्यहंयत्तोलक्ष्मणेनसमन्वित॥जांबवांश्चसुषेणश्चवेगदर्शीचवानरः॥
१७॥ऋक्षमुख्यामहात्मानःकुक्षिंरक्षंतुतेत्रय॥जघनंकपिसेनायाःकपिराजोभिरक्षितु॥१८॥पश्चाद्दिमिवलोकस्यप्रचेता
स्तेजसावृत॥सुविभक्तमहाभूतामहावानररक्षिता॥१९॥अनीकिनीसाविबभौयथाद्यौःसाभ्रसंप्लवा॥प्रगृह्यगिरिशृंगाणिम
हतश्चमहीरुहान्॥२०॥भासेदुर्वानरालंकांविमर्दयिषवोरणे॥शिखरैर्विकरामैनांलंकांमुष्टिभिरेववा॥२१॥इतिस्मदधिरे
सर्वेमनांसिहरिपुंगवाः॥ततोरामोमहातेजाःसुग्रीवमिदमब्रवीत्॥२२॥सुविभक्तानिसैन्यानिशुकएषविमुच्यतां॥रामस्य
तुवचःश्रुत्वावानरेंद्रोमहाबलः॥२३॥मोचयामासतंदूतंशुकंरामस्यशासनात्॥मोचितोरामवाक्येनवानरैश्चनिपीडितः
२४॥शुकःपरमसंत्रस्तोरक्षोधिपमुपागमत्॥रावणःप्रहसन्नेवशुकंवाक्यमुवाचह॥२५॥किमिमौतेसितौपक्षौलूनपक्षौ
चदृश्यते॥कच्चिन्नानेकचित्तानांतेषांत्ववशमागत॥२६॥ततःसभयसंविग्नस्तेनराज्ञाभिचोदितः॥वचनंप्रत्युवाचेदंराक्षसा
धिपमुत्तमं॥२७॥सागरस्योत्तरेतीरेध्रुवंस्तेवचनंतदा॥यथासंदेशमक्लिष्टंसांत्वयन्श्लक्ष्णयागिरा॥२८॥कुद्धस्तेरहमाज्ञु
त्यदृष्टमात्रैःप्लवंगमैः॥गृहीतोस्म्यपिचारब्धोहंतुंलोलुंचमुष्टिभिः॥२९॥नैवसंभाषितुंशक्याःसंप्रश्नोत्रनलभ्यते॥प्रकृत्याकोप

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नास्तीक्ष्णाः वानरराक्षसाधिप ॥३१॥ सचहंताविराधस्यकबंधस्यखरस्यच ॥ सुग्रीवसहितोरामः सीतायाः पदमागतः ॥३२॥ स
कृत्वासागरोसेतुं तीर्त्वाचलवणोदधिं ॥ एषरक्षांसिनिर्धूय धन्वीतिष्ठतिराघवः ॥३३॥ ऋक्षवानरसंघानामनीकानिसह
स्रशः ॥ गिरिमेघनिकाशानांछादयंतिवसुंधरां ॥३४॥ राक्षसानांबलौघस्यवानरेंद्रबलस्यच ॥ नैतयोर्विद्यतेसंधिर्देवदान
वयोरिव ॥३४॥ पुरःप्राकारमायांतिक्षिप्रमेकतरंकुरु ॥ सीतांचास्मैप्रयच्छाशुसुयुद्धंवाप्रदीयतां ॥३५॥ शुकस्यवचनंश्रुत्वा
रावणोवाक्यमब्रवीत् ॥ शिषसंरक्तनयनोनिर्दहन्निवचक्षुषा ॥३६॥ यदिमांप्रतियुध्येरन्देवगंधर्वदानवाः ॥ नैवसीतांप्रदा
स्यामिसर्वलोकभयादपि ॥३७॥ कदासमभिधावंतिराघवंमामकाःशराः ॥ वसंतपुष्पितेमत्ताभ्रमराइवपादपं ॥३८॥ कदातू
णीशयेद्दृष्टैःशतशःकार्मुकच्युतैः ॥ शरैरादीपयाम्येनमुल्काभिरिवकुंजरं ॥३९॥ तच्चास्यबलमादास्येबलेनमहतावृतः ॥ ज्यो
तिषामिवसर्वेषांप्रभामुद्यन्दिवाकरः ॥४०॥ सागरस्येवमेवेगोमारुतस्येवमेबलं ॥ नचदाशरथिर्वेदतेनमांयोद्धुमिच्छति ॥४१
नमेतूणीशयान्बाणान्सविषानिवपन्नगान् ॥ रामःपश्यतिसंग्रामेतेनमांयोद्धुमिच्छति ॥४२॥ नजानातिपुरावीर्यंममयुद्धेस
राघवः ॥ ममचापमयींबाणांशरकोणप्रवादितां ॥४३॥ ज्याशब्दंतुमुलंघोरमार्तभीतमहास्वनं ॥ नाराचतलसन्नादंतंमहाहि
तवाहिनं ॥४४॥ अवगाह्यमहारंगंवादयिष्याम्यहंरणे ॥ नवासवेनापिसहस्रचक्षुषायुधाम्पिशक्योवरुणेनवापुनः ॥ यमेनवा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

धर्षयितुंतथाग्निनामहाहवेवैश्रवणेनवास्वयं॥१३॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेचतुर्विंशःसर्गः॥२४॥सबलेसा
गरेतीर्णेरामेदशरथात्मजे॥अमात्येरावणःश्रीमानब्रवीच्छुकसारणौ॥१॥समग्रेसागरंतीर्णंदुस्तरंवानरंबलं॥अभूतपूर्वंरामेण।
सागरेसेतुबंधनं॥२॥सागरेसेतुबंधंतंनश्रद्दध्यांकथंचन॥अवरुद्धंचापिसंख्येयंतन्मयावानरंबलं॥३॥भवंतौवानरंसैन्यंप्र
विश्यानुपलक्षितौ॥परिमाणंचवीर्यंचयेचमुख्याःप्लवंगमाः॥४॥मंत्रिणोयेचरामस्यसुग्रीवस्यचसंमताः॥येपूर्वमभिवर्तंते
येचमुख्याःप्लवंगमाः॥५॥सचसेतुर्यथाबद्धःसागरेसलिलार्णवे॥निवेशश्चयथातेषांवानराणांमहात्मनां॥६॥रामस्यप्रव।
सायंचवीर्यंप्रहरणानिच॥लक्ष्मणस्यचवीरस्यतत्त्वतोज्ञातुमर्हथ॥७॥कश्चसेनापतिस्तेषांवानराणांमहौजसां॥एतज्ज्ञात्वा
यथातत्त्वंशीघ्रमागंतुमर्हथः॥८॥इतिप्रतिसमादिष्टौशुकसारणौ॥हरिरूपधरौवीरौप्रविष्टौवानरंबलं॥९॥ततस्तद्वानरसै
न्यमचिंत्यंरोमहर्षणं॥संख्यातुंनाध्यगच्छेतांतदानौशुकसारणौ॥१०॥तस्थितंपर्वताग्रेषुनिर्झरेषुगुहासुच॥समुद्रस्यचतीरेषु
वनेषुपवनेषुच॥११॥तरमाणंचतीर्णंचतर्तुकामंचसर्वशः॥निविष्टंनिविशंचैवभीमनादंमहाबलं॥१२॥तद्बलार्णवमक्षोभ्यंदृ
शानेनिशाचरौ॥तौददर्शमहातेजाःप्रतिच्छन्नौविभीषणः॥१३॥आचचक्षेथरामायगृहीत्वाशुकसारणौ॥तस्यैतौराक्षसेंद्रस्य
मंत्रिणौशुकसारणौ॥१४॥लंकायाःसमनुप्राप्तौचारौपरपुरंजयौ॥तौदृष्ट्वाव्यथितंरामंनिराशौजीवितेतदा॥१५॥कृतांजलिपुटौ

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

सूत्रे भीतौ वचनं चेदमूचतुः॥ आवामिहागतौ सौम्य रावणप्रहितावुभौ॥१६॥ परिज्ञातुं बलं कृत्स्नं तवेदं रघुनंदन॥ तयोस्तद्
वचनं श्रुत्वा रामो दशरथात्मजः॥१७॥ अब्रवीत्प्रहसन्वाक्यं सर्वभूतहिते रतः॥ यदि दृष्टं बलं कृत्स्नं वयं वा सुसमीक्षिताः॥१८॥ य
थोक्तं वाकृतं कार्यं छंदतः प्रतिगम्यतां॥ अथ किंचिददृष्टं वा भूयस्तद्दृष्टमर्हथ॥१९॥ विभीषणो वा कार्त्स्न्येन भूयः संदर्शयिष्य
ति॥ न चात्मग्रहणं प्राप्य भेतव्यं जीवितं प्रति॥२०॥ न्यस्तशस्त्रौ गृहीतौ च न दूतौ वधमर्हतः॥ प्रच्छन्नौ च विमुंचेमौ चारौ रात्रिंच
रावुभौ॥२१॥ शत्रुपक्षस्य सततं विभीषणविकर्षिणौ॥ प्रविश्य नगरीं लंकां भवद्भ्यां धनदानुजः॥२२॥ वक्तव्यो रक्षसां यथोक्तं
वचनान्मम॥ यद्बलं च समाश्रित्य सीतां मे हृतवानसि॥२३॥ तद्दर्शय यथाकामं ससैन्यः सहबांधवः॥ श्वः काले नगरीं + राजा +
लंकां सप्राकारां सतोरणां॥२४॥ रक्षसां स्वबलं पश्य शरैर्विध्वंसितं मया॥ घोरं रोषमहं मोक्ष्ये ससैन्ये त्वयि रावण॥२५॥ श्वः काले व
ज्रवान्वज्रं दानवेष्विव वासवः॥ इति प्रतिसमादिष्टौ राक्षसौ शुकसारणौ॥२६॥ जयेति प्रतिनंद्यैनं राघवं धर्मवत्सलं॥ आगम्य न
गरीं लंकामब्रूतां राक्षसाधिपं॥२७॥ विभीषणगृहीतौ तु वधार्हौ राक्षसेश्वर॥ दृष्ट्वा धर्मात्मना मुक्तौ रामेणामिततेजसा॥२८॥
एकस्थानगतास्तत्र चत्वारः पुरुषर्षभाः॥ लोकपालसमाः शूराः कृतज्ञा दृढविक्रमाः॥२९॥ रामो दाशरथिः श्रीमाल्लक्ष्मणश्च
विभीषणः॥ सुग्रीवश्च महातेजा महेंद्रसमविक्रमः॥३०॥ एते शक्ताः पुरीं लंकां सप्राकारां सतोरणां॥ उत्पाट्य संक्रामयितुं सर्वे तिष्ठंतु

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वानराः॥३१॥यादृशंतस्यरामस्यरूपंप्रहरणानिच॥वधिष्यतिपुरीलंकामेकस्तिष्ठंतुतेत्रयः॥३२॥रामलक्ष्मणगुप्तासासुग्रीवेणच
वाहिनी॥बभूवदुर्धर्षतरासर्वैरपिसुरासुरैः॥३३॥प्रहृष्टयोधाध्वजिनीमहात्मनांवनौकसांसंप्रतियोद्धुमिच्छतां॥अलंविरोधेन
रामोविधीयतांप्रदीयतांदाशरथायमैथिली॥३४॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेपंचविंशःसर्गः॥२५॥तद्वचः
पथ्यमक्लीबंसारणेनाभिभाषितं॥निशम्यरावणोराजापर्यभाषतसारणं॥१॥यदिमामभियुंज्युरन्देवगंधर्वदानवाः॥नैव
सीतामहंदद्यांसर्वलोकभयादपि॥२॥त्वंतुसौम्यपरित्रस्तोहरिभिःपीडितोभृशं॥प्रतिप्रदानमद्यैवसीतायाःसाधुमन्यसे
३॥कोहिनामसपत्नोमांसमरेजेतुमर्हति॥इत्युक्त्वापरुषंवाक्यंरावणोराक्षसाधिपः॥४॥आरुरोहततःश्रीमान्प्रासादंहिम
पांडुरं॥बहुतालसमुत्सेधंरावणोथदिदृक्षया॥५॥ताभ्यांचराभ्यांसहितोरावणःक्रोधमूर्छितः॥पश्यमानःसमुद्रंचपर्वतां
श्चवनानिच॥६॥ददर्शपृथिवीदेशंसुसंपूर्णंप्लवंगमैः॥तदपारमसह्यंचवानराणांमहाबलं॥७॥आलोक्यरावणोराजापा
रिपप्रच्छसारणं॥एषांकेवानरामुख्याःकेशूराःकेमहाबलाः॥८॥किंपूर्वमभिवर्तंतेमहोत्साहाःसमंततः॥केषांशृणोतिसुग्री
वःकेवायूथपयूथपाः॥९॥सारणाचक्ष्वमेसर्वंकेप्रधानाःप्लवंगमाः॥सारणोराक्षसेंद्रस्यवचनंपरिपृच्छतः॥१०॥आचभाषेथ
मुख्यज्ञोमुख्यांस्तत्रवनौकसः॥एषयोधिमुखेलंकांनदंस्तिष्ठतिवानरः॥११॥यूथपानांसहस्रेणशतेनपरिवारितः॥यस्यघो

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

षेणमहतासप्राकारसतोरणा॥१२॥लंकाग्रेवपतेसर्वासशैलवनकानना॥सर्वशाखामृगेंद्रस्यसुग्रीवस्यमहात्मनः॥१३॥व
लाग्रेतिष्ठतेवीरोनलोनामैषवानरः॥बाहूप्रगृह्यपद्भ्यांमहीगच्छतिवीर्यवान्॥१४॥लंकामभिमुखःकोपाद्भीक्ष्णंचवि
जृंभते॥गिरिशृंगप्रतिकाशःपद्मकिंजल्कसन्निभः॥१५॥स्फोटयत्यतिसंरब्धोलांगूलंचपुनःपुनः॥यस्यलांगूलशब्देनस्वनं
तीवदिशोदश॥१६॥एषवानरराजेनसुग्रीवेणाभिषेचितः॥योवराज्येंगदोनामत्वामाहूयतिसंयुगे॥१७॥वालिनःसदृशःपुत्रः
सुग्रीवस्यसदाप्रियः॥राघवार्थेपराक्रांतःशक्रार्थेवरुणोयथा॥१८॥एतस्यसामतिःश्रेष्ठायदृष्ट्वाजनकात्मजा॥हनूमतावे
गवताराघवस्यहितैषिणा॥१९॥बहूनिवानरेंद्राणामेषयूथानिवीर्यवान्॥परिगृह्याभियातित्वांस्वेनानीकेनदुर्जयः॥२०॥अ
नुवालिसुतस्यापिबलेनमहतावृतः॥वीरस्तिष्ठतिसंग्रामेसेतुहेतुरयंनलः॥२१॥येतुविष्टभ्यगात्राणिस्वेलयंतिनदंतिच॥
आस्थायचविजृंभंतेक्रोधेनहरियूथपाः॥२२॥येतुदुष्प्रसहावीराश्चंडाश्चंडपराक्रमाः॥अशीतिशतसहस्राणिदशकोटिशता
निच॥२३॥यएवमनुगच्छंतिवीराश्चंदनवासिनः॥एषवाशंसतेलंकांस्वेनानीकेनमर्दितुं॥२४॥श्वेतोरजतसंकाशश्चपलो
भीमविक्रमः॥बुद्धिमान्वानरःश्रेष्ठस्त्रिषुलोकेषुविश्रुतः॥२५॥तूर्णंसुग्रीवमागम्यपुनर्गच्छतिवानरः॥विभजन्वानरींसेनामनी
कानिप्रहर्षयन्॥२६॥यःपुरागोमतीतीरेरम्यंपर्येतिपर्वतं॥नाम्नासंरोचनोनामनानानगयुतोगिरिः॥२७॥तत्रराज्यंप्रशास्तेषु

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

कुमुदोनामयूथपः॥योसौशतसहस्राणांसहस्रंपरिकर्षति॥२९॥यस्यवालावहुध्यामादीर्घलांगूलमाश्रिताः॥ताम्राःपीताः
सिताश्वेताःप्रकीर्णाघोरदर्शनाः॥२९॥अरीनोवानरश्चंडःसंग्राममभिकांक्षति॥एषैवाशंसतेलंकांस्वेनानीकेनमर्दितुं॥३०॥य
स्त्वेषसिंहसंकाशःकपिलोदीर्घकेसरः॥निभृतःप्रेक्षतेलंकांदिधक्षन्निवचक्षुषा॥३१॥विंध्यंकृत्स्नंगिरिंसत्यंपर्वतंचसुदर्शनं॥
राजन्सततमध्यास्तेरंभोनामैषयूथपः॥३२॥शतंशतसहस्राणांत्रिंशच्चहरिपुंगवाः॥यमेतिवानराघोराश्चंडाश्चंडपराक्रमाः
३३॥परिवार्यानुगच्छंतिलंकांमर्दितुमोजसा॥यस्तुकर्णौविधूनुतेजृंभतेचपुनःपुनः॥३४॥नतुसंविजतेमृत्योर्नचसेनांप्रधाव
ति॥प्रकंपतेचरोषेणतिर्यक्चपुनरीक्षते॥३५॥यस्यलांगूलविक्षेपंक्ष्वेडत्येषमहाबलः॥महाजवोवीतभयोरम्यंसाल्वेयपर्व
तं॥३६॥राजन्सततमध्यास्तेशरभोनामयूथपः॥एतस्यबलिनःसर्वेविहारानामयूथपाः॥३७॥राजन्शतसहस्राणिचत्वारिं
शतथैवच॥यस्तुमेघइवाकाशंमहानादृत्यतिष्ठति॥३८॥मध्येवानरवीराणांसुराणामिववासवः॥भेरीणामिवसन्नादोयस्यै
षश्रूयतेमहान्॥३९॥घोषःशाखामृगेंद्राणांसंग्राममभिकांक्षतां॥एषपर्वतमध्यास्तेपारियात्रमनुत्तमं॥४०॥युद्धेदुष्प्रसहोनित्यं
पनसोनामयूथपः॥एनंशतसहस्राणांशताईपर्युपासते॥४१॥यूथपायूथपश्रेष्ठंयेषांयूथानिभागशः॥यस्तूर्णांमांप्रवल्गं
तींचमूंतिष्ठतिशोभयन्॥४२॥स्थितस्तीरेसमुद्रस्यद्वितीयइवसागरः॥एषदर्दुरसंकाशोविनतोनामयूथपः॥४३॥पिबंश्चरति

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

पर्णादीनदीनामुत्तमानदी॥षष्टिःशतसहस्राणिवानरास्तेमहाबलाः॥४४॥त्वामाहूयतियुद्धायक्रोधनोनामयूथपः वि
क्रांताबलवंतश्चयूथायूथविभागशः॥४५॥यस्तुगैरिकवर्णाभंवपुःपुष्यतिवानरः॥अवमत्यसदासर्वान्वानरान्बलदर्पि
तः॥४६॥गवयोनामतेजस्वीत्वांक्रोधादभिवर्तते॥एनंशतसहस्राणिसप्ततिपर्युपासते॥४७॥एषैवाशंसतेलंकांस्वेनानी
केनमर्द्दितुं॥एतेदुष्प्रसहावीराबलिनःकामरूपिणः॥४८॥यूथपायूथपश्रेष्ठंयेषांयूथानिभागशः॥४९॥इत्यार्षेश्रीरामाय
णेवाल्मीकियेयुद्धकांडेषड्विंशःसर्गः॥२६॥तास्तुतेसंप्रवक्ष्यामिप्रेक्षमाणस्ययूथपान्॥राघवार्थेपराक्रांतायेनरक्षंति
जीवितं॥१॥स्निग्धायस्यबहुकुल्यामावालालांगूलमाश्रिताः॥ताम्राःपिताःसिताःकृष्णाःप्रकीर्णाघोरकर्मणः॥२॥प्रगृही
ताःप्रकाशंतेसूर्यस्येवमरीचयः॥रथिवीचानुकृष्यंतेतारोनामैषयूथपः॥३॥यंपृष्ठतोनुगच्छंतिशतशोथसहस्रशः॥द्रुमानुद्य
म्यसहसालंकारोहणतत्पराः॥४॥यूथपाहरिराजस्यकिंकराःसमुपस्थिताः॥नीलानिवसहामेघांस्तिष्ठतोयांस्तुपश्यसि
॥५॥असितांजनसंकाशान्युद्धेसत्यपराक्रमान्॥असंख्येयाननिर्देश्यान्परंपारमिवोदधेः॥६॥पर्वतेषुचयेकेचिद्विषमे
षुनदीषुच॥एतेत्वामभिवर्तंतेराजन्नृक्षाःसुदारुणाः॥७॥एषांध्येस्थितोराजन्भीमाक्षोभीमदर्शनः॥पर्जन्यइवजीमूतैःसमं
तात्परिवारितः॥८॥ऋक्षवंतंगिरिश्रेष्ठमध्यास्तेनर्मदांपिबन्॥सर्वर्क्षाणामधिपतिर्धूम्रोनामैषयूथपः॥९॥पवीयानस्यतु

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

बलीपत्र्यैनंपर्वतोपमं॥ भ्रात्रासमानोरूपेणविशिष्टश्चपराक्रमे॥१०॥ सएषजांबवान्नाममहायूथपयूथपः॥ प्रशांतोगुरुव
त्तश्चसंग्रहारेष्वमर्षणः॥११॥ एतेनसाद्धंसुमहत्कृतंशक्रस्यधीमता॥ देवासुरेजांबवतालब्धाश्चबहवोवराः॥१२॥ आरुह्यप
र्वताग्रेभ्योमहाभ्रविपुलाःशिलाः॥ मुंचंतिविपुलान्नादान्नमृत्योरुद्विजंतिच॥१३॥ राक्षसानांचसदृशाःपिशाचानांचरोमशाः
एतस्यसैन्यावहवोविचरंत्यग्नितेजसः॥१४॥ यंत्वेनमभिसंरब्धंप्लवमानमवस्थितं॥ प्रेक्षंतेवानराःसर्वेस्थितायूथपयूथ
पं॥१५॥ एषराजन्महाशैलंपर्युपास्ते हरीश्वरः॥ बलेनबलसंपन्नोदुंदुभीनामैषयूथपः॥१६॥ यःस्थितंयोजनेशैलंगच्छन्
पार्श्वेनसेवते॥ ऊर्ध्वंतथैवकायेनगतःप्राप्नोतियोजनं॥१७॥ यस्मान्नभैरवंरूपंचतुष्पादेषुविद्यते॥ श्रुतःसन्नादनोनामवा
नराणांपितामहः॥१८॥ येनयुद्धंपुरादत्तंरणेशक्रस्यधीमता॥ पराजयश्चनप्राप्तःसोयंयूथपयूथपः॥१९॥ यस्यविक्रममा
णस्यवपराक्रमः॥ एषगंधर्वकन्यायामुत्पन्नःकृतवर्त्मनः॥२०॥ तदादेवासुरेयुद्धेसाह्याथेत्रिदिवौकसां॥ यत्रवैश्रवणोराजा
जंबुमुपनिषेवते॥२१॥ योराजापर्वतेंद्राणांबहुकिन्नरसेविनां॥ विहारसुखदोनित्यंभ्रातुस्तेराक्षसाधिप॥२२॥ तत्रैववसते
श्रीमान्बलवान्वानरर्षभः॥ युद्धेष्वकत्थनोराजन्क्रोधनोनामयूथपः॥२३॥ वृतःकोटीसहस्रेणहरीणांसमवस्थितः॥ एषैवाशं
सतेलंकांस्वेनानीकेनमर्दितुं॥२४॥ योगंगामनुपर्येतित्रासयन्राजयूथपान्॥ हस्तिनांवानराणांचपूर्ववैरमनुस्मरन्॥२५॥ ए

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

षयूथपतिर्नेतागर्जन्गिरिगुहाश्रयः॥गजान्योधयतेवन्यानारुजंश्चमहीरुहान्॥२६॥हरीणांवाहिनीमुख्योनदीहैम
वतीमनु॥उशीरबीजमाश्रित्यपर्वतंमंदरोपमं॥२७॥रमतेवानरश्रेष्ठोदिविशक्रइवस्वयं॥एनंशतसहस्राणांसहस्रम
भिवर्त्तते॥२८॥वीर्यविक्रमहृष्टानांनर्दतांबाहुशालिनां॥सएषनेतावैतेषांवानराणांमहात्मनां॥२९॥सएषदुर्द्धरोराजन्न
माथीनामयूथपः॥वातेनैवोद्धतंमेघंपश्यमेनमनुपश्यति॥३०॥अनीकमपिसंरब्धंवानराणांतरस्विनां॥उद्धूतमरुणाभासंप
वनेनसमंततः॥३१॥विवर्त्तमानंबहुशोयत्रैतद्धुलंरजः॥एतेसितमुखाघोराःगोलांगूलामहाबलाः॥३२॥शतंशतसह
स्राणिदृष्टावैसेतुबंधे॥गोलांगूलामहावेगागवाक्षंनामयूथपं॥३३॥परिवार्याभिवर्त्तंतेलंकांमर्द्दितुमोजसा॥भ्रमराचरि
तायत्रसर्वकामफलद्रुमाः॥३४॥यंसूर्यशतवर्णाभमनुपर्येतिपर्वतं॥यस्यभासासदाभांतितद्वर्णामृगपक्षिणः॥३५॥यस्य
प्रस्थेमहात्मानोनत्यजंतिमहर्षयः॥सर्वकामफलावृक्षाःसदापुष्पसमन्विताः॥३६॥मधूनिचमहार्हाणितस्मिन्पर्वतसत्त
मे॥तत्रैषरमतेराजन्रम्येकांचनपर्वते॥३७॥मुख्योवानरमुख्यानांकेसरीनामयूथपः॥षष्टिर्गिरिस्थाणिरम्येकांचनप
र्वताः॥३८॥तेषांमध्येगिरिवरस्त्वभिवानघरक्षसां॥तत्रैतेकपिलाःश्वेतास्ताम्रास्यमधुपिंगलाः॥३९॥निवसंत्युत्तरगिरौती
क्ष्णदंष्ट्रानखायुधाः॥सिंहाइवचतुर्दंष्ट्राव्याघ्राइवदुरासदाः॥४०॥सर्वेवैश्वानरसमाज्वलदाशीविषोपमाः॥सुदीर्घोचि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

तलांगूलामत्तमातंगसन्निभाः॥४२॥महापर्वतसंकाशामहाजीमूतसन्निभाः॥वृत्तपिंगलनेत्राहिमहाभीमगतिस्वनाः॥४३॥
मर्दयंतीवतेसर्वेतस्थुर्लंकासमीक्ष्यते॥एषचैषामधिपतिर्मध्येतिष्ठतिवीर्यवान्॥४३॥जयाथ३नित्यमादित्यमुपतिष्ठतिवी
र्यवान्॥नाम्नापृथिव्याविख्यातोराजन्शतबलीतिय॥४४॥एषैवाशंसतेलंकांखेनानीकेनमर्दितुं॥विक्रांतोबलवान्शूरः
पौरुषेस्वेव्यवस्थितः॥४५॥रामप्रियार्थंप्राणानांदयांनकुरुतेहरि॥गजोगवाक्षोगवयोनलोनीलश्चवानराः॥४६॥एकैकमेव
यूथानांकोटिभिर्दशभिर्वृताः॥तथान्येवानराश्चाविंध्यपर्वतवासिनः॥४७॥नशक्यंतेबहुत्वात्तुसंख्यातंलघुविक्रमाः॥४८
सर्वेमहाराजमहाप्रभावाःसर्वेमहाशैलनिकाशकाः॥सर्वेसमर्थाःपृथिवींक्षणेनकर्तुंप्रविध्वस्तविकर्णशैलां॥४९॥इ
त्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेसप्तविंशःसर्गः॥२७॥सारणस्यवचःश्रुत्वारावणंराक्षसाधिपं वलमादिश्यतत्सर्वं
शुकोवाक्यमथाब्रवीत्॥स्फीतान्पश्यसियानेतान्मत्तानिवमहाद्विपान्॥न्यग्रोधानिवगांगेयान्सालान्हैमवतानिव॥२॥
एतेदुष्प्रसहाराजन्बलिनःकामरूपिणः॥दैत्यदानवसंकाशायुद्धेदेवपराक्रमाः॥३॥एषांकोटिसहस्राणिनवपंचचसप्त
चतथाशंकुसहस्राणितथाचदशतानिच॥४॥एतेसुग्रीवसचिवाःकिष्किंधानिलयाःसदा॥हरयोदेवगंधर्वैरुत्पन्नाःकामरू
पिणः॥५॥यौतौपश्यसितिष्ठंतौकुमारौदेवरूपिणौ॥मैंदश्चद्विविदश्चेतिताभ्यांवालिसमोयुधि॥ब्रह्मणामनुज्ञातावमृतप्रा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

शिनावुभौ॥आशंसेतेयथालंकामेतौमर्दितुमोजसा॥७॥यंतुपश्यैश्यमितिष्ठंतमभिन्नमिवकुंजरं॥योबलात्क्षोभयेत्क्रुद्धःसमुद्र
मपिवानर॥८॥एषोभिगंतालंकायांवैदेह्यास्तवचप्रभो॥एनंदृष्ट्वापुरोदृष्टंवानरंपुनरागतं॥९॥ज्येष्ठःकेसरिणःपुत्रोवातात्मज
इतिश्रुतः॥हनूमानितिविख्यातोलंघितोयेनसागरः॥१०॥कामरूपीहरिश्रेष्ठोबलवीर्यसमन्वितः॥अनिवार्यगतिश्चैवय
थासततगःप्रभुः॥११॥उद्यंतंभास्करंदृष्ट्वाबाल्येकिलपिपासितः॥त्रियोजनसहस्रंतुअध्वानमवतीर्यहि॥१२॥आदित्यमाह
रिष्यामिनमेक्षुत्प्रतियास्यति॥इतिनिश्चित्यमनसापुरैषवलदर्पितः॥१३॥अनाधृष्यतमंदेवमपिदेवर्षिराक्षसैः॥अनासाद्यै
वपतितोभास्करोदयनेगिरौ॥१४॥पतितस्यकपेरस्यहनुरेकाशिलातले॥किंचिद्भिन्नादृढहनुर्हनुमानेषतेनवै॥१५॥सत्समा
गमयोगेनममैषविदितोहरिः॥नास्यशक्यंबलंरूपंप्रभावोनुभाषितुं॥१६॥एषआशंसतेलंकामेकोमर्दितुमोजसा॥येनजाज्व
ल्यतेसौम्यधूमकेतुस्तवाद्यवै॥१७॥लंकायानिहितश्चापिकथंविस्मरसेकपिं॥यश्चैषोनंतरःशूरःश्यामःपद्मनिभेक्षणः॥१८॥इ
क्ष्वाकूणामतिरथोलोकेविश्रुतपौरुषः॥यस्मिन्नचलतेधर्मोयोधर्मंनातिवर्तते॥१९॥योब्राह्ममस्त्रंवेदांश्चवेदवेदविदांवर
ः॥योभिंद्याद्गगनंबाणैर्मेदिनींचैवदारयेत्॥२०॥यस्यमृत्योरिवक्रोधःशक्रस्येवपराक्रमः॥यस्यभार्यांजनस्थानात्सीतांचाप
हृतात्वया॥२१॥सएषरामस्त्वांराजन्योद्धुंसमिवर्तते॥तस्यैषदक्षिणेपार्श्वेशुद्धजांबूनदप्रभः॥२२॥विशालवक्षास्ताम्राक्षोनी

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

लकुंचितमूर्धजः॥ एषोहिलक्ष्मणोनाम भ्रातुः प्रियहितेरतः॥२३॥ नयेयुद्धेचकुशलः सर्वशास्त्रविदांवरः॥ अमर्षः दुर्जयोजेता
विक्रांतोबलसंयुतः॥२४॥ रामस्य दक्षिणोबाहुर्नित्यंप्राणोबहिश्चरः॥ नत्वेषराघवस्यार्थेजीवितंपरिरक्षति॥२५॥ एषैवशक्तः स
तेयुद्धेनिहंतुंसर्वराक्षसान्॥ यस्तुसम्यमसौपक्षो रामस्याश्रित्यतिष्ठति॥२६॥ रक्षोगणपरिक्षिप्तोराजात्वेषविभीषणः॥ श्रीमताराज
राजेनलंकायामभिषेचितः॥२७॥ त्वामसौप्रतिसंरब्धोयुद्धायैषोभिवर्तते॥ यंतुपश्यसितिष्ठंतंमध्येगिरिमिवाचलं॥२८॥ सर्वश
स्त्रमृगेंद्राणांभर्तारममितौजसं॥ तेजसायशसाबुध्याबलेनाभिजनेनच॥२९॥ यःकर्षीनतिबध्नाजहिमवानिवपर्वतान्
किष्किंधायःसमध्यास्तेगुहांसगहनद्रुमां॥३०॥ दुर्गेपर्वतदुर्गस्थांप्रधानैःसहयूथपैः॥ यस्यैषाकांचनीमालाशोभतेशतपुष्क
रा॥३१॥ कांतादेवमनुष्याणांयस्यालक्ष्मीःप्रतिष्ठिता॥ एतांमालांचतारांचकपिराज्यंचशाश्वतं॥३२॥ सुग्रीवोवालिनंहत्वारामे
णप्रतिपादितः॥ शतंशतसहस्राणांकोटिमाहुर्मनीषिणः॥३३॥ शतंकोटिसहस्राणांशंकुरित्यभिधीयते॥ शतंशंकुसहस्रा
णांमहाशंकुरितिस्मृतः॥३४॥ महाशंकुसहस्राणांशतंवृंदमिहोच्यते॥ शतंवृंदसहस्राणांमहावृंदमितिस्मृतं॥३५॥ महावृंदसह
स्राणांशतंपद्ममिहोच्यते॥ शतंपद्मसहस्राणांमहापद्ममितिस्मृतं॥३६॥ महापद्मसहस्राणांशतंखर्वमिहोच्यते॥ शतंखर्वस
हस्राणांमहाखर्वमिहोच्यते॥३७॥ महाखर्वसहस्राणांसमुद्रमभिधीयते॥ शतंसमुद्रसाहस्रंमहौघमितिविश्रुतं॥३८॥ एवंको

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

टिसहस्रेणशंकूनांचतथैवच॥महाशंकूसहस्रेणतथावृंदशतेनच॥३९॥महावृंदसहस्रेणतथापद्मशतेनच॥४०॥समुद्रेणचते
नैवमहौघेनतथैवच॥एवंकोटिमहौघेनसमुद्रसदृशेनच॥४१॥विभीषणेनवीरेणसचिवैःपरिवारितः॥सुग्रीवोवानरेंद्रस्त्वायु
ध्यार्थमभिवर्त्तते॥४२॥महाबलवृतोनित्यंमहाबलपराक्रमः॥इमांमहाराजसमीक्ष्यवाहिनीमुपस्थितांप्रज्वलितग्रहोप
मां॥ततःप्रयत्नःपरमोविधीयतांयथाजयःस्यान्नपरैःपराभवः॥४३॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेऽष्टाविंशःस
र्गः॥२८॥सुकेनतुसमाख्यातांस्तान्दृष्ट्वाहरियूथपान्॥समीपस्थंचरामस्यभ्रातरंस्वंविभीषणं॥१॥लक्ष्मणंचमहावीर्यंभु
जंरामस्यदक्षिणं॥सर्ववानरराजंसुग्रीवंभीमविक्रमं॥२॥गजंगवाक्षंशरभंमैंदंद्विविदमेवच॥अंगदंचैववलिनंवज्रह
स्तात्मजात्मजं॥३॥हनुमंतंचविक्रांतंजांबवंतंसुदुर्जयं॥नीलंसेनापतिंचैवनलंगवयमेवच॥४॥किंचिदाविग्नहृदयोजाता
मर्षश्चरावणः॥भर्त्सयामासतौवीरौकथांतेशुकसारणौ॥५॥अधोमुखौतौप्रणतावब्रवीत्शुकसारणौ॥रोषगद्गदयावा
चासंरब्धःपरुषंतदा॥६॥नतावत्सदृशंनामसचिवैरुपजीविभिः॥विप्रियंनृपतेःकर्त्तुंनिग्रहेप्रग्रहेप्रभोः॥७॥रिपूणांप्रतिकू
लानांयुद्धार्थमभिवर्त्ततां॥उभाभ्यांसदृशंनामवक्तुमप्रस्तवेस्तवं॥८॥उभाभ्यां आचार्यागुरवोवृद्धावृथावापर्युपासिता॥सार
रवद्राजशास्त्राणामनुज्ञेयंनगृह्यते॥९॥गृहीतोवानविज्ञातोभारोज्ञानस्यवाह्यते॥ईदृशैःसचिवैर्युक्तोमूर्खोदिष्ट्याधराम्य

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

हं॥२४॥किंतुमृत्योर्भयंनास्तिमांवक्तुंपरुषंवच॥यस्यमेशंसतोजिह्वाप्रयच्छतिशुभाशुभं॥२५॥अप्येवदहनंस्पृष्ट्वावने
तिष्ठतिपादपा॥राजदोषपरामृष्टास्तिष्ठंतेनापराधिन॥२६॥हन्यामहंत्विमौपापौशत्रुपक्षप्रशंसकौ॥यदिपूर्वोपकारैर्मेक्रो
धोनमृदुतांव्रजेत्॥२७॥अपध्वंसतगच्छध्वंसन्निकर्षादितोमम॥नहिवांहंतुमिच्छामिस्मराम्युपकृतानिवां॥२८॥हतावेवकृत
घ्नौतौमयिस्नेहपराङ्मुखौ॥एवमुक्तौतुसव्रीडौतावुभौशुकसारणौ॥२९॥रावणंजयशब्देनप्रतिनंद्याभिनिःसृतौ॥अब्रवीत्सद
शग्रीवःसमीपस्थंमहोदरं॥३०॥उपस्थापयमेशीघ्रंचारानितिनिशाचरा॥महोदरस्तथेत्युक्त्वाशीघ्रमाज्ञापयच्चरा॥३१॥ततश्चरा
संत्वरिताःप्राप्ताःपार्थिवशासनात्॥उपस्थिताःप्रांजलयोवर्धयित्वाजयाशिषा॥३२॥तानब्रवीत्ततोवाक्यंरावणोराक्षसाधि
पः॥चारान्प्रत्यायिकान्शूरान्भक्तान्विगतसाध्वसान्॥३३॥इतोगच्छथरामस्यप्रवसायंपरीक्षथ॥मंत्रेषुमंतरायेस्यप्रीत्या
येचसमागताः॥३४॥कथंस्वपितिजागर्तिकिमद्यचकरिष्यति॥विज्ञायनिपुणंसर्वमागंतव्यंविशेषतः॥३५॥चारेणविदितःशत्रुःपं
डितैर्वसुधाधिपैः॥युद्धेवत्येनयत्नेनसमासाद्यनिरस्यते॥३६॥चारास्तुतेतथेत्युक्त्वाप्रहृष्टाराक्षसेश्वरं॥शार्दूलमग्रतःकृत्वात
तश्चक्रुःप्रदक्षिणं॥३७॥ततस्तेनमहात्मानंचाराराक्षसमंत्रिणं॥कृत्वाप्रदक्षिणंजग्मुर्यत्रराममसलक्ष्मणः॥३८॥तेसुवेलस्यशैल
स्यसमीपेरामलक्ष्मणौ॥प्रच्छन्नादृष्टुर्गत्वासुग्रीवविभीषणौ॥३९॥प्रेक्षमाणाश्चभूतंचबभूवुर्भयविक्लवाः॥ततुधर्मात्मना

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

दृष्टाराक्षसेंद्रेणराक्षसाः॥२२॥विभीषणेनतत्रस्थानिगृहीतायदृच्छया॥शार्दूलोग्राहितस्त्वेकःपापोयमितिराक्षसः॥२३॥मोक्षि
तःसोपिरामेणवध्यमानःप्लवंगमैः॥अनृशंसेनरामेणमोक्षितराक्षसाःपरे॥२४॥वानरैरर्दितास्तेतुविक्रांतैर्लघुविक्रमैः॥पुन
र्लंकामनुप्राप्ताःश्वसंतोनष्टचेतसः॥२५॥ततोदशग्रीवमुपस्थितास्तेचारावहिर्नित्यचरानिशाचराः॥गिरेसुवेलस्यसमीपवा
सिनन्यवेदयन्भीमबलंमहाबलाः॥२६॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेएकोनत्रिंशःसर्गः॥२९॥ततस्तमक्षो
भ्यबलंलंकाधिपतयेचराः॥सुवेलेराघवंशैलेनिविष्टंप्रत्यवेदयन्॥१॥चाराणांरावणःश्रुत्वाप्राप्तंरामंमहाबलं॥ज्ञातोद्वे
गोऽभवत्किंचिच्छार्दूलंवाक्यमब्रवीत्॥२॥अयथावच्चतेवर्णोदीनश्चासिनिशाचर॥नासिकच्चिदमित्राणांक्रुद्धानांवशमा
गतः॥३॥इतितेनानुशिष्टस्तुवाचमंदमुदीरयन्॥तदाराक्षसशार्दूलंशार्दूलोभयविह्वलः॥४॥नतेचारयितुंशक्याराजन्वानर
पुंगवाः॥विक्रांताबलवंतश्चराघवेणचरक्षिताः॥५॥नापिसंभाषितुंशक्याःसंप्रश्नोत्रनलभ्यते॥सर्वतोरक्षतेपंथावानरैःपर्वतो
पमैः॥६॥प्रविष्टमात्रेज्ञातोहंबलेतस्मिन्विचारिते॥बलाद्गृहीतोरक्षोभिर्बहुधास्मिविदारितः॥७॥जानुभिर्मुष्टिभिर्दंतैस्तलैश्चाभि
हतोभृशं॥परिणीतोस्मिहरिभिर्बलवद्भिरमर्षणैः॥८॥परिणीयचसर्वत्रनीतोहंरामसंसदं॥रुधिरस्राविदीनांगोविह्वलश्चलिं
द्रियः॥९॥हरिभिर्वध्यमानश्चयाचमानःकृतांजलिः॥राघवेणैवपरित्रातोजीवामीतियदृच्छया॥१०॥एषशैलैःशिलाभिश्चपूरयि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

त्वामहार्णवं॥ द्वारमाश्रित्य लंकायाराममस्थितिमायुधः॥१२॥ गरुडव्यूहमास्थाय सर्वतो हरिभिर्वृतः॥ मां विसृज्य महातेजा लंका
मेवाभिवर्त्तते॥१२॥ पुरद्वारमायाति क्षिप्रमेकतरं कुरु सीतां वापि प्रयच्छाशु युद्धं वा प्रदीयतां॥१३॥ मनसा संतता पाशुतच्छु
त्वा राक्षसाधिपः॥ शार्दूलस्य महद्वाक्यमथो वाचसरावणः॥१४॥ यदि मां प्रतियुध्येरन्देवगंधर्वदानवाः॥ नैव सीतां प्रदास्यामि
सर्वलोकभयादपि॥१५॥ एवमुक्त्वा महातेजा रावणः पुनरब्रवीत्॥ वारिता भवतासे के ऽत्र शूराः प्लवंगमाः॥१६॥ कीदृशाः किंप्र
माणाश्च वानरा येदुरासदाः॥ कस्य पुत्राश्च पौत्राश्च तत्त्वमाख्याहि राक्षस॥१७॥ तथा त्वत्प्रतिपत्स्यामि ज्ञात्वा तेषां बलाबले॥ अव
श्यं बलसंख्यानं कर्त्तव्यं युद्धमिच्छता॥१८॥ तदेवमुक्तः शार्दूलो रावणेन तत श्चरः॥ इदं वचनमारेभे वक्तुं रावणसन्निधः॥१९॥
अथर्क्षराजसः पुत्रो युधिराजासुदुर्जयः॥ गद्गदस्याथ पुत्रो वै जांबवानिति विश्रुतः॥२०॥ गद्गदस्याथ पुत्रान्यो गुरुपुत्रो रात
क्रतोः॥ कदनं यस्य पुत्रेण कृतमेकेन राक्षसां॥२१॥ सुषेणश्चात्र धर्मात्मा पुत्रो धर्मस्य वीर्यवान्॥ सौम्य सोमात्मजश्चात्र राजन्द
धिमुखः कपिः॥२२॥ सुमुखो दुर्मुखश्चात्र वेगदर्शी च वानरः॥ मृत्युर्वानररूपेण नूनं सृष्टः स्वयंभुवा॥२३॥ पुत्रो हुतवहस्याथ नी
लः सेनापतिः स्वयं॥ अनिलस्याथ पुत्रो यो हनुमानिति विश्रुतः॥२४॥ न मात्रा कस्य दुर्धर्षो बलवानंगदो युवा॥ मैंदश्च द्विविदश्चो
भौ बलिनावश्विसंभवौ॥२५॥ पुत्रावेव च्यवनस्याथ पंचकालांतकोपमाः॥ गजो गवाक्षो गवयः शरभो गंधमादनः॥२६॥ दशवानरको

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

प्योत्रशूराणांयुद्धकांक्षिणां॥श्रीमतांदेवपुत्राणांशेषान्नाख्यातुमुत्सहे॥२५॥पुत्रोदशरथस्यैषसिंहसंहननोयुवा॥दूषणो
निहतोयेनखरश्चत्रिशिरस्तथा॥२६॥नास्तिरामस्यसदृशोविश्रमेभुविकश्चन॥विराधोनिहतोयेनकबंधश्चांतकोपमः॥२७
वक्तुंनशक्तोरामस्यगुणान्कश्चिन्नरःक्षितौ॥जनस्थानगतायेनतावंतोराक्षसाहताः॥२८॥लक्ष्मणश्चापिधर्मात्मामातंगानामि
वर्षभः॥यस्यबाणपथंप्राप्यनजीवेदपिवासवः॥२९॥श्वेतोज्योतिर्मुखश्चात्रभास्करस्यात्मसंभवो॥वरुणस्यचपुत्रोथहेमकूटः
प्लवंगमः॥३०॥विश्वकर्मसुतोवीरोनलःप्लवगसत्तमः॥विक्रांतोबलवानत्रसुपुत्रःसमुदुर्धरः॥३१॥राक्षसानांवसिष्ठश्चतवभ्रा
ताविभीषणः॥प्रतिगृह्यपुरींलंकांराघवस्यहितेरतः॥३२॥इतिसर्वंसमाख्यातंतवेदंवानरंबलं॥सुवेलेधिष्ठितंशैलेशेषका
र्यंभवानगतिः॥३३॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेत्रिंशःसर्गः॥३०॥ततस्तमसोभ्यबलंलंकायांनृपतेश्वरा॥सुवेले
राघवंशैलेनिविष्टंप्रत्यवेदयन्॥१॥चाराणांरावणःश्रुत्वाप्राप्तंरामंमहाबलं॥ज्ञातोद्वेगोभयात्किंचित्सचिवानिदमब्रवीत्
२॥मंत्रिणःशीघ्रमायांतुसर्वेवैसुसमाहिताः॥अयंनोमंत्रकालोहिसंप्राप्तइतिराक्षसाः॥३॥तस्यतद्वासनंश्रुत्वामंत्रिणोभ्या
गमन्द्रुतं॥ततःसमंत्रयामासराक्षसैःसचिवैःसह॥४॥मंत्रयित्वातुदुर्धर्षःक्षमंयत्तदनंतरं॥विसर्जयित्वासचिवान्प्रविवेश
स्वमालयं॥५॥ततोराक्षसमादायविद्युज्जिह्वंमहाबलं॥मायाविदंमहामायःप्राविशद्यत्रमैथिली॥६॥विद्युज्जिह्वंचमायाज्ञ

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

मब्रवीद्राक्षसाधिपः॥मोहयिष्याम्यहंसीतांमाययाजनकात्मजां॥७॥शिरोमायामयंगृह्यराघवस्यनिशाचर॥मांत्वंसमुपतिष्ठ
स्वमहच्चसशरंधनुः॥८॥एवमुक्तस्तथेत्याहविद्युज्जिह्वोनिशाचरः॥दर्शयामासतांमायांसुत्रयुक्तांसरावणे॥९॥तस्यतुष्टोभर
वद्राजाप्रददौवरभूषणं॥अशोकवनिकायांचसीतादर्शनलालसः॥१०॥नैऋतानामधिपतिःसंविवेशमहाबलः॥ततोदीना
मदीनार्हांददर्शधनदानुजः॥११॥अधोमुखींशोकपरांमुपविष्टांमहीतले॥भर्तारंसमनुध्यांतीमशोकवनिकांगतां॥१२॥उ
पास्यमानांघोराभीराक्षसीभिरदूरतः॥उपसृत्यततःसीतांप्रहस्यामर्कीर्तयन्॥१३॥इदंचवचनंधृष्टमुवाचजनकात्मजां॥
सांत्वमानामयाभद्रेयमुपाश्रित्यवल्गसे॥१४॥वरहंतासतेभर्तारघवःसमरेहतः॥छिन्नंतेसर्वतोमूलंदर्पस्तेनिहतोमया
१५॥व्यसनेनात्मनःसीतेममभार्याभविष्यति॥विसृजैनांमतिंमूढेकिंमृतेनकरिष्यति॥१६॥भवस्वभद्रेभार्याणांसर्वासामीश्वरीम
म॥अल्पपुण्येनिवृत्तार्थेमूढेपंडितमानिनि॥१७॥शृणुभर्तृवधंसीतेघोरंवृत्रवधंयथा॥समायातःसमुद्रांतंमांहंतुंकिलराघ
वः॥१८॥वानरेंद्रप्रणीतेनबलेनमहतावृतः॥सन्निविष्टःसमुद्रस्यपीड्यतीरमथोत्तरं॥१९॥बलेनमहतारामोव्रजत्यस्तंदिवा
करे॥अथाध्वनिपरिश्रांतमर्धरात्रेस्थितंबलं॥२०॥सुखसुप्तंसमासाद्यचरितंप्रथमंचरैः॥तत्प्रहस्तप्रणीतेनबलेनमहता
ममः॥२१॥बलमस्यहतंरात्रौयत्रामःसलक्ष्मणः॥पट्टिशान्परिघान्खड्गान्दंडान्चक्रान्महायुधान्॥२२॥बाणजालानिमू

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

लानिभास्वरान् कूटमुद्गरान्॥ यष्टीश्चतोमरान् शक्तीन् शस्त्राणि मुसलानि च॥२३॥ उद्यम्योद्यम्य रक्षोघैर्वानरेषु निपातः॥ अथ
सुप्तस्य रामस्य प्रहस्तेन प्रमाथिना॥२४॥ असकृत्कृतहस्तेन शिरश्छिन्नं महासिना॥ विभीषणः समुत्पत्य निगृहीतो यदृच्छया॥
॥२५॥ दिशः प्रव्राजितः सर्वैर्लक्ष्मणश्च प्लवंगमैः॥ सुग्रीवो ग्रीवया शेते भग्नया प्लवगाधिपः॥२६॥ निरस्तहनुकः शेते हनूमान् रा
क्षसैर्हतः॥ जांबवानथ जानुभ्यां पतन्निहतो युधि॥२७॥ पट्टिशैर्बहुभिश्छिन्नौ निकृत्तौ पादपौ यथा॥ मैंदश्च द्विविदश्चोभौ
निहतौ वानरर्षभौ॥२८॥ निश्वसंतौ रुदंतौ तौ रुधिरेण परिप्लुतौ॥ असिना शायितौ छिन्नौ मध्ये त्वरिनिषूदनौ॥२९॥ अनुतिष्ठति
मेहिन्यां पनसो पनसो यथा॥ नाराचैर्बहुभिश्छिन्नः शेते दर्यो दरीमुखः॥३०॥ कुमुदस्तु महातेजा निकुंभः सायकैः कृतः॥ अंगदो
बहुभिश्छिन्नः शरैरग्रासाद्यराक्षसैः॥३१॥ पतितो रुधिरोद्गारी क्षितौ निपतितो गदः॥ हरयो मथिता नागैरथजालैस्तथा परे॥३२॥ श
यानामृदितास्तत्र वायुवेगैरिवांबुदाः॥ त्रसंतश्चापरे त्रस्ता हन्यमाना इतस्ततः॥३३॥ अभिद्रुतास्तु रक्षोभिः सिंहैरिव महाद्वि
पाः॥ सागरे पतिताः केचित् केचिद्गगनमाश्रिताः॥३४॥ वृक्षावृक्षान् समारूढा वानरैर्गतिमिच्छताः॥ सागरस्य च तीरेषु शैलेषु प
चवनेषु च॥३५॥ पिंगलाक्षा विरूपाक्षैर्बहुभिर्वहवो हताः॥ एवं तत्र हतो भर्ता ससैन्यो मम सेनयाः॥३६॥ क्षतजार्द्रैरजोध्वस्तमि
दं चास्याहतं शिरः॥ ततः परमदुर्धर्षो रावणो राक्षसेश्वरः॥३७॥ सीतायामुपशृण्वंत्यां राक्षसीमिदमब्रवीत्॥ राक्षसं क्रूरकर्माणं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

विद्युज्जिह्वं समानय ॥३८॥ येन तद्राघवशिरः संग्रामात्त्वयमाहृतं ॥ विद्युज्जिह्वस्ततोगत्वा शिरस्तत्सशरासनं ॥३९॥ प्रणामं शि
रसा कृत्वा रावणस्याग्रतः स्थितः ॥ तमब्रवीत्ततो राजा रावणो राक्षसैः स्थितं ॥४०॥ विद्युज्जिह्वं महाजिह्वं समीपपरिवर्तिनं ॥ अग्रतः कु
रु सीतायाः शीघ्रं दाशरथेः शिरः ॥४१॥ अवस्थां पश्चिमां भर्तुः कृपणां साधु पश्यतु ॥ एवमुक्तेन तद्रक्षः शिरस्तस्य प्रियदर्शनं ॥४२॥ उ
पनिक्षिप्य सीतायाः क्षिप्रमंतरधीयत ॥ रावणश्चापि विक्षिप्य भास्करं कार्मुकं महत् ॥४३॥ त्रिषु लोकेषु विख्यातं सीतामिदमि
ति ब्रुवन् ॥ इदं तत्तव रामस्य कार्मुकं ज्यासमाहृतं ॥४४॥ इह प्रस्थे हि नानीतं तं हत्वा निशि मानुषं ॥ स विद्युज्जिह्वेन सहैव तच्छिरोध
नूश्च भूमौ विनिकीर्य रावणः ॥ विदेहराजस्य सुतां यशस्विनीं ततोब्रवीन्नो भव मे वशानुगा ॥४५॥ इत्यार्षे श्रीरामायणे वाल्मी
कीये युद्धकांडे एकत्रिंशत्सर्गः ॥३१॥ सा सीता तच्छिरो दृष्ट्वा तच्च कार्मुकमुत्तमं ॥ सुग्रीवप्रतिसंसर्गं आख्यातं च हनूमता ॥१॥ तय
ने मुखवर्णं च भर्तुस्तत्सदृशं मुखं ॥ केशान् केशांतदेशं च तं च चूडामणिं शुभं ॥२॥ एतैः सर्वैरभिज्ञानैरभिज्ञाय सुदुःखिता ॥ विज
गर्हे च कैकेयीं क्रोशंती कुररी यथा ॥३॥ सकामा भव कैकेयि हतो यं कुलनंदनः ॥ कुलमुत्सादितं सर्वं यथा कलहशीलया ॥४॥
आर्येण किं तु कैकेय्याः कृतं रामेण विप्रियं ॥ यन्मया चीरवसनं दत्त्वा प्रव्राजितो वनं ॥५॥ इदानीं सहि धर्मात्मा राक्षसैश्च कथं
हतः ॥ एवमुक्त्वा तु वैदेही वेपमाना तपस्विनी ॥६॥ जगाम जगतीं बाला छिन्ना तु कदली यथा ॥ सा मुहूर्तात्समाश्वास्य प्रतिलभ्य च

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

चेतनां ॥ ९ ॥ तच्छिरसमुघ्राय विललापायतेक्षणा ॥ हा हतास्मि महाबाहो वीरव्रतमनुव्रता ॥ ८ ॥ इमां ते पश्चिमावस्थां गतास्मि वि
धवाकृता ॥ अथ मम रणं नार्या भर्तुर्वैगुण्यमुच्यते ॥ ९ ॥ सुव्रतः साधुवृत्तायाः संवृत्तस्त्वं ममाग्रतः ॥ दुःखाद्दुःखं प्रपन्नायाः मग्ना
याः शोकसागरे ॥ १० ॥ सोहि मामुद्यतस्त्रातुं सोपि त्वं विनिपातितः ॥ साम्प्रश्रूर्मम कौसल्या त्वया पुत्रेण राघव ॥ ११ ॥ वत्सेनेव यथा धेनु
र्विवत्सा वत्सलाकृता ॥ आदिष्टं दीर्घमायुस्ते दैवज्ञैरपि राघव ॥ १२ ॥ अनृतं वचनं तेषां अल्पायुरसि राघव ॥ अथवा नरपतिप्रज्ञा
प्राज्ञस्यापि सतस्तव ॥ १३ ॥ प्रपचत्येनं यथाकालो भूतानां प्रभवोद्ययं ॥ अदृष्टं मृत्युमापन्नः कस्मात्त्वं यशस्विन् ॥ १४ ॥ यमना
नामुपायज्ञः कुशलोद्यसि वर्जने ॥ तथा त्वं संपरिष्वज्य रौद्यातिनृशंसया ॥ १५ ॥ कालरात्र्या मया छिन्नहृतः कमललोचन ॥
कच्चिद्दोषे महाबाहो मां विहाय तपस्विनीं ॥ १६ ॥ प्रियामिव शुभां नारीं पृथिवीं पुरुषर्षभ ॥ अचिंतसततं यत्नाद्गंधमाल्यैर्मया
तव ॥ १७ ॥ इदं ते मत्प्रियं वीर धनुः कनकभूषणं ॥ पित्रा दशरथेन त्वं श्वसुरेण ममानघ ॥ १८ ॥ सर्वैश्च पितृभिः सार्धं नूनं स्वर्गं समा
गतः ॥ १९ ॥ दिवि नक्षत्रभूतस्त्वं महत्कर्म कृतं प्रियं ॥ पुण्यं राजर्षिवंशं त्वमात्मनः समुपेक्षसे ॥ २० ॥ किं मां न प्रेक्षसे राजन् किं मां
न प्रतिभाषसे ॥ बालां बालेन संप्राप्तां भार्यां मां सहचारिणीं ॥ २१ ॥ संश्रुतं गृहणा पाणिं चरिष्यामीति यत्त्वया ॥ स्मरंतं मम का कुर
त्स्यनयमामपि दुःखितां ॥ २२ ॥ कस्मान्मामपहाय त्वं गतो गतिमतां वर ॥ अस्माल्लोकादमुं लोकं त्यक्त्वा मामपि दुःखितां ॥ २३ ॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

कल्याणैरुचिरंयत्तत्परिष्वक्तंमयैवतु॥क्रव्यादैस्तच्छरीरंतेनूनंविपरिकृष्यते॥२३॥अग्निष्टोमादिभिर्यज्ञैरिष्टवानाप्तदक्षिणैः॥अ
ग्निहोत्रेणसंस्कारंकेनत्वंनतुलप्स्यते॥२४॥प्रव्रज्यामुपपन्नानांत्रयाणामेकमागतं॥परिप्रक्ष्यतिकौसल्यालक्ष्मणंशोकलालसं॥२५॥
सतस्यात्परिपृच्छंत्यावधंमित्रबलस्यते॥तवचाख्यातेनूनंनिशायांराक्षसैर्वधं॥२६॥सात्वांसुप्तंहतंज्ञात्वामांचरक्षोगृहंगतं॥हृद
येनावदीर्णेननभविष्यतिराघव॥२७॥ममहेतोरनार्यायाअनर्हपार्थिवात्मजः॥रामःसागरमुत्तीर्यवीर्यवान्गोष्पदेहतः॥२८॥
अहंदाशरथेनोढामोहात्त्वकुलपांसनी॥आर्यपुत्रस्यरामस्यभार्यामृत्युरजायत॥२९॥नूनमन्यांमयाजातिंवारितंदानमुत्तमं॥
याहमद्यैवशोचामिभार्यासर्वातिथेरिह॥३०॥साधुघातयमांक्षिप्रंरामस्यापरिरावणा॥समानयपतिंपत्न्याकुरुकल्याणमुत्त
मं॥३१॥शिरसाशिरश्चास्यकायंकायेनयोजय॥रावणानुगमिष्यामिगतिंभर्तुर्महात्मनः॥३२॥इतीवदुःखसंतप्ताविललापाय
तेक्षणा॥भर्तुःशिरोधनुश्चैवददर्शजनकात्मजा॥३३॥एवंलालप्यमानायांसीतायांत्वराक्षसः॥अभिचक्रामभर्तारंअनीकस्थः
कृतांजलिः॥३४॥विजयस्वार्यपुत्रेतिसोभिवाद्यप्रसाद्यच॥न्यवेदयदनुप्राप्तंप्रहस्तंवाहिनीपतिं॥३५॥अमात्यैःसहितःसर्वैः
प्रहस्तसमुपस्थितः॥तेनदर्शनकामेनअहंप्रस्थापितःप्रभो॥३६॥नूनमस्मिंमहाराजराजभावाक्षमान्वितं॥किंचिदात्ययिकं
कार्यंतेषांत्वंदर्शनंकुरु॥३७॥एतत्श्रुत्वादशग्रीवोराक्षसप्रतिवेदितुं॥अशोकवनिकांत्यक्त्वामंत्रिणांदर्शनंययौ॥३८॥सतुसर्वे

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

समर्थैर्वमंत्रिभिः कृत्यमात्मनः॥ सभां प्रविश्य विदधे विदित्वा रामविक्रमं॥३९॥ अंतर्धानं तु तत्रैव तच्च कार्मुकमुत्तमं॥ ज
गाम रावणस्यैव निर्याणसमनंतरं॥४०॥ राक्षसेंद्रस्तु तैः सार्धं मंत्रिभिर्भीमविक्रमैः॥ संमंत्रयामास तदा रामकार्यं विनिश्चयं॥
॥४१॥ अविदूरस्थितान् सर्वान् बलाध्यक्षान् हितैषिणः॥ अब्रवीत् कालसदृशो रावणो राक्षसाधिपः॥४२॥ शीघ्रं भेरीनिनादेन स्फुट
कोणाहतेन मे॥ समानयध्वं सैन्यानि वक्तव्यं च न कारणं॥४३॥ ततस्तथेति प्रतिगृह्य तद्वचस्तदैव दूताः सहसा महाबलं॥ सम
नयंश्चैव समागतं च ते न्यवेदयन् भर्तरि युद्धकांक्षिणः॥४४॥ इत्यार्षे श्रीरामायणे वाल्मीकीये युद्धकांडे द्वात्रिंशः सर्गः॥३२

सीतां तु मोहितां दृष्ट्वा सरमा नाम राक्षसी॥ आससादाशु वैदेहीं प्रियं प्रियकरी सखी॥१॥ मोहितो राक्षसेंद्रेण सीतां परमदुः
खितां॥ आश्वासयामास तदा सरमा मृदुभाषिणी॥२॥ सा हि तत्र कृतामित्रं सीतायारक्षमाणया॥ रक्षंती रावणादिष्टा सानु
क्रोशा दृढव्रता॥३॥ सा ददर्श सखीं सीतां सरमां नष्टचेतनां॥ उपावृत्योत्थितां ध्वस्तां वडवामिव पांसुषु॥४॥ तां समाश्वासयामा
स सखी स्नेहेन सुव्रता॥ उक्तायद्रावणेन त्वं प्रत्युक्तश्च स्वयं त्वया॥५॥ सखी स्नेहेन ते भीरु मया सर्वं प्रतिश्रुतं॥ लीनया गृहनेशू
न्ये भयमुत्सृज रावणात्॥६॥ तवहेतोर्विशालाक्षि न हि जीवितं प्रियं॥ ससंभ्रांतश्च निष्क्रांतो यत्कृते राक्षसेश्वरः॥७॥ न च मे विदि
तं सर्वमभिनिष्क्रम्य मैथिलि॥ नरकं सौप्तिकं कर्तुं रामस्य विदितात्मनः॥८॥ वधश्च पुरुषव्याघ्रे तस्मिन्नेवोपपद्यते॥ तत्रैव बान

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

राहंतुंशक्याःपादपयोधिन॥९॥सुरादेवर्षभेणेवराघवेणसुरक्षिता॥दीर्घवृत्तभुजःश्रीमान्महोरस्कःप्रतापवान्॥१०॥धन्वीसंह
ननोपेतोधर्मात्माभुविविश्रुतः॥विक्रांतोरक्षितानित्यमात्मनश्चपरस्यच॥११॥लक्ष्मणेनसहभ्रात्राकुशलीनयशास्त्रवित्॥
हंतापरबलौघानामचिंत्यबलपौरुष॥१२॥नहतोराघवःश्रीमान्सीतेशत्रुनिबर्हणः॥अयुक्तबुद्धिकृत्येनसर्वभूतविरोधिना॥
१३॥इयंत्वयुक्तारौद्रेणमायेयामायाविनात्वयि॥शोकस्तेविगतःसर्वःकल्याणंत्वामुपस्थितं॥१४॥भूयस्त्वांभजतेलक्ष्मीःप्रियंतेभ
वतिशृणु॥उत्तीर्यसागरंरामःसहवानरसेनया॥१५॥सन्निविष्टःसमुद्रस्यतीरमासाद्यदक्षिणं॥दृष्टोमेपरिपूर्णार्थःकाकुत्स्थःस
हलक्ष्मणः॥१६॥सहितैःसागरांतस्थैर्बलैस्त्रिपृतिरक्षिता॥अनेनप्रेषितायेचराक्षसालघुविक्रमाः॥१७॥राघवस्तीर्णदृष्टेवंप्र
वृत्तिस्तैरिहाहृता॥सतांश्रुत्वाविशालाक्षिप्रवृत्तिंराक्षसाधिपः॥१८॥एवमंत्रयतेसर्वैःसचिवैःसहरावणः॥इतिब्रुवाणासर
माराक्षसीसीतयासह॥१९॥सर्वोद्योगेनसैन्यानांशब्दमुश्रावभैरवं॥दंडनिर्घातवादित्राःश्रुत्वाभेर्योमहास्वनं॥२०॥उवाचसर
मासीतामिदंमधुरभाषिणी॥सन्नाहजननीह्येषाभैरवाभीरुभैरिका॥२१॥भेरीनादंचगंभीरंशृणुतोयदनिस्वनं॥कल्प्यंते
मत्तमातंगायुज्यंतेरथवाजिनः॥२२॥हृष्यंतेतुरसोगाढाःपाशहस्ताःसहस्रशः॥तत्रतत्रचसन्नद्धाःसंपतंतिसहस्रशः॥२३॥
आपूर्यंतेराजमार्गाःसैन्यैरद्भुतदर्शनैः॥वेगवद्भिर्नदद्भिश्चतोयौघैरेवसागराः॥२४॥शस्त्राणांचप्रसन्नानांचर्मणांवर्मणांत

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

था॥रथवाजिगजानांचहृषितानांचरक्षसां॥२०॥संभ्रमोरक्षसामेषहृषितानांतरस्विनां॥प्रभाविसृजतांपश्यनानावर्णासमुत्थितां
॥२१॥वनंनिर्दहतोधर्मेयथारूपविभावसोः॥घंटानांशृणुनिर्घोषंरथानांनेमिनिस्वनं॥२२॥हयानांहेषमाणानांशृणुतूर्यध्वनिंत
था॥उद्यतायुधहस्तानांराक्षसेंद्रानुयायिनां॥२३॥संभ्रमोरक्षसामेषांतुमुलंलोमहर्षणं॥श्रीस्त्वांभजंतिशोकघ्नारक्षसांभयमा
गतां॥२४॥रामात्कमलपत्राक्षाद्दैत्यानामिववासवात्॥अवजित्यजितक्रोधस्तमचिंत्यपराक्रमः॥२५॥रावणंसमरेहत्वाभर्तात्वा
धिगमिष्यति॥विक्रमिष्यतिरक्षस्सुभर्तातेसहलक्ष्मणः॥२६॥यथाशत्रुषुशत्रुघ्नोविष्णुनासहवासवः॥आगतस्यहिरामस्य
क्षिप्रमेकगतांसतीं॥२७॥अहंद्रक्ष्यामिसिद्धार्थांत्वांशत्रौविनिपातिते॥अस्त्राण्यानंदजानित्वंवर्तयिष्यसिजानकि॥२८॥समा
गम्यपरिष्वक्तास्थोरसिमहोरसः॥अचिरान्मोक्ष्यसेसीतेदेवितेजग्घनंगतां॥२९॥धृतामेकाबहुन्मासान्चेणीरामोमहाबलः॥त
स्यदृष्ट्वामुखंदेविपूर्णचंद्रमिवोदितं॥३०॥मोक्ष्यसेशोकजंवारिनिर्मोकमिवपन्नगी॥रावणंसमरेहत्वानचिरादेवमैथिलि॥३१
त्वयासमग्रेप्रियया सुखार्होलप्स्यतेसुखं॥सभाजितात्वंरामेणमोदिष्यसिमहात्मना॥३२॥सुवर्षेणसमायुक्तायथासस्येनमेदि
नी॥गिरिवरमभितोविवर्तमानोहयइवमंडलमाश्रयःकरोति॥तमिहशरणमभ्युपैहिदेविदिवसकरंप्रभवोत्थयंप्रजानां
३३॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेत्रयस्त्रिंशःसर्गः॥३३॥अथतांजातसंतापांतेनवाक्येनमोहिता॥सरमाल्हारया

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

मासपृथिवीद्यौरिवांभसा॥१॥ततस्तस्याहितंसंख्याश्चिकीर्षंतिसखीवचः॥उवाचकालेकालज्ञांस्मितपूर्वाभिभाषिणी॥२॥उत्सहे
यमहंगत्वातद्वाक्यमसितेक्षणे॥निवेद्यकुशलंरामेप्रतिछन्नानिवर्णितुं॥३॥नहिमेक्रममाणायानीरालंबेविहायसि॥समर्थो
गतिमन्वेतुपवनोगरुडोपिवा॥४॥एवंब्रुवाणांतांसीतासरमामिदमब्रवीत्॥मधुरंश्लक्ष्णयावाचापूर्वशोकाभिपन्नया॥५॥सम
र्थागगनंगंतुमपिचत्वंरसातलं॥अवगच्छाम्यकर्तव्यंकर्तव्यंतेमदंतरे॥६॥मत्प्रियंयदिकर्तव्यंयदिबुद्धिःस्थिरातव॥ज्ञातुमि
च्छामितंगत्वाकिंकरोतीतिरावणं॥७॥सहिमायाबलंक्रूरोरावणःशत्रुरावणः॥मांमोहयतिदुष्टात्मापीतमात्रेववारुणी॥८॥
उद्विग्नाशंकिताचास्मिनस्वस्थंचमनोमम॥नद्रव्याच्चाहमुद्विग्नान्मशोकवनिकांगता॥९॥यदिनामकथंतस्यनिश्चितंवा
पियद्भवेत्॥निवेदयेथाःसर्वंतद्वरोमेस्यादनुग्रहः॥१०॥तत्रैवंब्रुवतींसीतांसरमामृदुभाषिणी॥उवाचवदनंतस्याःस्पृशंतीवा
प्यविक्लवं॥११॥एषतेयद्यभिप्रायस्तस्माद्गच्छामिजानकि॥गृह्यशत्रोरभिप्रायमुपावृत्तांचपश्यमां॥१२॥एवमुक्त्वाततोगत्वास
मीपस्तस्यरक्षसः॥शुश्रावकथितंतस्यरावणस्यसमंत्रिणः॥१३॥तांश्रुत्वानिश्चयंतस्यनिश्चयज्ञादुरात्मनः॥पुनरेवागमत्क्षिप्रम
शोकवनिकांशुभां॥१४॥सात्रविष्टापुनस्तत्रददर्शजनकात्मजां॥प्रतीक्षमाणांतामेवभ्रष्टपद्ममिवश्रियं॥१५॥तांतुसीतापुनःप्राप्ता
सरमांवल्गुभाषिणीं॥परिष्वज्यचसुस्निग्धंददौचस्वयमासनं॥१६॥इहासीनासुखंसर्वमाख्याहिममतत्त्वतः॥क्रूरस्यनिश्चयं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

तस्यरावणस्यसमंत्रिणः॥१९॥जनन्याराक्षसेंद्रोवैत्वन्मोक्षार्थंमहद्वचः॥अथविधेनवैदेहिमंत्रिवृद्धेनचोदित॥२०॥दीयतामभिसत्कृत्यमनुजेंद्रायमैथिली॥निर्दर्शनंतेपर्याप्तंजनस्थानेयदद्भुतं॥२१॥लंघनंचसमुद्रस्यदर्शनंचहनूमतः॥वधंचराक्षसंयुद्धेकःकुर्यान्मानुषोयुधि॥२२॥एवंसमंत्रिवृद्धेनमात्राचबहुबोधितः॥नत्वामुत्सहतेत्यक्तुमर्थमर्थपरोयथा॥२३॥नोत्सहसमृतोमोक्तुंयुद्धेत्वामितिमैथिली॥सामात्यस्यनृशंसस्यनिश्चयोत्यैषवर्तते॥२४॥नदेवासुस्थिराबुद्धिर्मृत्युलोभादुपस्थिताभयान्नशक्तस्त्वंमोक्तुमनिरस्तस्तुसंयुगे॥२५॥राक्षसानांचसर्वेषामात्मनश्चवधेनहि॥निहत्यरावणंसंख्येसर्वथानिशितैःशरैः॥२६॥प्रतिनेष्यतिरामस्त्वामयोध्यामसितेक्षणे॥एतस्मिन्नंतरेशब्दोभेरीशंखसमाकुलः॥२७॥श्रुतोवानरसैन्यानांकंपयन्धरणीतलं॥श्रुत्वातुतद्वानरसैन्यनादंलंकागताराक्षसराजभृत्याः॥२८॥हतौजसोदैन्यपरीतचेष्टाश्चेयोनपश्यंतिनृपस्यदोषे॥२९॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेचतुस्त्रिंशःसर्गः॥३४॥तेनशंखविमिश्रेणभेरीशब्देनराघवः॥उपयातिमहाबाहूरामःपरपुरंजयः॥१॥तंनिनादंनिशम्याथरावणोराक्षसेश्वरः॥मुहूर्तंध्यानमास्थायसचिवानिदमब्रवीत्॥२॥अथतान्सचिवांस्तत्रसर्वानाभाष्यरावणः॥सभांसन्नादयन्सर्वमित्युवाचमहाबलः॥३॥जगत्संतापनःक्रूरोगर्हयन्हितवादिनः॥तरणंसागरस्यास्यविक्रमंबलपौरुषं॥४॥यदुक्तवंतोरामस्यभवंतस्तन्मयाश्रुतं॥भवतश्चाप्यहंवेद्मियुद्धेसत्यपराक्रमान्॥५॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

तूष्णीकानीक्षतेन्योन्यंविहिलाराम विक्रमं॥ततस्तु सुमहाप्राज्ञो माल्यवान्नाम राक्षसः॥६॥रावणस्यवचः श्रुत्वामातुःपैतामहोब्र
वीत॥विद्यास्वपिविनितो योराजाराजन्नयानुगः॥७॥सशोस्तिचिरमैश्वर्यमरीश्चकुरुतेवशे॥सदधानोहिकालोनविगृह्णाश्वा
रिभिःसह॥८॥स्वपक्षेवर्धनंकुर्वन्महदैश्वर्यमश्नुते॥हीयमानेनकर्तव्योराज्ञासंधिःसमेनच॥९॥नशत्रुमवमन्येतज्यायान्कुर्व
तविग्रहं॥ततूमत्यंरोचतेसंधिस्तवरामेणरावण॥१०॥तदर्थमभियुक्तोस्मिसीतातस्मैप्रदीयतां॥तस्यदेवर्षयःसर्वेगंधर्वाश्च
जयैषिणः॥११॥विरोधंमास्मगमस्तेनसंधिस्तेतेनरोचतां॥अस्मद्भगवान्पक्षौद्वावेवहिपितामहः॥१२॥सुराणामसुराणांचधर्मा
धर्मौतदाश्रियौ॥धर्मोहिश्रूयतेपक्षअमराणांमहात्मनां॥१३॥अधर्मोश्रूयतेपक्षोराक्षसांपक्षस्त्वसुराणांचरावण॥धर्मोवैग्रसते
ऽधर्मंततःकृतमभूद्युगं॥१४॥अधर्मंग्रसतेधर्मंततस्तिष्यःप्रवर्तते॥तत्त्वयाचरतालोकान्धर्मोविनिहतोमहान्॥१५॥अध
र्मःप्रगृहीतश्चतेनास्मद्बलिनःपरैः॥प्रमादात्प्रवृद्धस्तेऽधर्मोहिग्रसतेहिनः॥१६॥विवर्द्धयतिपक्षंचसुराणांसुरभावन॥विषये
षुप्रसक्तेनयत्किंचित्कारणात्त्वया॥१७॥ऋषीणामग्निकल्पानामुद्वेगोजनितोमहान्॥तेषांप्रभावोदुर्धर्षःप्रदीप्तइवपावकः
॥१८॥तपसाभावितात्मानोधर्मस्यानुग्रहेरताः॥सुखैर्यज्ञैर्यजंत्यन्येनित्यंतैस्तैर्द्विजातयः॥१९॥जुह्वत्यग्नींश्चविधिवद्वेदां
श्चोच्चैरधीयते॥अभिभूयचरक्षांसिब्रह्मघोषानुदीरयन्॥२०॥दिशोविप्रद्रुताःसर्वेस्तनयित्नुरिवोष्णगे॥ऋषीणामग्निकल्पा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नामग्निहोत्रसमुत्थितः॥२१॥आदत्तेरक्षसांतेजो धूमोव्याप्यदिशोदश॥तेषुतेषुचदेशेषुपुण्येष्वेवधृतव्रतैः॥२२॥चर्यमाणं
तपस्तीव्रंसंतापयतिराक्षसान्॥देवदानवयक्षेभ्योगृहीतश्चवरस्त्वया॥२३॥मानुषावानराऋक्षागोलांगूलामहाबलाः
बलवंतइहागत्यगर्जंतिदृढविक्रमाः॥२४॥उत्पातान्विविधान्दृष्ट्वाघोरान्बहुविधान्बहून्॥विनाशमनुपश्यामिसर्वेषांर
क्षसामहं॥२५॥खराभिस्तनिताघोरामेघाःप्रतिभयंकराः॥शोणितेनाभिवर्षंतिलंकामुस्मिन्सर्वतः॥२६॥रुदतोवाहनानांच
प्रपतंत्यश्रुबिंदवः॥राज्ञोध्वस्ताविवर्णाश्चनप्रभांतियथापुरा॥२७॥आलागोमायवोगृध्रावाश्यंतिचसुभैरवं॥प्रविश्यलं
कामनिशंसमवायांश्चकुर्वते॥२८॥कालिकापांडुरैर्दंतैःप्रहसंत्यग्रतःस्थिताः॥स्त्रियःस्वप्नेषुमुह्यंत्योगृहाण्यप्रतिभाष्यच
२९॥गृहाणांबलिकर्माणिश्वानपर्युपसेवते॥खरागोषुप्रजायंतेमूषिकानकुलेषुच॥३०॥मार्जाराद्वीपिभिःसार्धंसूकराःश्वान
कैःसह॥किन्नराराक्षसैश्चापिसमेयुर्मानुषैःसह॥पांडुराराक्तपादाश्चविहगाःकालचोदिताः॥राक्षसानांविनाशायकपोताविचरंतिच॥३२॥चीचीकुचीतिवाश्यंत्यःसारिकावेश्मसुस्थिताः॥पतंतिग्रथिताश्चापिनिर्जिताःकालहेतिभिः॥३३॥पक्षिणश्चमृगाःसर्वेप्रत्यादित्यंरुदंतिच॥करालोविकटोमुंडःपुरुषःकृष्णपिंगलः॥३४॥कालोगृह्णातिसर्वेषांकालेकालेचवेक्षते॥एतान्यन्यानिदुष्टानिनिमित्तान्युत्पतंतिच॥३५॥विक्लुप्तमन्यामहेरामंमानुषंरूपमास्थितं॥नहिमानुषमात्रोसौराघवोदृढविक्रमः॥३६॥येनबद्धःसमुद्रेच

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

ससेतुपरमाद्भुतः॥कुरुष्वनरराजेनसंधिरामेणरावण॥३॥ज्ञात्वावधार्यकर्माणिक्रियतामायतिक्षमं॥इदंवचस्तस्यनिगद्यमाल्यवान्स
रीक्ष्यरक्षोधिपतेर्मनःपुनः॥अनुत्तमेपूत्तमपौरुषोबलीबभूवतूष्णीमनवेक्ष्यरावणं॥३९॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडे
पंचत्रिंशःसर्गः॥३५॥ततुमाल्यवतोवाक्यंहितमुक्तंदशाननः॥नमर्षयतिदुष्टात्माकालस्यवशमागतः॥१॥सबध्वाभ्रुकुटिंवक्रेक्रोध
स्यवशमागतः॥अमर्षात्परिवृत्ताक्षोमाल्यवंतमथाब्रवीत्॥२॥हितबुद्ध्यायदहितंवचःपरुषमुच्यते॥परपक्षंप्रविश्येवनैतच्छोच्य
गतंमम॥३॥मानुषंकृपणंराममेकंशाखामृगाश्रयं॥समर्थंमन्यसेकेनत्वंकपिवनालयं॥४॥रक्षसामीश्वरंमांचदेवानांचभयंकरं
हीनंमांमन्यसेकेनअहीनंसर्वविक्रमैः॥५॥वीरद्वेषेणवाशंकेपक्षपातेनवारिपोः॥त्वयाहंपरुषाद्युक्तःपरप्रोत्साहनेनवा॥६॥प्रभ
वंतंपदस्थंहिपरुषंकोभिभाषते॥पंडितःशास्त्रतत्वज्ञोविनाप्रोत्साहनेनवा॥७॥आनीयचवनात्सीतांपद्महीनमिवश्रियं॥किम
र्थंप्रतिदास्यामिराघवस्यभयादहं॥८॥हतंवानरकोटीभिःससुग्रीवंसलक्ष्मणं॥पश्यकैश्चिदहोभिश्चराघवंनिहतंमया॥९॥इंद्रे
यस्यनतिष्ठंतिदेवतान्यपिसंयुगे॥सकस्माद्रावणोयुद्धेभयमाहरयिष्यति॥१०॥द्विधाभज्येयमप्येवननमेयंतुकस्यचित्॥एषमे
सहजोदोषःस्वभावोदुरतिक्रमः॥११॥यदितावत्समुद्रेतुसेतुबद्धोयदृच्छया॥रामेणविस्मयकोत्रयेनतेभयमागतं॥१२॥ननुतीर्त्वा
र्णवंरामःसहवानरसेनया॥प्रतिजानामितेसत्यंनजीवन्प्रतियास्यति॥१३॥एवंब्रुवाणंसंरब्धंरुष्टंविज्ञायरावणं॥व्रीडितोमाल्यवा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

न्वाक्यं नोत्तरं प्रत्यपद्यत ॥१४॥ जयाशिषा च राजानं वर्धयित्वा यथोचितं ॥ माल्यवानभ्यनुज्ञातो जगाम स्वनिवेशनं ॥१५॥ रावणस्तु स
हामात्यो मंत्रयित्वा विसृष्य च ॥ लंकायास्तु तदा गुप्तिं कारयामास राक्षसः ॥१६॥ प्राच्यां दिशि च पूर्वस्यां प्रहस्तं द्वारि राक्षसं ॥ दक्षिणस्यां
महावीर्यौ महापार्श्वमहोदरौ ॥१७॥ पश्चिमायां मथद्वारि पुत्रमिंद्रजितं तदा ॥ प्राच्यां दिशि महामायं राक्षसैर्बहुभिर्वृतं ॥१८॥ उत्तरस्यां
पुरद्वारि प्राच्यां दिशि शुकसारणौ ॥ स्वयं चात्र गमिष्यामि मंत्रिणस्तानुवाच ह ॥१९॥ राक्षसं तु विरूपाक्षं महावीर्यपराक्रमं ॥ मध्यमे
ऽस्थापयद्गुल्मे बहुभिः सह राक्षसैः ॥२०॥ एवं विधानं लंकायां कृत्वा राक्षसपुंगवः ॥ कृतकृत्यमिवात्मानं मन्यते कालचोदितः ॥२१॥
विसर्जयामास ततः समंत्रिणो विज्ञाप्य पुरमीश्वरः ॥ स्वपुष्कलं ॥ जयाशिषा मंत्रिगणेन पूजितो विवेश सोंतःपुरमृद्धिमन्महत् ॥२२॥
इत्यार्षे श्रीरामायणे वाल्मीकीये युद्धकांडे षट्त्रिंशः सर्गः ॥३६॥ नरवानरराजानौ सतु वायुसुतः कपिः ॥ जांबवान्ऋक्षराजश्च राक्षस
श्च विभीषणः ॥ अंगदो वालिपुत्रश्च सौमित्रिः शरभः कपिः ॥ सुषेणः सहदायादो मैंदो द्विविद एव च ॥ गजो गवाक्षो कुमुदो नलो थ
पनसस्तथा ॥ अमित्रविषयं प्राप्ताः समवेताः समर्थयन् ॥३॥ इयं सा लक्ष्यते लंका पुरा रावणपालिता ॥ सासुरोरगगंधर्वैः सर्वैरपि सु
दुर्जया ॥४॥ कार्यसिद्धिं पुरस्कृत्य मंत्रयध्वं विनिर्णये ॥ नित्यं सन्निहितात्र रावणो राक्षसाधिपः ॥५॥ अथ तेषु ब्रुवाणेषु राव
णावरजो ब्रवीत् ॥ वाक्यमग्र्यमग्र्यपदवत्पुष्कलार्थं विभीषणः ॥६॥ अनलः शरभश्चैव संपातिर्विहगस्तथा ॥ गत्वा लंकां ममामात्याः

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

पुरीपुनरिहागताः॥७॥भूत्वाशकुनयःसर्वेप्रविष्टाश्चरिपोर्बलं॥विधानंविहितंयच्चतंचदृष्ट्वामुपस्थितां॥संविधानंयदाकुरुतेरावण
स्यदुरात्मनः॥रामतद्वचतःसर्वंयथातथ्येनमेशृणु॥९॥पूर्वेप्रहस्तःसबलोद्वारमासाद्यतिष्ठति॥दक्षिणंचमहावीर्यौमहापार्श्वमहो
दरौ॥१०॥इंद्रजित्पश्चिमद्वारंराक्षसैर्बहुभिर्वृतः॥परिघासिधनुष्मद्भिःशूलमुद्गरपाणिभिः॥११॥नानाप्रहरणैःशूरैरावृतोरावणात्म
जः॥राक्षसानांसहस्रैस्तुबहुभिःशस्त्रपाणिभिः॥१२॥मुक्तःपरमसंविग्नोराक्षसैर्बहुभिर्वृतः॥उत्तरंनगरद्वारंरावणःस्वयमास्थितः
॥१३॥विरूपाक्षस्तुमहताशूलखड्गधनुष्मता॥बलेनराक्षसैःसार्द्धंमध्यमंगुल्ममास्थितः॥१४॥एतानेवंविधान्गुल्मानलंकायांसमु
दीक्ष्यते॥मामकाःसचिवाःसर्वेशीघ्रंपुनरिहागताः॥१५॥गजानांचरथानांचसहस्रमयुतंतथा॥हयानामयुतेद्वेचसाग्राकोटीश्चरक्ष
सां॥१६॥विक्रांताबलवंतश्चसंयुगेष्वपराजिताः॥दृष्टाराक्षसराजस्यनित्यमेतेनिशाचराः॥१७॥एकैकस्यात्रयुद्धार्थंराक्षसस्यविशां
पते॥परिवारासहस्राणांसहस्रंमुपतिष्ठते॥१८॥एतांप्रवृत्तिंलंकायामंत्रिभ्योक्तोविभीषणः॥एवमुक्तामहाबाहुराक्षसांस्तानदर्शयत्
१९॥लंकायांसचिवैःसर्वैरामायप्रत्यवेदयत्॥रामंकमलपत्राक्षमिदमुत्तरमब्रवीत्॥२०॥रावणावरजःश्रीमान्रामप्रियचिकीर्ष
या॥कुबेरंतुयदारामरावणःप्रत्ययुध्यत॥२१॥षष्टिःशतसहस्राणितदानिर्योतिराक्षसाः॥पराक्रमेणवीर्येणसत्वेनचबलेनच॥२
सहसायत्रदर्पेणरावणस्यदुरात्मनः॥अवमन्युर्नकर्तव्योरोषयेत्वांनभीषये॥२३॥समर्थोत्यसिवीर्येणसुराणामपिनिग्रहे॥त

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

द्रवांश्चतुरंगेणबलेनमहतावृतः॥२४॥श्रुत्वेदंवानरानीकंनिर्मथिष्यामिरावणं॥रावणावरजेवाक्यमेवंब्रुवतिराघव॥२५॥
शत्रूणांप्रतिघातार्थमिदंवचनमब्रवीत्॥पूर्वद्वारेतुलंकायांनीलोवानरपुंगवः॥२६॥महत्प्रतियोद्धास्याद्वानरैर्बहुभिर्वृतः
अंगदोवालिपुत्रस्तुबलेनमहतावृतः॥२७॥दक्षिणेवाधतांद्वारेमहापार्श्वमहोदरौ॥हनूमान्पश्चिमद्वारेनिपीड्यपवनात्म
जः॥२८॥प्रविशत्वत्रमेयात्माबहुभिःकपिभिर्वृतः॥दैत्यदानवसंघानामृषीणांचमहात्मनां॥२९॥विप्रकारप्रियःक्षुद्रोवरदा
नबलान्वितः॥परिक्रमतियःसर्वांल्लोकान्संतापयन्प्रजाः॥३०॥तस्याहराक्षसेंद्रस्यस्वयमेववधेधृतः॥उत्तरंनगरद्वारमहंसौमित्रि
णासह॥३१॥निपीड्याभिप्रवेक्ष्यामिसबलोयत्ररावणः॥वानरेंद्रश्चबलवान्ऋक्षराजश्चवीर्यवान्॥३२॥राक्षसेंद्रानुजश्चैवगु
ल्मेभवतुमध्यमे॥नचैवंमानुषंरूपंकार्यंहरिभिराहवे॥३३॥एषाऽभवतुनःसंज्ञायुद्धेस्मिन्वानरेबले॥वानराएवनश्चिह्नंस्वजने
स्मिन्भविष्यति॥३४॥वयंतुमानुषेणैवसप्तयोत्स्यामहेपरान्॥अहमेवसहभ्रात्रालक्ष्मणेनमहौजसा॥३५॥आत्मनापंचमेश्चा
यंसखामममविभीषणः॥सरामःकृत्यसिद्ध्यर्थमेवमुक्त्वाविभीषणं॥३६॥सुवेलारोहणेबुद्धिंचकारमतिमान्मतिः॥रमणीयतरंदृष्ट्वा
सुवेलस्यगिरेस्तटं॥३७॥ततस्तुरामोमहताबलेनप्रच्छाद्यसर्वांपृथिवींमहात्मा॥प्रहृष्टरूपोभिजमलंकांकृत्वामतिंसोरिवधेमहा
त्मा॥३८॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेसप्तत्रिंशःसर्गः॥३७॥सतुकृत्वासुवेलस्यमतिमारोहणंप्रति॥लक्ष्मणानु

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

गतोरामःसुग्रीवमिदमब्रवीत्॥१०॥विभीषणंचधर्मज्ञमनुरक्तंनिशाचरं॥मंत्रज्ञंविधिज्ञंचश्लक्ष्णयापरयागिरा॥११॥सुवेलंसाधुशै
लेंद्रमिमंधातुशतैश्चितं॥अध्यारोहामहेसर्वेवत्स्यामोत्रनिशामिमां॥१२॥लंकाचालोकयिष्यामोनिलयंतस्यरक्षसः॥येनमेम
रणंतायहृताभार्यादुरात्मना॥१३॥येनधर्मोनविज्ञातोनवृत्तंनकुलंतथा॥राक्षस्यानीचयाबुद्ध्यायेनतत्गर्हितंकृतं॥१४॥अस्मि
न्वधंतिमेकोपकीर्तितेराक्षसाधमे॥यस्यापराधान्नीचस्यवधंद्रक्ष्यामिराक्षसं॥१५॥एकोहिकुरुतेपापंकालपाशवशंगतः॥नीचे
नात्मापराधेनकुलंतस्यविनश्यति॥१६॥एवंसमंत्रयन्नेवसक्रोधोरावणंप्रति॥रामःसुवेलंवासायचित्रासानुमुपारुहत्॥१७॥
एष्टतोलक्ष्मणश्चैनन्वगच्छत्समाहितः॥सशरंचापमुद्यम्यसुमहद्विक्रमेरतः॥१८॥तमन्वरोहत्सुग्रीवःसामात्यःसविभीषणः॥ह
नुमानंगदोनीलोमैंदोद्विविदएवच॥१९॥गजोगवाक्षोगवयःसरभोगंधमादनः॥पनसःकुमुदश्चैवहारोरंभश्चयूथपः॥२०॥जांब
वांश्चसुषेणश्चशरभश्चमहाकपिः॥दुर्मुखश्चमहातेजास्तथाशतबलिःकपिः॥२१॥एतेचान्येचबहवोवानराःशीघ्रगामिनः॥ते
वायुवेगप्रवणास्तंगिरिंगिरिचारिणः॥२२॥अध्यारोहंतशतशःसुवेलंयत्रराघवः॥ततःसुवेलमारुह्यरामस्तैःसहवानरैः॥२३
निषसादगिरेस्तस्यशृंगेसुमतलेशुभे॥ततःकपिगणाःसर्वेसमावृत्यदिशोजनं॥२४॥सुवेलमध्यारोहंतोलवंतोदक्षिणामु
खाः॥तित्वदीर्घेणकालेनगिरिमारुह्यसर्वतः॥ददृशुःशिखरेतस्यविषक्तामिवखेपुरीं॥तांशुभांप्रवरद्वारांप्राकारवरशो

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

भितो॥१४॥लंकाराक्षससंपूर्णांददृशुर्हरियूथपाः॥प्राकारचयसंस्थैश्च तथानीलैश्च राक्षसैः॥१५॥ददृशुस्ते हरिश्रेष्ठाः प्राकार
मपरंकृतं॥तेदृष्ट्वा वानराः सर्वे राक्षसान् युद्धकांक्षिणः॥मुमुचुर्विविधान्नादास्तत्र रामस्य पश्यतः॥ततोस्तमगमत्सूर्यः संध्या
प्रतिरंजितः॥१७॥पूर्णचंद्रप्रदीप्ताचक्षया समतिवर्त्तत॥ततः सरामो हरिवाहिनीपतिर्विभीषणेन प्रतिनंद्य सत्कृतं॥सलक्ष्म
णो यूथपयूथसंयुतः सुवेलपृष्ठे न्यवसद्यथासुखं॥१८॥इत्यार्षे श्रीरामायणे वाल्मीकीये युद्धकांडे अष्टत्रिंशः सर्गः॥३८॥
तां रात्रिमुषितास्तत्र सुवेले हरियूथपाः॥लंकायां ददृशुः कानानुपवनानि च॥१॥समसौम्यानि रम्याणि विशालान्यायता
नि च॥दृष्टिरम्याणि ते दृष्ट्वा बभूवुर्जातविस्मयाः॥२॥चंपकाशोकवकुलसालतालवनाकुलाः॥नमालपनसच्छन्ना नागमाला
समावृताः॥३॥हिंतालैरर्जुनैर्नीपैः सप्तपर्णैः सुपुष्पितैः॥तिलकैः कर्णिकारैश्च पाटलैश्च समंततः॥४॥सुशुभे पुष्पिताग्रैश्च ल
ताभिरुपगतैर्द्रुमैः॥लंकाबहुविधैर्दिव्यैर्यथेंद्रस्यामरावती॥५॥विचित्रकुसुमोपेतैरक्तकोमलपल्लवैः॥राजतैश्च तथानीलै
श्चित्राभिर्वनराजिभिः॥६॥गंधाढ्यान्यभिरम्याणि पुष्पाणि च फलानि च॥धारयंति नगास्तत्र भूषणानीव मानवाः॥७॥तच्चैत्र र
थसंकाशं मनोज्ञं नंदनोपमं॥वनं सर्वर्तुकं रम्यं शुशुभे षट्पदायुतं॥८॥नत्यूहकोयष्टिभिश्च नृत्यमानैश्च बर्हिणैः॥रुतं परभृ
तानां च शुश्रुवे वननिर्झरे॥९॥नित्यमत्तविहंगानि भ्रमराचरितानि च॥कोकिलाकुलखंडानि विहंगाभिरुतानि च॥१०॥भृंगारा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

जाधिगीतानिकुरवैःसेवितानिच॥कोयष्टिविघुष्टानिसारसाभिरुतानिच॥१२॥विविशुस्तेततस्तानिवनान्युपवनानिच
हृष्टाप्रमुदितावीराहरयःकामरूपिणः॥१३॥तेषांप्रविशतांतत्रवानराणांमहौजसां॥पुष्पसंसर्गसुरभिर्ववौप्राणस
मोनिलः॥१३॥अन्येतुहरिवीराणांयूथान्निष्क्रम्ययूथपाः॥सुग्रीवेणाभ्यनुज्ञातालंकांजग्मुपताकिनीं॥१४॥वित्रासयं
तोविहगांस्त्रासयंतोमृगद्विजान्॥कंपयंतश्चतांलंकांनादैःस्वैर्नदतांवराः॥१५॥कुर्वंतस्तेमहावेगामहींचरणपीडितां॥
रजश्चसमसैवोर्ध्वंजगामाचरणोत्थितं॥१६॥ऋक्षाःसिंहाश्चमहिषावानराणांमृगाःखगाः॥तेनशब्देनवित्रस्ताजग्मुभृ
तादिशोदश॥१७॥शिखरंत्रिंतुकूटस्यांशुचेर्वदिविस्पृशं॥समंतात्पुष्पसंछन्नंमहारजतसन्निभं॥१८॥शतयोजनविस्तीर्णं
विमलंचारुदर्शनं॥श्लक्ष्णंश्रीमन्महच्चैवदुःप्रापंशकुनैरपि॥१९॥मनसापिदुरारोहंकिंपुनःकर्मणाजनैः॥निविष्टातस्य
शिखरेलंकारावणपालिता॥२०॥दशयोजनविस्तीर्णातथाद्विगुणमायया॥सापुरीगोपुरैरुच्चैःपांडुरांबुदसन्निभैः॥२१
कांचनेनचमालेनराजतेनचशोभते॥प्रासादैश्चविमानैश्चलंकापरमभूषिता॥२२॥घनैरिवातपापायेमध्यमंवैस्तवे
पहं॥यस्यांस्तंभसहस्रेणप्रासादःसमलंकृतः॥२३॥कैलासशिखराकारोदृश्यतेखमिवोल्लिखन्॥चैत्यःसराक्षसेंद्रस्यव
भूवपुरभूषणं॥२४॥शतेनरक्षसांनित्यंयःसमग्रेणरक्ष्यते॥मनोज्ञोकानवैनवतीपर्वतैरुपशोभितां॥२५॥नानाधातुविचित्रै

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

श्च उद्यानोपवनाकुलं॥ नानाविहगसंघुष्टं नानामृगसमायुतं॥ रम्यं नानाकुसुमसंछन्नं नानाराक्षससेवितं॥ तं समृद्धं समृद्धार्थो लक्ष्मीवान्लक्ष्मणाग्रजः॥ २४॥ रावणस्य पुरीं रामो ददर्श सहवानरैः॥ तां महाग्रहसंबाधां दृष्ट्वा लक्ष्मणपूर्वजः॥ २५॥ नगरीं मम रम्यश्च विस्मयं च परं ययौ॥ तां रत्नपूर्णां बहुसंविधानां प्रासादमालाभिरलंकृतां च॥ पुरीं महायंत्रकपाटमुख्यां ददर्श रामो महताबलेन॥ २६॥ इत्यार्षे श्रीरामायणे वाल्मीकीये युद्धकांडे नवचत्वारिंशः सर्गः॥ ३९॥ ततो रामः सुवेलाग्रं योजनद्वयमंडितं॥ आरुरोह ससुग्रीवो हरियूथपसंवृतः॥ १॥ स्थित्वा मुहूर्तं तत्रैव दिशो दश विलोकयन्॥ त्रिकूटशिखरे रम्ये निर्मितां विश्वकर्मणा॥ २॥ ददर्श लंकां सुन्यस्तां रम्यकाननशोभितां॥ तस्यां गोपुरशृंगस्थं राक्षसेंद्रं दुरासदं॥ ३॥ श्वेतचामरपर्यंतं विजयच्छत्रशोभितं॥ रक्तचंदनसंलिप्तं रक्ताभरणभूषितं॥ ४॥ नीलजीमूतसंकाशं हेमसंछादितोबरं॥ ऐरावतविषाणाग्रैरुत्कृष्टकिणवक्षसं॥ ५॥ प्रांशुं लोहितरागेण संवीतं रक्तवाससा॥ संध्यातपेन संछन्नं मेघराजिमिवोन्नतं॥ ६॥ पश्यतां वानरेंद्राणां राघवस्यापि पश्यतः॥ दृष्ट्वा नाद्राक्षसेंद्रस्य सुग्रीवसहसोत्थितः॥ ७॥ क्रोधवेगेन संतप्तः सत्वेन च बलेन च॥ अचलाग्राद्यथोत्थाय पुप्लुवे गोपुरस्थले॥ ८॥ स्थित्वा मुहूर्तं संप्रेक्ष्य निर्भयेनांतरात्मना॥ तृणीकृत्य च तद्रक्षसोब्रवीत्परुषं वचः॥ ९॥ लोकनाथस्य रामस्य सखा दासोस्मि राक्षस॥ नमस्यामोक्ष्यसे द्यत्वं पार्थिवेंद्रस्य तेजसा॥ १०॥ इत्युक्त्वा सहसो॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

त्प्लुत्य पुप्लुवे तस्य चोपरि॥ आकृष्य मुकुटं चित्रं पातयामास तद्भुवि॥११॥ समीक्ष्य तूर्णं मायां तं बभाषे तं निशाचरः॥ सुग्रीवस्त्वं
परीक्षे मे हीनग्रीवो भविष्यसि॥१२॥ इत्युक्त्वोत्थाय तं क्षिप्त्वा बाहुभ्यामाक्षिपत्तले॥ कंदुकं तं समुत्थाय बाहुभ्यामाक्षिपद्धरि
१३॥ परस्परं स्वेदविदग्धगात्रौ परस्परं शोणितरक्तदेहौ॥ परस्परं श्लिष्टनिरुद्धचेष्टौ परस्परं शाल्मलिकिंशुकाविव॥१४॥
मुष्टिप्रहारैश्चतलप्रहारैरर्त्निघातैश्चकराग्रघातैः॥ तौ चक्रतुर्युद्धमसह्यरूपं महाबलौ राक्षसवानरेंद्रौ॥१५॥ कृत्वा
नियुद्धं भृशमुग्रवेगौ काले चिरं गोपुरवेदिमध्ये॥ उत्क्षिप्य चोत्क्षिप्य विनम्य देहौ पदक्रमाद्गोपुरवेदिलग्नौ॥१६॥ मन्यो
न्यमापीड्य विलग्नदेहौ तौ पेततुर्मालनिघातमध्ये॥ उत्पेततुर्भूतलमुत्स्पृशंतौ स्थित्वा मुहूर्तं त्वभिनिश्वसंतौ॥१७॥ आ
लिंग्य चालिंग्य बाहुभिः सयोजयामासतुराहवेतौ॥ संरंभशिक्षाबलसंप्रयुक्तौ क्रमंजतौ जग्मतुराजिवीरौ॥१८॥
शार्दूलसिंहाविव जातदंष्ट्रौ गजेंद्रपोताविव संप्रयुक्तौ॥ संहत्य संवेष्ट्य च तौ कराभ्यां तौ पेततुर्वै युगपद्धरायां॥१९॥ उद्यम्य
चान्योन्यमधिक्षिपंतौ संचक्रमातेबहुयुद्धमार्गे॥ आयामशिक्षाबलसंप्रयुक्तौ समंगतौ जग्मतुराशुवीरौ॥२०॥ बाहून
मैर्वारणवारणाभैर्निवारयंतौ परवारणाभौ॥ चिरेणकालेन भृशं प्रयुद्धौ संचेरतुर्मंडलमार्गमाशु॥२१॥ तौ परस्परमासा
द्य यत्तावन्योन्यसूदने॥ मार्जारावि वभक्षार्थे वितस्थाने मुहुर्मुहुः॥२२॥ मंडलानि विचित्राणि स्थानानि विविधानि च॥ गोमू

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

त्राणिचचक्राणिगतप्रत्यागतानिच॥२३॥तिरश्चीनगतान्येवतथावक्रगतानिच॥परिमोक्षंप्रहाराणांवर्जनंपरिधावनं
॥२४॥अभिद्रवणमाप्लावमास्थानंचसविग्रहं॥परावृत्तमपावृत्तमवप्लुतमवद्रुतं॥२५॥उपन्यस्तमपन्यस्तंयुद्धमार्गविशारदौ
तौसंचेरतुरन्योन्यंवानरेंद्रश्चरावणः॥२६॥एतस्मिन्नंतरेरक्षोमायाबलमथात्मनः॥आरब्धमुपसंपदेज्ञात्वातंवानरा
धिपः॥२७॥उत्पपाततदाकाशंजितकाशीजितक्रमः॥रावणःस्थितएवात्रहरिराजेनवंचितः॥२८॥अथहरिवरनाथः
प्राप्तसंग्रामसंकीर्त्तिनिशिचरपतिमाजौयोजयित्वाश्रमेण॥गगनमतिविशालंलंघयित्वार्कसूनुर्हरिगणवरमध्येरा
मपार्श्वेजगाम॥२९॥इतिसमवितसूनुस्तत्रसत्कर्मकृत्वापवनगतिरनीकंप्राविशत्संप्रहृष्टः॥रघूवरनृपसूनोर्वर्द्धयन्
युद्धहर्षंनरुमृगणमुख्यैःपूज्यमानोहरिंद्रः॥३०॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेचत्वारिंशःसर्गः॥४०॥अथत
स्मिन्निमित्तानिदृष्ट्वालक्ष्मणपूर्वजः॥सुग्रीवंसंपरिष्वज्यरामोवचनमब्रवीत्॥१॥असंमंत्र्यमयासार्द्धंतदिदंसाहसंकृतं
एवंसाहसयुक्तानिनकुर्वंतिजनेश्वराः॥२॥संशयेस्थापयमांचेदंबलंचसविभीषणं॥कष्टंकृतमिदंवीरसाहसंसाहसप्रि
य॥३॥इदानींमाकृथावीरएवंविधमचिंतितं॥त्वयिकंचित्समापन्नेकिंकार्यंसीतयामम॥४॥भरतेनमहाबाहोलक्ष्मणेन
यवीयसा॥शत्रुघ्नेनचशत्रुघ्नस्वशरीरेणवापुनः॥५॥त्वयिचानागतेपूर्वमितिमेनिश्चितामतिः॥जानतश्चापितेवीर्यंमहेंद्रव

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

रुणोपम॥घ॥हत्वाहंरावणंयुद्धेसपुत्रबलवाहनं॥अभिषिच्यचलंकायांविभीषणमथापिच॥९॥भरतेराज्यमावेश्य
त्यक्ष्येदेहंमहाबल॥तमेवंवादिनंरामंसुग्रीवःप्रत्यभाषत॥१०॥तवभार्यापहर्तारंदृष्ट्वाराघवरावणं॥मर्षयामिकथंवीर
ज्ञानेनेविक्रममात्मन॥११॥इत्येवंवादिनंवीरमभिनेद्यसराघवः॥लक्ष्मणंलक्ष्मिसंपन्नमिदंवचनमब्रवीत॥१२॥परिगृह्यो
दकंशीतंवनानिफलवंतिच॥बलौघसंविभज्येमंव्यूह्यतिष्ठमलक्ष्मण॥१३॥लोकक्षयकरंभीमंभयंपश्याम्युपस्थितं॥निव
र्हणंप्रवीराणामृक्षवानरराक्षसां॥१४॥वाताश्चकलुषावांतिकंपतेचवसुंधरा॥पर्वताग्राणिवेपंतेपतंतिचमहीरुहाः॥१५॥
मेघाःक्रव्यादसंकाशाःपरुषाःपरुषस्वनाः॥क्रूराःक्रूरंप्रवर्षंतिमिश्रंशोणितबिंदुभिः॥१६॥रक्तचंदनसंकाशासंध्यापरम
दारुणा॥ज्वलच्चनिपतत्येतदादित्यादभिमंडलं॥१७॥आदित्यमभिवाश्यंतिजनयंतोमहद्भयं॥दीनादीनस्वराःक्रूरान
प्रशस्तामृगद्विजाः॥१८॥रजन्यामप्रकाशश्चसंतापयतिचंद्रमाः॥कृष्णारक्तांशुपर्यंतोलोकक्षयइवोदितः॥१९॥ह्रस्वो
रूक्षोऽप्रशस्तश्चपरिवेषःसुलोहितः॥आदित्यमंडलेनीलंलक्ष्मणदृश्यते॥२०॥दृश्यंतेनयथावच्चनक्षत्राण्यभिवर्तते॥यु
गांतइवलोकस्यपश्यशंसतिलक्ष्मणः॥२१॥काकाःश्येनास्तथागृध्रानीचैःपरिपतंतिच॥शिवाश्चाप्यशुभावाचःप्रवदं
तिमहास्वनाः॥२२॥शैलैःशूलैश्चखड्गैश्चविमुक्तैःकपिराक्षसैः॥भविष्यत्यावृताभूमिर्मांसशोणितकर्दमा॥२३॥क्षिप्रमद्य

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

दुराधर्षां पुरीं रावणपालितां॥ अभियामजवेनैव सर्वतो हरिभिर्वृताः॥२२॥ इत्येवं ब्रुवदन्वीरो लक्ष्मणं लक्ष्मणाग्रजः॥ तस्मा
दवतरत् शीघ्रं पर्वताग्रान्महाबलः॥२३॥ अवतीर्य तु धर्मात्मा तस्माच्छैलात्स राघवः॥ परैः परमदुर्धर्षो ददर्श बलमात्मनः
॥२४॥ सन्नह्य तु ससुग्रीवः कपिराजबलं महत्॥ कालज्ञो राघवः काले संयुगाय चोदयत्॥२५॥ ततः काले महाबाहुर्बलेन
महता वृतः॥ प्रस्थितः पुरतो धन्वी लंकामभिमुखः पुरीं॥२६॥ तौ विभीषणसुग्रीवौ हनूमान् जांबवान्नलः॥ ऋक्षराजस्त
थानीलो लक्ष्मणश्चान्वयुस्तदा॥२७॥ ततः पश्चात्तु महतीं एतनर्क्षवनौकसां॥ प्रच्छाद्य महतीं भूमिमनुयांति स्म राघवं॥२८
॥ शैलशृंगाणि शतशः प्रवृद्धाश्च महीरुहान्॥ जगृहुः कुंजरप्रख्याः वानरा परवारणाः॥२९॥ तौ त्वदीर्घेण कालेन भ्रातरौ
रामलक्ष्मणौ॥ रावणस्य पुरीं लंकामासेदतुररिंदमौ॥३०॥ पताकामालिनीं रम्यां सुद्यानवनशोभितां॥ चित्रवप्रां सुदुष्प्राप
मुच्चैः प्राकारतोरणां॥३१॥ तां सुरैरपि दुर्धर्षां रामवाक्यप्रचोदिताः॥ यथानिदेशं संपीड्य न्यविशंत वनौकसः॥३२॥ लंका
यास्तूत्तरद्वारं शैलशृंगमिवोन्नतं॥ रामः सहानुजो धन्वी जुगोप चरुरोध च॥३३॥ लंकामुपनिविष्टस्तु रामो दशरथात्म
जः॥ लक्ष्मणानुचरो वीरः पुरीं रावणपालितां॥३४॥ उत्तरद्वारमासाद्य यत्र तिष्ठति रावणः॥ नान्यो रामाद्विसहारं समर्थः परिर
क्षितुं॥३५॥ रावणाधिष्ठितं भीमं वरुणेनेव सागरं॥ तायुधैराक्षसैर्भीमैरभिगुप्तं समंततः॥३६॥ लघूनां त्रासजननं पातालमि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वदानवैः॥विन्यस्तानिचयोधानांबहुविविधानिच॥३५॥ददर्शायुधजालानितथैवकवचानिच॥पूर्वंतुद्वारमासाद्यनी
लोहरिचमूपतिः॥३६॥अतिष्ठत्सहमैंदेनद्विविदेनचवीर्यवान्॥अंगदोदक्षिणद्वारंजहेयोसुमहाबलः॥३७॥ऋषभेणग
वाक्षेणगजेनगवयेनच॥हनूमान्पश्चिमद्वारंररक्षबलवान्कपिः॥४०॥प्रजंघतरसाभ्यांचवीरैरन्यैश्चसंगतः॥मध्यमेचस्व
यंगुल्मेसुग्रीवःसमतिष्ठतः॥४१॥सहस्रैर्हरिश्रेष्ठैःसुपर्णपवनोपमैः॥वानराणांतुषट्त्रिंशत्कोट्यःप्रख्यातयूथपाः॥
४२॥निषीड्योपनिविष्टाश्चसुग्रीवोयत्रवानरः॥शासनेनतुरामस्यलक्ष्मणःसविभीषणः॥४३॥द्वारेद्वारेहरीणांतुकोटिको
टीन्यवेशयत्॥पश्चिमेनतुरामस्यसुषेणःसहजांबवान्॥४४॥अदूरान्मध्यमेगुल्मेतस्थौबहुबलानुगः॥नेतुवानरशा
र्दूलाःशार्दूलाइवदंष्ट्रिणः॥४५॥गृहीत्वाद्रुमशैलाग्रान्दृष्टायुद्धायतस्थिरे॥सर्वेविकृतलांगूलाःसर्वेदंष्ट्रानखायुधाः
४६॥सर्वेविकृतचित्राणाःसर्वेचविकृताननाः॥दशनागबलाःकेचित्केचिद्दशगुणोत्तराः॥४७॥केचिन्नागसहस्रस्यबभू
वुस्तुल्यविक्रमाः॥संतिचौघबलाःकेचित्केचिच्छतगुणोत्तराः॥४८॥अप्रमेयबलाश्चान्येतत्रासन्हरियूथपाः॥अद्भुतश्च
विचित्रश्चतेषामासीत्समागमः॥४९॥तत्रवानरसैन्यानांशालभानामिवोद्गमः॥अतिपूर्णमिवाकाशंसंपूर्णेवचमेदिनी॥५०
लंकामुपनिविष्टैश्चसंपतद्भिश्चवानरैः॥शतंशतसहस्राणांपृथगूथवनौकसां॥५१॥लंकाद्वाराण्युपाजग्मुरन्येयोद्धुंम

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

मंततः॥आवृतः सगिरिः सर्वैस्तैः समंतात्प्लवंगमैः॥५२॥अयुतानां सहस्रं च पुरीं तामभ्यवर्तत॥वानरैर्वलवद्भिश्च ब
भूवुर्द्रुमपाणिभिः॥५३॥सर्वतः संवृतालंका दुष्प्रवेशापि वायुना॥राक्षसा विस्मयं जग्मुः सहसाभिनिपीडिताः॥५४॥वा
नरैर्मेघसंकाशैः॥शक्रतुल्यपराक्रमैः॥महाञ्छब्दो भवत्तत्र बलौघस्याभिवर्ततः॥५५॥सागरस्येव भिन्नस्य यथा स्यात्तुमु
लस्वनः॥तेन शब्देन महता सप्राकारा सतोरणा॥५६॥लंका प्रचलिता सर्वा सशैलवनकानना॥रामलक्ष्मणगुप्ता सा सु
ग्रीवेण च वाहिनी॥५७॥बभूव दुर्धर्षतरा सर्वैरपि सुरासुरैः॥राघवः सन्निविश्यैव स्वसैन्यं रक्षसां वधे॥५८॥समं मंत्रिभिः सा
र्धं निश्चित्य च पुनः पुनः॥आनयं मभिप्रेत्य शुक्रमयोगार्थतत्त्ववित्॥५९॥विभीषणस्यानुमते राजधर्ममनुस्मरन्॥अंगदं वा
लिनयं समाहूयेदमब्रवीत्॥६०॥गत्वा सौम्य दशग्रीवं ब्रूहि मद्वचनात्कपे॥लंघयित्वा पुरीं लंकां भयं त्यक्त्वा गतव्यथः
६१॥भ्रष्टश्रीकं गतैश्वर्यं मुमूर्षुं नष्टचेतनः॥ऋषीणां देवतानां च गंधर्वाप्सरसां तथा॥६२॥नागानामथ यक्षाणां राज्ञां च
रजनीचर॥यच्च पापं कृतं मोहाद्वलिप्तेन राक्षसा॥६३॥तस्य पापस्य संप्राप्ता मुष्टिरद्य दुरासदा॥नूनमद्य गतो दर्पस्त्वयं भूवर
दानज॥६४॥यस्य दंडधरस्तेहं दाराहरणकर्षितः॥दंडं धारयमाणस्तु लंकाद्वारेऽवस्थितः॥६५॥परदारा देवतानां च गंध
र्वाणां च रक्षसां॥राजर्षीणां च सर्वेषां गमिष्यसि युधि स्थितः॥६६॥बलेन येन वैसीतां मायया राक्षसाधम॥मामतिक्रामयित्वा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

त्वं हतवांस्तद्विदर्शय ॥६५॥ अराक्षसमिमं लोकं कर्तास्मि निशितैः शरैः ॥ नमच्छरणमभ्येषि तामादाय च मैथिलीं ॥६६॥ धर्मा
त्माराक्षसश्रेष्ठः संप्राप्तोयं विभीषणः ॥ लंकैश्वर्यं ध्रुवं श्रीमानयं प्राप्तोत्युत्कटं ॥६७॥ नहि राज्यमधर्मेण भोक्तुं क्षणमपि त्वया ॥
शक्यं मूर्ख सहायेन पापेनाविदितात्मना ॥ ७० ॥ युध्यस्व वा धृतिं कृत्वा शौर्यमालंब्य राक्षस ॥ मच्छरैस्त्वं रणे शांतस्ततः पूतो भ
विष्यसि ॥ ७१ ॥ यद्यावि शसि लोकांस्त्रीन्यक्षिभूतो निशाचर ॥ मम चक्षुःपथं प्राप्य न जीवन्प्रतियास्यसि ॥ ७२ ॥ ब्रवीमि त्वां हितं
वाक्यं क्रियतामौर्ध्वदेहिकं ॥ सुदृष्टा क्रियतां लंका जीवितं ते मयि स्थितं ॥ ७३ ॥ इत्युक्तः संतुतारेयो रामेणाक्लिष्टकर्मणा ॥ जगामा
काशमाविश्य मूर्ध्नि मानिवहव्यवाट् ॥ ७४ ॥ तो निशम्य मुहूर्तं श्रीमान्रावणमंदिरं ॥ ददर्श सीनमग्रे रावणं सचिवैः सह ॥ ७५
ततस्तस्याविदूरे स निपत्य हरिपुंगवः ॥ दीप्ताग्निसदृशस्तस्थावंगदः कनकांगदः ॥ ७६ ॥ तद्रामवचनं सर्वमन्यूनाधिकमुत्त
मं ॥ सामात्यं श्रावयामास निवेद्यात्मानमात्मना ॥ ७७ ॥ दूतोहं कोशलेंद्रस्य रामस्याक्लिष्टकर्मणः ॥ वालिपुत्रोंगदो नाम यद्हितं
श्रोत्रमागतः ॥ ७८ ॥ अहत्वा राघवो रामः कौशल्यानंदवर्धनः ॥ निष्पत्य प्रतियुध्यस्व नृशंस पुरुषाधम ॥ ७९ ॥ हंता स्मि त्वां सहा
मात्यं सपुत्रज्ञातिबांधवं ॥ निरुद्विग्नास्त्रयो लोका भविष्यंति हते त्वयि ॥ ८० ॥ देवदानवयक्षाणां गंधर्वोरगरक्षसां ॥ शत्रुमद्यो
द्धरिष्यामि त्वामृषीणां च कंटकं ॥ ८१ ॥ विभीषणस्य चैश्वर्यं भविष्यति हते त्वयि ॥ न चेत्कृत्यं वैदेहीं प्रणिपत्य प्रदास्यसि ॥ ८२

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

इत्येवं परुषं वाक्यं ब्रुवाणे हरिपुंगवे॥ अमर्षवशमापन्नो निशाचरगणेश्वरः॥८३॥ ततः सरोषताम्राक्षः शशासमचि
वांस्तदा॥ गृह्यतामिति दुर्मेधा वध्यतामिति चासकृत्॥८४॥ रावणस्य वचः श्रुत्वा दीप्ताग्निमिव तेजसः॥ जगृहुस्तं ततो
घोरा चत्वारो रजनीचराः॥८५॥ ग्राहयामास तारेयः स्वयमात्मानमात्मवान्॥ बलं दर्शयितुं वीरो यातुधानगणेनरः॥८६॥ स ता
न्बाहुद्वये सक्तानादाय हरिपुंगवः॥ प्रासादं शैलसंकाशमुत्पतोपोगदल्लदा॥८७॥ तस्योत्पतनवेगेन निर्हृतास्ते राक्षसाः
भूमौ निपतिताः सर्वे राक्षसेंद्रस्य पश्यतः॥८८॥ ततः प्रासादशिखरं शैलशृंगमिवोन्नतं॥ बभंज राक्षसेंद्रस्य वालिपुत्रः प्रता
पवान्॥८९॥ तत्प्रकालपदाक्रांतं ददृशे ग्रीवस्य पश्यतः॥ पुरा हिमवतः शृंगं वज्रेणेव विदारितं॥९०॥ भक्त्वा प्रासादशिखरं
नाम विश्राम्य चात्मनः॥ विनद्य सुमहानादमुत्पपात विहायसं॥९१॥ अथ यन्नराक्षसान् सर्वान् हर्षयंश्चापि वानरान्॥ राजा जय
ति सुग्रीवो वानराधिपतिर्बली॥९२॥ ततो दाशरथी रामो लक्ष्मणश्च महारथः॥ विभीषणश्च धर्मात्मा राजा राक्षसपुंगवः॥९३॥ ते
कैश्चर्यैर्महात्मानस्त्वां हत्वा रावणं रणे॥ आस्फोटयंत ददृशे विनद्य च क्रमेण पुनः॥९४॥ उवाच वचनं चेदं तारेयो वालिनः सुतः॥
रामेणैव प्रतिज्ञातं दुरात्मन्निधनं तव॥९५॥ तेन ते निधनं नाद्य करोमि बलवानपि॥ क्रममाणस्तु संध्यार्थे पितामहचतुर्मुखा
त्॥९६॥ यस्त्वामादाय कक्षेण अचरद्भूमिमंडलं॥ योऽविभेदैकबाणेन तादृशं पितरं मम॥९७॥ कबंधं च विराधं च मारीचं खरदू

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

षणो॥तस्याग्रतोरणेमूढत्वंसिंहस्येवकुंजरः॥९८॥इत्युक्त्वावचनंवीरोननादनदतांवरः॥वायुवेगसमास्थायरावणस्य
ततोगदः॥९९॥जग्राहमुकुटंवीरःपादमादायमस्तके॥अंगदेनपदाक्रांतोरेजेसहिरावणः॥१००॥त्रिविक्रमक्रमाक्रांतो
वलिर्वैरोचनिर्यथा॥सवानराणांमध्येतुरामपार्श्वमुपागतः॥१०१॥अंगदःपुनरागत्यववंदेचरणौततः॥सुग्रीवस्यचराम
स्यलक्ष्मणस्यतथैवच॥१०२॥मुकुटंराक्षसेंद्रस्यराघवायन्यवेदयत्॥तद्दृष्ट्वामुकुटंरामोरत्नसार्थविभूषितं॥३॥आबबंध
महाराजरावणानुजमस्तके॥साधुसाधुमहाबाहोयस्तेबलमीदृशं॥४॥नैतत्कर्मकरिष्यंतिदेवाअपिसपन्नगाः॥प्र
हस्यागदमाभाष्यसस्वजेचविभीषणः॥५॥ददृशुर्वानरावीराभीषणंचविभीषणं॥मुकुटेनप्रकाशंतंत्रिशृंगमिवपर्वतं
॥६॥श्रुत्वारामस्तुतद्वाक्यमंगदस्यमुखाच्युतं॥विस्मयंपरमंप्राप्ययुद्धायचमनोदधे॥७॥सवानराणांमध्येतुरामपार्श्वमुपा
गतः॥८॥रावणस्तुपरंचक्रेक्रोधंप्रासादधर्षणात्॥विनाशंचात्मनःपश्यन्निश्वासपरमोभवत्॥९॥रामस्तुबहुभिर्हृष्टैर्वि
नदद्भिःप्लवंगमैः॥वृतोरिपुवधाकांक्षीयुद्धायैवाभिवर्तत॥१०॥सुषेणस्तुमहावीर्योगिरिकूटोपमोहरिः॥बहुभिःसंवृत
स्तत्रवानरैःकामरूपिभिः॥११॥सतुद्वाराणिसर्वाणिसुग्रीववचनात्कपिः॥पर्यक्रामतदुर्धर्षोनक्षत्राणीवचंद्रमाः॥तेषामक्षौ
हिणीशतंसमवेक्ष्यवनौकसां॥लंकामुपनिविष्टानांसागरंचाभिवर्तनां॥१२॥राक्षसाविस्मयंजग्मुस्त्रासंजग्मुस्तथापरे॥अ

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

परेसमरोद्धर्षाद्धर्षमेवोपपेदिरे॥१४ कृत्स्नहिकंपिभिर्व्योम्नांप्राकारपरिघांतरं॥ददृशूराक्षसादीनाःप्राकारंवानरैःकृतं
॥१५॥हाहाकारमकुर्वंतराक्षसाभयमागताः॥तस्मिन्महाभीषणकेप्रवृत्तेकोलाहलेराक्षसराजधान्यां॥प्रगृह्यरक्षांसि
महायुधानियुगांतवाताइवसंविचेरु॥१६॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेएकचत्वारिंशःसर्गः॥४१॥तत
स्तेराक्षसास्तत्रगत्वारावणमंदिरं॥न्यवेदयन्पुरीरुद्धांरामेणसहवानरैः॥१॥रुद्धांतुनगरींश्रुत्वाजातक्रोधोनिशाचरः
विधानंद्विगुणंकृत्वाप्रासादंसोप्यरोहत॥२॥सददर्शावृतांलंकांसशैलवनकाननां॥असंख्येयैर्हरिगणैःसर्वतोयुद्ध
कांक्षिभिः॥३॥सदृष्ट्वावानरैःसर्वांवसुधांकपिलीकृतां॥कथंक्षपयितव्याःस्युरितिचिंतापरोभवत्॥४॥सचिंतयित्वासुचिरं
धैर्यमालंब्यरावणः॥राघवंहरियूथांश्चददर्शायतलोचनः॥५॥राघवःसहसैन्येनमुदितोनामपुप्लुवे॥लंकांददर्शगुप्तांवैसर्व
तोराक्षसैर्वृतां॥६॥दृष्ट्वादाशरथिर्लंकांचित्रध्वजपताकिनीं॥जगाममनसासीतांदूयमानेनचेतसा॥७॥अत्रसामृगशावा
क्षीमलक्तेजनकात्मजा॥पीड्यतेशोकसंतप्ताकृशास्थंडिलशायिनी॥८॥सपीड्यमानांधर्मात्मावैदेहीमनुचिंतयन्॥क्षि
प्रमाज्ञापयामासवानरान्द्विषतांवधे॥९॥एवमुक्तेतुवचनेरामेणाक्लिष्टकर्मणा॥संघर्षमाणाप्लवगाःसिंहनादैरपूरयन्
१०॥शिखरैर्विकरामैर्नांलंकामुष्टिभिरेववा॥इतिस्मदधिरेसर्वेमनांसिहरियूथपाः॥उद्यम्यगिरिशृंगाणिमहांतिशिखरा।

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

णि च॥ तरूंश्चोत्पाट्य विविधांस्तिष्ठंति हरियूथपाः॥१२॥ प्रेक्षतो राक्षसेंद्रस्य तान्यनीकानि भागशः॥ राघवप्रियकामार्थं
लंकामारुरुहुस्तदा॥१३॥ नेतास्त्रवक्त्राहेमाभारामार्थे त्यक्तजीविताः॥ लंकामेवाभ्यवर्तंत सालतालशिलायुधाः॥१४॥ तेद्रुमैः
पर्वताग्रैश्च मुष्टिभिश्च प्लवंगमाः॥ प्राकारायाम्यसंख्यानि मम्थुस्तोरणानि च॥१५॥ परिखाः पूरयंतश्च प्रसन्नसलिलायुताः
पांसुभिः पर्वताग्रैश्च तृणैः काष्ठैश्च वानराः॥१६॥ ततः सहस्रयूथाश्च कोटियूथाश्च यूथपाः॥ कोटियूथाश्च ताश्चान्ये लंकामा
रुरुहुस्तदा॥१७॥ कांचनानि प्रमृष्टानि तोरणानि प्लवंगमाः॥ कैलासशिखराग्राणि गोपुराणि प्रमथ्य च॥१८॥ आप्लवंतः प्लवंतश्च गर्ज
तश्च प्लवंगमाः॥ लंकां तामभिधावंति महावारणसन्निभाः॥१९॥ जयत्युरुबलो रामो लक्ष्मणश्च महाबलः॥ राजा जयति सुग्री
वो राघवेणाभिपालितः॥२०॥ इत्येवं घोषयंतश्च गर्जंतश्च प्लवंगमाः॥ अभ्यधावंत लंकायाः प्राकारं कामरूपिणः॥२१॥ वीरबाहु
सुबाहुश्च नलश्च पनसस्तथा॥ निपीड्योपनिविष्टास्ते प्राकारं हरियूथपाः॥२२॥ एतस्मिन्नंतरे चक्रुः स्कंधावारनिवेशनं॥ पूर्वद्वा
रं तु कुमुदः कोटीभिर्दशभिर्वृतः॥२३॥ आवृत्य बलवांस्तस्थौ हरिभिर्जितकाशिभिः॥ महाबाहुर्तु तस्थौ वनिविष्टः प्रघसो हरिः॥
२४॥ पनसश्च महाबाहुर्वानरैरभिसंवृतः॥ दक्षिणद्वारमासाद्य वीरः शतबलिः कपिः॥२५॥ आवृत्य बलवांस्तस्थौ कोटि[illegible] को
टिभिरावृतः॥ उत्तरद्वारमासाद्य रामः सौमित्रिणा सह॥२६॥ आवृत्य बलवांस्तस्थौ सुग्रीवश्च हरीश्वरः॥ गोलांगूलो महामायो गवा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

क्षोभी मदर्शनः॥२८॥ वृतः कोट्या महावीर्यस्तस्थौ रामस्य पार्श्वतः॥ ऋक्षाणां भीमकोपानां धूम्रश्चानिबर्हणः॥२९॥ वृतः कोट्या
महावीर्यस्तस्थौ रामस्य पार्श्वतः॥ सन्नद्धस्तु महावीर्यो गदापाणिर्विभीषणः॥३०॥ वृतो यतैस्तु सचिवैस्तस्थौ तत्र महाबलः॥ गजो गवा
क्षो गवयः शरभो गंधमादनः॥३१॥ समंतात्परिधावंतो ररक्षुर्हरिवाहिनीं॥ ततः कोपपरीतात्मा रावणो राक्षसेश्वरः॥३२॥ निर्याणं स
र्वसैन्यानां द्रुतमाज्ञापयत्तदा॥ एतत्श्रुत्वा तदा वाक्यं रावणस्य मुखेरितं॥३३॥ सहसा भीमनिर्घोषमुद्धृष्टं रजनीचरैः॥ ततः प्रचो
दिताभेर्य्यश्चंद्रपांडुरपुष्कराः॥३४॥ हेमकोणाहताभीमा राक्षसानां समंततः॥ विनेदुश्च महाघोषाः शंखाः शतसहस्रशः॥३५॥ रा
क्षसानां सुघोराणां मुखमारुतपूरिताः॥ तेबभूः शुकनीलांगाः सशंखा रजनीचराः॥३६॥ विद्युन्मंडलसन्नद्धाः सबलाकाइवांबुदाः
निष्पतंति ततः सैन्याहृष्टा रावणचोदिताः॥३७॥ समये पूर्यमाणस्य वेगाइव महोदधेः॥ ततो वानरसैन्येन मुक्तो नादः समंततः॥
३८॥ सुवेलः पूरितो येन ससानुप्रस्थकंदरः॥ शंखदुंदुभिनिर्घोषः सिंहनादस्तरस्विनां॥३९॥ पृथिवीं चांतरिक्षं च सागरं चाभ्यना
दयत्॥ गजानां बृंहितैः सार्धं हयानां हेषितैरपि॥४०॥ रथानां नेमिनिर्घोषैरक्षसां पदनिस्वनैः॥ एतस्मिन्नंतरे सद्यः संग्रामः सम
प्रवर्तत॥४१॥ रक्षसां वानराणां च यथा देवासुरे पुरा॥ ते गदाभिः प्रदीप्ताभिः शक्तिशूलपरश्वधैः॥४२॥ निर्जघ्नुर्वानरान्सर्वान्कथयं
तः स्वविक्रमान्॥ तथा वृक्षैर्महाकायाः पर्वताग्रैश्च वानराः॥४३॥ निर्जघ्नुस्तानिरक्षांसि नखैर्दंतैश्च वेगिनः॥ राजा जयति सुग्रीवइ

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

तिराष्ट्रोमहानभूत्॥ ४४॥राजन्जयजयेत्युक्त्वास्वस्य नामकथांततः॥राक्षसास्त्वपरेभीमाःप्राकारस्थामहींगताः॥४५॥वा
नराश्चापिसंक्रुद्धाप्राकारस्थान्महींगताः॥४६॥राक्षसान्पातयामासुःसमाप्लुत्यस्वबाहुभिः॥ससंप्रहारस्तुमुलोमांसशोणितक
र्दमः॥४७॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेद्विचत्वारिंशःसर्गः॥४२॥युध्यतांतुततस्तेषांवानराणांमहात्मनां॥रक्षसां
संबभूवाथबलकोपःसुदारुणः॥१॥तेहयैःकांचनापीडैर्ध्वजैश्चाग्निशिखोपमैः॥रथैश्चादित्यसंकाशैःकवचैश्चमनोरमैः॥२॥
निर्ययुराक्षसावीरानादयंतोदिशोदशः॥राक्षसाभीमकर्माणोरावणस्यजयैषिणः॥३॥वानराणामपिचमूर्बृहतीजयमिच्छ
तां॥अभ्यधावततांसेनांराक्षसांघोरकर्मणां॥४॥एतस्मिन्नंतरेतेषामन्योन्यमभिधावतां॥राक्षसांवानराणांचद्वंद्वयुद्धमव
र्तत॥५॥अंगदेनेंद्रजित्सार्धंवालिपुत्रेणराक्षसः॥अयुध्यतमहातेजास्त्र्यंबकेनयथांधकः॥६॥प्रजंघेनचसंपातिर्नित्यंदुर्म
र्षणोरणे॥जंबुमालिनमारब्धोहनूमानपिवानरः॥७॥संगतःसुमहाक्रोधाद्राक्षसोरावणानुजः॥समरेतीक्ष्णवेगेनमित्रघ्नेन
विभीषणः॥८॥तपनेनगजःसार्धंराक्षसेनमहाबलः॥निकुंभेनमहातेजानीलोपिसमयुध्यतः॥९॥वानरेंद्रस्तुसुग्रीवःप्रघसेन
सुसंगतः॥संगतःसमरेश्रीमान्विरूपाक्षेणलक्ष्मणः॥१०॥अग्निकेतुश्चदुर्धर्षोरश्मिकेतुश्चराक्षसः॥सुमनाश्चयज्ञकोपश्चरामे
णसहसंगताः॥११॥वज्रमुष्टिश्चमैंदेनद्विविदेनाशनिप्रभः॥राक्षसाभ्यांसुघोराभ्यांकपिमुख्यौसमागतौ॥१२॥वीरःप्रतपनोघो

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

रोराक्षसोरणदुर्धरः॥समरेतीक्ष्णवेगेननलेनसमयुध्यत॥१३॥धूर्मस्यपुत्रोबलवान्सुषेणइतिविश्रुतः॥सविद्युन्मालिनासा
र्धमयुध्यतमहाकपिः॥१४॥वानराश्चापरेघोराराक्षसैःश्चापरैःसह॥द्वंद्वंसमीयुःसहसायुद्धायबहुभिःसह॥१५॥तत्रासीत्सु
महद्युद्धंतुमुलंरोमहर्षणं॥रक्षसांवानराणांचवीराणांजयमिच्छतां॥१६॥हरिराक्षसदेहेभ्यःप्रस्रुताःकेशशाडलाः॥शरीरसं
घाद्वहाःप्रसस्रुःशोणितापगाः॥१७॥आजघानेंद्रजिक्रुद्धोवज्रेणेवशतक्रतुः॥अंगदंगदयावीरंशत्रुसैन्यविदारणं॥१८॥
तस्यकांचनचित्रांगंसरथंसाश्वसारथिं॥जघानसमरेश्रीमानंगदोवेगवान्हरिः॥१९॥संपातिस्तुप्रजंघेनत्रिभिर्बाणैःसमा
हतः॥निजघानाश्वकर्णेनप्रजंघंरणमूर्धनि॥२०॥जंबुमालीरथस्थस्तुरथशक्त्यामहाबलः॥विभेदसमरेक्रुद्धोहनूमंतं
स्तनांतरे॥२१॥तस्यतंरथमास्थायहनूमान्मारुतात्मजः॥प्रममाथतलेनासुसहतेनैवरक्षसा॥२२॥बदन्प्रतपनोघोरोन
लंसोप्यनुधावतः॥नलःप्र[illegible]तपनस्याशुपातयामासचक्षुषी॥२३॥भिन्नगात्रःशरैस्तीक्ष्णैःक्षिप्रहस्तेनराक्षसा॥ग्रसंतमि
वसैन्यानिप्रघसंवानराधिपः॥२४॥सुग्रीवःसप्तपर्णेननिजघानजवेनच॥प्रपीड्यशरवर्षेणराक्षसंभीमदर्शनं॥२५॥निज
घानविरूपाक्षंशरेणैकेनलक्ष्मणः॥अग्निकेतुश्चदुर्धर्षोरश्मिकेतुश्चराक्षसः॥२६॥सुप्तघ्नोयज्ञकोपश्चरामंनिर्विभिदुःश
रैः॥तेषांचतुर्णांरामस्तुशिरांसिसमरेशरैः॥२७॥क्रुद्धश्चतुर्भिश्चिच्छेदघोरैरग्निशिखोपमैः॥वज्रमुष्टिस्तुमैंदेनमुष्टिनानिः

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

हतोरणे ॥२८॥ पपातसरथःसाश्वसुराष्ट्रइवभूतले ॥ निकुंभस्तुरणेनीलंनीलांजनचयप्रभं ॥२९॥ निर्विभेदशरैस्तीक्ष्णैः करैर्मेघमि-
वांशुमान् ॥ पुनःशरशतेनाथक्षिप्रहस्तोनिशाचरः ॥३०॥ विभेदसमरेनीलंनिकुंभंप्रजहासच ॥ तस्यैवरथचक्रेणनीलोविष्णु
रिवाहवे ॥३१॥ शिरश्चिच्छेदसमरेनिकुंभस्यचसारथेः ॥ वज्राशनिसमस्पर्शौद्विविदश्चाशनिप्रभः ॥३२॥ जघानगिरिशृंगेण
मिषतांसर्वरक्षसां ॥ द्विविदंवानरेंद्रंतंदुमयोधिनमाहवे ॥३३॥ शरैरशनिसंकाशैः सविव्याधाशनिप्रभः ॥ सशरैरभिविद्धांगो
द्विविदःक्रोधमूर्छितः ॥३४॥ सालेनसरथंसाश्वंनिजघानाशनिप्रभं ॥ विद्युन्मालीरथस्थस्तुशरैः कांचनभूषणैः ॥३५॥ सुषेणं
ताडयामासननादचमुहुर्मुहुः ॥ तंरथस्थमथोदृष्ट्वासुषेणोवानरोत्तमः ॥३६॥ गिरिशृंगेणमहतारथमाशुन्यपातयत् ॥
लाघवेनतुसंयुक्तोविद्युन्मालीनिशाचरः ॥३७॥ अपक्रम्यरथान्मूर्णंगदापाणिःक्षितौस्थितः ॥ ततःक्रोधसमाविष्टःसुषेणोह
रिपुंगवः ॥३८॥ शिलांसुमहतींगृह्यनिशाचरमभिद्रवत् ॥ तमापतंतंगदयाविद्युन्मालीनिशाचरः ॥३९॥ चर्मण्यभिजघानाशु
सुषेणंहरिपुंगवं ॥ गदाप्रहारंतंघोरमचिंत्यबलवानसौ ॥४०॥ तांशिलांपातयामासतस्योरसिमहामृधे ॥ शिलाप्रहाराभिह
तोविद्युन्मालीनिशाचरः ॥४१॥ निष्पिष्टहृदयोभूमौगतासुर्निपपातह ॥ एवंतैर्वानरैः शूरैः शूरास्तेरजनीचराः ॥४२॥ हंद्वेविम-
थितास्तत्रदैत्याइवदिवौकसैः ॥ भल्लैश्चान्यैर्गदाभिश्चशक्तितोमरसायकैः ॥४३॥ अपविद्धैश्चभग्नैश्चरथैःसांग्रामिकैर्हयैः

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

निहतैः कुंजरैर्मत्तैस्तथा वानरराक्षसैः॥ चक्राक्षयुगदंडैश्च भग्नैर्धरणिसंश्रितैः॥ बभूवाथो धनं घोरं गोमायुबलसंकुलं॥
४५॥ कबंधानि समुत्पेतुर्दिक्षु वानररक्षसां॥ विमर्दे तुमुले तस्मिन् देवासुररणोपमे॥ ४६॥ निहन्यमाना हरिपुंगवैस्तदा निशा
चरः शोणितदिग्धगात्राः पुनश्च युद्धं तरसा समाश्रिता दिवाकरस्यास्तमयाभिकांक्षिणः॥ ४७॥ इत्यार्षे श्रीरामायणे श्रीरामा
यणे वाल्मीकीये युद्धकांडे त्रिचत्वारिंशः सर्गः॥ ४३॥ युध्यतामेवं तेषां तु तदा वानररक्षसां॥ रविरस्तं गतो रात्रिः प्रवृत्ता प्राणहा
रिणी॥ १॥ अन्योन्यं वद्धवैराणां घोराणां जयमिच्छतां॥ संप्रवृत्तं निशायुद्धं तथा वानररक्षसां॥ २॥ रक्षसो सीति हरयो हरिश्चा
ति राक्षसाः॥ अन्योन्यं समरे जघ्नुस्तस्मिंस्तमसि दारुणे॥ ३॥ जहि दारय चैहीति कथं विद्रवसीति च॥ एवं स तुमुलः शब्दस्तस्मि
न्नैन्येतुभुश्रुवे॥ ४॥ कालाः कांचनसन्नाहास्तस्मिंस्तमसि राक्षसाः॥ संप्रदृश्यंत शैलेंद्रादीप्तौषधिवनाद्वव॥ ५॥ तस्मिंस्तमसि दु
ष्पारे राक्षसाः क्रोधमूर्छिताः॥ परिपेतुर्महावेगा भक्षयंतः प्लवंगमान्॥ ६॥ तेहयान् कांचनीपीडान् गजांश्च शिखरोपमान्॥ आप्लु
त्य दशनैस्तीक्ष्णैर्भ्रमकोपाद्व्यदारयन्॥ ७॥ वानरा बलि नो युद्धेऽक्षोभयन् राक्षसीं चमूं॥ कुंजरान् कुंजरारोहान् पताकाध्व
जिनो रथान्॥ ८॥ चकर्षुश्च ददंशुश्च दशनैः क्रोधमूर्छिताः॥ लक्ष्मणश्चापि रामश्च शरैराशीविषोपमैः॥ ९॥ दृश्यादृश्यानि रक्षां
सि प्रवराणि निजघ्नतुः॥ तुरंगखुरविध्वस्तं रथनेमिसमुत्थितं॥ १०॥ रुरोध कर्णनेत्राणि युध्यतां धरणीरजः॥ वर्त्तमाने तथा घो

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

रेसंग्रामे लोमहर्षणे॥११॥रुधिरौघामहाघोरानद्यस्तत्रप्रसुस्रुवुः॥ततोभेरीमृदंगानांपणवानांचनिस्वनः॥१२॥शंखवेणुस्वनैर्मिश्रः
संबभूवाद्भुतोपमः॥विमर्देतुमुलेतस्मिन्देवासुररणोपमे॥१३॥हतानांस्तनमानानांरक्षसांचनिस्वनः॥शस्त्रानांवानराणांचसं
बभूवात्रदारुणः॥१४॥हतैर्वानरमुख्यैश्चशक्तिशूलपरश्वधैः॥निहतैःपर्वताकारैराक्षसैःकामरूपिभिः॥१५॥शस्त्रपुष्पोपहा
राचतत्रासीद्युद्धमेदिनी॥दुर्ज्ञेयादुर्विवेशाचशोणितास्रावकर्दमा॥१६॥साबभूवनिशाघोराहरिराक्षसहारिणी॥कालरात्री
वभूतानांसर्वेषांदुरतिक्रमा॥१७॥ततस्तेराक्षसास्तत्रतस्मिंस्तमसिदारुणे॥राममेवाभ्यवर्तंतसंहृष्टाःशरवृष्टिभिः॥१८॥तेषा
मापततांशब्दःक्रुद्धानामभिगर्जतां॥उद्धर्तइवसप्तानांसमुद्राणामभूत्स्वनः॥१९॥तेषांरामःशरैःषड्भिःषट्जघाननिशाच
रान्॥निमेषांतरमात्रेणशरैरग्निशिखोपमैः॥२०॥यज्ञशत्रुश्चदुर्धर्षौमहापार्श्वमहोदरौ॥वज्रदंष्ट्रोमहाकायस्तोचौभीमु
कसारणौ॥२१॥तेतुरामेणबाणौघैःसर्वेमर्मसुताडिताः॥युद्धादपसृतास्त्रस्तासावशेषायुषोऽभवन्॥२२॥निमेषांतरमात्रेण
घोरैरग्निशिखोपमैः॥दिशश्चकारविमनाप्रदीप्तश्चमहारथः॥२३॥तेत्वन्येराक्षसावीरारामस्याभिमुखेस्थिताः॥तेपिनष्टाःस
मासाद्यपतंगाइवपावकं॥२४॥सुवर्णपुंखैर्विशिखैःसंपतद्भिःसमंततः॥बभूवरजनीचित्राखद्योतैरिवशारदी॥२५॥राक्षसा
नांचनिनदैर्हरीणांचैवनिस्वनैः॥साबभूवनिशाघोराभूयोघोरतराभवत्॥२६॥तेनशब्देनमहताप्रवृद्धेनसमंततः॥त्रिकूटःकं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

दराकीर्णः प्रभाहरदिवाचल॥२७॥गोलांगूलामहाकायास्तमसातुल्यवर्चसः॥संपरिष्वज्यबाहुभ्यांभक्षयन्रजनीचरान्
२८॥अंगदस्तुरणेशत्रून्निहंतुंसमुपस्थितः॥रावणिंनिजघानाशुसारथिंचहयानपि॥२९॥इंद्रजितुरथंत्यक्त्वाहताश्चोहतसा
रथि॥अंगदेनमहामायस्तत्रैवांतरधीयत॥३०॥तत्कर्मवालिपुत्रस्यसर्वेदेवासहर्षिभिः॥तुष्टुवुःपूजनार्हस्यतौचोभौरामल
क्ष्मणौ॥३१॥प्रभावंसर्वभूतानिविदुरिंद्रजितोयुधि॥अदृश्यःसर्वभूतानांयोभवद्युधिदुर्जयः॥३२॥तेनतेतंमहात्मानंदृष्टादृष्टाः
प्रधर्षितं॥ततःप्रहृष्टाःकपयःससुग्रीवविभीषणाः॥३३॥साधुसाध्वितिनेदुश्चदृष्ट्वाशत्रुंपराजितं॥इंद्रजितुतदातेननिर्जितो
भीमकर्मणा॥३४॥संयुगेवालिपुत्रेणक्रोधंचक्रेसुदारुणं॥एतस्मिन्नंतरेरामोवानरान्वाक्यमब्रवीत्॥३५॥सर्वेभवंतस्तिष्ठंतु
कपिराजेनसंगताः॥सब्रह्मणादत्तवरस्त्रैलोक्यंबाधतेभृशं॥३६॥भवतामर्थसिध्यर्थंकालेनचसमागतः॥अद्यैवक्षमि
तव्यंमेभवंतोविगतज्वराः॥३७॥सोंतर्धानगतःपापोरावणीरणकर्कशः॥ब्रह्मदत्तवरोवीरोरावणिक्रोधमूर्छितः॥३८॥अदृश्यो
निशितान्बाणान्मोचयाशनिवर्चसः॥सरामंलक्ष्मणंचैवघोरैर्नागमयैःशरैः॥३९॥विभेदसमरेक्रुद्धःसर्वगात्रेषुराक्षसः
माययासंवृतस्तत्रमोहयन्राघवौ युधि॥४०॥अदृश्यःसर्वभूतानांकूटयोधीनिशाचरः॥बबंधशरबंधेनभ्रातरौरा
मलक्ष्मणौ॥४१॥तौतेनपुरुषव्याघ्रौक्रुद्धेनाशीविषैःशरैः॥सहसानिहतौवीरौतदाप्रेक्षंतवानराः॥४२॥ प्रकाशस्तूपस्तस्य

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

रिसंग्रामे लोमहर्षणे॥१२॥रुधिरौघामहाघोरानद्यस्तत्रप्रसुस्रुवुः॥ततोभेरीमृदंगानांपणवानांचनिस्वनः॥१३॥शंखवेणुस्वनैर्भिन्नः
संबभूवाद्भुतोपमः॥विमर्देतुमुलेतस्मिन्देवासुररणोपमे॥१३॥हतानांस्तनमानानांरक्षसांचनिस्वनः॥शस्त्रानांवानराणांचसं
बभूवातिदारुणः॥१४॥हतैर्वानरमुख्यैश्चशक्तिशूलपरश्वधैः॥निहतैःपर्वताकारैराक्षसैःकामरूपिभिः॥१५॥शस्त्रपुष्पोपहा
राचतत्रासीद्युद्धमेदिनी॥दुर्ज्ञेयादुर्विवेशाचशोणितास्रावकर्दमा॥१६॥साबभूवनिशाघोराहरिराक्षसहारिणी॥कालरात्री
वभूतानांसर्वेषांदुरतिक्रमा॥१७॥ततस्तेराक्षसास्तत्रतस्मिंस्तमसिदारुणे॥राममेवाभ्यवर्तंतसंहृष्टाःशरवृष्टिभिः॥१८॥तेषा
मापततांशब्दःक्रुद्धानामभिगर्जतां॥उद्धर्तइवसत्त्वानांसमुद्राणामभूत्स्वनः॥१९॥तेषांरामःशरैःषड्भिःषट्जघाननिशाच
रान्॥निमेषांतरमात्रेणशरैरग्निशिखोपमैः॥२०॥यज्ञशत्रुश्चदुर्धर्षौमहापार्श्वमहोदरौ॥वज्रदंष्ट्रौमहाकायस्तौचोभौशु
कसारणौ॥२१॥तेतुरामेणबाणौघैःसर्वेमर्मसुताडिताः॥युद्धादपसृतास्त्रस्तासावशेषायुषोऽभवन्॥२२॥निमेषांतरमात्रेण
घोरैरग्निशिखोपमैः॥दिशश्चकारविमनाप्रदीप्तश्चमहारथः॥२३॥येत्वन्येराक्षसावीरारामस्याभिमुखेस्थिताः॥तेपिनष्टाःस
मासाद्यपतंगाइवपावकं॥२४॥सुवर्णपुंखैर्विशिखैःसंपतद्भिःसमंततः॥बभूवरजनीचित्रारवद्योतेरिवशारदी॥२५॥राक्षसा
नांचनिनदैर्हरीणांचैवनिस्वनैः॥साबभूवनिशाघोराभूयोघोरतराभवत्॥२६॥तेनशब्देनमहताप्रवृद्धेनसमंततः॥त्रिकूटःकं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

दराकीर्णः प्रभाहरदिवाचल॥२७॥गोलांगूलामहाकायास्तमसातुल्यवर्चसः॥संपरिष्वज्यबाहुभ्यांभक्षयन्नरजनीचरान्
२८॥अंगदस्तुरणेशत्रून्निहंतुंसमुपस्थितः॥रावणिंनिजघानाशुसारथिंचहयानपि॥२९॥इंद्रजितुरथंत्यक्त्वाहताश्चोद्धतसा
रथि॥अंगदेनमहामायस्तत्रैवांतरधीयत॥३०॥तत्कर्मवालिपुत्रस्यसर्वेदेवासहर्षिभिः॥तुष्टुवुःपूजनार्हस्यतौचोभौरामल
क्ष्मणौ॥३१॥प्रभावंसर्वभूतानिविदुरिंद्रजितोयुधि॥अदृश्यःसर्वभूतानांयोभवद्युधिदुर्जयः॥३२॥तेनतेतंमहात्मानंदृष्ट्वाहृष्टाः
प्रधर्षितं॥ततःप्रहृष्टाःकपयःससुग्रीवविभीषणाः॥३३॥साधुसाध्वितिनेदुश्चदृष्ट्वाशत्रुंपराजितं॥इंद्रजितुतदातेननिर्जितो
भीमकर्मणा॥३४॥संयुगेवालिपुत्रेणक्रोधंचक्रेसुदारुणं॥एतस्मिन्नंतरेरामोवानरान्वाक्यमब्रवीत्॥३५॥सर्वेभवंतस्तिष्ठंतु
कपिराजेनसंगताः॥सब्रह्मणादत्तवरस्त्रैलोक्यंबाधतेभृशं॥३६॥भवतामर्थसिध्यर्थंकालेनचसमागतः॥अद्यैवक्षमि
तव्यंमेभवंतोविगतज्वराः॥३७॥सोतर्धानगतःपापोरावणीरणकर्कशः॥ब्रह्मदत्तवरोवीरोरावणिक्रोधमूर्छितः॥३८॥अदृश्यो
निशितान्बाणान्मोचयाशनिवर्चसः॥सरामंलक्ष्मणंचैवघोरैर्नागमयैःशरैः॥३९॥विभेदसमरेक्रुद्धःसर्वगात्रेषुराक्षसः
माययासंवृतस्तत्रमोहयन्राघवौ युधि॥४०॥अदृश्यःसर्वभूतानांकूटयोधीनिशाचरः॥बबंधशरबंधेनभ्रातरौरा
मलक्ष्मणौ॥४१॥तौतेनपुरुषव्याघ्रौक्रुद्धेनाशीविषैःशरैः॥सहसानिहतौवीरौतदाप्रेक्षंतवानराः॥४२॥प्रकाशस्तूपस्तूय

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

दानशक्तस्तौबाधितुंराक्षसराजपुत्रः॥मायांप्रयोक्तंसमुपाजगामबबंधतौराजसुतौदुरात्मा॥४३॥इत्यार्षेश्रीरामायणे
वाल्मीकीयेयुद्धकांडेचतुश्चत्वारिंशःसर्गः॥४४॥सतस्यगतिमन्विच्छन्राजपुत्रःप्रतापवान्॥दिदेशातिबलोरामोदशवा
नरयूथपान्॥१॥द्वौसुषेणस्यदायादौनीलंचप्लवगाधिपं॥अंगदंवालिपुत्रंचशरभंचतरस्विनं॥२॥विनतंजांबवंतंचसा
नुप्रस्थंमहाबलं॥ऋषभंचर्षभस्कंधंआदिदेशपरंतप॥३॥तेसंप्रहृष्टाहरयोभीमानुद्यम्यपादपान्॥आकाशंविविशु
ःसर्वेमार्गमाणादिशोदश॥४॥तेषांवेगवतांवेगमिषुभिर्वेगवत्तरैः॥अस्त्रवित्परमास्त्रेणवारयामासरावणिः॥५॥ते
वारितास्तुहरयोनाराचैःक्षतविक्षताः॥अंधकारेनददृशुर्मेघैःसूर्यमिवावृतं॥६॥रामलक्ष्मणयोरेवसर्वदेहभिदःश
रान्॥भृशमावेशयामासरावणिःसमितिंजयः॥७॥निरंतरशरीरौतुतावुभौरामलक्ष्मणौ॥कुद्देनेंद्रजितावीरौपन्नगैःशरतां
गतैः॥८॥तयोःक्षतजमार्गेणसुस्रावरुधिरंबहु॥तावुभौचप्रकाशेतेपुष्पिताविवकिंशुकौ॥९॥अथराक्षसवीरोसौभिन्नांज
नचयोपमः॥रावणिर्भ्रातरौवाक्यमंतर्धानगतोब्रवीत्॥१०॥युध्यमानमनालक्ष्यंशक्रोपित्रिदशेश्वरः॥द्रष्टुमासादितुंवा
पिनशक्तःकिंपुनर्युवां॥११॥आवृतावेषुजालेनराघवौकंकपत्रिणा॥एषरोषपरीतात्मानयामियमसादनं॥१२॥एवमुक्त्वातु
धर्मज्ञौभ्रातरौरामलक्ष्मणौ॥निर्विभेदशितैर्बाणैःप्रतोत्रैरिवकुंजरौ॥१३॥भिन्नांजनचयप्रख्यौविस्फार्यविपुलंधनुः॥भू

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

योभूयः शरान् घोरान् विससर्ज महामृधे ॥१४॥ ततो मर्मसु मर्मज्ञो मज्जयन्निशितांछ्शरान् ॥ रामलक्ष्मणयोर्घोरं ननाद च
मुहुर्मुहुः ॥१५॥ बद्धौ तु शरबंधेन तावुभौ रणमूर्धनि ॥ निमेषांतरमात्रेण न शेकतुरवेक्षितुं ॥१६॥ ततो विभिन्नसर्वांगौ शरश
ल्याचितौ हतौ ॥ ध्वजाविव महेंद्रस्य रज्जुमुक्तौ प्रकंपितौ ॥१७॥ तौ सप्रबलितौ वीरौ मर्मभेदनकर्षितौ ॥ निपेततुर्महेष्वासौ ज
गत्यां जगतीपती ॥१८॥ तौ वीरशयने वीरौ शयानौ रुधिरेक्षितौ ॥ शरवेष्टितसर्वांगावार्तौ परमपीडितौ ॥१९॥ नत्यविद्धतयो
र्गात्रं बभूव अंगुलमात्रकं ॥ नानिभिन्नं न चास्तथ्यं आकाराग्रादजिह्मगैः ॥२०॥ तौ तु क्रूरेण मिहतौ रक्षसा कामरूपिणा ॥ असृ
क्सुस्रवतुस्तीव्रं जलं प्रस्रवणाविव ॥२१॥ पपात प्रथमं रामो विद्धो मर्मसु मार्गणैः ॥ क्रोधादिंद्रजिता येन पुराशक्रो विनि
र्जितः ॥२२॥ रुक्मपुंखैः प्रसन्नाग्रैरजोगतिभिराशुगैः ॥ नाराचैरर्धनाराचैर्भल्लैरंजलिकैरपि ॥२३॥ विव्याध वत्सदंतैश्च सिंह
दंष्ट्रैः क्षुरैस्तथा ॥ सवीरशयने शिश्ये विस्मयमादाय कार्मुकं ॥२४॥ भिन्नमुष्टिपरीणाहं त्रिनतं रुक्मभूषितं [illegible] बाणपातो
तरे रामं पतितं पुरुषर्षभं ॥२५॥ स तत्र लक्ष्मणो दृष्ट्वा निराशो जीवितेभवत् ॥ रामं कमलपत्राक्षं शरण्यं शरतोषितं ॥२६॥ शुशो
च भ्रातरं दृष्ट्वा पतितं धरणीतले ॥ हरयश्चापि तं दृष्ट्वा संतापं परमं गताः ॥२७॥ शोकार्ताश्चुक्रुशुर्घोरमश्रुपूरितलोचनाः ॥२८॥
बद्धौ तु तौ वीरशये शयानौ ते वानराः संपरिवार्य तस्थुः ॥ समागतावायुसुतप्रमुख्या विषादमार्ताः परमं च जग्मुः ॥२९॥ इत्या

CC-0.Courtesy Shri K.S.Parihar, Librarian Government District Library Varanasi. Digitized by eGangotri

र्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेपंचचत्वारिंशःसर्गः॥४५॥ततोद्यांपृथिवींचैवचवीक्षमाणावनौकसः॥ददृशुःसततैर्बा
णैश्रीतरौरामलक्ष्मणौ॥दृष्ट्वैवापरतेदेवेकृतकर्मणिराक्षसैः॥आजगामाथतंदेशंससुग्रीवोविभीषणः॥२॥नीलश्चद्विविदो
मैंदःसुषेणकुमुदौगदः॥तूर्णंहनुमतासार्धमन्वशोचंतराघवौ॥३॥अचेष्टौमंदनिश्वासौशोणितेनपरिप्लुतौ॥शरजालाचि
तौस्तब्धौशयानौशरतल्पगौ॥४॥निश्वसंतौयथासर्पौनिश्चेष्टौदीनविक्रमौ॥रुधिरस्रावदिग्धांगौतपनीयाविवध्वजौ॥५॥
तौवीरशयनेवीरौशयानौमंदचेष्टितौ॥यूथपैःस्वैःपरिवृतौवाष्पव्याकुललोचनैः॥६॥राघवौपतितौदृष्ट्वाशरजालसमा
चितौ॥बभूवुर्व्यथिताःसर्वेवानराःसविभीषणाः॥७॥अंतरिक्षंनिरीक्षंतौदिशःसर्वाश्चवानराः॥नचैनंमाययाछन्नंददृशूरा
वणिंरणे॥८॥तंतुमायाप्रतिछन्नंमाययैवविभीषणः॥वीक्षमाणोददर्शाग्रेभ्रातुःपुत्रमवस्थितं॥९॥तमप्रतिमकर्माणमप्रति
द्वंद्वमाहवे॥ददर्शातर्हितंवीरंवरदानाद्विभीषणः॥१०॥तेजसायशसाचैवविक्रमेणचसंयुतः॥इंद्रजित्वात्मनःकर्मतौशया
नौसमीक्ष्यच॥११॥उवाचपरमप्रीतोहर्षयन्सर्वराक्षसान्॥दूषणस्यचहंतारौखरस्यचमहाबलौ॥सादितौमामकैर्बाणैर्भ्रा
तरौरामलक्ष्मणौ॥नैमौमोक्षयितुंशक्यावेतस्मादिषुबंधनात्॥१२॥सर्वैरपिसमागम्यसर्षिसंघैसुरासुरैः॥यत्कृतेचिंतयान
स्यशोकार्तस्यपितुर्मम॥अस्पृष्ट्वाशयनंगात्रैःस्त्रियामायातुशर्वरी॥कृत्स्नेयंयत्कृतेलंकानदीवर्षोस्विवाकुला॥१५॥सोयं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

मूलहरोनर्थःसर्वेषांशमितोमया॥रामस्यलक्ष्मणस्यैवसर्वेषांचवनौकसां॥१६॥विक्रमानिष्फलाःसर्वेयथाशरदितोयशः
एवमुक्तातुतान्सर्वान्राक्षसान्परिपश्यतः॥१७॥पृथपानपितान्सर्वांस्ताडयामासरावणिः॥नीलंनवभिराहत्यमैंदंस
द्विविदंतथा॥त्रिभिस्त्रिभिरमित्रघ्नस्तापपरमेषुभिः॥जांबवंतंमहेष्वासोविध्वाबाणेनवक्षसि॥१९॥हनूमतोवेगवतो
विससर्जशरान्दश॥ग वाक्षंशरभंचैवतावप्यमितविक्रमौ॥२०॥द्वाभ्यांद्वाभ्यांमहावेगोविव्याधसुधिरावणिः॥गोलां
गूलेश्वरंचैववालिपुत्रमथांगदं॥२१॥विव्याधबहुभिर्बाणैस्त्वरमाणोथरावणिः॥तान्वानरवरान्भित्वाशरैरग्निशिखोपमैः
२२॥ननादबलवांस्तत्रमहासत्वसरावणिः॥तानर्दयित्वाबाणौघैस्त्रासयित्वाचवानरान्॥२३॥प्रजहासमहाबाहुर्वचनं
चेदमब्रवीत्॥शरबंधेनघोरेणमयाबद्धौचमूमुखे॥२४॥सहितौभ्रातरावेतौनिशामयतराक्षसाः॥एवमुक्तास्तुतेसर्वेराक्ष
साःकूटयोधिनः॥२५॥परंविस्मयमापन्नाःकर्मणातेनहर्षिताः॥विनेदुश्चमहानादान्सर्वेतेजलदोपमाः॥२६॥हतोराम
इतिज्ञात्वारावणिंसमपूजयन्॥निष्पंदौतुतदादृष्ट्वाभ्रातरौरामलक्ष्मणौ॥२७॥वसुधायांनिरुच्छ्वासौहतावित्यवमन्यत
हर्षेणतुसमाविष्टइंद्रजित्समितिंजयः॥२८॥प्रविवेशपुरींलंकांहर्षयन्सर्वनैर्ऋतान्॥रामलक्ष्मणयोर्दृष्ट्वाशरीरेसायकै
श्चिते॥२९॥सर्वाणिचांगोपांगानिसुग्रीवंभयमाविशत्॥तमुवाचपरित्रस्तंवानरेंद्रविभीषणः॥३०॥सबाष्पवदनेदीनंको

CC-0.Courtesy Shri K.S.Parihar,Librarian Government District Library Varanasi. Digitized by eGangotri

धव्याकुललोचनं॥अलंत्रासेनसुग्रीववाष्पवेगोनिगृह्यतां॥३२॥एवंप्रायाणियुद्धानिविजयोनास्तिनैश्चिकः॥सर्वेषंभाग्यम
स्माकंयदिवीरभविष्यति॥३३॥मोहमेतौप्रहास्येतेम ह्यात्मानौमहाबले॥पर्यवस्थापयात्मानमनाथंमांचवानरः॥३३॥सत्यध
र्मीभिरक्तानांनास्तिमृत्युकृतंभयं॥एवमुक्तातत्तस्यजलक्लिन्नेनपाणिना॥३४॥सुग्रीवस्यशुभेनेत्रेप्रममार्जविभीषणः॥ततः
सलिलमादायविद्ययापरिजप्यच॥३५॥सुग्रीवनेत्रेधर्मात्माप्रममार्जविभीषणः॥विमृज्यवदनंतस्यकपिराजस्यधीमतः॥
अब्रवीत्कालसंप्राप्तमसंभ्रांतमिदंवचः॥नकालःकपिराजेंद्रवैक्लव्यमवलंबितुं॥३७॥अतिस्नेहस्त्वकालेस्मिन्मरणायो
पकल्पते॥तस्मादुत्सृज्यवैक्लव्यंसर्वकार्यविनाशनं॥३८॥हितंरामपुरोगाणांसैन्यानामनुचिंतय॥अथवारक्ष्यतारामोयाव
त्तंविपर्ययः॥३९॥लब्धसंज्ञौहिकाकुत्स्थौभयंनोव्यपनेष्यतः॥नैतत्किंचनरामस्यनचरामोमुमूर्षति॥४०॥न त्वेनंहास्यते
लक्ष्मीर्दुर्लभायागतायुषं॥तस्मादाश्वासयात्मानंबलंचाश्वासयस्वकं॥४१॥यावत्कार्याणिपुनःसंस्थापयाम्यहं॥एतेहिफु
ल्लनयनास्त्रासादागतसाध्वसाः॥४२॥कर्णेकर्णेप्रकथिताहरयोहरिपुंगव॥मांतुदृष्ट्वाप्रधावंतमनीकंसंप्रहर्षितुं॥४३
त्यजंतुहरयस्त्रासंभुक्तपूर्वामिवस्रजं॥समाश्वास्यतुसुग्रीवंराक्षसेंद्रोविभीषणः॥४४॥विद्रुतंवानरानीकंतत्समाश्वास
यसुनः इंद्रजित्तुमहामायसर्वसैन्यसमावृतः॥४५॥विवेशानगरींलंकांपितरंचाभ्युपागमत्॥तत्ररावणमासाद्यअभिवाद्य

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

कृतांजलिः॥४६॥आचचक्षेप्रियंपित्रेनिहतौरामलक्ष्मणौ॥उत्पपातततोहृष्टःपुत्रंचपरिषस्वजे॥४७॥रावणोराक्षसांमध्ये
श्रुत्वाशत्रूनिपातितौ॥उपाघ्रायचतंमूर्ध्निपत्रछत्रीतमानसः॥४८॥एकृतेचयथावृत्तंपित्रेतस्मैन्यवेदयत्॥यथातौशरबंधे
ननिश्चेष्टौनिष्प्रभौकृतौ॥४९॥सहर्षवेगानुगतांतरात्माश्रुत्वागिरंतस्यमहारथस्य॥जहौज्वरंदाशरथेःसमुत्थंप्रहृष्टवाचा
भिननंदपुत्रं॥५०॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेषट्चत्वारिंशःसर्गः॥४६॥तस्मिन्प्रविष्टेलंकायांकृतार्थेरा
वणात्मजे॥राघवंपरिवार्याथररक्षुर्वानरर्षभाः॥१॥हनूमानंगदोनीलोसुषेणःकुमुदोनलः॥गजोगवाक्षःपनसःसानुप्रस्थो
महाहरिः॥२॥जांबवान्ऋषभःसुदोरंभःशतबलिःपृथुः॥व्यूढानीकाश्चयत्ताश्चद्रुमानादायसर्वतः॥३॥वीक्षमाणादिशःसर्वा
स्तिर्यगूर्ध्वंचवानराः॥तृणेष्वपिचचेष्टत्सुराक्षसाइतिमेनिरे॥४॥रावणश्चापिसंहृष्टोविसृजेंद्रजितंसुतं॥आजुहावततः
सीतारक्षणीराक्षसीस्तदा॥५॥राक्षस्यस्त्रिजटाचापिशासनातमुपस्थिताः॥ताउवाचततोहृष्टोराक्षसीराक्षसाधिपः॥६॥हता
विंद्रजितारब्धातवेदेत्याराम लक्ष्मणौ॥पुष्पकंतत्समारोप्यदर्शयध्वंरणेहतौ॥७॥यदाश्रयादवष्टभ्यानेयंमामुपतिष्ठते॥सो
स्याभर्त्तासहभ्रात्रानिहतोरणमूर्धनि॥८॥निर्विशंकानिरुद्विग्नानिरपेक्षाचमैथिली॥मामुपस्थास्यतेसीतासर्वाभरणभूषिता
॥९॥अद्यकालवशंप्राप्तंरणेरामंसलक्ष्मणं॥अवेक्ष्यविनिवृत्ताशानान्यांगतिमपश्यती॥१०॥अनपेक्षाविशालाक्षीमामुपस्था

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

स्पतेस्वयं॥तस्मतद्वचनंश्रुत्वारावणस्यदुरात्मनः॥१४॥राक्षस्यस्तास्तथेत्युक्त्वाजग्मुर्वैयत्रपुष्पकं॥ततःपुष्पकमादायराक्षसो
रावणाज्ञया॥१२॥अशोकवनिकास्थांतांमैथिलींसमुपानयन्॥तामादायतुराक्षस्योभर्तृशोकपराजितां॥१३॥सीतामारोपया
मासुर्विमानंपुष्पकंतदा॥ततःपुष्पकमारोप्यसीतांत्रिजटयासह॥१४॥रावणःकारयामापताकाध्वजमालिनं॥प्राघोषयत
हृष्टश्चलंकायाराक्षसेश्वरः॥१५॥राघवोलक्ष्मणश्चैवहताविंद्रजितारणे॥विमानेनापिगत्वातुसीतात्रिजटयासह॥१६॥दद
र्शवानराणांतुसर्वंसैन्यंनिपातितं॥प्रहृष्टमनसश्चापिददर्शपितॄंस्तान्शरान्॥१७॥वानरांश्चातिदुःखार्तान्रामलक्ष्मण
पार्श्वतः॥ततःसीतादर्शभौशयानौशरतल्पयोः॥१८॥लक्ष्मणंचैवरामंचविसंज्ञौशरपीडितौ॥विध्वस्तकवचौवीरौविप्रा
विप्रविद्धशरासनौ॥१९॥सायकैश्छिन्नसर्वांगौशरस्तंभमयौक्षितौ॥तौदृष्ट्वाभ्रातरौतत्रप्रवीरौपुरुषर्षभौ॥२०॥शयानौपुंड
रीकाक्षौकुमाराविवपावकौ॥शरतल्पगतौवीरौतथाभूतौनरर्षभौ॥२१॥दुःखार्तौकरुणंसीतासुभृशंविललापह॥भर्तारम
नवद्यांगीलक्ष्मणंचासितेक्षणा॥२२॥प्रेक्ष्यपांसुषुचेष्टंतौरुरोदजनकात्मजा॥सावाष्पशोकाभिहतासमीक्ष्यतौभ्रातरौदे
वसुतप्रभावौ॥वितर्कयंतीनिधनंतयोःसादुःखान्वितावाक्यमिदंजगाद॥२४॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकां
डेसप्तचत्वारिंशःसर्गः॥४७॥भर्तारंनिहतंदृष्ट्वालक्ष्मणंचमहाबलं॥विललापभृशंसीताकरुणंशोककर्शिता॥१॥कुचुलो

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

क्षणिनोयेमांपुत्रिण्यविधवेतिच॥तेद्यसर्वेहतेरामेज्ञानिनोनृतवादिन॥२॥यज्वनोमहिषीयेमांऊचुःपत्नीचसत्रिणः
तेऽद्यसर्वेहतेरामेज्ञानिनोऽनृतवादिनः॥३॥वीरपार्थिवपत्नीत्वंयेधन्येतिचमांविदुः॥तेऽद्यसर्वेहतेरामेज्ञानिनोऽनृतवा
दिनः॥४॥ऊचुःसंश्रवणेयेमाद्विजाःकार्नीतिकांशुभां॥तेऽद्यसर्वेहतेरामेज्ञानिनोऽनृतवादिन॥५॥इमानिखलुपद्मानि
पादयोर्वैकुलस्त्रियः॥अधिराज्येभिषिच्यंतेनरेंद्रैःपतिभिःसह॥६॥वैधव्यंयांतियेनार्योऽलक्षणैर्भाग्यदुर्लभाः॥नात्मनस्तार
निपश्यामिपश्यंतीहतलक्ष्मणा॥७॥सत्यनामानिपद्मानिस्त्रीणांमुक्तानिलक्षणैः॥तान्यद्यनिहतेरामेवितथानिभवंतिमे॥८
केशासूक्ष्माःसमानीलाभ्रुवौचासंगतेमम॥हृतेचारोमशेजंघेदंताश्चविरलामम॥९॥शंखेनेत्रेकरौपादौगुल्फावूरूचमेचि
तौ॥अनुवृत्तानखास्निग्धाःसमाश्चांगुलयोमम॥१०॥स्तनौचाविरलौपीनौममभौमग्नचूचुकौ॥मग्नाचोत्संगिनीनाभिःपार्श्वौ
रकाश्चमेचिता॥११॥ममवर्णोमणिनिभोमृदून्यंगरुहाणिच॥प्रतिष्ठितांद्वादशभिर्मामूचुःशुभलक्षणां॥१२॥समग्रंयवमच्छिद्रंपा
णिपादंचवर्णवत्॥मंदस्मितेत्येवचमांकन्यांलाक्षणिकाविदुः॥१३॥आधिराज्येऽभिषेकोमेब्राह्मणैःपतिनासह॥कृतांतकु
शलैरुक्तंतत्सर्वंवितथीकृतं॥१४॥शोधयित्वाजनस्थानंप्रवृत्तिमुपलभ्यमे॥तीर्त्वासागरमक्षोभ्यंभ्रातरौगोष्पदेहतौ॥१५॥ननु
वारुणमाग्नेयमैंद्रंवायव्यमेवच॥अस्त्रंब्रह्मशिरश्चैवराघवौप्रत्यपद्यतां॥१६॥अदृश्यमानेनरणेमायया चासवोपमौ॥मम

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नाथायानिहतौरामलक्ष्मणौ॥१७॥नहिदृष्टिपथंप्राप्यराघवरणेरिपुः॥जीवन्प्रतिनिवर्तेतयद्यपिस्यान्मनोजवः॥१८॥नकालस्यातिभारोस्तिकृतांतस्यसुदुर्जयः॥यत्रराम:सहभ्रात्राशेतेयुधिनिपातितः॥१९॥नशोचामितथारामंलक्ष्मणंचमहारथं॥नात्मानंजननींचापियथाश्वश्रूंतपस्विनीं॥२०॥सातुचिंतयतेनित्यंसमाप्तव्रतमागतं॥कदाद्रक्षामिसीतांचरामंचसहलक्ष्मणं॥२१॥परिदेवयमानांतांराक्षसीत्रिजटाब्रवीत्॥माविषादंकृथादेविभर्तास्यंतवजीवति॥२२॥कारणैश्चापिवक्ष्यामिमहांतिसदृशानिच॥यथेमौजीवतोदेवीभ्रातरौरामलक्ष्मणौ॥२३॥नहिकोपपरीतानिहर्षपर्युत्सुकानिच॥भवंतियुधियोधानांमुखानिनिहतेपतौ॥२४॥इदंविमानंवैदेहिपुष्पकंनामनामत॥दिव्यंत्वांधारयेन्नेदंयद्येतौगतजीवितौ॥२५॥हतवीरप्रधानाहिगतोत्साहानिरुद्यमा॥सेनाभ्रमतिसंख्येषुहतकर्णेवनौर्जले॥२६॥इयंपुनरसंभ्रांतानिरुद्विग्नातपस्विनी॥सेनारक्षतिकाकुत्स्थौमयाप्रीत्यानिवेदितौ॥२७॥सात्वंभवसुविस्रब्धाअनुमानैःसुखोदयं॥अहतौपश्यकाकुत्स्थौस्नेहादेतद्ब्रवीमिते॥२८॥अनृतंभोक्तपूर्वंमेनचवक्ष्यामिमैथिलि॥चारित्रसुखशीलत्वात्प्रतिष्ठासिमनोममम॥२९॥नैमौशक्यौरणेजेतुंसेंद्रैरपिसुरासुरैः॥तादृशंदर्शनंदृष्टंमयाचावेदितंतव॥३०॥इदंतुसुमहच्चिह्नंशरैःपश्यस्वमैथिलि॥निःसंज्ञावप्युभावेतौनैवलक्ष्याविपुज्यतां॥३१॥प्रायेणगतसत्वानांपुरुषाणांगतायुषां॥दृश्यमानेषुचक्रेषुपरंभवतिवैकृतं॥३२॥त्यजशोकंचदुःखंचमोहंचजनकात्मजे॥राम

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

लक्ष्मणयोरर्थेनाद्यशक्यमजीवितुं॥३३॥श्रुत्वातुवचनंतस्याःसीतासुरसुतोपमा॥कृतांजलिरुवाचेदमेवमस्त्वितिमैथिली
३४॥विमानंपुष्पकंतंतुसन्निवर्त्यमनोजवं॥दीनात्रिजटयासीतालंकामेवप्रवेशिता॥३५॥ततस्त्रिजटयासार्धंपुष्पकादवस
त्यसा॥अशोकवनिकामेवराक्षसीभिःप्रवेशिता॥३६॥प्रविश्यसीतावहुवृक्षखंडांतांराक्षसेंद्रस्यविहारभूमिं॥संप्रेक्ष्यसं
चिंत्यचराजपुत्रौपरंविषादंसमुपाजगाम॥३७॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेअष्टचत्वारिंशःसर्गः॥४८॥घो
रेणशरबंधेनबद्धौदशरथात्मजौ॥निश्वसंतौयथानागौशयानौरुधिरोक्षितौ॥१॥सर्वेतेवानरश्रेष्ठाःससुग्रीवमहाबला
परिवार्यमहात्मानौतस्थुःशोकपरिप्लुताः॥२॥एतस्मिन्नंतरेरामःप्रत्यबुध्यतवीर्यवान्॥स्थिरत्वात्सत्वयोगाच्चशरैःसंदा
नितोपिसन्॥३॥ततोदृष्ट्वासरुधिरंविषण्णंगाढमर्पितं॥लक्ष्मणंभ्रातरंदीनंपर्यदेवयदातुरः॥४॥किन्नुमेसीतयाकार्यंल
ब्धयाजीवितेनवा॥शयानंयोद्यपश्यामिभ्रातरंयुधिनिर्जितं॥५॥शक्यासीतासमानारीमर्त्यलोकेविचिन्वता॥नलक्ष्मण
समोभ्रातासचिवःसांपरायिकः॥६॥परित्यक्ष्याम्यहंप्राणान्वानराणांतुपश्यतां॥यदिपंचत्वमापन्नःसुमित्रानंदवर्धनः॥७
किंनुवक्ष्यामिकौसल्यांमातरंकिन्नुकैकयीं॥कथमंबासुमित्रांचपुत्रदर्शनलालसां॥८॥विवत्सांवेपमानांचवेपंतीकुररीमि
व॥कथमाश्वासयिष्यामियदिस्योयोमितंविना॥९॥कथंवक्ष्यामिशत्रुघ्नंभरतंचयशस्विनं॥[redacted]

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

[illegible]॥मयासहवनंयातोविनातेनगतःपुनः॥१४॥उपालंभनवक्ष्या[illegible]मिसोदुंबतसुमित्रया॥इहैवदेहंत्यक्ष्यामिनहिजीवि
तुमुत्सहे॥१५॥धिङ्मांदुष्कृतकर्माणमनार्यमकृतेद्यसौ॥लक्ष्मणःपतितःशेतेशरतल्पेगतासुवत्॥१६॥त्वंनित्यंसुविषण्णंमांआ
श्वासयसिलक्ष्मण॥गतासुर्नाद्यशक्नोमिमामार्तमभिभाषितुं॥१७॥येनाद्यबहवोलोकेनिहताराक्षसाःक्षितौ॥तस्यामेवाद्यशू
रस्त्वंशेषेविनिहतःशरैः॥१८॥शयानःशर[illegible]ल्पेस्मिन्सशोणितपरिप्लुतः॥शरभूतस्ततोभासिभास्करोस्तमिवव्रजन्॥१९॥
बाणाभिहतममात्वंनशक्नोषीहभाषितुं॥रुजावाब्रुवतोयस्यदृष्टिरागेणसूच्यते॥२०॥यथैवमांवनंयांतमनुयातोमहाद्युतिः
अहमप्यनुयास्यामितथैवैनंयमक्षयं॥२१॥इष्टबंधुजनंनित्यंमांचनित्यमनुव्रतः॥इमामद्यगतोवस्थाममानार्यस्यदुर्नयैः
२२॥सुरुष्टेनापिवीरेनलक्ष्मणेनचसंस्मरे॥परुषंविप्रियंवापिश्रावितंनकदाचन॥२३॥विसमर्जैकवेगेनपंचबाणशतानि
च॥इषुस्त्रेषधिकस्तस्मात्कार्तवीर्याच्चलक्ष्मणः॥२४॥अस्त्रैरस्त्राणियोहन्याच्छक्रस्यापिमहात्मनः॥सोयमुर्व्योहतःशेतेम
हार्हशयनोचितः॥२५॥तत्रमिच्छाम्यहंनेमांप्रधक्ष्यतिनसंशयः॥यन्मयानकृतोराजाराक्षसानांविभीषणः॥२६॥अस्मिन्मु
हूर्तेसुग्रीवःप्रतियातुमितोर्हसि॥मत्वाहीनंमयारावणोभिभविष्यति॥२७॥अंगदंतुपुरस्कृत्यससैन्यःसपरिच्छदः॥सागरंतर
सुग्रीवनीलेनचनलेनच॥२८॥कृतंहनुमताकार्यंयदन्यैर्दुष्करंरणे॥ऋक्षराजेनतुष्यामिगोलांगूलाधिपेनच॥२९॥अंगदेनकृ

CC-0.Courtesy Shri K.S.Parihar, Librarian Government District Library Varanasi. Digitized by eGangotri

तंकर्ममैदेनद्विविदेनच॥युद्धंकेसरिणसंख्येघोरंसंपातिनाकृतं॥२६॥गवयेनगवाक्षेणशरभेणगजेनच॥अन्यैश्चहरिभिर्युद्धे
मदर्थेत्यक्तजीवितैः॥२७॥नचातिक्रमितुंशक्यंदैवंसुग्रीवमानुषैः॥यत्तुशक्यंवयस्येनसुहृदोवापरंतप॥२८॥कृतंसुग्रीवतत्स
र्वंभवताधर्मभीरुणा॥मित्रकार्यंकृतमिदंभवद्भिर्वानरर्षभाः॥२९॥अनुज्ञातामयासर्वेयथेष्टंगंतुमर्हथ॥सुश्रुवुस्तस्ययेस
र्वेवानराःपरिदेवितं॥३०॥वर्तयांचक्रिरेभूमिनेत्रैःकृष्णेतरेक्षणाः॥ततःसर्वाण्यनीकानिस्थापयित्वाविभीषणः॥३१॥आज
गामगदापाणिस्त्वरितोयत्रराघवः॥तंदृष्ट्वात्वरितंयांतंनीलांजनचयोपमं॥वानरादुदुवुःसर्वेमन्यमानास्तुरावणिं॥३२॥इ
त्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेएकोनपंचाशत्सर्गः॥४९॥अथोवाचमहातेजाहरिराजोमहाबलः॥किमियंमथि
तासेनामूढवातेवनौर्जले॥१॥सुग्रीवस्यवचःश्रुत्वाबालिपुत्रोगदोब्रवीत्॥किन्नपश्यसिरामंचलक्ष्मणंचमहारथं॥२॥
शरजालाचितौवीरावुभौदशरथात्मजौ॥शरतल्पेमहात्मानौशयानौरुधिरोक्षितौ॥३॥अथाब्रवीद्वानरेंद्रःसुग्रीवपुत्रमं
गदं॥नानिमित्तमिदंमन्येभवितव्यंभयेनतु॥४॥विषण्णवदनाह्येतेत्यक्तप्रहरणादिराः॥पलायंत्रहरयस्त्रासादुत्फुल्ललो
चनाः॥५॥अन्योन्यस्यनजल्पंतेननिरीक्षंतिएष्टतः॥विप्रकर्षंतिचान्योन्यंपतितंलंघयंतिच॥६॥एतस्मिन्नंतरेवीरोगदापा
णिर्विभीषणः॥सुग्रीवंवर्धयामासराघवंचनिरैक्षत॥७॥विभीषणंतंसुग्रीवोदृष्ट्वावानरभीषणं॥ऋक्षराजसमीपस्थंजां

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

बवंतंसुवाचह॥विभीषणोऽयंसंप्राप्तोयंदृष्ट्वावानरर्षभाः॥इवंत्यागतसंत्रासारावणात्मजशंकया॥९॥शीघ्रमेतान्सुमंत्रस्ता
न्बहुधाविप्रधावितान्॥पर्यवस्थापयाख्याहिविभीषणमुपस्थितं॥१०॥सुग्रीवेणैवमुक्तस्तुजांबवान्ऋक्षपार्थिवः॥वानरान्सं
त्वयामाससंनिवर्त्यप्रधावतः॥११॥तेनिवृत्ताःपुनःसर्वेवानरास्त्यक्तसाध्वसाः॥ऋक्षराजवचःश्रुत्वातंचदृष्ट्वाविभीषणं॥
१२॥विभीषणस्तुरामस्यदृष्ट्वागात्रंशरैश्चितं॥लक्ष्मणस्यतुधर्मात्माबभूवव्यथितस्तदा॥१३॥जलक्लिन्नेनहस्तेनतयोर्ने
त्रविमृज्यच॥शोकसंपीडितमनारुरोदविललापच॥१४॥इमौतौसत्वसंपन्नौविक्रांतौप्रियसंयुगौ॥इमामवस्थांगमितौरा
क्षसैःकूटयोधिभिः॥१५॥भ्रातुःपुत्रेणचैतेनदुष्पुत्रेणदुरात्मना॥राक्षसाजिह्मयाबुद्ध्याचलितौराज्यविक्रमौ॥१६॥शरैरिमाव
लंविद्धौरुधिरेणसमुक्षितौ॥वसुधायामिमौसुप्तौदृश्येतेशल्यकाविव॥१७॥ययोर्वीर्यमुपाश्रित्यप्रतिष्ठाकांक्षितामया॥ताविमौ
दिहनाशायप्रसुप्तौपुरुषर्षभौ॥१८॥जीवन्नद्यविपन्नोस्मिनष्टराज्यमनोरथः॥प्राप्तप्रतिज्ञश्चरिपुःसकामोरावणोभूत्॥१९॥
एवंविलपमानंतंपरिष्वज्यविभीषणं॥सुग्रीवःसत्वसंपन्नोहरिराजोब्रवीदिदं॥२०॥राज्यंप्राप्स्यसिधर्मज्ञलंकायांनेहसंशयः
रावणःसहपुत्रेणस्वराज्यंनेहलप्स्यते॥२१॥नरुजापीडितावेतावुभौराघवलक्ष्मणौ॥त्यक्तकामोहंवधिष्येतेसगणंरावणंरणे॥२२
तमेवंसांत्वयित्वातुसमाश्वास्यतुराक्षसं॥सुषेणंश्वशुरंपार्श्वेसुग्रीवस्तुवाचह॥२३॥सहशूरैर्हरिगणैर्लब्धसंज्ञावरिंदमौ

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

गच्छत्वं भ्रातरौ गृह्य किष्किंधां रामलक्ष्मणौ ॥२४॥ अहं तु रावणं हत्वा सपुत्रं सहबांधवं ॥ मैथिलीमानयिष्यामि शक्रो नष्टामिव
श्रियं ॥२५॥ श्रुत्वैतद्वानरेंद्रस्य सुषेणो वाक्यमब्रवीत् ॥ देवासुरं महायुद्धमनुभूतं पुरातनं ॥२६॥ तदास्मद्दानवा देवान् शरसंस्प
र्शकोविदाः ॥ निजघ्नुः शस्त्रविदुषः छादयंतो मुहुर्मुहुः ॥२७॥ नानार्तान्नष्टसंज्ञाश्च परासूंश्च बृहस्पतिः ॥ विद्याभिर्मंत्रयुक्ता
भिरोषधीभिश्चिकित्सति ॥२८॥ तान्यौषधान्यानयितुं क्षिरोदं यातु सागरं ॥ जवेन वानराः शीघ्रं संपातिपनसादयः ॥२९॥ हरयः
स्तु विजानंति पार्वतीस्तामहौषधीः ॥ संजीवकरुणीं दिव्यां विशल्यां देवनिर्मितां ॥३०॥ चंद्रश्चैनाम्नाद्रोणश्च क्षीरोदे सागरोत्त
मे ॥ अमृतं यत्र मथितं तत्र ते परमौषधी ॥३१॥ ते तत्र विहिते देवैः पर्वते तु महौषधी ॥ अयं वायुसुतो राजन् हनूमांस्तत्र गच्छतु
३२॥ अथैनमुपसंगम्य वायुः श्रोत्रे वचोऽब्रवीत् ॥ राम राम महाबाहो स्वात्मानं स्मर वै प्रभो ॥ नारायणस्त्वं भगवान् राक्षसार्थे व
तारितः ॥ स्मर सर्पभुजं देवं वैनतेयं महाबलं ॥ स सर्पबंधनाद्घोरा ध्रुवं मोचयिष्यति ॥ स तस्य वचनं श्रुत्वा राघवो रघुनंदनः ॥ स्म
रं स्मार गरुडं रामो भुजंगानां भयावहं ॥ एतस्मिन्नंतरे वायुर्मेघाश्चापि सविद्युतः ॥ पर्यस्य सागरे तोयं कंपयन्निव पर्वतान् ॥३३॥
महतापक्षवातेन सर्वद्विपमहाद्रुमाः ॥ निपेतु [illegible] भग्नविटपाः समूलालवणांभसि ॥३४॥ अभवन्पन्नगास्त्रस्ताभोगिनस्तत्र वा
सिनः शीघ्रसर्वाणि पारं सिजग्मुश्चलवणार्णवं ॥३५॥ ततो मुहूर्ताद्गरुडं वैनतेयं महाबलं ॥ वानरा ददृशुः सर्वे ज्वलंतमिव पा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वकं॥३६॥तमागतमभिप्रेक्ष्य नागास्ते विप्रदुद्रुवुः॥ये स्तौ पुरुषौ बद्धौ शरभूतैर्महाबलौ॥३७॥ततः सुपर्णः काकुत्स्थौ स्पृष्ट्वा
प्रत्यभिनंद्य च॥विममर्श च पाणिभ्यां मुखे चंद्रसमप्रभे॥३८॥वैनतेयेन संस्पृष्टास्तयोः संरुरुहुर्व्रणाः॥सुपर्णे चतनूस्निग्धे तयो
राभूवभूवतुः॥३९॥तेजो वीर्यं बलं चौजउत्साहश्च महान्गुणः॥प्रदर्शनं च बुद्धिश्च स्मृतिश्च द्विगुणं तयोः॥४०॥तावुत्थाप्य महा
वीर्यौ गरुडो वासवोपमौ॥उभौ तौ सस्वजे हृष्टो रामश्चैनमुवाच ह॥४१॥भवत्प्रसादाद्व्यसनं रावणिप्रभवं महत्॥आवामिह
व्यतिक्रांतौ शीघ्रं च बलिनौ कृतौ॥४२॥यथा तातं दशरथं यथा जं च पितामहं॥तथा भवंतमासाद्य हृदयं मे प्रसीदति॥४३॥को
भवान्रूपसंपन्नो दिव्यस्रगनुलेपनः॥वसानो विरजे वस्त्रे दिव्याभरणभूषितः॥४४॥तमुवाच महातेजा वैनतेयो महाबलः
पतत्रिराजः प्रीतात्मा हर्षपर्याकुलेक्षणः॥४५॥अहं सखा ते काकुत्स्थ प्रियः प्राणो बहिश्चरः गरुत्मानिह संप्राप्तो युवयोः सा
ह्यकारणात्॥४६॥असुरा वा महावीर्या दानवा वा महाबलाः॥सुराश्चापि सगंधर्वाः पुरस्कृत्य शतक्रतुं॥४७॥नैमं मोक्षयितुं शक्ता
शरबंधं सुदारुणं॥मया बलादिंद्रजिता निर्मितं क्रूरकर्मणा॥४८॥एते नागा काद्रवेयास्तीक्ष्णदंष्ट्राविषोत्कटाः॥रक्षो मया प्र
भावेण शरभूतास्त्वदाश्रिताः॥४९॥सभाग्यश्चासि धर्मज्ञ रामं सत्यपराक्रमं॥लक्ष्मणेन सह भ्रात्रा समरे रिपुघातिना॥५०॥इमं
श्रुत्वा तु वृत्तांतं त्वरमाणो ह्यमागतः॥सहसा युवयोः स्नेहात्सखित्वमनुपालयन्॥५१॥मोक्षितौ च महाघोराद स्मात्सायकबं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

धनात्॥अप्रमादश्चकर्त्तव्योयुवाभ्यांनित्यमेवहि॥५२॥त्वकृत्याराक्षसाःसर्वेसंग्रामेकूटयोधिनः॥शूराणांशुद्धभावानांभव
तामाजवेबलं॥५३॥तन्नविश्वसितव्यंवोराक्षसानांरणाजिरे॥एतेनैवोपमानेननित्यंजिह्माहिराक्षसाः॥५४॥एवमुक्त्वाततो
रामंसुपर्णःसुमहाबलः॥परिष्वज्यचसुस्निग्धमात्रष्टुमुपचक्रमे॥५५॥सखेराघवधर्मज्ञरिपूणामपिवत्सलः॥अभ्यनुज्ञातु
मिच्छामिगमिष्यामियथागतं॥५६॥नचकौतूहलंकार्यंसखित्वंप्रतिराघवः॥कृतकर्मारणेवीरसखित्वमनुवेत्स्यसि॥५७॥बा
लवृद्धावशेषांतुलंकांकृत्वाशरोर्मिभिः॥सरावणंरिपुंहत्वासीतांत्वमुपलप्स्यसे॥५८॥इत्येवमुक्त्वावचनंसुपर्णःशीघ्रविक्र
मः॥रामंचविरुजंकृत्वामध्येतेषांवनौकसां॥५९॥त्रदक्षिणंततःकृत्वापरिष्वज्यचवीर्यवान्॥आजगामाकाशमाविश्यसुपर्णः
पवनोयथा॥६०॥नीरुजौराघवौदृष्ट्वाततोवानरयूथपाः॥सिंहनादंतदानेदुर्लांगूलंदुधुवुश्चते॥६१॥ततोभेरीसमाजघ्नुर्मृदंगा
श्चाप्यनादयन्॥दध्मुःशंखान्सुसंहृष्टाःक्ष्वेलंत्यपियथापुरा॥६२॥अपरेस्फोट्यविक्रांतावानरानगयोधिनः॥द्रुमानुत्पाट्य
विविधांस्तस्थुःशतसहस्रशः॥६३॥विसृजंतोमहानादांस्त्रासयंतोनिशाचरान्॥लंकाद्वाराण्युपाजग्मुर्युद्धकामाप्लवंगमाः
६४॥ततस्तुभीमस्तुमुलोनिनादोबभूवशाखामृगयूथपानां॥क्षयेनिदाघस्यथाघनानांनादःसुभीमोनदतांनिशीथे
६५॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेपंचाशत्सर्गः॥५०॥तेषांतुतुमुलंशब्दंवानराणांमहौजसां॥नर्दतांराक्षसैःसार्धं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

तदाशुश्रावरावणः॥१॥स्निग्धगंभीरनिर्घोषंश्रुत्वातंनिनदंभृशं॥सचिवानांततस्तेषांमध्येवचनमब्रवीत्॥२॥यथायथासौसंग्रहृष्टा
नांवानराणांसमुत्थितं॥बहूनांसुमहानादोमेघानामिवगर्जतां॥३॥व्यक्तंसुमहतीप्रीतिरेतेषांनात्रसंशयः॥तथाहिविपुलैर्नो
दैश्चुक्षुभेवरुणालयैः॥४॥तौतुबद्धौशरैस्तीक्ष्णैर्भ्रातरौरामलक्ष्मणौ॥अयंचसुमहान्नादःशंकांजनयतीवमे॥५॥एतत्तुवचनं
चोत्कामंत्रिणोराक्षसेश्वरः॥उवाचनैर्ऋतांस्तत्रसमीपपरिवर्तिनः॥६॥ज्ञायतांतूर्णमेतेषांसर्वेषांचवनौकसां॥शोककालेस
मुत्पन्नेहर्षकारणमुत्थितं॥७॥तथोक्तास्तेसुसंभ्रांताःप्राकारमधिरुह्यच॥ददृशुःपालितांसेनांसुग्रीवेणमहात्मना॥८॥तौचसु
क्तौसुघोरेणशरबंधेनराघवौ॥समुत्थितौमहाभागौविषेदुःप्रेक्षराक्षसाः॥९॥संत्रस्तहृदयाःसर्वेप्राकाराद्वरुह्यते॥विषण्ण
वदनाघोराराक्षसेंद्रमुपस्थिताः॥१०॥तदप्रियंदीनमुखारावणस्यनिशाचराः॥कृत्स्नंनिवेदयामासुर्यथावक्यंद्रोकोविदाः॥११
॥यौताविंद्रजितायुद्धेभ्रातरौरामलक्ष्मणौ॥निबद्धौशरबंधेननिष्प्रकंपभुजौकृतौ॥१२॥विमुक्तौशरबंधेनदृश्येतेतौरणाजिरे
पाशानिवगजौछित्वागजेंद्रसमविक्रमौ॥१३॥ततश्चुवचनंतेषांराक्षसेंद्रोमहाबलः॥चिंताशोकसमाक्रांतोविवर्णवदनोब्र
वीत्॥१४॥घोरैर्दनवरैर्बद्धौशरैराशीविषोपमैः॥अमोघैःसूर्यसंकाशैःप्रमथ्येंद्रजितायुधि॥१५॥तदस्त्रवधमासाद्ययदिमु
क्तौरिपूममः॥संशयस्थमिदंसर्वमनुपश्याम्यहंबलं॥१६॥निष्फलाःखलुसंवृत्ताःशरावासुकितेजसः॥आदत्तंयैस्तुसंग्रामेरिपू

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

णांममजीवितं॥१२॥एवमुक्त्वातुसंक्रुद्धोनिश्वस्यभुजगोयथा॥अब्रवीद्राक्षसांमध्येधूम्राक्षंनामराक्षसं॥१३॥बलेनमहतायुक्तार
क्षसाभीमविक्रम॥त्वंविधायशुनिर्यात्रिरामस्यसहवानरैः॥१४॥एवमुक्तस्तुधूम्राक्षोराक्षसेंद्रेणधीमता॥परिक्रम्यततःशीघ्रं
निर्जगामनृपालयात्॥१५॥अभिनिष्क्रम्यतद्द्वारंबलाध्यक्षमुवाचह॥त्वरयस्वबलंशीघ्रंकिंचिरेणयुयुत्सतः॥१६॥धूम्राक्षव
चनंश्रुत्वाबलाध्यक्षोबलानुगः॥बलमुद्योजयामासरावणस्याज्ञयाद्रुतं॥१७॥तेबद्धघंटाबलिनोघोररूपानिशाचराः॥वि
नद्यमानासंहृष्टाधूम्राक्षंपर्यवारयन्॥१८॥विविधायुधहस्ताश्चशूलमुद्गरपाणयः॥गदाभिःपट्टिशैर्दंडैरायसैर्मुसलैर
पि॥१९॥परिघैर्भिंडिपालैश्चभल्लैःप्रासैःपरश्वधैः॥निर्ययूराक्षसाघोरानर्दंतोजलदायथा॥२०॥रथैःकवचिनस्त्वन्येध्वजै
श्चसमलंकृतैः॥सुवर्णजालरचितैःखरैश्चविविधाननैः॥२१॥हयैःपरमशीघ्रैश्चगजैश्चैवमदोत्कटैः॥निर्ययूराक्षसाघोराव्या
घ्राइवदुरासदाः॥२२॥ऋक्षसिंहमुखैर्युक्तंखरैःकनकभूषितैः॥आरुरोहरथंदिव्यंधूम्राक्षःखरनिस्वनः॥२३॥सनिर्यातोमहा
वीर्योधूम्राक्षोराक्षसैर्वृतः॥प्रहसन्पश्चिमद्वाराद्धनूमान्यत्रयूथपः॥२४॥रथप्रवरमास्थायखरयुक्तंखरस्वनं॥प्रयांतंतु
महावीरंराक्षसंभीमदर्शनं॥३०॥अंतरिक्षगताःक्रूराःशकुनाःप्रत्यषेधयन्॥रथशीर्षेमहाभीमोगृध्रश्चनिपपातह॥३१॥
ध्वजाग्रेग्रथिताश्चैवनिपेतुकुणपाशनाः॥रुधिरार्द्रोमहान्श्वेतःकबंधःपतितोभुवि॥३२॥विस्वरंचोत्सृजन्नादंधूम्राक्षस्य

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

समीपतः॥ववर्षरुधिरंदेवःसंचचालचमेदिनी॥३३॥प्रतिलोमंववौवायुर्निर्घातसमनिस्वनः॥तिमिरौघावतास्तत्रदिशश्चनचक
शिरे॥३४॥सतूत्पातांस्ततोदृष्ट्वाराक्षसानांभयावहान्॥प्रादुर्भूतान्सुघोरांश्चधूम्राक्षोव्यथितोभवत्॥३५॥मुमुदुराक्षसाःसर्वेधू
म्राक्षस्यपुरःसराः॥३६॥ततःसभीमोबहुभिर्निशाचरैर्वृतोभिनिष्क्रम्यरणोत्सुकोबली॥ददर्शतांराघवबाहुपालितांसमुद्रक
ल्पांबहुवानरीचमूं॥३७॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेएकपंचाशत्सर्गः॥५१॥धूम्राक्षंप्रेक्षनिर्यांतंराक्षसंभीम
विक्रमं॥विनेदुर्वानराःसर्वेप्रहृष्टायुद्धकांक्षिणः॥१॥तेषांसुतुमुलंयुद्धंसंजज्ञेकपिरक्षसां॥अन्योन्यंपादपैर्घोरैर्निघ्नतांशूलमु
द्गरैः॥२॥राक्षसैर्वानराघोराविनिकृत्ताःसमंततः॥वानरैराक्षसाश्चापिद्रुमैर्भूमौसमीकृताः॥३॥राक्षसास्त्वभिसंक्रुद्धावानरा
न्निशितैःशरैः॥विव्यधुर्घोरसंकाशैःकंकपत्ररजिह्मगैः॥४॥तेगदाभिश्चभीमाभिःपट्टिशैःकूटमुद्गरैः॥घोरैश्चपरिघैश्चित्रैस्त्रि
शूलैश्चापिसंहतैः॥५॥विदार्यमाणारक्षोभिर्वानरास्तेमहाबलाः॥अमर्षाज्जनितोद्धर्षाश्चक्रुःकर्माण्यभीतवत्॥६॥शरनिर्भिन्न
गात्रास्तेशूलनिर्भिन्नदेहिनः॥जगृहुस्तेद्रुमास्तत्रशिलाश्चहरियूथपाः॥७॥तेभीमवेगाहरयोनर्दमानाःसमंततः॥ममंथूराक्ष
सान्वीरान्नामानिचबभाषिरे॥८॥तद्बभूवाद्भुतंघोरंयुद्धंवानररक्षसां॥शिलाभिर्विविधाभिश्चबहुशाखैश्चपादपैः॥९॥राक्ष
साःमथिताःकेचिद्वानरैर्जितकाशिभिः॥प्रवेमुरुधिरंकेचिन्मुखेरुधिरभोजनाः॥१०॥पार्श्वैःपुदारिताःकेचित्केचिद्राशीकृताद्रुमैः

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

शिलाभिश्चूर्णिताः केचित्केचिद्दंतैर्विदारिताः॥१२॥ध्वजैर्विमथितैर्भग्नैः खड्गैश्च विनिपातितैः॥रथैर्विध्वंसितैः केचिद्व्यथितार
जनीचराः॥१३॥गजैर्द्वैः पर्वताकारैः पर्वताग्रैर्वनौकसां॥मथितैर्वाजिभिः कीर्णैः सारोहैर्वसुधातलं॥१३॥वानरैर्भीमविक्रांतैरा
प्लुत्याप्लुत्यवेगितैः॥राक्षसाकरजैस्तीक्ष्णैर्मुखेषु विनिदारिता॥१४॥विवर्णवदनाभूयो विप्रकीर्णशिरोरुहाः॥मूढाः शोणि
तगंधेन निपेतुर्धरणीतले॥१५॥अन्येतु परमक्रुद्धा राक्षसा भीमविक्रमाः॥तलैरेवाभिधावंति वज्रस्पर्शसमैर्हरीन्॥१६॥वान
रैरापतंतस्ते वेगितावेगवत्तरैः॥मुष्टिभिश्चरणैर्दंतैः पादपैश्चावयोथिताः॥१७॥सैन्यं तु विद्रुतं दृष्ट्वा धूम्राक्षो राक्षसर्षभः॥रो
षेण कदनं चक्रे वानराणां युयुत्सतां॥१८॥ [illegible] प्रासैः प्रमथिताः केचिद्वानराः शोणितस्रवाः॥मुद्गरैराहताः केचित्पातिता ध
रणीतले॥१९॥परशुभिर्मथिता केचिद्भिंडिपालैर्विदारिताः॥पट्टिशैर्मथिताः केचिद्विह्वलंतो गतासवः॥२०॥केचिद्विनिहता भूमौ
रुधिरार्द्रा वनौकसः॥केचिद्विद्राविता नष्टाः संक्रुद्धैराक्षसैर्युधि॥२१॥विभिन्नहृदयाः केचिदेकपार्श्वे विदारिताः॥विदारिते
स्त्रिशूलैश्च केचिदात्रैर्विनिसृताः॥२२॥तत्तुमुलं ममर्द्द युद्धं हरिराक्षससंकुलं॥प्रबभौ शस्त्रबहुलं शिलापादपसंकुलं॥२३॥
धनुर्ज्यातंत्रिमधुरं हिक्कातालसमन्वितं॥मंदस्मितगीतं तद्युद्धं गंधर्वमाबभौ॥२४॥धूम्राक्षस्तु धनुष्पाणि वानरान्रण
मूर्धनि॥हसन्विद्रावयामास दिव्यास्तान्शरवृष्टिभिः॥२५॥धूम्राक्षेणार्दितं सैन्यं व्यथितं प्रेक्ष्य मारुतिः॥अभ्यवर्तत संक्रुद्धः

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

प्रगृह्य विपुलां शिलां ॥ २९ ॥ क्रोधाद्द्विगुणताम्राक्षः पितुस्तुल्यपराक्रमः ॥ शिलां तां पातयामास धूम्राक्षस्य रथं प्रति ॥ ३० ॥ आप
तंतीं शिलां दृष्ट्वा गदामुद्यम्य संभ्रमात् ॥ रथादाप्लुत्य वेगेन वसुधायां व्यवस्थितः ॥ ३१ ॥ संभ्रमथ्य रथं तस्य निपपात शिला भुवि
स चक्रकूवरं साश्वं सध्वजं सशराशनं ॥ ३२ ॥ दृष्ट्वा तु रथं तस्य हनूमान्मारुतात्मजः ॥ रक्षसां कदनं चक्रे सस्कंधविटपैर्द्रुमैः
३३ ॥ विभिन्नशिरसो भूत्वा राक्षसा रुधिरोक्षिताः ॥ द्रुमैः प्रमथिताश्चान्ये निपेतुर्धरणीतले ॥ ३४ ॥ विद्राव्य राक्षससैन्यं हनूमा
न्मारुतात्मजः ॥ गिरेः शिखरमादाय धूम्राक्षमभिदुद्रुवे ॥ ३५ ॥ तमापतंतं धूम्राक्षो गदामुद्यम्य वीर्यवान् ॥ विनर्दमानः सह
सा हनूमंतमभिद्रवत् ॥ ३६ ॥ तस्य क्रुद्धस्य रोषेण गदां तां बहुकंटकां ॥ पातयामास धूम्राक्षो मस्तके यहनूमतः ॥ ३७ ॥ ताडितः
स तया तत्र गदया भीमरूपया ॥ स कपिर्मारुतबलस्तं प्रहारमचिंतयन् ॥ ३८ ॥ धूम्राक्षस्य शिरोमध्ये गिरिशृंगमपातयत् ॥
स विस्फारितसर्वांगो गिरिशृंगेण ताडितः ॥ ३९ ॥ पपात सहसा भूमौ विकीर्ण इव पर्वतः ॥ धूम्राक्षं निहतं दृष्ट्वा हतशेषा निश
ाचराः ॥ त्रस्ताः प्रविविशुर्लंकां वध्यमानाः प्लवंगमैः ॥ ४० ॥ स तु पवनसुतो निहत्य शत्रून् क्षतजवहाः सरितश्च संविकीर्य
रिपुवधजनितश्रमो महात्मा मुदमगमत्कपिभिः सुपूज्यमानः ॥ ४१ ॥ इत्यार्षे श्रीरामायणे वाल्मीकीये युद्धकांडे द्विपंच
राशत्सर्गः ॥ ५२ ॥ द्वितीयापहारः समाप्तः ॥ द्वाविंशेद्भिवर्त्तमानकथा समाप्तः ॥ ४२ ॥ धूम्राक्षं निहतं श्रुत्वा रावणो राक्षसेश्वरः ॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

क्रोधेनमहताविष्टोनिश्वसन्नुरगोयथा॥१॥दीर्घमुष्ट्यविनिश्वस्यक्रोधेनकलुषीकृत॥अब्रवीद्राक्षसंक्रूरंवज्रदंष्ट्रंमहाब
लं॥२॥गच्छत्वंवीरनिर्याहिराक्षसैःपरिवारित॥जहिदाशरथिंरामंसुग्रीवंवानरैःसह॥३॥तथेत्युक्त्वाद्रुततरंमायावीराक्ष
सेश्वरः॥निर्जगामबलैःसार्धंबहुभिःपरिवारितः॥४॥नागैरश्वैःखरैरुष्ट्रैःसंयुक्तःसुसमाहित॥पताकाध्वजचित्रैश्चबहु
भिसमलंकृतः॥५॥ततोविचित्रकेयूरोमुकुटेनविभूषितः॥तनुत्राणिचसंवृत्यसधनुर्निर्ययौद्रुतं॥६॥पताकालंकृतंदीप्तं
नक्रांचनभूषितं॥रथंप्रदक्षिणंकृत्वासमारोहचमूपतिः॥७॥यष्टिभिस्तोमरैश्चित्रैःश्लक्ष्णैश्चमुसलैरपि॥भिंडिपालैश्चच
पेश्चशक्तिभिःपट्टिशैरपि॥८॥खड्गैश्चक्रैर्गदाभिश्चनिशितैश्चपरश्वधैः॥पदातयश्चनिर्यातिविविधाशस्त्रपाणयः॥९॥वि
चित्रवाससःसर्वेदीप्ताराक्षसपुंगवाः॥गजामदोत्कटाःशूराश्चलंतइवपर्वताः॥१०॥तेयुद्धकुशलारूढास्तोमरांकुशपाणि
भिः॥अन्येलक्षणसंयुक्ताःशूरारूढामहाबलाः॥११॥तद्राक्षसबलंघोरंप्रविस्थितमशोभत॥प्रावृट्कालेयथामेघानर्दमा
नासमंततः॥१२॥निसृतादक्षिणद्वारादंगदोयत्रयूथपः॥तेषांनिष्क्रममाणानामशुभंसमजायत॥१३॥आकाशाद्घनातीव्रा
दुल्काश्चन्यपतंस्तदा॥वमंतशिवकंज्वालाशिवाघोरावचाशिरे॥१४॥आहरंतिमृगाघोरारक्षसांनिधनंतथा॥समापतंतोयो
धास्तूर्यस्वनलंतत्रदारुणं॥१५॥एतान्यौत्पातिकान्दृष्ट्वावज्रदंष्ट्रोमहाबलः॥धैर्यमालंब्यतेजस्वीनिर्जगामरणोत्सुकः॥१६॥तां

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

स्तु निष्क्रमतो दृष्ट्वा वानराजितकाशिनः। प्रणेदुः सुमहानादान् दिशः शब्देन पूरयन्॥१४॥ ततः प्रवृत्तं तुमुलं हरीणां राक्षसैः स
ह॥ घोराणां भीमरूपाणामन्योन्यवधकांक्षिणां॥१५॥ निष्पतंतो महोत्साहा भिन्नदेहशिरोधराः॥ रुधिरोक्षितसर्वांगा न्यपतन्धर
णीतले॥१६॥ केचिदन्योन्यमासाद्य शूराः परिघबाहवः॥ चिक्षिपुर्विविधं शस्त्रं समरे घनिवर्तिनः॥१७॥ द्रुमाणां च शिलानां च श
स्त्राणां चापि निस्वनः॥ श्रूयते सुमहांस्तत्र घोरो हृदयभेदनः॥ रथनेमिस्वनस्तत्र सागरस्य च घोषवत्॥ शंखभेरीमृदंगानां च
भूत्तुमुलः स्वनः॥१८॥ केचिदस्त्राणि मुत्सृज्य बाहुयुद्धमकुर्वत॥ तलैश्च चरणैश्चापि मुष्टिभिश्च द्रुमैरपि॥१९॥ जानुभिश्चा
हताः केचिद्भग्नदेहाश्च राक्षसाः॥ शिलाभिश्चूर्णिताः केचिद्वानरैर्युद्धदुर्मदैः॥२०॥ वज्रदंष्ट्रो महाबाणैरणे वित्रासयन्हरीन्
चचार लोकसंहारे पाशहस्त इवांतकः॥२१॥ बलवंतो स्त्रविदुषो नानाप्रहरणा रणे॥ जघ्नुर्वानरसैन्यानि राक्षसाः क्रोधमूर्छि
ताः॥२२॥ निघ्नतो राक्षसान्सर्वान्दृष्ट्वा वा[illegible]लिसुतो रणे॥ क्रोधेन द्विगुणाविष्टः संवर्तकहुताशनः॥२३॥ तान्राक्षसगणान्सर्वा
न्वृक्षमुद्यम्य वेगवान्॥ अंगदः क्रोधताम्राक्षः सिंहः क्षुद्रमृगानिव॥२४॥ चकार कदनं घोरं शक्रतुल्यपराक्रमः॥ अंगदाभिहता
स्तत्र राक्षसा भीमविक्रमाः॥२५॥ विभिन्नशिरसः पेतुर्निकृत्ताद्रुपादपाः॥ रथैश्चित्रैर्ध्वजैरश्वैः शरीरैर्हरिरक्षसां॥२६॥ रुधिरेण
चसंछन्ना भूमिर्भयकरातदा॥ हारकेयूरवस्त्रैश्च शस्त्रैश्च समलंकृता॥२७॥ भूमिर्भाति रणे तत्र शारदीव यथा निशा॥ अंगदस्य च

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वेगेनतद्राक्षसबलंमहत्॥२२॥प्राकंपततदातत्रपवनेनोदोयथा॥२३॥इत्यार्षेश्रीरामायणेयुद्धकांडेत्रिपंचाशत्सर्गः॥५३॥बल
स्यचनिघातेनअंगदस्यबलेनच॥राक्षसःक्रोधमाविष्टोवज्रदंष्ट्रोमहाबलः॥१॥विस्फार्यचधनुर्घोरंशक्राशनिसमप्रभं॥वा
नराणामनीकानिप्राकिरत्शरवृष्टिभिः॥२॥राक्षसाश्चापिमुख्यास्तेरथैश्चसमवस्थिताः॥नानाप्रहरणाःशूराःप्रायुध्यंततदा
रणे॥३॥वानराणांचशूरास्तुतेसर्वेप्लवगर्षभाः॥अयुध्यंतशिलाहस्ताःसमवेताःसमंततः॥४॥तत्रायुधसहस्राणितस्मिन्ना
योधनेभृशं॥राक्षसाःकपिमुख्येषुपातयांचक्रिरेतदा॥५॥वानराश्चैवरक्षःसुमहावृक्षान्महाशिलाः॥प्रवीरापातयामासु
र्मत्तवारणसन्निभाः॥६॥शूराणांयुध्यमानानांसमरेष्वनिवर्त्तिनां॥तद्राक्षसगणानांचसुयुद्धंसमवर्तत॥७॥प्रभिन्नशिरसःके
चित्छिन्नैःपादैश्चबाहुभिः॥शस्त्रैरर्दितदेहास्तुरुधिरेणसमुक्षिताः॥८॥हरयोराक्षसाश्चैवशोरतेगांसमाश्रिताः॥कंकगृध्र
बलाकाश्चगोमायुकुलसंकुलाः॥९॥कबंधानिसमुत्पेतुर्भैरूणांभीषणानिच॥भुजपाणिशिरश्छिन्नाभिन्नकायाश्चभूतले
१०॥वानराराक्षसाश्चापिनिपेतुस्तत्रभूतले॥ततोवानरसैन्येनहन्यमानंनिशाचरं॥११॥प्राभज्यतबलंसर्वंवज्रदंष्ट्रस्यपश्य
तः॥राक्षसान्भयवित्रस्तान्हन्यमानान्प्लवंगमैः॥१२॥दृष्ट्वासरोषताम्राक्षोवज्रदंष्ट्रोऽतापवान्॥प्रविवेशधनुःपाणिस्त्रा
सयन्हरिवाहिनीं॥१३॥शरैर्विदारयामासकंकपत्रैरजिह्मगैः॥विभेदवानरांस्तत्रसप्ताष्टौनवपंचच॥१४॥विव्याधपरमक्रुद्धो

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वज्रदंष्ट्रोप्रतापवान्॥त्रस्ताःसर्वेहरिगणाःशरैःसंकृतदेहिनः॥१५॥अंगदंसंप्रधावंतिप्रजापतिमिवप्रजाः॥ततोहरिगणान्भग्ना
न्दृष्ट्वावालिसुतस्तदा॥१६॥क्रोधेनवज्रदंष्ट्रंतमुदीक्षंतमुदैक्षत॥वज्रदंष्ट्रांगदश्चोभौसंगतौहरिराक्षसौ॥१७॥चेरतुःपरमक्रुद्धौह
रिमत्तगजाविव॥ततःशरसहस्रेणवालिपुत्रंमहाबलं॥१८॥जघानमर्मसुदेशेषुशरैरग्निशिखोपमैः॥रुधिरोक्षितसर्वांगोवा
लिसूनुर्महाबलः॥१९॥चिक्षेपवज्रदंष्ट्रायवृक्षंभीमपराक्रमः॥दृष्ट्वापतंतंतंवृक्षमसंभ्रांतश्चराक्षसः॥२०॥चिच्छेदबहुधासो
पिमथितःपतितोभुवि॥तंदृष्ट्वावज्रदंष्ट्रस्यविक्रमंप्लवगर्षभः॥२१॥प्रगृह्यविपुलंशैलंचिक्षेपचननादच॥समापतंतंतंदृष्ट्
वारथादाप्लुत्यवीर्यवान्॥२२॥गदापाणिरसंभ्रांतःपृथिव्यांसमतिष्ठत॥सांगदेनशिलाक्षिप्तागत्वातुरणमूर्धनि॥२३॥सचक्र
कूवरंसाश्वंप्रममाथरथंतदा॥ततोन्यच्छिखरंगृह्यविपुलंद्रुमभूषितं॥२४॥वज्रदंष्ट्रस्यशिरसिपातयामासवानरः॥अभवत्
छोणितोद्गारीवज्रदंष्ट्रसुमूर्छितः॥२५॥मुहूर्तमभवन्मूढोगदामालिंग्यनिश्वसन्॥सलब्धसंज्ञोगदयावालिपुत्रमवस्थितं॥
जघानपरमक्रुद्धोवक्षोदेशेनिशाचरः॥गदांत्यक्त्वाततस्तत्रमुष्टियुद्धमकुर्वत॥२६॥अन्योन्यंनिघ्नतुस्तत्रतावुभौहरिराक्षसौ
रुधिरोद्गारिणौतौतुप्रहारैर्जनितश्रमौ॥२७॥बभूवतुःसुविक्रांतावंगारकबुधाविव॥ततःपरमतेजस्वीत्वंगदःप्लवगर्षभः॥
२८॥उत्पाट्यवृक्षस्थितवानासीत्पुष्पफलै[illegible]र्युतं॥सजग्राहार्षभंचर्मखड्गंचविपुलंशुभं॥२९॥किंकिणीजालसंछन्नंचर्मणा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

चपरिष्कृतं॥वज्रदंष्ट्रोथजग्राहसोंगदोप्यसिचर्मणी॥३१॥विचित्रांश्चैरतुर्मार्गान्रुषितौकपिराक्षसौ॥जघ्नतुश्चतदान्योन्यंनिर्द
यंजयकांक्षिणौ॥३२॥व्रणैःसमग्रैःशोभेतांपुष्पिताविवकिंशुकौ॥युध्यमानौपरिश्रांतौजानुभ्यामवनीगतौ॥३३॥निमेषांतरमा
त्रेणअंगदःकपिकुंजरः॥उदतिष्ठतदीप्ताक्षोदंडाहतइवोरगः॥३४॥निर्मलेनसुधौतेनखड्गेनास्यमहच्छिरः॥जघानवज्रदं
ष्ट्रस्यवालिसूनुर्महाबलः॥३५॥रुधिरोक्षितगात्रस्यबभूवपतितंद्विधा॥सरोषपरिवृत्ताक्षंशुभंखड्गाहतंशिरः॥३६॥वज्रदंष्ट्रं
हतंदृष्ट्वाराक्षसाभयमोहिताः॥त्रस्तास्त्यभ्यद्रवन्लंकांध्यमानाःप्लवंगमैः॥३७॥विषण्णवदनादीनाह्रियाकिंचिदवाङ्मुखाः
निहत्यतंवज्रधरप्रतापवान्सवालिसूनुःकपिसैन्यमध्ये॥जगामहर्षंमहितंमहाबलःसहस्रनेत्रस्त्रिदशैरिवावृतः
३८॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेचतुःपंचाशत्सर्गः॥५४॥तृतीयापहारःसमाप्तः॥वज्रदंष्ट्रंहतंश्रुत्वावालि
पुत्रेणरावणः॥बलाध्यक्षमुवाचेदंकृतांजलिमुपस्थितं॥१॥शीघ्रंनिर्यातुदुर्धर्षाराक्षसाभीमविक्रमाः॥अकंपनंपुरस्कृत्य
सर्वशास्त्रार्थकोविदं॥२॥एषशास्ताचगोप्ताचनेताचयुधिसंमतः॥भूतिकामश्चमेनित्यंनित्यंचसमरप्रियः॥३॥एषजेष्यति
काकुत्स्थोसुग्रीवंचमहाबलं॥वानरांश्चापरान्घोरान्हनिष्यतिनसंशयः॥४॥परिगृह्यसतामाज्ञांरावणस्यमहाबलः॥बलंसं
त्वरयामासतदालघुपराक्रमः॥५॥ततोनानाप्रहरणाभीमाक्षाभीमदर्शनाः॥निष्पेतूराक्षसामुख्याबलाध्यक्षप्रचोदिताः॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

रथमास्थाय विपुलं तप्तकांचनमंडितं॥ मेघाभो मेघवर्णश्च मेघस्वनमहास्वनः॥ ७॥ राक्षसैः संवृतो भीमस्तादानिर्यात्यकंपनः॥ न
हि कंपयितुं शक्यः सुरैरपि महामृधे॥ ८॥ अकंपनः सनाम्नाभूदादित्यइव तेजसा॥ तस्य निर्धावमानस्य संरब्धयुयुत्सया॥ ९॥ अ
कस्माद्दैन्यमागच्छद्वयानां रथवाहिनां॥ व्यस्फुरन्नयनं चास्य सव्यं युद्धाभिनंदिनः॥ १०॥ विवर्णो मुखवर्णश्च गद्गदश्चाभवत्स्व
नः॥ अभवत्सुदिने चापि दुर्दिनं रूक्षमारुतं॥ ११॥ ऊचुः खगमृगाः सर्वे वाचः क्रूरा भयावहाः॥ ससिंहोपचितस्कंधः शार्दूलसम
विक्रमः॥ १२॥ तानुत्पातान चिंत्यैव निर्जगाम रणाजिरं॥ तदा निर्गच्छतस्तस्य राक्षसः सहराक्षसैः॥ १३॥ बभूव सुमहान्नादः क्षोभय
न्निव सागरं॥ तेन शब्देन वित्रस्ता वानराणां महाचमूः॥ १४॥ द्रुमशैलमहाराणा योद्धुं समुपतिष्ठत॥ तेषां युद्धं महारौद्रं संजज्ञे क
पिरक्षसां॥ १५॥ रामरावणयोरर्थे समभित्यक्तजीविनां॥ सर्वे त्यक्तबलाः शूराः सर्वे पर्वतसन्निभाः॥ १६॥ हरयो राक्षसाश्चैव पर
स्परजिघांसवः॥ तेषां विनर्दतां शब्दः संयुगे नितरस्विनां॥ १७॥ शुश्रुवे सुमहान्कोपाद्न्योन्यमभिगर्जतां॥ रजश्चारुणवर्णाभं सु
भीममभवद्भृशं॥ १८॥ उद्धूतं हरिरक्षोभिः संरुरोध दिशो दश॥ अन्योन्यं रजसा तेन कौशेयोद्धूतपांडुना॥ १९॥ संवृतानि च भूता
नि ददृशुर्नरणाजिरे॥ न ध्वजो न पताका वा गजो वा तुरगो पि वा॥ २०॥ आयुधं स्यंदनं वापि ददृशे तेन रेणुना॥ शब्दश्च सुमहांस्तेषां
नर्दतामभिधावतां॥ २१॥ श्रूयते तुमुलेशब्देन रुपाणि च काशिरे॥ हरीनेव सुसंहृष्टा हरयो जघ्नुराहवे॥ २२॥ राक्षसा राक्षसां

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

श्चापिनिजघ्नुस्तिमिरेतदा॥ तेपरांश्चैवनिघ्नंतस्त्वांश्चवानरराक्षसा॥२३॥रुधिरार्द्रीतदाचक्रुमहीपंकानुलेपनां॥ततस्तुरुधि
रौघेणशिक्तंयपगतंरजः॥२४॥शरीरशवसंकीर्णाबभूवसुंधरा॥द्रुमशक्तिगदाप्रासैःशिलापरिघतोमरैः॥२५॥राक्षसाहर
यस्तूर्णंजघ्नुरन्योन्यमोजसा॥बहुभिःपरिघाकारैर्युध्यतोपर्वतोपमे॥२६॥हरयोभीमकर्माणोराक्षसान्जघ्नुराहवे॥रा
क्षसास्त्वभिसंक्रुद्धाःप्रासतोरणपाणयः॥२७॥कपीन्निजघ्नुरेतत्रशस्त्रैःपरमदारुणैः॥अकंपनःसुसंक्रुद्धोराक्षसानांचभूप
तिः॥२८॥संहर्षयतितान्सर्वान्राक्षसान्भीमविक्रमान्॥हरयस्त्वपिरक्षांसिमहाद्रुममहाश्मभिः॥२९॥विदारयंत्यभिक्रम्प
शस्त्राण्याच्छिद्यवीर्यतः॥एतस्मिन्नंतरेवीराहरयःकुमुदोनलः॥३०॥मैंदश्चपरमक्रुद्धश्चक्रुर्वेगमनुत्तमं॥तेतुवृक्षैर्महावी
राराक्षसानांचभूमुखरे॥३१॥क्रुद्धनंसुमहच्चक्रुलयाहरिपुंगवाः॥अकंपनसमादिष्टाविविधायुधयोधिनः॥३२॥
ममंथूराक्षसास्तत्रवानरान्गणशोभृशं॥३३॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेपंचपंचाशत्सर्गः॥५५॥तद्दृष्ट्वा
सुमहत्कर्मकृतंवानरसत्तमैः॥क्रोधमाहारयामासयुधितीव्रमकंपनः॥१॥क्रोधमूर्छितरूपस्तुधुन्वन्परमकार्मुकं॥
दृष्ट्वातुकर्मशत्रूणांसारथिंवाक्यमब्रवीत्॥२॥तत्रैवतावत्वरितंरथंप्रापयसारथे॥एतेचबलिनोघ्नंतिसुबहून्राक्ष
सान्रणे॥३॥येतत्रबलवंतोत्रभीमकोपाश्चवानराः॥द्रुमशैलप्रहाराणांस्तिष्ठतिप्रमुखेमम॥४॥एतान्निहंतुमिच्छामि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

समरेश्लाघिनोत्यहं॥एतत्प्रमथितंसर्वैराक्षाद्दृश्यतेबलं॥८॥ततःप्रचलिताश्चैनरथेनरथिनांवरः॥हरीभ्यपतदूराच्छर
जालैरकंपनः॥९॥नस्थातुंवानराःशेकुःकिंपुनर्योद्धुमाहवे॥अकंपनशरैर्भग्नाःसर्वएवाभिदुद्रुवुः॥१०॥तान्मृत्युवशमाप
न्नान्वानरान्शरमातुरान्॥समीक्ष्यहनुमान्ज्ञातीनुपतस्थेमहाबलः॥११॥तं [illegible] महाप्लवगंदृष्ट्वासर्वेप्लवगसत्तमाः॥स
मेत्यसमरेवीराःसहिताःपर्यवारयन्॥१२॥अवस्थितंहनुमंतंतंदृष्ट्वाप्लवगर्षभाः॥बभूवुर्बलवंतोहिबलवंतमुपाश्रिताः॥१३॥
अकंपनस्तुशैलाभंहनूमंतमुपस्थितं॥महेंद्रइवधाराभिःशरैरभिववर्षह॥१४॥अचिंतयित्वाबाणौघान्शरीरेपतितांश्छिता
न्॥अकंपनवधार्थायनोदधेमहाबलः॥१५॥सग्रहस्यमहातेजाहनुमान्मारुतात्मजः॥अभिदुद्रावतद्रक्षःकंपयन्निवमे
दिनीं॥१६॥तस्याथनर्दमानस्यदीप्यमानस्यतेजसा॥बभूवरूपंदुर्धर्षंदीप्तस्येवविभावसोः॥१७॥आत्मानंत्वग्रहरणंज्ञात्वा
क्रोधसमन्वितः॥शैलमुत्पाटयामासवेगेनहरिपुंगवः॥१८॥तंगृहीत्वामहाशैलंपाणिनैकेनमारुतिः॥सविनद्यमहानादंभ्रा
मयामासवीर्यवान्॥१९॥ततस्तमभिदुद्रावराक्षसेंद्रमकंपनं॥यथाहिनमुचिसंख्येवज्रेणेवपुरंदरः॥२०॥अकंपनस्तुतं
दृष्ट्वागिरिशृंगंसमुद्यतं॥दूरादेवमहाबाणैरर्द्धचंद्रैरदारयत्॥२१॥तंपर्वताग्रमाकाशेरक्षोबाणविदारितं॥विकीर्णपति
तंदृष्ट्वाहनूमान्क्रोधमूर्छितः॥२२॥सिंहकर्णसमासाद्यरोषदर्पान्वितोहरिः॥तूर्णमुत्पाटयामासमहागिरिमिवोद्धृतं॥२३॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

तंगृहीत्वामहास्कंधंसोश्वकर्णमहाद्युतिः॥प्रहस्यपरयाप्रीत्याभ्रामयामाससंयुगे॥२१॥प्रधावन्भूरुवेगेनबभंजतरसाद्रु-
मान्॥हनूमान्परमक्रुद्धश्चरणैर्दारयन्महीं॥२२॥गजांश्चसगजारोहान्सरथान्रथिनस्तथा॥जघानहनुमान्भीमान्रा-
क्षसांश्चपदातिगान्॥२३॥तमंतकमिवक्रुद्धंसमरेप्राणहारिणं॥हनूमंतमभिप्रेक्ष्यराक्षसाविप्रदुद्रुवुः॥२४॥तमापतंतंसं-
क्रुद्धंराक्षसानांभयावहं॥ददर्शाकंपनोवीरश्चुक्षुभेचननादच॥२५॥सचतुर्दशभिर्बाणैःशितैर्देहविदारणैः॥निर्बिभेदह-
नूमंतंमहावीर्यमकंपनः॥२६॥तथासप्रतिविद्धस्तूबहुभिःशरवृष्टिभिः॥हनूमान्ददृशेवीरःप्ररूढइवसानुमान्॥२७॥
विरराजमहावीर्योमहाकायोमहामनाः॥पुष्पिताशोकसंकाशोविधूमइवपावकः॥२८॥ततोन्यंवृक्षमुत्पाट्यकृत्वावेगम-
नुत्तमं॥शिरस्यभिजघानाशुराक्षसेंद्रमकंपनं॥२९॥सवृक्षेणहतस्तेनसक्रोधेनमहात्मना॥राक्षसोवानरेंद्रेणपपातचममा-
रच॥३०॥तंदृष्ट्वानिहतंभूमौराक्षसेंद्रमकंपनं॥व्यथिताराक्षसाःसर्वे[illegible]क्षितिकंपइवद्रुमाः॥३१॥त्यक्तप्रहरणाःसर्वेराक्ष-
सास्तेपराजिताः॥लंकामभिययुस्त्रस्तावानरैस्तैरभिद्रुताः॥३२॥तेमुक्तकेशाःसंभ्रांताभग्नमानापराजिताः॥स्रवच्छ्रमजलैरंगैः
श्वसंतोविप्रदुद्रुवुः॥३३॥अन्योन्यंप्रममंथुस्तेविविशुर्नगरंभयात्॥एकतस्तेतुसंमूढाःप्रेक्ष्यमाणामुहुर्मुहुः॥३४॥तेषुलंकाप्र-
विष्टेषुराक्षसेषुमहाबलाः॥समेत्यहरयःसर्वेहनूमंतमपूजयन्॥३५॥सोपिप्रहृष्टांस्तान्सर्वान्हरीन्संप्रत्यपूजयत्॥हनूमान्

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

त्वसंपन्नोयथार्हमनुकूलतः॥३६॥विनेदुश्चयथाप्राणांहरयोजितकाशिनः॥चकर्षुश्चपुनस्तत्रसप्राणानेवराक्षसान्॥३७
सवीरश्रीभामभजन्महाकपिःसमेत्यरक्षांसिनिहत्यमारुतिः॥महासुरंभीममभित्रनाशनोयथैवविष्णुर्बलिनंमहाहवे।
३८॥अपूजयन्देवगणास्तदाकपिंस्वयंचरामोतिबलश्चलक्ष्मणः॥तथैवसुग्रीवमुखाःप्लवंगमाविभीषणश्चैवमहाब
लस्तदा॥३९॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेषट्पंचाशत्सर्गः॥५६॥चतुर्थोपहारअकंपनवधःसमाप्तः॥अकंप
नवधंश्रुत्वाक्रुद्धोवैराक्षसेश्वरः॥किंचिद्दीनमुखश्चापिसचिवांस्तानुदैक्षत॥१॥सतुध्यात्वामुहूर्तंतुमंत्रिभिःसविचार्यच
ततस्तुरावणःपूर्वंदिवसेराक्षसाधिपः॥२॥पुरींपरिययौलंकांसर्वान्गुल्मानवेक्षितुं॥तांराक्षसगणैर्गुप्तांगुल्मैर्बहुभिरा
वृतां॥३॥ददर्शनगरींराजापताकाध्वजमालिनीं॥रुद्धांतुनगरींदृष्ट्वारावणोराक्षसेश्वरः॥४॥उवाचामर्षितःकालेप्रहस्तंयु
द्धकोविदं॥पुरस्योपनिविष्टस्यसहसापीडितस्यह॥५॥नान्यंयुद्धायपश्यामिहंतुंयुधिविशारद॥अहंवाकुंभकर्णोवात्वंवासे
नापतेमम॥६॥इंद्रजिद्वानिकुंभोवावहेयुर्भारमीदृशं॥सत्वंबलमतःशीघ्रमादायरथमास्थितः॥७॥विजयायाभिनिर्याहि
यत्रसर्वेवनौकसः॥निर्याणादेवतेनूनंचलेत्साहरिवाहिनी॥८॥नर्दतांराक्षसेंद्राणांश्रुत्वानादंद्रविष्यति॥चपलात्वविनीता
श्चचलचित्ताश्चवानराः॥९॥नसहिष्यतितेनादंसिंहनादमिवद्विपाः॥विद्रुतेचबलेतस्मिन्रामःसौमित्रिणासह॥१०॥अवस्थाते

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

निरालंबः प्रहस्तवशमेष्यति॥आपत्संशयिता श्रेयो नात्र निःसंशयिकृता॥११॥प्रतिलोमानुलोमं वा यद्वा नो मन्यसे हितं रावणे
नैवमुक्तस्तु प्रहस्तो वाहिनीपतिः॥१२॥राक्षसेंद्रमुवाचेदमसुरेंद्रमिवोशनाः॥राजन्संमंत्रितं पूर्वं कुशलैः सह मंत्रिभिः॥१३॥
विवादश्चापि नावृत्तसमवेक्ष्य परस्परं॥प्रदानेन तु सीतायाः श्रेयो व्यवसितं मया॥१४॥अप्रदाने पुनर्युद्धं दृष्टमेतत्तथैव नः
सोहंदानैश्च मानैश्च सततं पूजितस्त्वया॥१५॥सांत्वैश्च विविधैः काले किं पुनर्यो प्रियं तव॥नहि मे जीवितं रक्ष्यः पुत्रदारधना
नि वा॥१६॥त्वं पश्य मां जिहीर्षंतं त्वदर्थे जीवितं युधि॥एवमुक्तो सभर्तारं रावणं वाहिनीपतिः॥१७॥उवाचेदं बलाध्यक्षान्प्र
हस्तप्रमुखे स्थितान्॥समानयत मे शीघ्रं राक्षसानां महाबलं॥१८॥मद्बाणाशनिवेगेन हतानां तु रणाजिरे॥अद्य तृप्यंतु मां
सादाः पक्षिणः काननौकसः॥१९॥तस्य तद्वचनं श्रुत्वा बलाध्यक्षाः कृतत्वराः॥बलमुद्योजयामासुस्तस्मिन्राक्षसमंदिरे॥२०॥सा
बभूव मुहूर्तेन तिग्मनानाविधायुधैः॥लंकाराक्षवीरैस्तैर्गजैरिव समाकुला॥२१॥हुतासनं तर्पयंतो ब्राह्मणांश्च नमस्यंतः॥आ
ज्यगंधप्रतिवहः सुरभिर्मारुतो ववौ॥२२॥स्रजश्च विविधाकाराजगृहुस्त्वभिमंत्रिताः॥संग्रामसज्जाः संहृष्टा धारयन्राक्षसा
स्तदा॥२३॥सधनुष्काः कवचिनो वेगादाप्लुत्य राक्षसाः॥रावणं प्रेक्ष्य राजानं प्रहस्तं पर्यवारयन्॥२४॥अथामंत्र्य च राजानं भेरी
माहत्यभैरवं॥आरुरोह रथं दिव्यं प्रहस्तः सज्जकल्पितं॥२५॥हयैर्महाजवैर्युक्तं सम्यक्सूतं ससायकं॥महाजलदनिर्घोषं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

साक्षाच्चंद्रार्कभास्वरं॥२६॥उरगध्वजदुर्धर्षंसुवरूथंस्ववस्वरं॥सुवर्णजालसंयुक्तंग्रहसंतमिवश्रिया॥२७॥ततस्तंरथमा
स्थायरावणार्पितशासनः॥लंकायानिर्ययौतूर्णंबलेनमहतावृतः॥२८॥ततोदुंदुभिनिर्घोषपर्जन्यनिनदोपमः॥वादि
त्राणांचनिनदःपूरयन्नीवमेदिनीं॥२९॥शुश्रुवेशंखशब्दश्चप्रयातेवाहिनीपतौ॥निनदंतःस्वरान्घोरान्राक्षसाजग्मुर
ग्रतः॥३०॥भीमरूपामहाकायाःग्रहस्तस्यपुरःसराः॥नरांतकःकुंभहनुर्महानादःसमुन्नतः॥३१॥ग्रहस्तसचिवाह्येतेनिर्य
युःपरिवार्यतं॥मूढेनैवसुघोरेणपूर्वद्वारात्सनिर्ययौ॥३२॥गजयूथनिकाशेनबलेनमहतावृतः॥सागरप्रतिमौघेनवृत
स्तेनबलेनसः॥३३॥ग्रहस्तोनिर्ययौतूर्णंक्रुद्धःकालांतकोपमः॥तस्यनिर्याणघोषेणराक्षसानांचनर्दतां॥३४॥लंकायांसर्व
भूतानिविनेदुर्विकृतैःस्वरैः॥अभ्रमाकाशमाविश्यमांसशोणितभोजनाः॥३५॥मंडलान्यपसव्यानिखगाश्चक्रुरथंप्रति
चमंतिपावकज्वालाःशिवाघोरावदाशिरे॥३६॥अंतरिक्षात्सपातोल्का [illegible] वायुश्चपरुषंववौ॥अन्योन्यमभिसंक्रुद्धाग्रहा
श्चनचकाशिरे॥३७॥मेघाश्चखरनिर्घोषारथस्योपरिराक्षसः॥ववर्षूरुधिरंचास्यसिषिचुश्चपुरःसरान्॥३८॥केतुमूर्धनिगृध्रो
स्यविलीनोदक्षिणामुखः॥तुदन्नुभयतःपार्श्वेसमग्रामहरत्प्रभां॥३९॥सारथेर्वदुराश्वास्यसंग्राममवगाहतः॥प्रहर्तोन्यपतद्व
स्तात्सूतस्यहयमादिनः॥४०॥निर्याणश्रीश्चयाचासीद्वाक्स्वराचसुदुर्लभा॥सानानाशमुहूर्तेनसमेचस्खलिताहयाः॥४१॥ग्रह

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

स्तत्वभिनिर्यातं प्रख्यातबलपौरुषं॥ युधि नाना प्रहरणाः कपिसेना भ्यवर्तत॥ ४२॥ अथ घोषः सुतुमुलो हरीणां समजायत
वृक्षानारुह्यतां चैव गुरुभिर्वैगृह्यतां शिलाः॥ ४३॥ नर्दतां राक्षसानां च वानराणां च गर्जतां॥ उभे प्रमुदिते सैन्ये रक्षोगणवनौ
कसां॥ ४४॥ वेगितानां समर्थानामन्योन्यवधकांक्षिणां॥ परस्परं चाह्वयतां निनादः श्रूयते महान्॥ ४५॥ ततः प्रहस्तः कपिरा
जवाहिनीमभितप्रतस्थे विजयाय दुर्मतिः॥ विवृद्धवेगं च विवेश तां चमूं यथा सुमूर्षुः शमनो लेविभावसुं॥ ४६॥ इत्यार्षे
श्रीरामायणे वाल्मीकीये युद्धकांडे सप्तपंचाशत्सर्गः॥ ५७॥ ततः प्रहस्तं निर्यातं दृष्ट्वा भीमपराक्रमं॥ उवाच सस्मितं रामो
विभीषणमरिंदमं॥ १॥ कएष सुमहाकायो बलेन महतावृतः॥ आचक्ष्व मे महाबाहो वीर्यवंतं निशाचरं॥ २॥ राघवस्य व
चः श्रुत्वा प्रत्युवाच विभीषणः॥ एष सेनापतिस्तस्य प्रहस्तो नाम राक्षसः॥ ३॥ लंकायां राक्षसेंद्रस्य त्रिभागबलवृतः॥ वीर्यव
तस्त्रिविक्रमः प्रख्यातश्च पराक्रमे॥ ४॥ ततः प्रहस्तं निर्यातं भीमं भीमपराक्रमं॥ गर्जंतं सुमहाकायं राक्षसैरभिसंवृतं॥ ५॥ ददृ
शुर्महतीं सेनां वानराणां बलीयसां॥ अभिसंजातरोषाणां प्रहस्तमभिगर्जतां॥ ६॥ खड्गशक्तिवृष्टिबाणाश्च शूलानि मुसलानि
च॥ गदाश्च परिघा घोरा प्रासाश्चैव परश्वधाः॥ ७॥ धनूंषि च विचित्राणि राक्षसानां जयैषिणां॥ प्रगृहीतान्यशोभंत वानरानुपर
धावतां॥ ८॥ जगृहुः पादपांश्चापि पुष्पिताञ्चानरर्षभाः॥ शिलाश्च विपुलादीर्घा योद्धुकामाः प्लवंगमाः॥ ९॥ निषामन्योन्यमासाद्य

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

संग्रामः सुमहानभूत्॥ बहूनामश्मवृष्टिं च शरवर्षं ववर्षतां॥१०॥ बहवो राक्षसा युद्धे बहून्वानरयूथपान्॥ वानरा राक्षसांश्चा
पि निजघ्नुर्बहवो बहून्॥११॥ शूलैः प्रमथिताः केचित्केचित्तु परमायुधैः परिघैराहताः केचित्केचिच्छिन्नाः परश्वधैः॥१२॥ निरुच्छ्व
सा पुनः केचित्पतिता जगतीतले॥ विभिन्नहृदयाः केचिदिषुसंधानसंधिताः॥१३॥ केचिद्द्विधाकृताः खड्गैः स्फुरंतः पतिताश्चु
चि॥ वानरा राक्षसैः शूलैः पार्श्वतश्च विदारिताः॥१४॥ वानरैश्चापि संक्रुद्धैराक्षसौघाः समंततः॥ पादपैर्गिरिशृंगैश्च संपिष्टा वसु
धातले॥१५॥ वज्रस्पर्शतलैर्हस्तैर्मुष्टिभिश्च हताभृशं॥ वेमुः शोणितमास्येभ्यो विशीर्णदशनेक्षणाः॥१६॥ आर्तस्वनं च स्वन
तां सिंहनादं च नर्दतां॥ बभूवतुमुलः शब्दो हरीणां रक्षसां युधि॥१७॥ राक्षसा वानराः क्रुद्धा वीरमार्गमनुष्ठिताः॥ विवृत्तनय
नाः क्रूराश्चक्रुः कर्माण्यभीतवत्॥१८॥ नरांतकः कुंभहनुर्महानादः समुन्नतः॥ एते प्रहस्तसचिवाः सर्वे जघ्नुर्वनौकसः॥१९॥
तेषां चापततां शीघ्रं निघ्नतां चापि वानरान्॥ द्विविदो गिरिशृंगेण जघानैकं नरांतकं॥२० दुर्मुखः पुन[illegible]रुत्थाय कपिः स
विपुलद्रुमः॥ राक्षसं क्षिप्रहस्तं तु समुन्नतमपोथयत्॥२१॥ जांबवांस्तु सुसंक्रुद्धः प्रगृह्य महतीं शिलां॥ पातयामास तेजस्वी
महानादस्य वक्षसि॥२२॥ अथ कुंभहनुस्तत्र तारेणासाद्य वीर्यवान्॥ वृक्षेण महता तस्य प्राणान्संत्याजयद्रणे॥२३॥ अमृष्य
माणस्तत्कर्म प्रहस्तो रथमास्थितः॥ चकार कदनं घोरं धनुष्पाणिर्वनौकसां॥२४॥ आवर्तइव संजज्ञे उभयोः सेनयोस्तदा॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

क्षुभितस्याप्रमेयस्यसागरस्येवनिस्वनः॥२५॥महताहिशरौघेणप्रहस्तोयुद्धकोविदः॥अर्दयामाससंक्रुद्धोवानरान्परमाहवे॥२६॥वानराणांशरीरैस्तुराक्षसानांचमेदिनी॥बभूवातिचिताघोरापतितैरिवपर्वतैः॥२७॥सामहीरुधिरौघेणप्रच्छन्नासंप्रकाशते॥संछन्नामाधवेमासेपुष्पितैरिवकिंशुकैः॥२८॥हतवीरौघवप्रांतुभग्नायुधमहाद्रुमां॥शोणितौघमहातोयांयमसागरगामिनीं॥२९॥यकृत्प्लीहमहापंकांविनीकीर्णांत्रशैवलां॥भिन्नकायशिरोमीनामंगावयवशाद्वलीं॥३०॥गृध्रहंसगणाकीर्णांकंकसारससेवितां॥मिदःफेनसमाकीर्णामार्तस्तनितनिस्वनां॥३१॥तांकापुरुषदुस्तारांयुद्धभूमिमयींनदीं॥नदीमिवघनापाये हंससारससेविते॥३२॥राक्षसाकपिमुख्याश्चतेरुस्तांदुस्तरांनदीं॥यथापद्मरजोध्वस्तांनलिनींगजयूथपाः॥३३॥ततःसृजंतंबाणौघान्प्रहस्तंस्यंदनेस्थितं॥ददर्शतरसानीलोविनिघ्नंतंप्लवंगमान्॥३४॥उद्धूतइववायुःखिमंदभ्रचयंबलात्॥समीक्ष्याभिद्रुतंयुद्धेप्रहस्तोवाहिनीपतिः॥३५॥रथेनादित्यवर्णेननीलमेकाभिदुद्रुवे॥सधनुर्धन्विनांश्रेष्ठोविकृष्यपरमाहवे॥३६॥नीलायव्यसृजद्बाणान्प्रहस्तोवाहिनीपतिः॥तेप्राप्यविशिरवानीलंविनिर्भिद्यसमाहिताः॥३७॥महीजग्मुर्महावेगारुषिताइवपन्नगाः॥नीलःशरैरभिहतोनिशितैर्ज्वलनोपमैः॥३८॥सतंपरमदुर्धर्षमापततंमहाकपिः॥प्रहस्तंताडयामासमुत्पाट्यवीर्यवान्॥३९॥सतेनाभिहतःक्रुद्धोनदन्राक्षसपुंगवः॥ववर्षशरवर्षाणिप्लवगानांचसूपतौ॥४०॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

तस्यबाणगणान्घोरान्राक्षसस्यमहात्मनः॥अपारयन्वारयितुंप्रत्यगृह्णान्निमीलितः॥४१॥यथैवगोवृषोवर्षंशारदंशीघ्र
मागतं॥एवमेवप्रहस्तस्यशरवर्षंदुरासदं॥४२॥निमीलिताक्षःशिरसानीलःसेहेसुदारुणं॥रोषितःशरवर्षेणसालेवमहताम
हान्॥४३॥प्रजघानहयान्नीलःप्रहस्तस्यमनोजवान्॥ततस्तच्चापमुद्धृत्यप्रहस्तस्यमहाबलः॥४४॥बभंजतरसानीलोनान
श्चपुनःपुनः॥विधनुस्तुकृतस्तेनप्रहस्तोवाहिनीपतिः॥४५॥प्रगृह्यमुसलंघोरंस्पंदनादवपुद्रुवे॥तावुभौवाहिनीमुख्यौजा
तवैरौतरस्विनौ॥४६॥स्थितौक्षतजदिग्धांगौप्रभिन्नाविवकुंजरौ॥उच्चिरवंतौसुतीक्ष्णाभिर्दंष्ट्राभिरितरेतरं॥४७॥सिंहशार्दू
लसदृशौसिंहशार्दूलचेष्टितौ॥विक्रांतविजयौवीरौसमरेष्वनिवर्तिनौ॥४८॥कांक्षमाणौयशःप्राप्तुंवृत्रवासवयोःसमौ॥आ
जघाननदानीलंललाटेमुसलेनसः॥४९॥प्रहस्तःपरमायत्तस्तस्यमुस्रावशोणितं॥ततःशोणितदिग्धांगःप्रगृह्यसुमहात
कं॥५०॥प्रहस्तस्योरसिक्रुद्धोविससर्जमहाकपिः॥तमचिंत्यप्रहारंसःप्रगृह्यमुसलंमहत्॥५१॥अभिदुद्रावबलिनंबलीनीलंप्लव
ंगमं॥तमुग्रवेगंसंरब्धमापतंतंमहाकपिः॥५२॥ततःसंप्रेक्ष्यजग्राहमहावेगोमहाशिलां॥तस्ययुद्धाभिकामस्यमृधेमुसल
योधिनः॥५३॥प्रहस्तस्यशिलांनीलोमूर्ध्नितूर्णमपातयत्॥सातेनकपिमुख्येनविमुक्तामहतीशिला॥५४॥विभेदबहुधाघो
राप्रहस्तस्यशिरस्तदा॥संगतासुर्गतश्रीकोगतसत्वोगतेंद्रियः॥५५॥पपातसहसाभूमौछिन्नमलइवद्रुमः॥विभिन्नशिरसस्त

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

स्यवहुसुस्रावशोणितं॥५६॥शरीरादपिसुस्रावगिरेःप्रस्रवणोयथा॥हतेप्रहस्तेनीलेनतदकंप्यमहाबलं॥५७॥रक्षसामवशिष्टा
नांलंकामभिजगामह॥नशेकुःसमवस्थातुंनिहतेवाहिनीपतौ॥५८॥सेतुबंधंसमासाद्यविशीर्णसलिलंयथा॥हतेतस्मिंश्चमू
मुख्यैरक्षसास्तेनिरुद्यमाः॥५९॥रक्षःपतिगृहंगत्वाध्यानमूकत्वमागताः॥त्रस्ताःशोकार्णवंतीव्रंनिःसंज्ञाइवतेभवन्॥६०॥त
तस्तुनीलोविजयीमहाबलःप्रशस्यमानःस्वकृतेनकर्मणा॥समेत्यरामेणसलक्ष्मणेनप्रहृष्टरूपस्तुबभूवयूथपः॥६१॥
इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेप्रहस्तवधोनामाऽष्टपंचाशत्सर्गः॥५८॥पंचमोपहारसमाप्तः॥तस्मिन्हतेराक्ष
ससैन्यपालेप्लवंगमानामृषभेणयुद्धे॥भीमायुधंसागरतुल्यवेगंप्रदुद्रुवेराक्षसराजसैन्यं॥१॥गत्वाथरक्षोधिपतेःशशं
सुःसेनापतिंपावकसूनुशस्तं॥तच्छ्रापितेषांवचनंनिशम्यरक्षोधिपःक्रोधवशंजगाम॥२॥संख्येप्रहस्तंनिहतंनिशम्य
शोकार्दितःकोपपरीतचेताः॥उवाचतानैर्ऋतयोधमुख्यानिंद्रोयथानिर्जरयोधमुख्यान्॥३॥नावज्ञारिपवेकार्याये
बलसूदनः॥मार्दितःसैन्यपालोमेसानुयात्रसकुंजरः॥४॥सोहंरिपुविनाशायविजयायाविचारयन्॥स्वयमेवगमिरणशी
र्षंतदद्भुतं॥५॥अद्यतद्वानरानीकंरामंचसहलक्ष्मणं॥निर्दहिष्यामिबाणौघैर्वनंदीप्तैरिवाग्निभिः॥६॥सएवमुक्त्वाज्वल
नप्रकाशंरथंतुरंगोत्तमराजयुक्तं॥प्रकाशमानंवपुषाज्वलंतंसमारुरोहामरराजशत्रुः॥७॥सशंखभेरीपटहप्रणादैरास्फो

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

टितक्ष्वेडितसिंहनादैः॥पुण्यैःस्तवैश्चाप्यतियुज्यमानस्तदायथौराक्षसराजमुख्यः॥९॥सशैलजीमूतनिकाशकायैर्मांसाशनैः
पाचकदीप्तनेत्रैः॥बभौवृतोराक्षसयोधमुख्यैर्भूतैर्वृतोरुद्र इवामरेशः॥१०॥यतोनगर्य्याःसहसामहौजानिष्क्रम्यतद्वानरसैन्य
मुग्रं॥महार्णवाभस्तनितंददर्शसमुद्यतंपादपशैलहस्तं॥११॥तद्राक्षसानीकमतिप्रचंडमालोक्यरामोभुजगेंद्रबाहुः॥विभी
षणंशस्त्रभृतांवरिष्ठमुवाचसेनानुगतःपृथुश्रीः॥१२॥नानापताकाध्वजशस्त्रजुष्टंप्रासासिशूलानिवज्रजुष्टं॥सैन्यंन
गेंद्रोपमनागजुष्टंकस्येदमक्षोभ्यमभीरुजुष्टं॥१३॥ततस्तुरामस्यनिशम्यवाक्यंविभीषणःशक्रसमानवीर्यः॥शशंस
रामायबलप्रवेकंमहात्मनांराक्षसपुंगवानां॥१३॥योसौगजस्कंधगतोमहात्मानवोदितार्कोपमताम्रचक्षुः॥प्रकंपनं
नागशिरोभ्युपैतित्वकंपनंत्वेनमवेहिराजन्॥१४॥योसौरथस्थोमृगराजकेतुर्धुन्वन्धनुःशक्रधनुःप्रकाशं॥करीवभा
त्युग्रविवृत्तदंष्ट्रःसइंद्रजिन्नामवरप्रधानः॥१५॥यश्चैषविंध्याद्रिमहेंद्रकल्पोधन्वीरथस्थोतिरथोतिवीरः॥विस्फारयं
श्चापमतुल्यमानंनाम्नातिकायोतिविवृद्धकायः॥१६॥योसौनवार्कोदयताम्रचक्षुरारुह्यघंटानिनदप्रणादं॥राजंरवरं
गर्जतिवैमहात्मामहोदरोनामसएषवीरः॥१७॥योसौहयंकांचनचित्रभांडमारुह्यसंध्याभ्रगिरिप्रकाशं॥प्रासंसमुद्यम्य
मरीचिनद्धंपिशाचएषोशनितुल्यवेगः॥१८॥यश्चैषशूलंनिशितंप्रगृह्यविद्युत्प्रभंकिंकरवज्रवेगं॥वृषेंद्रमास्थायमहाशि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

प्रकाशमायातिसौत्रिशिरायशस्वी॥असौचजीमूतनिकाशरूपःकुंभःप्रथुव्यूढसुजातवक्षाः॥समाहितःपन्नगराजकेतु
र्विस्फारयन्भातिधनुर्विधुन्वन्॥२०॥यश्चैषजांबूनदवज्रजुष्टंदीप्तंविधूमपरिघंप्रगृह्य॥आयातिरक्षोबलकेतुभूतः२
सोसौनिकुंभोद्भुतघोरकर्मा॥२१॥यश्चैषचापासिशरौघजुष्टपताकिनंपावकदीप्तरूपः॥रथंसमास्थायविभात्युदग्रोन
रांतकोसौनगशृंगयोधी॥२२॥यश्चैषनानाविधघोररूपैर्व्याघ्रोष्ट्रनागेंद्रमृगेंद्रवक्त्रैः॥भूतैर्वृतोभातिविवृत्तनेत्रैः॥सोसौ
सुराणामपिदर्पहंता॥२३॥यत्रैतदिंदुप्रतिमंविभातिछत्रंसितंसूक्ष्मशलाकमग्र्यं॥तत्रैषरक्षोधिपतिर्महात्माभूतैर्वृतो
रुद्रइवावभाति॥२४॥असौकिरिटीचलकुंडलास्योनागेंद्रविंध्योपमभीमकायः॥महेंद्रवैवस्वतदर्पहंतारक्षोधिपःसूर्य
इवावभाति॥२५॥प्रत्युवाचततोरामोविभीषणमरिंदमः॥अहोदीप्तोमहातेजारावणोराक्षसेश्वरः॥२६॥आदित्यइवदुष्प्रे
क्ष्योरश्मिभिर्भातिराक्षसः॥नव्यक्तंलक्षयेस्वस्यरूपंतेजःसमावृतं॥२७॥देवदानवयक्षाणांवपुर्नैतादृशंभवेत्॥यादृ
शंराक्षसेंद्रस्यवपुरेतत्प्रकाशते॥२८॥सर्वेपर्वतसंकाशाःसर्वेपर्वतयोधिनः॥सर्वेदीप्तायुधधरायोधाश्चास्यमहौजसः
२९॥भातिराक्षसराजोसौप्रदीप्तेभ्रमविक्रमैः॥भूतैःपरिवृतस्तीक्ष्णैर्दहद्भिरिवांतकः॥३०॥दिष्ट्यायमद्यपापात्माममदृष्टि
पथंगतः॥अद्यक्रोधंविमोक्ष्यामिसीताहरणसंभवं॥३१॥एवमुक्त्वाततोरामोधनुरादायवीर्यवान्॥लक्ष्मणानुगतस्तस्थौसर

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

मुद्धृत्य शरोत्तमं ॥३२॥ ततः सरक्षोपतिर्महात्मा रक्षांस्याह महाबलानि ॥ द्वारेषु चर्यागृहगोपुरेषु सुनिर्वृतास्तिष्ठत निर्विकाशं ॥
॥३३॥ इहागतं मां सहितं भवद्भिर्वनौकसः क्षिप्रमिदं विदित्वा ॥ शून्यां पुरीं दुष्प्रसहाः प्रमथ्य प्रधर्षयेयुः सहसा समेताः ॥३४॥ वि
सर्जयित्वा सचिवांस्ततस्तान् गते पुरक्षस्सु यथानियोगं ॥ व्यदारयन् वानरसागरौघं महाझषः पूर्णमिवार्णवौघं ॥३५॥ त
मापतंतं सहसा समीक्ष्य दीप्तेषुचापं युधि राक्षसेंद्रः ॥ महत्समुत्पाट्य महीधराग्रं दुद्राव रक्षोधिपतिं हरीशः ॥३६॥ तच्छैलशृंगं
बहुवृक्षसानुं प्रगृह्य चिक्षेप च निशाचराय ॥ तमापतंतं सहसा समीक्ष्य चिच्छेद बाणैस्तपनीयपुंखैः ॥३७॥ तस्मिन्प्रवृद्धे
तमसानुवृक्षे शृंगे विकीर्णे पतिते पृथिव्यां ॥ महाहिकल्पं शरमंतकाभं समाददे राक्षसलोकनाथः ॥३८॥ सतं गृहीत्वानिल
तुल्यवेगं सविस्फुलिंगं ज्वलनप्रकाशं ॥ बाणं महेंद्राशनितुल्यवेगं चिक्षेप सुग्रीववधाय रुष्टः ॥३९॥ ससायको रावणबाहु
मुक्तः शक्राशनिप्रख्यवपुः शिताग्रः ॥ सुग्रीवमासाद्य विभेद वेगाद्दुहेरिताक्रौंचमिवोग्रशक्तिः ॥४०॥ ससायकार्त्तो विप
रीतचेता कूजन् पृथिव्यां निपपात वीरः ॥ तं प्रेक्ष्य भूमौ पतितं विसंज्ञं नेदुः प्रहृष्टा युधि यातुधानाः ॥४१॥ ततो गवाक्षो गव
यः सुदंष्ट्रस्त्वथर्षभो ज्योतिमुखो नलश्च ॥ शैलान्समुद्यम्य विवृद्धकायाः प्रदुद्रुवुः संयति राक्षसेंद्रं ॥४२॥ तेषां प्रहारान्सच
कारमोघान् रक्षोधिपो बाणगणैः शिखाग्रैः ॥ तान्वानरेंद्रानपि बाणजालैर्विभेद जांबूनदचित्रपुंखैः ॥४३॥ ते वानरेंद्रास्त्रिद

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

शारिवाणैर्भिन्नानिपेतुर्भुविभीमरूपाः॥ततस्तुतद्वानरसैन्यमुग्रंप्रच्छादयामाससवाणजालैः॥४४॥तेवध्यमानाःपतिताश्च
वीराःनानद्यमानाभयशल्यविद्धाः॥शाखामृगाराक्षणसायकार्ताजग्मुश्शरण्यंशरणंस्मरामः॥४५॥ततोमहात्मासधनुर्ध
नुष्मानादायरामःसहसाजगाम॥तंलक्ष्मणःप्रांजलिरभ्युपेत्यउवाचवाक्यंपरमार्थयुक्तं॥४६॥काममार्यसुपर्याप्तोव
धायास्यदुरात्मनः॥वि[illegible]धमिष्याम्यहंनीचमनुजानीहिमांप्रभो॥४७॥तमब्रवीन्महातेजारामःसत्यपराक्रमः॥गच्छत्व
परश्चापिभवलक्ष्मणरंगे॥४८॥रावणोपिमहावीर्योरणेद्भुतपराक्रमः॥त्रैलोक्येनापिसंक्रुद्धोदुःप्रसह्योनसंशयः॥
४९॥तस्यछिद्राणिमार्गस्वस्वछिद्राणिचगोपय॥चक्षुषाधनुषायत्नाद्रक्षात्मानंसमाहितः॥५०॥राघवस्यवचःश्रुत्वासंपरिष्व
ज्यपूज्यच॥अभिवाद्यततोरामंययौसौमित्रिराहवं॥५१॥रावणंवारणहस्तबाहुंददर्शदीप्तोद्यतभीमचापं॥प्रच्छादयंतं
शरवृष्टिजालैस्तान्वानरान्भिन्नविकीर्णदेहान्॥५२॥तमालोक्यमहातेजाहनूमान्मारुतात्मजः॥निवार्यशरजाला
निप्रदुद्रावसरावणं॥५३॥रथंतस्यसमासाद्यबाहुमुद्यम्यदक्षिणं॥त्रासयन्रावणंधीमाहनूमान्वाक्यमब्रवीत्॥५४॥दि
वदानवगंधर्वायक्षाश्चसहराक्षसैः॥अवध्यंभवताभग्नावानरेभ्यस्तुतेभयं॥५५॥एषतेदक्षिणोबाहुःपंचशाखःसमुद्यतः
विधमिष्यतितेदेहात्भूतात्मानंचिरोषितं॥५६॥श्रुत्वाहनुमतोवाक्यंरावणोवाक्यमब्रवीत्॥संरक्तनयनःक्रोधाद्राक्षसोभी

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi.,Digitized by eGangotri

मविक्रम॥क्षिप्रंप्रहरनिःशंकंस्थिराकीर्त्तिमवाप्नुहि॥ततस्त्वांज्ञातिविक्रांतंनाशयिष्यामिवानर॥५५॥रावणस्यवचःश्रुत्वा
वायुसूनुर्वचोब्रवीत॥प्रहृतंहिमयापूर्वमक्षंस्मरसुतंतव॥५६॥एवमुक्तोमहातेजारावणोराक्षसेश्वर॥आजघानानिलसु
तंतलेनोरसिवीर्यवान॥६०॥सतलाभिहतस्तेनचचालचमहाहरि॥स्थित्वामुहूर्त्तंतेजस्वीस्थैर्यंकृत्वामहामति॥६१॥आज
घानाभिसंक्रुद्धस्तलेनामरवैरिणं॥ततस्तलेनाभिहतोवानरेणमहात्मना॥६२॥दशग्रीवःसमाधूतोयथाभूमिवलेनच
ल॥संग्रामेतेनथादृष्ट्वारावणंतलताडितं॥६३॥ऋषयोवानराःसिद्धानेदुर्देवाःसुरासुराः॥अथाश्वास्यमहातेजारावणो
वाक्यमब्रवीत॥६४॥साधुवानरवीर्येणश्लाघनीयोसिमेरिपुः॥रावणेनैवमुक्तस्तुमारुतिर्वाक्यमब्रवीत॥धिगस्तुममवी
र्यस्ययस्त्वंजीवसिरावण॥सकृत्तुप्रहरेदानींदुर्बुद्धेकिंविकत्थसे॥६६॥ततस्त्वांमामकोमुष्टिर्नयिष्यतियमक्षयं॥ततोमा
रुतिवाक्येनकोपस्तस्यतदाज्वलत॥६७॥संरक्तनयनःक्रोधान्मुष्टिमावर्त्यदक्षिणं॥पातयामासवेगेनवानरोरसिवीर्यवान
६८॥हनुमान्वक्षसिमूढेसंचचालहतःपुनः॥विह्वलंतंतदादृष्ट्वाहनूमंतंमहाबलं॥६९॥रथेनातिरथःशीघ्रंनीलंप्रतिसमभ्य
यात॥राक्षसानामधिपतिर्दशग्रीवःप्रतापवान॥७०॥पन्नगप्रतिमैर्भल्लैःपरमर्मभिभेदिभिः॥शरैरादीपयामासनीलंहरिच
मूपतिः॥७१॥सशरौघसमात्यस्तोनीलःकपिचमूपतिः॥करेणैकेनशैलेंद्रंरक्षोधिपतयेसृजत॥७२॥हनूमानपितेजस्वीसमा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

श्वस्तोमहामनाः॥ विचिक्षमाणोयुद्धेषुः सरोषमिदमब्रवीत्॥ १३॥ नीलेनसहसंयुक्तरावणंराक्षसेश्वरं॥ अन्येनवद्यमानस्मन
युक्तमभिधावनं॥ १४॥ रावणोपिमहातेजास्तंशृंगसमभीःशरैः॥ आजघानसुतीक्ष्णाग्रैस्तद्विकीर्णंपपातह॥ १५॥ तद्विकीर्ण
शिरेःशृंगंदृष्ट्वाहरिचमूपतिः॥ कालाग्निरिवजज्वालकोपेनपरवीरहा॥ १६॥ सोश्वकर्णान्धवान्सालांश्चूतांश्चापिसुपुष्पि
तान्॥ अन्याश्चविविधान्वृक्षान्नीलश्चिक्षेपसंयुगे॥ १७॥ तान्वृक्षान्समासाद्यपतिश्चिच्छेदरावणः॥ अभ्यवर्षद्जस्रेणशरव
र्षेणपावकिं॥ १८॥ अभिवृष्टशरौघेणमेघेनेवमहाबलः॥ ह्रस्वंकृत्वातदात्मानंध्वजाग्रेनिपपातह॥ १९॥ पावकात्मजमालो
क्यध्वजाग्रेसमवस्थितं॥ जज्वालरावणःक्रोधाततोनीलोननादह॥ २०॥ ध्वजाग्रेधनुषश्चाग्रेकीरीटाग्रेचतंहरिं॥ लालक्ष्म
क्ष्मणोथहनूमांश्चदृष्ट्वारामश्चविस्मितः॥ २१॥ रावणोपिमहातेजाःकपिलाघवविस्मितः॥ अस्त्रमाहारयामासदीप्तमाग्ने
यमद्भुतं॥ २२॥ ततस्तेचुक्रुशुर्हृष्टालब्धलक्षाःप्लवंगमाः॥ नीललाघवसंभ्रांतंदृष्ट्वारावणमाहवे॥ २३॥ वानराणांप्रणादेन
संरब्धोरावणस्तदा॥ संभ्रमाविष्टहृदयोनकिंचित्प्रत्यपद्यत॥ २४॥ आग्नेयास्त्रसमायुक्तंगृहीत्वारावणःशरं॥ ध्वजेशीर्षेस्थितं
नीलमुद्दिक्षतनिशाचरः॥ २५॥ ततोब्रवीन्महातेजारावणोराक्षसेश्वरः॥ कपिलाघवयुक्तोसिमाययापरयानघ॥ २६॥ जीवितंख
लुरक्षस्वयदिशक्नोषिवानर॥ तानिसृतान्यात्मरूपाणिसृजसित्वमनेकशः॥ २७॥ तथापित्वांमयामुक्तःसायकोस्त्रप्रयोजतः॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

जीवितंपरिरक्षंतंजीवितात्भ्रंशयिष्यति॥८॥एवमुक्तामहाबाहूरावणोराक्षसेश्वरः॥संधायबाणमस्त्रेणचमूपतिमताडय
त्॥८॥तेनास्त्रयुक्तेनबाणेननीलोवक्षसिताडितः॥निर्दह्यमानःसहसानिपपातमहीतले॥९॥पितृमाहात्म्यसंयोगात्रा
नश्चापितेजसा॥जानुभ्यामपतद्भूमौनतुप्राणैर्वियुज्यत॥९॥विसंज्ञंपतितंदृष्ट्वादशग्रीवोरणोत्सुकः॥रथेनाबुद्धनादेनसौमि
त्रिमभिदुद्रुवे॥९॥आसाद्यरणमध्येतंवारयित्वास्थितोज्वलन्॥धनुर्विस्फारयामासराक्षसेंद्रःप्रतापवान्॥९३॥तमाहसौमि
त्रिरदीनसत्वोविस्फारयन्स्वंधनुरप्रमेयं॥अन्वेहिमेवनिशाचरेंद्रनवानरांस्त्वंप्रतियोद्धुमर्हसि॥९४॥सतस्यवाक्यंप्रति
पूर्णघोषंज्याशब्दमुग्रंचनिशम्यराजा॥आसाद्यसौमित्रिमवस्थितंतंकोपान्वितंवाक्यमुवाचरक्षः॥९५॥दिष्ट्यासिमेराघव
दृष्टिमार्गंप्राप्तोतकामीविपरीतचेताः॥अस्मिन्क्षणेयास्यसिमृत्युदेशंसंसाद्यमानोममबाणजालैः॥९६॥तमाहसौमित्रि
रविस्मयानोगर्जंतमुद्धतसिताग्रदंष्ट्रं॥राजन्नगर्जंतिमहाप्रभावाविकत्थसेपापकृतांवरिष्ठ॥९७॥जानामिवीर्यंतवरा
क्षसेंद्रलंघ्रतापंचरपराक्रमंच॥अवस्थितोहंशरचापपाणिरागच्छकिंमोघविकत्थनेन॥९८॥सएवमुक्तःकुपितःसस
र्जरक्षोधिपःसप्तशरान्सुपुंखान्॥तांस्त्रक्ष्मणःकांचनचित्रपुंखैश्चिच्छेदबाणैर्निशिताग्रधारैः॥९९॥तान्वीक्षमाणःसहसानि
कृत्तान्निकृत्तभोगानिवपन्नगेंद्रान्॥लंकेश्वरःक्रोधवशंजगामससर्जचान्यान्निशितान्पृथक्तान्॥१००॥सबाणवर्षंतुववर्ष

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

तीव्रो रामानुजः कार्मुकसंप्रयुक्तैः सुरार्धचंद्रोपमकर्णिभस्त्रैः शरांश्चचिच्छेदनचुक्षुभे च ॥ सबाणजालान्यथतानितानि मो
घानिपश्यन्स्मिदशारिराजः ॥ विसिस्मिये लक्ष्मणलाघवेन पुनश्च बाणान्निशितान्मुमोच ॥ २ ॥ सलक्ष्मणश्चापिशरोच्छिताग्रा
न्महेंद्रवज्राशनितुल्यवेगान् ॥ संधाय चापेज्वलनप्रकाशान्ससर्जरक्षोधिपतेर्वधाय ॥ ३ ॥ सतान्प्रचिच्छेदनिशाचरेंद्रश्छि
न्नांस्तु लक्ष्मणमाजघान ॥ शरेण कालाग्निसमप्रभेण स्वयंभुदत्तेनललाटदेशे ॥ ४ ॥ सलक्ष्मणो रावणसायकार्तश्चचाल
चापंशिथिलंप्रगृह्य ॥ पुनश्चसंज्ञांप्रतिलभ्यकृच्छ्राच्चिच्छेदचापंत्रिदशेंद्रशत्रोः ॥ ५ ॥ निकृत्यचापंत्रिभिराजघानबाणैस्तदा
दाशरथिः शितायैः ॥ ससायकार्तो विचचालराजा कृच्छ्रासंज्ञांपुनराससाद ॥ ६ ॥ सकृत्तचापः शरताडितश्चमेदार्द्रगात्रो रु
धिरावसिक्तः ॥ जग्राहशक्तिंस्वयमुग्रशक्तिः स्वयंभुदत्तांयुधिदेवशत्रुः ॥ ७ ॥ सतांसधूमानलसन्निकाशां वित्रासिनींसंयति
वानराणां ॥ चिक्षेपशक्तिंतरसाज्वलंतीं सौमित्रयेराक्षसराष्ट्रनाथः ॥ ८ ॥ तामापतंतीं भरतानुजोस्त्रैर्जघानबाणैश्चकृतांतकल्पैः
॥ तथापिसातस्यविवेशशक्तिंभुजांतरंदाशरथेर्विशालं ॥ ९ ॥ सशक्तिमान्शक्तिसमाहतःसन्पपातभूमौसरघु
प्रवीरः ॥ तंविह्वलंतंसहसाभ्युपेत्यजग्राहराजातरसाभुजाभ्यां ॥ १० ॥ हिमवान्मंदरोमेरुस्त्रैलोक्यंवासुरासुरैः ॥ शक्यंभुजाभ्
यामुद्धर्तुंनसंख्येभरतानुजः ॥ ११ ॥ शक्त्याब्राह्म्यातुसौमित्रिस्ताडितस्तुस्तनांतरे ॥ विस्मोरचिंत्यंस्वंभागमात्मानंप्रत्यनुस्मरन्

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

॥१२॥ततोहानवदर्पघ्नंसौमित्रिंकंटकः॥तंपीडयित्वाबाहुभ्यामत्रभुर्लेघनेभवत्॥१३॥अथैनंवेष्टयंभागंमानुषंदेहमास्थि
तं॥अथवायुसुतःक्रुद्धोरावणंसमभिद्रवत्॥१४॥आजघानोरसिक्रुद्धोवज्रकल्पेनमुष्टिना॥तेनमुष्टिप्रहारेणरावणोरा
क्षसेश्वरः॥१५॥जानुभ्यामगमद्भूमौचचालचपपातच॥आस्येसंस्रनेत्रश्रवणेर्वामरुधिरंबहु॥१६॥विघूर्णमानोनिश्चेष्टो
रथोपस्थउपाविशत्॥विसंज्ञोमूर्छितश्चासीन्नचस्थानंसमालभत्॥१७॥विसंज्ञंरावणंदृष्ट्वासमरेभीमविक्रमं॥ऋषयो
वानराःसिद्धानेदुर्देवाःसवासवाः॥१८॥हनुमानपितेजस्वीलक्ष्मणंरावणार्दितं॥आनयद्राघवाभ्यांबाहुभ्यांपरिरभ्यच
१९॥वायुसूनोःसुहृत्वेनभक्त्यापरमयाचसः॥शत्रूणामत्रकंप्योपिलघुत्वमगमत्कपेः॥२०॥तंसमुत्सृज्यसाशक्तिःसौमित्रिं
युधिदुर्जयं॥रावणस्यरथेतस्मिन्स्थानंपुनरुपागता॥२१॥रावणोपिमहातेजाःप्राप्यसंज्ञांमहाहवे॥आददेनिशितान्बाणा
न्जग्राहचमहद्धनुः॥२२॥आश्वस्तश्चविशल्यश्चलक्ष्मणःशत्रुसूदनः॥विस्तीर्णंगमीमांसमात्मनःप्रत्यनुस्मरत्॥२३॥नि
पातितमहावीरांवानराणांमहाचमूं॥राघवस्तुरणेदृष्ट्वारावणंसमभिद्रवत्॥२४॥अथैनमुपसंगम्यहनूमान्वाक्यमब्रवीत्
ममपृष्ठंसमारुह्यरावणंशास्तुमर्हसि॥२५॥विष्णुर्यथागरुत्मंतंआरुह्यामरवैरिणं॥तत्श्रुत्वाराघवोवाक्यंवायुसुतेन
भाषितं॥२६॥आरुरोमहावीरोबलवंतंमहाहरिं॥रथस्थंरावणंसंख्येददर्शमनुजाधिपः॥२७॥तमालोक्यमहातेजाःप्रदुद्रा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वसराघवः॥वैरोचनिमिवक्रुद्धोविष्णुरभ्युद्यतायुधः॥२९॥ज्याशब्दमकरोतीव्रंवज्रनिष्पेषनिष्ठुरं॥गिरागंभीरयारामोराक्षसेंद्रमु
वाचह॥२९॥तिष्ठतिष्ठममत्वंहिकृत्वाविप्रियमीदृशं॥क्वनुराक्षसशार्दूलगतोमोक्षमवाप्स्यसि॥३०॥यदींद्रवैवस्वतभास्क
रान्वास्वयंभुवैश्वानरशंकरान्वा॥गमिष्यसित्वंदशवादिशोवातथापिमेनाद्यगतोविमोक्ष्यसे॥३१॥यश्चैषशक्त्यानिहत
स्त्वयाद्यइच्छ[illegible]न्विषादंसहसाभ्युपेतः॥सएषरक्षोगणराजमृत्युःसपुत्रदारस्यतवाद्ययुक्तः॥३२॥एतेनचात्यद्भुतदर्शना
निशरैर्जनस्थानकृतालयानि॥चतुर्दशान्यात्तवरायुधानिरक्षःसहस्राणिनिषूदितानि॥३३॥राघवस्यवचःश्रुत्वाराक्ष
सेंद्रमहाकपिं॥वायुपुत्रंमहात्मानंराघवंरणे॥३४॥रोषेणमहताविष्टःपूर्ववैरमनुस्मरन्॥आजघानशरैस्तीक्ष्णैःकालान
लशिखोपमै॥३५॥राक्षसेनाहवेतस्यताडितस्यापिसायकैः॥स्वभावतेजोयुक्तस्यभूयस्तेजोभ्यवर्धत॥३६॥ततोरामोमहाते
जारावणेनकृतव्रणः॥दृष्ट्वाप्लवगशार्दूलःक्रोधस्यवशमेयिवान्॥३७॥तस्याभिसंक्रम्यरथंसचक्रंसाश्वंध्वजंछत्रमहापता
कं॥ससारथिंसाशनिभूलखड्गंरामःप्रचिच्छेदशरैःसुपुंखैः॥३८॥अथेंद्रशत्रुंतरसाजघानबाणेनवज्राशनिसन्निभेन
भुजांतरेव्यूढसुजातरूपेवज्रेणमेरुंभगवानिवेंद्रः॥३९॥योवज्रपाताशनिसन्निपातानचुक्षुभेनापिचचालराजा॥सरा
मबाणाभिहतोभृशार्त्तश्चचालचापंचमुमोचवीरः॥४०॥तंविह्वलंतंप्रसमीक्ष्यरामःसमादधेदीप्तमथार्धचंद्रं॥तेनार्कवै

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

र्णसहसाकिरीटंचिच्छेदरक्षोधिपतेर्महात्मा॥४॥तंनिर्विशीर्णंविषसन्निकाशंशांतार्चिषंसूर्यमिवाप्रकाशं॥गतश्रियंकृत्तकिरीटकू
टमुवाचरामोयुधिराक्षसेंद्रं॥४२॥कृतंत्वयाकर्ममहत्सुभीमंहतप्रवीरश्चकृतस्त्वयाहं॥तस्मात्परिश्रांतइतिव्यवस्यनत्वांशरैर्मृ
त्युवशंनयामि॥४३॥गच्छानुजानामिरणार्दितस्त्वंप्रविश्यरात्रिंचरराजलंकां॥आश्वास्यनिर्याहिरथीसधन्वीततोबलंप्रेक्ष्य
सिमेरथस्थः॥४४॥सएवमुक्तोहतहर्षदर्पोनिकृत्तचापोनिहताश्वसूतः॥शरार्दितःकृत्तकिरीटकूटोविवेशलंकांसहसा
स्मराजा॥४५॥तस्मिन्प्रविष्टेरजनीचरेंद्रेमहाबलेदानवदेवशत्रौ॥हरीन्विशल्यान्सहलक्ष्मणेनचकाररामंपरमाहवाग्रे
४६॥तस्मिन्प्रभग्नेत्रिदशेंद्रशत्रौसुरासुराभूतगणादिशश्च॥ससागराःसर्षिमहोरगाश्चतथैवभूम्यंबुधराःप्रहृष्टाः॥४७॥इत्या
र्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेएकोनषष्टितमःसर्गः॥४९॥सप्रविश्यपुरींलंकांरामबाणभयार्दितः॥भग्नदर्पस्तदाराजा
बभूवव्यथितेंद्रियः॥१॥मातंगइवसिंहेनगरुडेनेवपन्नगः॥अभिभूतोभवद्राजाराघवेणमहात्मना॥२॥ब्रह्मदंडप्रकाशानांवि
द्युच्चलितवर्चसां॥स्मरन्राघवबाणानांविव्यथेराक्षसेश्वरः॥३॥सकांचनमयंदिव्यंआश्रित्यपरमासनं॥विप्रेक्षमाणोरुक्मांसिरा
वणोवाक्यमब्रवीत्॥४॥सर्वंतत्खलुरामेणघंयत्तप्तंपरमंतपः॥यत्समानोमहेंद्रेणमानुषेणास्मिनिर्जितः॥५॥इदंतद्ब्रह्मणोघोरं
वाक्यंसामभ्युपस्थितं॥मानुषेभ्योविजानीहिभयंत्वमितितत्तथा॥६॥देवदानवगंधर्वयक्षराक्षसपन्नगैः॥अवध्यत्वमयाप्रा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

कं मानुषेभ्योनयाचितं॥७॥विदितं मानुषं मन्ये रामं दशरथात्मजं॥इक्ष्वाकुकुलजातेन त्वया नरपशुना यत्पुरा॥८॥उत्पत्स्यति हि मद्वंशे पुरुषो राक्षसाधमः॥यस्त्वां सपुत्रं सामात्यं सबलं साश्वसारथिं॥९॥निहनिष्यति संग्रामे त्वां कुलाधमदुर्मते॥शप्तो हं वेदवत्याच यदा साधर्षिता पुरा॥१०॥सेयं सीता महाभागा जाता जनकनंदिनी॥उमा नंदीश्वरश्चापि रंभा वरुणकन्यका॥११॥यथोक्तास्तपसा त्राता न मिथ्या ऋषिभाषितं॥एतदेव समागम्य यत्नं कर्तुमिहार्हथ॥१२॥राक्षसाश्चापि तिष्ठंतु चर्यागोपुरमूर्धसु सचापि प्रतिमर्गंभीर्यो देवदानवदर्पहा॥१३॥ब्रह्मशापाभिभूतस्तु कुंभकर्णो विबोध्यतां॥सपराजितमात्मानं ग्रहस्तेन निषूदितं॥१४॥ज्ञात्वा रक्षो बलं भीमं महाबलः॥द्वारेषु यत्नः क्रियतां प्राकारांश्चाधिरुह्यतां॥१५॥निद्रावशसमाविष्टः कुंभकर्णो विबोध्यतां॥सुरवैस्वपिति निश्चिंतः कामोपहतचेतनः॥१६॥नवसप्तदशाष्टौ च मासांस्वपिति राक्षसः॥मंत्रं कृत्वा प्रसुप्तोयं मितस्तु नव महनि॥१७॥स हि संख्ये महाबाहुः ककुदः सर्वरक्षसां॥वानरान्राजपुत्रौ च क्षिप्रमेव हनिष्यति॥१८॥एष केतुः परः संख्ये सुरेषु वै सर्वरक्षसां॥कुंभकर्णः सदा शेते मूढो ग्राम्यसुरेवरतः॥१९॥रामेणापि निरस्तस्य संग्रामे स्मिन्सुदारुणे॥भविष्यति न मे शोकः कुंभकर्णे विबोधिते॥२०॥किं करिष्याम्यहं तेन शक्रतुल्यबलेन हि॥ईदृशे व्यसने प्राप्ते योन सात्त्वायकल्पते॥२१॥ते तु तद्वचनं श्रुत्वा राक्षसा रावणाज्ञया॥जग्मुः परमसंभ्रांताः कुंभकर्णनिवेशनं॥२२॥ते रावणक्षमादिष्टा मांसशोणितभोजनाः॥गंधमाल्यास्तदा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

भस्यानादायसहसाययुः॥२३॥तांप्रविश्यमहाद्वारंसर्वतोयोजनायतां॥कुंभकर्णगुहांरम्यांप्रपुष्पगंधप्रवाहिनीं॥२४॥कुंभक
र्णस्यनिश्वासाद्वधूतामहाबलाः॥प्रतिष्ठमाणाःकृच्छ्रेणयत्नात्प्रविविशुर्गुहां॥२५॥तांप्रविश्यगुहांरम्यां [illegible] शुभांकांचनकु
ट्टिमां॥ददृशुर्नैर्ऋतव्याघ्राःशयानंभीमविक्रमं॥२६॥तेतुतंविकृतंसुप्तंविकीर्णमिवपर्वतं॥कुंभकर्णंमहानिद्रंसहिताप्रत्यवे
क्षयन्॥२७॥ऊर्ध्वलोमांचिततनुंश्वसंतमिवपन्नगं॥त्रासयंतंमहाकायंशयानंभीमदर्शनः॥२८॥भीमनासापुटंतंतुव्यालोलवि
पुलाननं॥शयनेन्यस्तसर्वांगंमेदोरुधिरगंधिनं॥२९॥कांचनांगदनद्धांगंकिरीटिनमरिंदमं॥ददृशुर्नैर्ऋतव्याघ्रकुंभकर्णंम
हाबलं॥३०॥ततश्चक्रुर्महात्मानःकुंभकर्णाग्रतस्तदा॥मांसानांमेरुसंकाशांराशिंपरमतर्पणं॥३१॥मृगाणांमहिषाणांचवराहा
णांचसंचयान्॥चक्रुर्नैर्ऋतशार्दूलाराशिमन्नस्यचाद्भुतं॥३२॥ततःशोणितकुंभांश्चमद्यानिविविधानिच॥पुरस्तात्कुंभकर्णस्य
चक्रुस्त्रिदशशात्रवः॥३३॥लिलिपुश्चपरार्धेनचंदनेनपरंतप॥दिव्यैरावासयामासुर्माल्यगंधैःसुगंधिभिः॥३४॥धूपगंधाश्चसं
सृजुस्तुष्टुवुश्चपरंतप॥जलदाइवचोन्नेदुर्यातुधानास्ततस्ततः॥३५॥शंखानांपूरयामासुःशशांकसदृशप्रभान्॥तुमुलंयुगप
च्चापिविनेदुश्चाप्यमर्षिताः॥३६॥निदुरास्फोटयामासुश्चिक्षिपुस्तेनिशाचराः॥कुंभकर्णविबोधार्थंचक्रुस्तेविपुलस्वनं॥३७॥स
शंखभेरीपटहप्रणादमास्फोटितस्वेलितसिंहनादं॥दिशोद्रवंतस्त्रिदिवंकिरंतःक्रुद्धाविहंगाःसहसानिपेतुः॥३८॥यदाभृशं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नैर्निनदैर्महात्मानकुंभकर्णोबुबुधेप्रसुप्तः॥ततोभृशुंडीमुसलानिसर्वेरक्षोगणास्तेजगृहुर्गदाश्च॥३९॥तंशैलशृंगैर्मुसलैर्गदा
भिर्वृक्षैस्तलैर्मुद्गरमुष्टिभिश्च॥सुखप्रसुप्तंभुविकुंभकर्णंरक्षांस्युदग्राणितदानिजघ्नुः॥४०॥तस्यनिश्वासवातेनकुंभकर्णस्य
रक्षसः॥राक्षसाबलवंतोपिस्थातुनाशक्नुवन्सुरः॥४१॥ततःपरिहितागाढंराक्षसाभीमविक्रमाः॥मृदंगपणवान्भेरीःशंखकुं
भगणांस्तदा॥४२॥दशराक्षससाहस्रंयुगपत्पर्यवारयत्॥नीलांजनचयाकारंतुतंप्रत्यबोधयन्॥४३॥अभिघ्नंतोनदंतश्च
नैवसंविविदेतुसः॥यदाचैनंनशेकुस्तेप्रतिबोधयितुंतदा॥४४॥ततोगुरुतरंयत्नंदारुणंसमुपाक्रमन्॥अश्वानुष्ट्रान्खरा
न्नागान्जघ्नुर्दंडकुशैकुशैः॥४५॥भेरीशंखमृदंगांश्चसर्वप्राणैरवादयन्॥निजघ्नुश्चास्यगात्राणिमहाकाष्ठकटंकटैः॥४६॥
मुद्गरैर्मुसलैश्चापिसर्वैप्राणसमुद्यतैः॥तेननादेनमहतालंकासर्वाप्रपूरिता॥४७॥सपर्वतवनासर्वासोपिनैवप्रबुध्यते
ततोभेरीसहस्रंतुयुगपत्समहन्यत॥४८॥मृष्टकांचनकोणानामसक्तानांसमंततः॥एवमप्यतिनिद्रस्तुयदानैवप्रबुध्यते
४९॥शापस्यवशमापन्नस्ततःक्रुद्धानिशाचराः॥ततःकोपसमाविष्टाःसर्वेभीमपराक्रमाः॥५०॥तद्रक्षोबोधयिष्यंतश्चक्रुस्ते
पराक्रमं॥अन्येभेरीःसमाजघ्नुरन्येचक्रुर्महास्वनः॥५१॥केशानन्येप्रलुलुपुःकर्णावन्येदशंतिच॥उदकुंभशतान्यन्येसमसिंचं
तकर्णयोः॥५२॥नकुंभकर्णःप्रास्यंदन्महानिद्रावशंगतः॥अन्येचबलिनस्तस्यकूटमुद्गरपाणयः॥५३॥मूर्ध्निवक्षसिगात्रेषुपाटयन्

CC-0 Courtesy Shri K.S Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

कूटमुद्गरान्॥रज्जुबंधनबद्धाभिःशतघ्नीभिश्चसर्वशः॥५४॥बध्यमानोमहाकायोनप्राबुध्यतराक्षसः॥वारणानांसहस्रंचशरी
रेस्यप्रधावितं॥५५॥कुंभकर्णस्तदाबुद्धःस्पर्शंपरममन्यत॥तपात्यमानैर्गिरिशृंगवृक्षैरचिंतयंस्तान्विपुलप्रहारान्॥निद्राक्ष
यात्सुदुःखपीडितश्चविजृंभमाणःसहसोत्पपात॥५६॥सनागभोगाचलशृंगकल्पौविक्षिप्यबाहूजितवज्रसारौ॥विवृत्य
वक्त्रंवडवामुखाभंनिशाचरेंद्रोविकृतंजजृंभे॥५७॥तस्यजाजृंभमाणस्यवक्त्रंपातालसन्निभं॥ददृशेमेरुशृंगाग्रेदिवाक
रइवोदितः॥५८॥सजृंभमाणोतिबलप्रबुद्धोरजनीचरः॥निश्वासश्वास्यतोजज्ञेपर्वतादिवमारुतः॥५९॥रूपमुत्तिष्ठतस्तस्य
कुंभकर्णस्यतद्बभौ॥युगांतेसर्वभूतानिकालस्येवदिधक्षतः॥६०॥तस्यदीप्ताग्निसदृशेविद्युत्सदृशवर्चसी॥ददृशातेम
हानेत्रेदीप्तानिवमहाग्रहौ॥६१॥ततस्त्वदर्शयन्भक्ष्यान्सर्वांश्चविविधान्बहून्॥वराहान्महिषांश्चैवबभक्षसमहा
बलः॥६२॥आदद्वभुक्षितोमांसंशोणितंतृषितोपिवत्॥मेदःकुंभान्महान्मद्यकुंभकर्णस्तदापिवत्॥६३॥ततस्तप्तइति
ज्ञात्वासमुत्पेतुर्निशाचराः॥शिरोभिश्चप्रणम्यैनंसर्वतःपर्यवारयन्॥६४॥निद्राविषदनेत्रस्तकलुषीकृतलोचनः॥चारय
न्सर्वतोदृष्टिंतानुवाचनिशाचरान्॥६५॥ससर्वान्सांत्वयामासनैर्ऋतानैर्ऋतर्षभः॥बोधनाद्विस्मितश्चापिराक्षसानिरम
ब्रवीत्॥६६॥किमर्थमहमाहूतभवद्भिःप्रतिबोधितः॥कच्चित्कुशलंराज्ञोभयंवानेहकिंचन॥६७॥अथवाध्रुवमन्येभ्यो

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

भयंपरमुपस्थितं॥यदर्थमेवंत्वरितैर्भवद्भिःप्रतिबोधित॥६८॥अथराक्षसराजस्यभयमुत्पाटयाम्यहं॥पातयिष्येमहेंद्रंवाशात
यितथानलं॥६९॥नत्वल्पकारणेसुप्तंबोधयिष्यतिमांप्रभुः॥तदाख्यातार्थतत्वेनमत्प्रबोधनकारणं॥७१॥एवंब्रुवाणंसंरब्धं
कुंभकर्णमरिंदमं॥यूपाक्षःसचिवोराज्ञःकृतांजलिरभाषत॥७२॥ननोदेवकृतंकिंचिद्भयमस्तिकदाचन॥मानुषान्नोभयंरा
जंस्तुमुलंसंप्रबाधते॥७३॥नदैत्यदानवेभ्योवाभयमस्तिहितादृशं॥यादृशंमानुषंराजन्भयमस्मानुपस्थितं॥७४॥वानरैःपर्व
ताकारैर्लंकेयंपरिवारिता॥सीताहरणसंतप्ताद्रामान्नस्तुमुलंभयं॥७५॥एकेनवानरेणेयंपूर्वंदग्धामहापुरी॥कुमारोनिह
श्चाक्षःसानुयात्रःसकुंजरः॥७६॥स्वयंरक्षोधिपश्चापिपौलस्त्योदेवकंटकः॥व्रजेतिसंयुगेमुक्तोरामेणादित्यतेजसा॥७७
यन्नदेवैःकृतोराजानापिदैत्यैर्नदानवैः॥कृतःसद्दूहरामेणविमुक्तःप्राणसंशयात्॥७८॥सयूपाक्षवचःश्रुत्वाभ्रातुर्युधिपराजयं
कुंभकर्णोविवृत्ताक्षोयूपाक्षमिदमब्रवीत्॥७९॥सर्वमद्यैवयूपाक्षहरिसैन्यंसलक्ष्मणं॥राघवंचरणेहत्वाततोद्रक्ष्यामिरावणं॥
८०॥राक्षसांस्तर्पयिष्यामिहरीणांमांसशोणितैः॥रामलक्ष्मणयोश्चापिस्वयंपास्यामिशोणितं॥८१॥ततस्यवाक्यंब्रुवतोनिशम्यसग
र्वितंरोषविवृद्धदोषं॥महोदरोनैर्ऋतयोधमुख्यःकृतांजलिर्वाक्यमिदंबभाषे॥८२॥रावणस्यवचःश्रुत्वागुणदोषौविमृश्यच
पश्चादपिमहाबाहोशत्रून्युधिविजेष्यसि॥८३॥महोदरवचःश्रुत्वाराक्षसैःपरिवारितः॥कुंभकर्णोमहातेजाःसंप्रतस्थेमहाबलः

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri.

८३॥सुमंत्रस्थाप्यभीमाक्षंभीमरूपपराक्रमं॥राक्षसास्त्वरिताजग्मुर्दशग्रीवनिवेशनं॥८४॥तेभिगम्यदशग्रीवमासीनंपरमा
सने॥ऊचुर्बद्धांजलिपुटाःसर्वएवनिशाचराः॥८५॥कुंभकर्णःप्रबुद्धोसौभ्रातातेराक्षसेश्वर॥कथंतत्रैवनिर्यातुद्रक्ष्यसेतमि
हागतं॥८६॥रावणस्त्वब्रवीद्दृष्टोराक्षसांस्तानुपस्थितान्॥द्रष्टुमेनमहेच्छामियथान्यायंचपूज्यतां॥८७॥तथेत्युक्त्वातुतेसर्वे
पुनरागम्यराक्षसाः॥कुंभकर्णमिदंवाक्यमूचुरावणचोदितः॥८८॥द्रष्टुत्वांकांक्षतेराजासर्वराक्षसपुंगव॥गमनेक्रियतांबुद्धि
र्भ्रातरंसंप्रहर्षय॥८९॥कुंभकर्णस्तुदुर्द्धर्षोभ्रातुराज्ञायशासनं॥तथेत्युक्त्वामहावीर्यःशयनादुत्पपातह॥९०॥प्रक्षाल्यवद
नंहृष्टःस्नातःपरमहर्षितः॥पिपासुस्त्वरयामासपानंबलसमीरणं॥९१॥ततस्तेत्वरितातत्रराक्षसारावणाज्ञया॥मद्यंभक्ष्यंच
विविधान्क्षिप्रमेवोपहारयन्॥९२॥पीत्वाघटसहस्रेद्वेगमभायोपचक्रमे॥ईषत्समुत्कटोमत्तस्तेजोबलसमन्वितः॥९३॥कुं
भकर्णोबभौहृष्टःकालांतकयमोपमः॥भ्रातुःसभवनंगच्छन्रक्षोभिःपरिवारितः॥९४॥कुंभकर्णःपदन्यासैरकंपयतमेदिनीं॥स
राजमार्गंवपुषाप्रकाशयन्सहस्ररश्मिर्धरणीमिवांशुभिः॥जगामतत्रांजलिमालयावृतःशतक्रतुर्गेहमिवस्वयंभुवः॥९५
तंराजमार्गस्थमभित्रघातिनंवनौकसस्तेसहसाबहिस्थिताः॥दृष्ट्वाप्रमेयंगिरिशृंगकल्पंवितत्रसुस्तेहरियूथपाला॥॥
९६॥केचिद्धरण्यंशरणंस्मरामंव्रजंतिकेचिद्व्यथिताःपतंति॥केचिद्दिशश्चव्यथिताःप्रयांतिकेचिद्भयार्ताभुविशेरतेस्म॥९७॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

तमद्रिशृंगप्रतिमंकीरीटिनंस्पृशंतमादित्यमिवात्मतेजसा॥वनौकसःप्रेक्ष्यविवृद्धमद्भुतंभयार्दिताद्दुद्रुवुरेयतस्ततः॥१५॥
इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेषष्टितमसर्गः॥६०॥ततोरामोमहातेजाधनुरादायवीर्यवान्॥किरीटिनंमहा
कायंकुंभकर्णंददर्शह॥१॥तंदृष्ट्वाराक्षसश्रेष्ठंपर्वताकारदर्शनं॥क्रममाणमिवाकाशंपुरानारायणंप्रभुं॥२॥ततोयांबु
दसंकाशांकांचनांगदभूषणां॥दृष्ट्वापुनःप्रदुद्रावुवानराणांमहाचमुं॥३॥विद्युतांवाहिनींदृष्ट्वावर्धमानंचराक्षसं॥वि
स्मयमिदंरामोविभीषणमुवाचह॥४॥कोसौपर्वतसंकाशःकिरीटीहरिलोचनः॥लंकायांदृश्यतेवीरःसविद्युदिवतो
यदः॥५॥पृथिव्याःकेतुभूतोसौमहानेकोत्रदृश्यते॥यंदृष्ट्वावानराःसर्वेविद्रवंति ततस्ततः॥६॥आचक्ष्वमेमहान्को
सौराक्षसोयदिवासुरः॥नमयैवंविधंभूतंदृष्टपूर्वंकदाचन॥७॥सपृष्टोराजपुत्रेणरामेणाक्लिष्टकर्मणा॥विभीषणोम
हाप्राज्ञःकाकुत्स्थमिदमब्रवीत्॥८॥येनवैवस्वतोयुद्धेवासवश्चविराजितः॥सैषविश्रवसःपुत्रःकुंभकर्णःप्रतापवा
न्॥९॥यस्यप्रमाणेनसमोराक्षसोन्योनविद्यते॥एतेनदेवायुधिदानवाश्चयक्षाभुजंगाःपिशिताशनाश्च॥गंधर्वविद्याध
रकिन्नराश्चसहस्रशोराघवसंप्रभग्नाः॥१०॥शूलपाणिंविरूपाक्षंकुंभकर्णंमहाबलं॥हंतुंनशक्तास्त्रिदशाःकालोयमिति
मोहिताः॥११॥प्रकृत्याद्येषतेजस्वीकुंभकर्णोमहाबलः॥अन्येषांराक्षसानांतुवरदानकृतंबलं॥१२॥एतेनजातमात्रेणक्षुधार्ते

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नमहात्मना॥भक्षितानिसहस्राणिसत्वानांसुबहून्यपि॥२३॥तेषुसंभक्षमाणेषुप्रजाभयनिपीडिताः॥यांतिस्मशरणंशक्रंत
मपर्थेन्यवेदयत्॥२४॥सकुंभकर्णंकुपितोमहेंद्रोजघानवज्रेणशितेनवज्री॥सशक्रवज्राभिहतोमहात्माचचालको
पाच्चभृशंननाद॥२५॥तस्यनानद्यमानस्यकुंभकर्णस्यरक्षसः॥श्रुत्वानिनादंचित्रस्ताभूयोभूमिर्वितत्रसे॥२६॥ततःको
पान्महेंद्रस्यकुंभकर्णोमहाबलः॥निष्कृष्यैरावताद्दंतंजघानोरसिवासवं॥२७॥कुंभकर्णप्रहारार्तोविजज्वालसवासवः॥त
तोविषेदुसहसादेवगंधर्वदानवाः॥२८॥प्रजाभिश्चसमंशक्रोययौस्थानंस्वयंभुवः॥कुंभकर्णस्यदौरात्म्यंशशंसुस्तेप्रजापते
प्रजानांभक्षणंचैवदेवानांचापिधर्षणं॥आश्रमध्वंसनंचापिपरस्त्रीहरणंभृशं॥३०॥एवंप्रजायदित्वेषभक्षयिष्यतिनित्यशः
अचिरेणैवकालेनशून्योलोकोभविष्यति॥३१॥वासवस्यवचःश्रुत्वासर्वलोकपितामहः॥रक्षोरावाहयामासकुंभकर्णंदद
र्शह॥३२॥कुंभकर्णंसमीक्ष्यैवविवत्रासंप्रजापतिः॥कुंभकर्णमथाश्वस्तःस्वयंभूरिदमब्रवीत्॥३३॥ध्रुवंलोकविनाशाय
पौलस्त्येनाशिनिर्मितः॥तस्मात्वमद्यप्रभृतिमृतकल्पशयिष्यसे॥३४॥ब्रह्मशापाभिभूतस्तुनिपपातापतःप्रभोः॥ततःपरमसंभ्रांतोरा
वणोवाक्यमब्रवीत्॥३५॥विवृद्धकांचनोवृक्षःफलकालेनिकृत्यते॥वनप्रारंस्वकन्याप्यमेवंशत्रुंप्रजापते॥३६॥नमिथ्याव
चनंश्रुत्वंस्वप्स्यत्येषनसंशयः॥कालस्तुक्रियतामस्यशयनेजागरेतथा॥३७॥रावणस्यवचःश्रुत्वास्वयंभूरिदमब्रवीत्॥शयि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

तात्येषषण्मासान्नैकाहंजागरिष्यति॥२८॥एकेनाद्यात्वसौवीरश्चरन्भूमिंबुभूक्षितः॥व्यात्तास्योभक्षयेल्लोकान्संक्रुद्ध
इवपावकः॥२९॥सोऽसौव्यसनमापन्नः कुंभकर्णमबोधयत्॥त्वत्पराक्रमभीमोहिराजासंप्रतिरावणः॥३०॥सरावनिर्ग
तोवीरःशिविरात्भीमविक्रमः॥वानरान्भृशसंक्रुद्धोभक्षयन्परिधावति॥३१॥कुंभकर्णसमीक्ष्यैवहरयोद्यप्रदुद्रुवुः
कथमेनंरणेक्रुद्धंवारयिष्यंतिवानराः॥३२॥उच्यतांवानराःसर्वेमंत्रमेतत्समुद्धितं॥इतिविज्ञायहरयोभविष्यंतीहनिर्भ
याः॥३३॥विभीषणवचःश्रुत्वाहेतुमत्सुमुखोद्गतं॥उवाचराघवोवाक्यंनीलंसेनापतिंतदा॥३४॥गच्छसैन्यानिसर्वाणि
व्यूह्यतिष्ठस्वपावके॥द्वाराण्यादायलंकायाश्चर्याश्चाप्यथसंक्रमान्॥३५॥शैलशृंगाणिवृक्षांश्चशिलाश्चाप्युपसंहरन्॥
तिष्ठंतुवानराःसर्वेसायुधाःशैलपाणयः॥३६॥राघवेणसमादिष्टोनीलोहरिचमूपतिः॥शशासवानरानीकंयथावत्कपिकुं
जरः॥३७॥ततोगवाक्षःशरभोहनूमानंगदस्तथा॥शैलशृंगाणिशैलाभागृहीत्वाद्वारमभ्ययुः॥३८॥रामवाक्यमुपश्रुत्यहर
योजितकाशिनः॥पादपैरर्दयन्वीरावानराःपरवाहिनी॥३९॥ततोहरीणांतदनीकमुग्रंरराजशैलोद्यतदीप्तहस्तः॥गिरेःसमी
पानुगतंयथैवमहन्महांभोधरजालमुग्रं॥४०॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेएकषष्टितमःसर्गः॥६१॥सतुराक्षस
शार्दूलोनिद्रामदसमाकुलः॥राजमार्गेश्रियाजुष्टंययौविपुलविक्रमः॥१॥राक्षसानांसहस्रैस्तुवृतःपरमदुर्जयः॥गृहेभ्यःपुष्प

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वर्यैणकीर्यमाणस्तदाययौ॥२॥सहेमजालवितततभानुभास्वरदर्शनं॥ददर्शविपुलंरम्यंराक्षसेंद्रनिवेशनं॥३॥सततंतथासूर्यइव
प्रजालंप्रविश्यरक्षोधिपतेर्निवेशनं॥ददर्शदूरेग्रजमासनस्थंस्वयंभुवंशक्रइवासनस्थं॥४॥भ्रातुःसभवनंगच्छन्रक्षो
गणसमन्वितः॥कुंभकर्णपदन्यासैरकंपयतमेदिनीं॥५॥सोभिगम्यगृहंभ्रातुंकक्षामभिविगाह्यच॥ददर्शोद्विग्नमासीनंविमा
नेपुष्पकेगुरुं॥६॥अथदृष्ट्वादशग्रीवःकुंभकर्णमुपस्थितं॥तूर्णमुत्थायसंहृष्टःसंनिकर्षमुपानयत्॥७॥अथासीनस्यपर्यं
केकुंभकर्णोमहाबलः॥भ्रातुर्वचंदेवरणोकिंकृत्यमितिचाब्रवीत्॥८॥पुनःसमुदितोसत्यरावणःपरिषस्वजे॥सभ्रात्रासंप
रिषक्तोयथावच्चाभिमोदितः॥९॥कुंभकर्णःशुभंदिव्यंप्रपेदेवरमासनं॥सतदासनमाश्रित्यकुंभकर्णोमहाबलः॥१०॥संरक्तन
यनःक्रोधाद्रावणंवाक्यमब्रवीत्॥किमर्थमहमाहूतत्वयाराजन्प्रबोधितः॥११॥शंसकस्माद्भयंतेऽस्तिकोद्यप्रेतोभविष्यति
भ्रातरंरावणःक्रुद्धंकुंभकर्णमुपस्थितं॥१२॥रोषेणपरिवृत्ताभ्यांनेत्राभ्यांवाक्यमब्रवीत्॥अद्यतेषुमहान्कालःशयानस्यमहा
बल॥१३॥सुखितस्त्वंनजानीषेममरामकृतंभयं॥एषदाशरथीरामःसुग्रीवसहितोबली॥१४॥समुद्रंसबलस्तीर्त्वामूलंनःप
रिकृंतति॥हतंपश्यस्वलंकायावनान्युपवनानिच॥१५॥सेतुनासुखमागम्यवानरैर्कार्णवंकृतं॥येराक्षसामुख्यतमाहृत
स्तेवानरैर्युधि॥१६॥वानराणांक्षयंयुद्धेनपश्यामिकदाचन॥नचापिवानरायुद्धेजितपूर्वाकदाचन॥१७॥तदेतद्भयमुत्पन्नंत्रै

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

यस्वास्मान्महाबल॥नाशयत्वमिमानद्यपदर्थेबोधितोमया॥१९॥सर्वक्षपितकोशंचसत्वमभ्यवपद्यमां॥त्रायस्वेमांपुरीलं
कांबालवृद्धावशेषितां॥२०॥भ्रातुरर्थेमहाबाहोकुरुकर्मसुदुष्करं॥मयैवंनोक्तपूर्वोहिभ्रातःकश्चित्परंतप॥२१॥मय्यस्तितु
तवस्नेहःपरासंभावनाचमे॥देवासुरेषुयुद्धेषुबहुशोराक्षसर्षभ॥२२॥त्वयादेवाःप्रतिमृद्धनिर्जिताश्चासुरायुधि॥तदेतत्स
र्वमातिष्ठवीर्येविपुलविक्रम॥२३॥नहितेसर्वभूतेषुदृश्यतेसदृशोबली॥कुरुष्वमेप्रियंहितमेतदुत्तमंयथाप्रियंप्रियरण
बांधवप्रियं॥स्वतेजसाविधमसपत्नवाहिनीशरघ्नंपवनइवोद्यतोमहान्॥२४॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकां
डेद्विषष्टितमःसर्गः॥६२॥तस्यराक्षसराजस्यनिशम्यपरिदेवितं॥कुंभकर्णोबभाषेथवचनंप्रजहासच॥१॥दृष्टोदोषोहि
योस्माभिःपुरामंत्रविनिर्णये॥हितेष्वनभियुक्तेनसोयमासादितस्त्वया॥२॥शीघ्रंखल्वभ्युपेतंत्वांफलंपापस्यकर्मणः॥निरये
ष्वेवपतनंयथादुष्कृतकर्मणः॥३॥प्रथमंतेमहाराजकृत्यमेतदचिंतितं॥केवलंवीर्यदर्पेणनानुबंधोविचारितः॥४॥यःप
श्चात्पूर्वकार्याणिकुर्यादैश्वर्यमास्थितः॥पूर्वंचोत्तरकार्याणिनसवेदनयानयो॥५॥देशकालविहीनानिकर्माणिविपरी
तवत्॥क्रियमाणानिदूष्यंतिहविष्यप्रपतेष्विव॥६॥त्रयाणांपंचधायोगंकर्मणांयःप्रपद्यते॥सचिवैःसमयंकृत्वाससम्यं
पथिवर्तते॥७॥यथागमंचयोराजासमयंविचिकीर्षति॥बुध्यतेसचिवांश्चापिसुहृदश्चानुपश्यति॥८॥धर्ममर्थंचकामंवा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

सर्वान्वारक्षसांपते॥भजतेपुरुषःकालेत्रीणिद्वंद्वानिवापुनः॥९॥त्रिषुचैतेषुयत्क्लेष्टंश्रुत्वातंनावबुध्यते॥राजावाराजमात्रोवाअर्थे
तस्यबहुश्रुतं॥१०॥उपप्रदानंसांत्वंवाभेदंकालेचविक्रमं॥योगंचरक्षसांश्रेष्ठतावुभौचनयानयो॥११॥कालेधर्मार्थकामान्यःसंमं
त्र्यसचिवैःसह॥निषेवेतात्मवान्राजानसव्यसनमाप्नुयात्॥१२॥हितानुबंधमालोक्यकार्याकार्यमहात्मनः॥राजासर्वार्थत
त्वज्ञैःसचिवैर्बुद्धिजीविभिः॥१३॥अनभिज्ञायशास्त्रार्थान्पुरुषाःपशुबुद्धयः॥शास्त्रात्त्वकुमिच्छंतिमंत्रेष्वभ्यंतरीकृताः॥
१४॥अशास्त्रविदुषांतेषांनकार्यमहितंवचः॥अर्थशास्त्रानभिज्ञानांविपुलांश्रियमिच्छतां॥१५॥अहितंचहिताकारंधार्ष्ट्या
ज्जल्पंतियेनराः॥अवेक्ष्यमंत्रवात्यास्तेकर्तव्याःकृतदूषणाः॥१६॥विनाशयंतोभर्तारंसहिताःशत्रुभिर्बुधैः॥विपरीतानिकृत्या
निकारयंतिचमंत्रिणः॥१७॥तान्भर्तामित्रसंकाशान्मित्रान्मंत्रविनिर्णये॥व्यवहारेणजानीयात्सचिवानुपसंहितान्॥१८॥च
पलस्येहकृत्यानिसहसानुपधावतः॥क्षिप्रमन्येप्रपद्यंतेकौंचस्यखमिवद्विजाः॥१९॥योहिशत्रुमवज्ञायत्यात्मानंनाभिरक्ष
ति॥अवाप्नोतिहिसोनार्थान्स्थानाच्चव्यवरोप्यते॥२०॥यदुक्तमिहतेपूर्वंप्रिययातेनुजेनच॥तदेवनोहितंवाक्यंयदिच्छसि
तथाकुरु॥२१॥एतत्श्रुत्वादशग्रीवःकुंभकर्णस्यभाषितं॥भ्रुकुटीचैवसंचक्रेक्रुद्धश्चैनमुवाचह॥२२॥मान्योगुरुरिवाचा
र्यकिंमात्वमनुशाससि॥किमेवंवाक्रमंकृत्वाकालेयुक्तंविधीयतां॥२३॥विभ्रमाच्चितमोहाद्वाबलवीर्याश्रयेणवा॥नाभि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

पन्नंपुरेदानीमर्थास्तस्यपुनःकथं॥२४॥अस्मिन्कालेतुयद्युक्तंतदिदानीविधीयतां॥गतंतुनानुशोचंतिगतंतुगतमेवहि॥२५
ममापनयजंदोषंविक्रमेणसमीकुरु॥यदिखल्वस्तिमस्नेहोविक्रमंवाधिगच्छसि॥२६॥यदिवाकार्यमेतत्तेहृदिकार्यतमं
मतं॥ससुहृद्योविपन्नार्थेदीनमभ्युपपद्यते॥२७॥सबंधुर्योपनीतेषुसाहायायोपकल्पते॥तमथैनंब्रुवाणंसःवचनंधीर
दारुणं॥२८॥रुष्टोयमितिविज्ञायशनैःश्लक्ष्णमुवाचह॥तमतीवसमालक्ष्यभ्रातरंक्षुभितेंद्रियं॥२९॥कुंभकर्णःशनैर्वाक्यंव
भाषेपरिसांत्वयन्॥अलंराक्षसराजेंद्रसंतापमुपपद्यवै॥३०॥रोषंचसंपरित्यज्यस्वस्थोभवितुमर्हसि॥नैतन्मनसिकर्तव्यंम
यिजीवतिपार्थिव॥३१॥तमहंनाशयिष्यामियत्कृतेपरितप्यसे॥अवश्यंचहितंवाच्यंसर्वावस्थासुतेमया॥३२॥बंधुभावा
दभिहितंभ्रातृस्नेहाच्चपार्थिव॥सदृशंयत्तुकालेस्मिन्कर्तुंस्नेहेनबंधुना॥३३॥शत्रूणांकदनंपश्यक्रियमाणंमयारणे॥
अद्यपश्यमहाबाहोमयासमरमूर्धनि॥३४॥हतेरामेसहभ्रात्राद्रवंतीहरिवाहिनी॥अद्यरामशिरोदृष्ट्वामयानीतंरणा
जिरात्॥३५॥सुखीभवमहाबाहोसीताभवतुदुःखिता॥अद्यरामस्यपश्यंतुनिधनंसुमहत्प्रियं॥३६॥लंकायांराक्षसाःसर्वेए
तेनिहतबांधवाः॥अद्यशोकपरीतानांस्त्रियंबंधुवधकारणात्॥३७॥शत्रोर्युधिविनाशेनकरोम्यश्रुप्रमार्जनं॥अद्यपर्वतसंका
शंसूर्यमिवतोयदं॥३८॥विकीर्णंपश्यसमरेसुग्रीवंशोणितोक्षितं॥कथंत्वंराक्षसैरेभिर्मयाचपरिरक्षितः॥३९॥जिघांसुभि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

र्दाशरथिंव्यथसेत्वंसदानघ॥अद्यपूर्वंहतेतेनमयित्वाहंतिराघवः॥४०॥नाहमात्मनिसंतापंगच्छेयंराक्षसाधिप॥कामंत्विद
नीमपिमामादित्रात्वंपरंतप॥४१॥नपरःप्रेषणीयस्तेयुद्धायातुलविक्रम॥अहमुत्सादयिष्यामिशत्रूंस्तवमहाबल॥४२॥या
दिशक्रोयदियमोयदिपावकमारुतौ॥तानहंयोधयिष्यामिकुबेरवरुणावपि॥४३॥गिरिमात्रशरीरस्यशितशूलधरस्यमे
नर्दतस्तीक्ष्णदंष्ट्रस्यबिभीयाद्वैपुरंदरः॥४४॥अथवात्यक्तशस्त्रस्यमृद्वतस्तरसारिपुन्॥नमेघ्रतिमुखंकश्चित्स्थातुंश
क्नोतिजीविषुः॥४५॥नैवशक्त्यानगदयानासिनानेषुभिःशितैः॥हस्ताभ्यामेवसंरब्धोहनिष्यामिसवज्रिणं॥४६॥यदिमेमुष्टि
वेगंसराघवोद्यसहिष्यति॥ततःपास्यंतिबाणौघारुधिरंराघवस्यतु॥४७॥अचिंतयित्वाबाणौघान्रुधिरंराघवस्यच॥लक्ष्म
णस्यचपास्यामिचिरकालपिपासितः॥४८॥चिंतयातप्यसेराजन्किमर्थंमयितिष्ठति॥सोहंशत्रुविनाशायतवनिर्यातुमुद्य
तः॥४९॥मुंचरामाद्भयंघोरंनिहनिष्यामिसंयुगे॥राघवंलक्ष्मणंचैवसुग्रीवंचमहाबलं॥५०॥हनुमंतंचरक्षोघ्नंलंकायेनप्रदी
पिता॥हरींश्चभक्षयिष्यामिसंयुगेसमुपस्थितान्॥५१॥असाधारणमिच्छामितवदातुंमहद्यशः॥यदिचेंद्राद्भयंराजन्यदिचा
पिस्वयंभुवः॥५२॥ततोहंनाशयिष्यामिनेशंतमदूर्वांशुमान्॥अपिदेवाःशयिष्यंतेमयिक्रुद्धेम[illegible]हीतले॥५३॥यमंचश
मयिष्यामिभक्षयिष्यामिपावकं॥आदित्यंपातयिष्यामिसनक्षत्रंमहीतले॥५४॥शतक्रतुंवधिष्यामिपास्यामिवरुणालयं॥प

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

र्वतांश्चूर्णयिष्यामिदारयिष्यामिमेदिनीं॥५५॥दीर्घकालंप्रसुप्तस्यकुंभकर्णस्यविक्रमं॥अद्यपश्यंतुभूतानिभक्षमाणानि
सर्वशः॥५६॥नचिरंत्रिदिवंसर्वमाहारोममपूर्यते॥वधेनतेदाशरथेःसुखावहंसुखंसमाहर्तुमहंव्रजामि॥निहत्यरामं
सहलक्ष्मणेनखादामिसर्वान्हरियूथमुख्यान्॥५७॥रमस्वकामंपिवचाद्यवारुणीकुरुष्वकृत्यानिविनीयदुःखं॥मयाद्य
रामोगमितेयमक्षयेचिरायसीतावशगाभविष्यति॥५८॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेत्रिषष्टितमःसर्गः॥६३॥
तदुक्तमतिकायस्यबलिनोबाहुशालिनः॥कुंभकर्णस्यवचनंश्रुत्वोवाचमहोदरः॥१॥कुंभकर्णकुलेजातोदृष्टःप्राकृतदर्शनः
अवलिप्तोनशक्नोहिकृत्यसर्वंत्रवेदितुं॥२॥नहिराजाविजानीतेकुंभकर्णनयानयौ॥त्वंतुकैश्चारकादृष्टःकेवलंवक्तुमि
च्छसि॥३॥स्थानंवृद्धिंचहानिंचदेशकालविभागवित्॥आत्मनश्चपरेषांचबुध्यतेराक्षसेश्वर॥४॥यत्तुराक्ष्यंबलवताकर्तुंप्रा
कृतबुद्धिना॥अनुपासितवृद्धेनकःकुर्यात्तादृशंबुधः॥५॥यांस्तुधर्मार्थकामांस्त्वंब्रवीषीपृथगाश्रयान्॥अनुबोद्धुंस्वभा
वेत्तान्नहिलक्षणमस्तिते॥६॥कर्मचैवहिसर्वेषांकारणानांप्रयोजनं॥श्रेयःपापीयसांचात्रफलंभवतिकर्मणां॥७॥निश्चे
यसफलावेवधर्मार्थावितरावपि॥अधर्मानर्थयोःप्राप्तिःफलंचप्राप्तवापिकं॥८॥ऐहलौकिकपारक्यंकर्मपुंभिर्निषेव्य
ते॥कर्मण्यपितुकल्पानिलभतेकाममास्थितः॥९॥तत्रकृत्यमिदंराज्ञाहृदिकार्यंमतंचनः॥रात्रौहिसाहसंयत्स्यात्किमि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वात्रापनीयते॥१०॥एकस्यैवाभियानेतुहेतुर्यः प्राकृतस्त्वया॥तत्राप्यनुपपन्नंतेवक्ष्यामियदसाधु च॥११॥येनपूर्वंजनस्थानेब
हवोतिबलाहताः॥राक्षसाराघवंतत्वंकथमेकोजयिष्यसि॥१२॥येपूर्वंनिर्जितास्तेनजनस्थानेमहौजसः॥राक्षसांस्तान्पुरेस
र्वान्भीतानद्यापिपश्यसि॥१३॥तंसिंहमिवसंक्रुद्धंरामंदशरथात्मजं॥सर्पंसुप्तमिवाबुध्याप्रबोधयितुमिच्छसि॥१४॥ज्वलंतंते
जसानित्यंक्रोधेनचदुरासदं॥कस्तंमृत्युमिवासह्यमासादयितुमर्हति॥१५॥संशयस्थमिदंसर्वंशत्रोःप्रतिसमासने॥एक
स्यगमनंतत्रनहिमेरोचतेभृशं॥१६॥हीनार्थस्तुसमृद्धार्थंकोरिपुंप्राकृतंयथा॥निश्चितंजीवितत्यागेवत्रामानेतुमिच्छति॥१७॥ए
वंस्यनास्तित्रिलोकेषुसदृशोराक्षसोत्तमः॥कथमाशंससेयोद्धुंतुल्येनेंद्रविवस्वतोः॥१८॥एवमुक्तातुसंरब्धाकुंभकर्णमहोदरः
उवाचरक्षसांमध्येरावणंलोकरावणं॥१९॥लब्ध्वापुरस्तावैदेहीकिमर्थंपरितप्यसे॥यथेच्छसितथासीतावशगातेभविष्य
ति॥२०॥दृष्टःकश्चिदुपायोमेसीतोपस्थानकारकः॥रुचिरश्चेत्त्वयाबुध्याराक्षसेंद्रवचःशृणु॥२१॥अहंद्विजिह्वःसंह्रादीकुं
भकर्णोवितर्दनः॥पंचरामवधायैतेनीर्यातीत्यवघोषय॥२२॥ततोगत्वावयंयुद्धंदास्यामस्तस्ययत्नतः॥जेष्यामोयदितेश
त्रुर्वयंचकृतसंयुगाः॥ततःसमभिपत्स्यामोमनसायत्समीक्षितं॥२३॥वयंयुद्धादिहेष्यामोरुधिरेणसमुक्षिताः॥विदार्यस्वत
नूर्बाणैःरामनामांकितैःशरैः॥२४॥राघवोभक्षितोस्माभिर्लक्ष्मणश्चेतिवादिनः॥तवपादौगृहीष्यामस्त्वन्नःकामंप्रपूरय॥२५॥

CC-0.Courtesy Shri K.S.Parihar,Librarian Government District Library Varanasi. Digitized by eGangotri

ततोवघोषयपुरेगजस्कंधेनपार्थिव॥हतोरामःसहभ्रात्रासससैन्यइतिसर्वतः॥२७॥प्रीतोनामततोभूत्वाभृत्यानांत्वमरिंद
म॥भोगांश्चपरिवाराश्चकामान्वसुचदापय॥२८॥ततोमाल्यानिवासांसिभूषणान्यनुलेपनं॥पेयंचबहुयोधेभ्यःस्वयंचमु
दितःपिब॥२९॥ततोस्मिन्बहुलीभूतेकोलीनेसर्वतोगते॥वीक्षितःसमुहृद्भिर्राक्षसैरितिविश्रुते॥३०॥प्रविश्याश्वास
वापित्वंसीतांरहसिसांत्वय॥धनधान्यैश्चरत्नैश्चकामैरेनांप्रलोभय॥३१॥अनयोपध ॥याराजन्भयशोकानुबंधया॥अका
मात्वद्वशंसीतानष्टनाथागमिष्यति॥३२॥रमणीयंहिभर्तारंविनष्टमवगम्यसा॥नैराश्यात्स्त्रीलघुत्वाच्चत्वद्वशंप्रतिपत्स्य
ते॥३३॥सापुरासुखसंवृद्धासुखार्हादुःखकर्शिता॥त्वदधीनंसुखंज्ञात्वासर्वथोपगमिष्यति॥३४॥एतत्सुनीतंममदर्शनेन
रामंहिदृष्ट्वैवभवेदनर्थः॥इहैवतेसेत्स्यतिमोत्सुकोभूर्महानयुद्धेनसुखस्यलाभः॥३५॥अनष्टसैन्योह्यनवाप्तसंशयो
रिपूनयुद्धेनजयन्नराधिप॥यशश्चसौख्यंचमहान्महीपतिःश्रियंसमृद्धांचचिरंसमश्नुते॥३६॥इत्यार्षेश्रीरामायणे
वाल्मीकीयेयुद्धकांडेचतुःषष्टितमःसर्गः॥६४॥एवमुक्तस्तुनिर्भर्त्स्यकुंभकर्णोमहोदरं॥अब्रवीद्राक्षसश्रेष्ठंभ्रातरंरावणंत
तः॥१॥सोहंतवभयंघोरंवधातस्यदुरात्मनः॥रामस्याद्यप्रमार्जोमिनिर्वैरस्त्वंसुखीभव॥२॥गर्जंतिनवृथाशूरानिर्जलाइव
तोयदाः॥पश्चात्संपद्यमानंतंगर्जंतंयुधिकर्मणा॥३॥नमर्षयतिचात्मानंसंभावयतिचात्मना॥अदर्शयित्वाशूरास्तुकर्मकु

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वैतिदुष्कृतं॥४॥विक्लवानामबुद्धीनांराज्ञांपंडितमानिनां॥रोचतेत्वद्वचोनित्यंकथ्यमानंमहोदर॥५॥युद्धेकापुरुषैर्नित्यंभव
द्भिःप्रियवादिभिः॥राजानमनुगच्छद्भिःकृत्यमेतद्विनाशितं॥६॥रोचतेमेषाकृतालंकाक्षीणःकोशोबलंहतं॥राजानमिम
मासाद्यसुहृच्चिद्रूममित्रकं॥७॥एषनिर्याम्यहंयोद्धुमुद्यतःशत्रुनिर्जये॥दुर्नयंभवतामद्यसमीकर्तुंमहाहवे॥८॥एवमुक्त
वतोवाक्यंकुंभकर्णस्यधीमतः॥प्रत्युवाचततोवाक्यंप्रहसन्राक्षसेश्वरः॥९॥महोदरश्चरामात्तुपरित्रस्तोनसंशयः॥नहि
रोचयतेतातयुद्धंयुद्धविशारद॥१०॥कश्चिन्नेत्वत्समोनास्तिसौहृदेनबलेनच॥गच्छशत्रुवधायत्वंकुंभकर्णजयायच॥११॥
शयानःशत्रुनाशार्थंभवान्संबोधितोमया॥अयंहिकालःसुहृदांराक्षसानामरिंदम॥१२॥त्वंगच्छशूलमादायपाशहस्तइ
वांतकः॥वानरान्राजपुत्रौचभक्षयादित्यतेजसौ॥१३॥समालोक्यैवतेरूपंविद्रविष्यंतिवानराः॥रामलक्ष्मणयोश्चापिह
दयेप्रस्फुटिष्यतः॥१४॥एवमुक्तामहातेजाःकुंभकर्णमहाबलं॥पुनर्जातमिवात्मानंमेनेराक्षसपुंगवः॥१५ कुंभकर्णबला
भिज्ञोजानंस्तस्यपराक्रमं॥बभूवमुदितोराजाशत्रूंकदुवनिर्मलः॥१६॥इत्येवमुक्तःसंहृष्टोनिर्जगामममहाबलः॥राज्ञस्तुव
चनंश्रुत्वाकुंभकर्णःसमुद्यतः॥१७॥आददेनिशितंशूलंवेगाच्छत्रुनिबर्हणः॥सर्वकालायसंदीप्तंतप्तकांचनभूषणं॥१८॥इं
द्राशनिःसमप्रख्यवज्रप्रतिमगौरवं॥देवदानवगंधर्वयक्षकिन्नरसूदनं॥१९॥रक्तमाल्यामहादामस्वतश्चोद्धतपावकं॥

CC-0:Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

आरायविपुलंशूलंशत्रुशोणितरंजितं॥२०॥कुंभकर्णोमहातेजारावणंवाक्यमब्रवीत्॥गमिष्याम्यहमेकाकीतिष्ठत्विहब
लंमहत्॥२१॥अद्यतान्क्षुधितःक्रुद्धोभक्षयिष्यामिवानरान्॥कुंभकर्णवचःश्रुत्वारावणोवाक्यमब्रवीत्॥२२॥सैन्यैःपरिवृतो
गच्छशूलमुद्गरपाणिभिः॥वानराहिमहात्मानःशीघ्राःस्युर्भवसायिनः॥२३॥एकाकिनंप्रमत्तंत्वांनयेयुर्दर्शनैःक्षयं॥तस्मात्पर
मदुर्धर्षैःसैन्यैःपरिवृतोव्रज॥२४॥रक्षस्वरक्षसांपक्षंशत्रुपक्षंनिषूदय॥अथासनात्समुत्पत्यस्रजंमणिकृतांतरां॥२५॥आबबं
धमहातेजाःकुंभकर्णस्यरावणः॥अंगदान्यंगुलीवेष्टान्वराण्याभरणानिच॥२६॥हारंचशशिसंकाशमामुमोचमहात्मनः
दिव्यानिचसुगंधीनिमाल्यदामानिरावणः॥२७॥गात्रेषुसज्जयामासकर्णयोश्चास्यकुंडले॥कांचनांगदकेयूरनिष्काभरणभू
षितः॥२८॥कुंभकर्णोबृहत्कर्णःसुकृतोग्निरिवाबभौ॥श्रोणीसूत्रेणमहतामेचकेनविराजितः॥२९॥अमृत्योतादनेनद्वोभुजं
गेनेवमंदरः॥३०॥सकांचनाभारसहस्रनिर्मितंविद्युत्प्रभंदीप्तमिवात्मभासा॥आबध्यमानःकवचंरराजसंध्याभ्रसंवीतइ
वाद्रिराजः॥३१॥सर्वाभरणसर्वांगशूलपाणिःसराक्षसः॥त्रिविक्रमकृतोत्साहोनारायणइवाबभौ॥३२॥भ्रातरंसंपरिष्वज्य
कृत्वाचापिप्रदक्षिणं॥प्रणम्यशिरसातस्मैसंप्रतस्थेमहाबलः॥३३॥निष्पतंतंमहाकायंमहानादंमहाबलं॥तमात्रीभिःप्रश
स्ताभिःप्रेषयामासरावणः॥३४॥शंखदुंदुभिनिर्घोषैःसैन्यैश्चापिवरायुधैः॥तंगजैश्चतुरंगैश्चस्यंदनैश्चांबुदस्वनैः॥३५॥अनु

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

जग्मुर्महात्मानोरथिनोरथिनांवरं॥रथैरुष्ट्रैःखरैश्चैवसिंहद्विपमृगद्विजैः॥३९॥अनुजग्मुश्चतंघोरंकुंभकर्णंमहाबलं॥४०॥सपु
ष्पवर्षैरवकीर्यमाणोधृतातपत्रःशितशूलपाणिः॥मदोत्कटःशोणितगंधमत्तोविनिर्ययौदानवदेवशत्रुः॥४१॥पदातयश्च
बहवोमहानादामहाबलाः॥अन्वयूराक्षसाभीमाभीमाक्षाःशस्त्रपाणयः॥४२॥राक्षसासुमहाकायानीलांजनचयोपमाः
शूलानुद्यम्यखड्गांश्चनिशिताश्चपरश्वधान्॥४३॥बहुभामांश्चपरिघान्गदाश्चमुसलानपि॥तालस्कंधांश्चविपुलान्क्षे
पणीयान्दुरासदान्॥४४॥अथान्यद्धुपुरादायदारुणंघोरदर्शनं॥निष्पपातमहातेजाःकुंभकर्णोमहाबलः॥४५॥धनुःशतपरी
णाहःसषट्शतसमुच्छ्रितः॥रौद्रःशकटचक्राक्षोमहापर्वतसन्निभः॥४६॥सन्नियम्यचरक्षांसिदग्धशैलोपमोमहान्॥कुं
भकर्णोमहावक्त्रःप्रहसन्निदमब्रवीत्॥४७॥अद्यवानरमुख्यानांमहायूथानिभागशः॥निर्दहिष्यामिसंक्रुद्धःशालभानिव
पावकः॥४८॥नापराध्यंतिमेकामंवानरावनचारिणः॥जातिरस्मद्विधानांसापुरोद्यानविभूषणः॥४९॥पुरोधस्यमूलेतुराघ
वःसहलक्ष्मणः॥हतेतस्मिन्हतंसर्वंतंवधिष्याम्यतोयुधि॥५०॥एवंतस्यब्रुवाणस्यकुंभकर्णस्यरक्षसः॥नादंचक्रुर्महायोधाः
कंपयंतइवार्णवं॥५१॥तस्यनिष्पततस्तूर्णंकुंभकर्णस्यधीमतः॥बभूवुर्घोररूपाणिनिमित्तानिसमंततः॥५२॥उल्काशनिमुचो
मेघाबभूवुर्गर्दभारुणाः॥ससागरवनाचैववसुधासमकंपत॥५३॥घोररूपाःशिवानेदुःसज्वालकवलैर्मुखैः॥मंडलान्यपसव्या

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

निबबंधुश्चविहंगमाः॥५१॥निःपपातचगृध्रोस्यमूलाग्रेपथिगच्छतः॥प्रस्फुरंनयनंचास्यसव्योबाहुरकंपत॥५२॥निष्पपाताग्र
तश्चोल्काज्वलंतीभीमनिस्वना॥आदित्योनिष्प्रभश्चासीत्प्रववौनसुखोनिलः॥५३॥अचिंतयन्महोत्पातानुत्थितान्रोमहर्ष
णान्॥निर्ययौकुंभकर्णस्तुकृतांतबलचोदितः॥५४॥सलंघयित्वाप्राकारंपश्चात्पर्वतपर्वतसन्निभः॥ददर्शाभ्रघनप्रख्यंवा
नरानीकमद्भुतं॥५५॥तंदृष्ट्वावानरश्रेष्ठाराक्षसंपर्वतोपमं॥वायुनुन्नाइवघनायद्रुःसर्वादिशस्तदा॥५६॥तद्वानरानीक
मतिप्रचंडंदिशोद्रवंद्भिन्नमिवाभ्रजालं॥सकुंभकर्णःसमवेक्ष्यहर्षान्ननादभूयोघनवद्घनाभः॥५७॥तेतस्यघोरंनिनदंनि
शम्ययथानिनादंदिविवारिदस्य॥पेतुःप्लवंगाबहवोधरण्यांनिकृतमूलाइवसालवृक्षाः॥५८॥विपुलपरिघबाहुसकुंभ
कर्णोरिपुघ्नेधनायविनिर्गतोमहात्मा॥कपिगणभयमादधत्सुभीमःप्रभुरिवकिंकरदंडवान्युगांते॥५९॥इत्यार्षेश्रीरा
मायणेवाल्मीकीयेयुद्धकांडेपंचषष्टितमःसर्गः॥६५॥सलंघयित्वाप्राकारंगिरिकूटोपमोमहान्॥निर्ययौनगरात्तूर्णं
कुंभकर्णोमहाबलः॥१॥सननादमहानादंसमुद्रमपिनादयन्॥जनयन्निवनिर्घोषान्विधमन्निवपर्वतान्॥२॥तमव
ध्यंमघवतायमेनवरुणेनवा॥प्रेक्ष्यभीमाक्षमायांतंवानराविप्रदुद्रुवुः॥३॥तान्वीरःप्रद्रुतान्दृष्ट्वावालिपुत्रोगदोब्रवीत
नलंनीलंगवाक्षंचकुमुदंचमहाबलं॥४॥आत्मनोप्यप्रविस्मृत्यवीर्याण्यभिजनानिच॥कुगच्छथभयत्रस्ताःप्राकृताइ

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

रयोयथा॥५॥साधुसौम्यानिवर्त्तध्वंकिंप्राणान्परिरक्षथ॥नालंयुद्धायवैरक्षोमहतीयंविभाषिका॥६॥महतीमुक्तितामेतां
राक्षसानांविभीषिकां॥विक्रमाद्विधमिष्यामोनिवर्त्तध्वंप्लवंगमाः॥७॥लङ्केणतेसमाश्वास्यसंगम्यचततस्ततः॥वृक्षाद्रिहस्ता
हरयोयुद्धार्थाःसंप्रतस्थिरे॥८॥तेनिवर्त्यतुसंरब्धाःकुंभकर्णवनौकसः॥निजघ्नुःपरमक्रुद्धाःसमदाइवकुंजराः॥९॥प्रोत्सृजि
गिरिशृंगैश्चशिलाभिश्चमहाबलाः॥पादपैःपुष्पितायैश्चहन्यमानोनबुध्यते॥१०॥अस्यगात्रेषुपतिताभिद्यंतेशतशःशिलाः
पादपैःपुष्पितायैश्चहन्यमानोनबुध्यते॥११॥अस्यगात्रेषुपतिताभिद्यंतेशतशःशिलाः॥पादपाःपुष्पितायाश्चभग्नाःपे
तुर्महीतले॥१२॥सोपिसैन्यानिसंक्रुद्धोवानराणांमहौजसां॥ममंथपरमायत्तोवनान्यग्निरिवोत्थितः॥१३॥लोहितार्द्रास्तुह
रयःशेरतेराक्षसाहताः॥निरस्तापतिताभूमौताम्रपुष्पाइवद्रुमाः॥१४॥लंघयंतःप्रधावंतोवानरानावलोकयन्॥केचित्समुद्रे
पतिताःकेचिद्गगनमाश्रिताः॥१५॥वध्यमानास्तुतेवीराराक्षसेनबलीयसा॥सागरंयेनवैतीर्णाःपथातेनैवदुद्रुवुः॥१६॥तेस्य
लानितथानिघ्नंविवर्णवदनाभयात्॥वृक्षावृक्षान्समारुह्यागोपुच्छात्स्वाश्रिताग्रहा॥१७॥ममज्जुरर्णवेकेचिद्गिरीन्के
चित्समाश्रिताः॥निपेतुःप्लवगाःकेचित्केचिन्नैवावतस्थिरे॥१८॥केचिद्भूमौनिपतिताःकेचित्सुप्तामृताइव॥तान्समीक्ष्यांग
दोभग्नान्वानरानिदमब्रवीत्॥१९॥अवतिष्ठतयुध्यामोनिवर्त्तध्वंप्लवंगमाः॥भग्नानांवोनपश्यामिपरिक्रम्यमहीमिमां॥२०

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

स्थानंसर्वेनिवर्तध्वंकिंत्रमाणान्परिक्षथ॥निरायुधानांद्रवतामसंगगतिपौरुषं॥२०॥दारात्यपहसिष्यंतिसर्वेघातस्तु
जीविनां॥कुलेषुजाताःसर्वेविस्तीर्णेषुमहत्सुच॥२१॥क्वगच्छतभयत्रस्ताःप्राकृताहरयोयथा॥अनार्याःखलुयद्भीतास्त्यक्त्वा
वीर्यंप्रधावत॥२२॥विकत्थनानिवोयानितदावैजनसंसदि॥तानिवःक्वनुयातानिसोदग्राणिमहांतिच॥२३॥भीरुप्रवादाःशू
यंतेयस्तूजीवतिधिक्कृतः॥मार्गःसत्पुरुषैर्जुष्टःसेव्यतांत्यज्यतांभयं॥२४॥ग्रपामहेवानिहताःपृथिव्यामत्यजीविताः॥दुष्प्राप
ब्रह्मलोकंवाप्राप्नुमोयुधिसूदिताः॥२५॥अवाप्नुयामकीर्तिंवानिहत्वाशत्रुमाहवे॥जीवितंवीरलोकस्यभोक्ष्यामोवसुवानराः
२६॥नकुंभकर्णःकाकुत्स्थंदृष्ट्वाजीवन्गमिष्यति॥दीप्यमानमिवासाद्यपतंगइवपावकं॥२७॥पलायनेनवोदिष्टःप्राणान्र
क्षामहेवयं॥एकेनबहवोभग्नायशोनाशंगमिष्यति॥२८॥एवंब्रुवाणंतंशूरमंगदंकनकांगदं॥द्रवमाणस्ततोवाक्यमूचुःशू
रविगर्हितं॥२९॥कुतनःकदनंघोरंकुंभकर्णेनरक्षसा॥नस्थानकालोगच्छामोदयितंजीवितंहिनः॥३०॥एतावदुक्त्वावचनंस
र्वेतेभेजिरेदिशः॥भीमराक्षसमायांतंदृष्ट्वावानरयूथपाः॥३१॥द्रवमाणाश्चतेवीराअंगदेनबलीकृताः॥सांत्वनैश्चानुमानै
श्चततःसर्वेनिवर्तिताः॥३२॥प्रहर्षमुपनीताश्चवालिपुत्रेणधीमता॥अज्ञाप्रतीक्षास्तस्थुश्चसर्वेवानरयूथपाः॥३३॥ऋष
भशरभमैंदधूम्रनीलाःकुमुदसुषेणगवारंभतारा॥द्विविदपनसवायुपुत्रमुख्यास्त्वरिततराभिमुखंरणंप्रयाताः॥३४॥इत्या

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

र्वैश्रीरामायणेवाल्मीकीयेयुद्धकांडे षट्षष्टितमःसर्गः॥६६॥ तेनिवृत्तामहाकायाःश्रुत्वागदवचस्तदा॥नैष्टिकीबुद्धिमास्थायस
र्वेसंग्रामकांक्षिणः॥१॥सुमुदीरितवीर्यास्तेसमारोपितविक्रमाः॥पर्यवस्थापितावाक्यैरंगदेनबलीमुखाः॥२॥प्रयाताश्चगता
हर्षमरणेकृतनिश्चयाः॥चक्रुःसुतुमुलंयुद्धंवानरास्त्यक्तजीविताः॥३॥अथवृक्षान्महाकायाःसानूनिसुमहांतिच॥वानरा
स्तूर्णमुद्यम्यकुंभकर्णमभिद्रवन्॥४॥सकुंभकर्णःसंक्रुद्धोगदामुद्यम्यवीर्यवान्॥अर्दयत्सुमहाकायःसमंताद्व्याक्षिपद्दिशः
न्॥५॥शतानिसप्तचाष्टौचसहस्राणिचवानराः॥प्रकीर्णाःशेरतेभूमौकुंभकर्णेनयोधिताः॥६॥षोडशाष्टौचदशचविंशत्रिंशत्
तथैवच॥परिक्षिप्यचबाहुभ्यांखादन्सपरिधावति॥७॥भक्षयन्भृशसंक्रुद्धोगरुडोपन्नगानिव॥कृच्छ्रेणचसमाश्वस्ताःसंगम्य
चततस्ततः॥८॥वृक्षाद्रिहस्ताहरयस्तस्थुःसंग्राममूर्धनि॥ततःपर्वतमुत्पाट्यद्विविदःप्लवगर्षभः॥९॥दुद्रावगिरिशृंगाभोविलंब
इवतोयदः॥तंसमुक्षिप्यचिक्षेपकुंभकर्णायवानरः॥१०॥तमप्राप्तोमहाशैलस्तत्सैन्येन्यपतत्तदा॥ममर्दाश्वान्गजांश्चैवरथां
श्चैवनगोत्तमः॥११॥तानिचान्यानिरक्षांसिपुनश्चान्यद्गिरेःशिरः॥तत्शैलशृंगाभिहतंहताश्वंहतसारथिं॥१२॥रक्षसांरुधिरक्लि
न्नंबभूवायोधनंमहत्॥रथिनोवानरेंद्राणांशरैःकालांतकोपमैः॥१३॥शिरांसिनर्दतांजह्रुराक्षसाभीमविक्रमाः॥वानराश्च
महात्मानःसमुत्पाट्यमहाद्रुमान्॥१४॥रथानश्वान्गजानुष्ट्रान्रक्षसामभ्यसूदयन्॥हनुमान्शैलशृंगाणिवृक्षांश्चविनि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

धानुरून्॥१५॥ववर्षकुंभकर्णस्यशिरस्यंबरमास्थितः॥तानिपर्वतशृंगाणिशूलाग्रेणविभेदसः॥१६॥बभंजवृक्षवर्षंचकुंभ
कर्णोमहाबलः॥१७॥ततोहरीणांतदनीकमुग्रंदुद्रावशूलंनिशितंप्रगृह्य॥तस्योततोस्यापततःपुरस्तान्महीधराग्रंहनु
मान्प्रगृह्य॥१८॥सकुंभकर्णंकुपितोजघानवेगेनशैलोत्तमभीमकायं॥संचुक्षुभेतेनतदाभिभूतोमदार्द्रगात्रोरुधिराव
सिक्तः॥१९॥सशूलमाविध्यतडित्प्रकाशंगिरेर्यथाप्रज्वलितायशृंगं॥वाङ्कंतरेमारुतिमाजघानगुहोचलंक्रौंचमिवो
ग्रशक्त्या॥२०॥सशूलनिर्भिन्नमहाभुजांतरःप्रविद्धलशोणितमुद्वमन्मुखात्॥ननादभीमंहनुमान्महाहवेयुगांतमेघ
स्तनितस्वनोपमं॥२१॥ततोविनेदुःसहसाप्रहृष्टारक्षोगणास्तंव्यथितंसमीक्ष्य॥प्लवंगमास्तुव्यथिताभयार्त्ताःप्रदुद्रुवुःसं
यतिकुंभकर्णे॥२२॥ततस्तुनीलोबलवान्पर्यवस्थापयन्बलं॥नीलश्चिक्षेपशैलाग्रंकुंभकर्णायधीमते॥२३॥तमापततं
संप्रेक्ष्यमुष्टिनाभिजघानह॥मुष्टिप्रहाराभिहतंतच्छैलाग्रंव्यशीर्यत॥२४॥सविस्फुलिंगंसज्वालंनिपपातमहीतले॥ऋष
भःशरभोनीलोगवाक्षोगंधमादनः॥२५॥पंचवानरशार्दूलाःकुंभकर्णमुपाद्रवन्॥शैलैर्वृक्षैस्तलैःपादैर्मुष्टिभिर्जानुभिस्त
था॥२६॥कुंभकर्णंमहाकायंनिजघ्नुस्तेमहाबलाः॥स्पर्शंनिवप्रहारांस्तान्वेदयानोनविव्यथे॥२७॥ऋषभंतुमहावेगंबा
हुभ्यांपरिषस्वजे॥कुंभकर्णभुजाभ्यांतुपीडितोवानरर्षभः॥२८॥निपपातर्षभोभूमौप्रमुखात्प्रगतशोणितः॥मुष्टिनाशरभंहत्वा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

जानुनानीलमाहनत्॥२९॥आजघानगवाक्षंचतलेनैवरिपुस्तदा॥हतप्रहारव्यथितामुमुहुश्शोणितोक्षिताः॥३०॥निपेतुस्ते
तुमेदिन्यांनिकृत्ताइवकिंशुकाः॥तेषुवानरमुख्येषुपतितेषुमहात्मसु॥३१॥वानराणांसहस्राणिकुंभकर्णंप्रदुद्रुवु॥तंशैल
मिवशैलाभाःसर्वेतुप्लवगर्षभाः॥३२॥समारुह्यसमुत्पत्यददंशुःप्लवगर्षभाः॥तंनखैर्दंतैश्चापिमुष्टिभिर्बाहुभिस्तथा॥३३
कुंभकर्णंमहाबाहुंनिजघ्नुःप्लवगर्षभाः॥सवानरसहस्रैस्तुविचितःपर्वतोपमः॥३४॥राजराक्षसव्याघ्रोगिरिरात्मरुहैरि
व॥बाहुभ्यांवानरांस्सर्वान्प्रगृह्यसुमहाबलः॥३५॥भक्षयामाससंक्रुद्धोगरुडःपन्नगानिव॥प्रक्षिप्ताःकुंभकर्णेनवक्त्रेपा
तालसन्निभे॥३६॥नासापुटाभ्यांनिर्जग्मुःकर्णाभ्यांचैववानराः॥भक्षयन्भृशसंक्रुद्धोहरीन्पर्वतसन्निभान्॥३७॥बभंजवा
नरान्सर्वान्संक्रुद्धोराक्षसोत्तमः॥मांसशोणितसंक्लेदांकुर्वन्भूमिंसराक्षसः॥३८॥चचारहरिसैन्येषुकालाग्निरिवमूर्छितः॥
वज्रहस्तोयथाशक्रःपाशहस्तोयथांतकः॥३९॥शूलहस्तोबभौतस्मिन्कुंभकर्णोमहाहवे॥यथाशुष्काण्यरण्यानिग्रीष्मेदह
तिपावकः॥४०॥तथावानरसैन्यानिकुंभकर्णोददाहसः॥ततस्तेवध्यमानास्तुहतयूथाविनायकाः॥४१॥वानराभयसंविग्ना
विनेदुर्विस्वरंभृशं॥अनेकशोवध्यमानाःकुंभकर्णेनवानराः॥४२॥राघवंशरणंजग्मुर्व्यथिताःखिन्नचेतसः॥प्रभग्नान्वानरान्दृ
ष्ट्वावज्रहस्तात्मजात्मजः॥४३॥अभ्यधावतवेगेनकुंभकर्णंमहाहवे॥शैलशृंगेमहद्गृह्यविनदन्समुहुर्मुहुः॥४४॥त्रासयन्

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

राक्षसान्सर्वान्कुंभकर्णपदानुगान्॥चिक्षेपशैलशिखरंकुंभकर्णस्यमूर्धनि॥४७॥सतेनाभिहतस्तेनशैलेनेंद्रारिपुस्तथा॥कुंभ
कर्णप्रजज्वालक्रोधेनमहतातदा॥४८॥सोभ्यधावतवेगेनवालिपुत्रममर्षणं॥कुंभकर्णोमहानादस्त्रासयन्सर्ववानरा
न्॥४९॥भूलंससर्जवैरोषादंगदेतुमहाबलः॥तमापतंतंबलवान्युद्धमार्गविशारदः॥५०॥लाघवान्मोक्षयामासबलवान्वानरर्ष
भः॥उत्पत्यचैनंतरसातलेनोरस्यताडयत्॥५१॥सतेनाभिहतःकोपात्समुमोहाचलोपमः॥सलब्धसंज्ञोतिबलोमुष्टिंसंगृह्य
राक्षसः॥५२॥अपहासेनचिक्षेपविसंज्ञःसपपातह॥तस्मिन्प्लवगशार्दूलेविसंज्ञेपतितेभुवि॥५३॥तच्छूलंसमुपादायसुग्रीवंभ
मिदुद्रुवे॥तमापतंतंसंप्रेक्ष्यकुंभकर्णंमहाबलं॥५४॥उत्पपातमहावेगःसुग्रीवोवानराधिपः॥सपर्वतोग्रमुत्क्षिप्यसमाविध्य
महाकपिः॥५५॥अभिदुद्रावबलवेगेनकुंभकर्णंमहाबलः॥तमापतंतंसंप्रेक्ष्यकुंभकर्णःप्लवंगमः॥५६॥तस्योविवृतसर्वांगोवानरे
द्रसमुन्मुखः॥कपिशोणितदिग्धांगंभक्षयंतंमहाकपीन्॥५७॥कुंभकर्णंस्थितंदृष्ट्वासुग्रीवोवाक्यमब्रवीत्॥पातिताश्चत्व
यावीराःकृतंकर्मसुदुष्करं॥५८॥भक्षितानिचसैन्यानिप्राप्तंतेपरमंयशः॥त्यज्यतद्वानरानीकंप्राकृतैःकिंकरिष्यसि॥५९॥सहस्रै
कनिपातंमेपर्वतस्यास्यराक्षस॥तद्वाक्यंहरिराजस्यसत्वधैर्यसमन्वितं॥६०॥श्रुत्वाराक्षसशार्दूलःकुंभकर्णोब्रवीद्वचः॥प्र
जापतेस्तुपौत्रस्त्वंतथैवर्क्षरजसुतः॥श्रुतपौरुषसंपन्नस्तस्माद्गर्जसिवानर॥६१॥सकुंभकर्णस्यवचोनिशम्यआविध्यशैलंसह

च

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

सामुमोच॥तेनाजघानोरसिकुंभकर्णंशैलेनवज्राशनिसन्निभेन॥६४॥तच्छैलशृंगंसहसाविभिन्नंभुजांतरेतस्यतदाविशाले॥
ततोविषेदुस्सहसाप्लवंगारक्षोगणाश्चापिमुदाविनेदुः॥६५॥सशैलशृंगाभिहतश्चुकोपननादकोपाच्चविवृत्यवक्त्रं॥आवि
ध्यशूलंसतडित्प्रकाशंचिक्षेपहर्यक्षपतेर्वधाय॥६६॥तत्कुंभकर्णस्यभुजांतरविद्धंशूलंशितंकांचनदामजुष्टं॥क्षिप्रंसमु
त्पत्यनिगृह्यदोर्भ्यांबभंजवेगेनसुतोनिलस्य॥६७॥कृतंभारसहस्रेणशूलंकालायसंमहत्॥बभंजजानुभारोप्यतदाहृष्टः
प्लवंगमः॥६८॥शूलंभग्नंहनुमतादृष्ट्वासाहरिवाहिनी॥हृष्टाननादबहुशःसर्वतश्चापिदुद्रुवे॥६९॥सिंहनादंचतेचक्रुःप्र
हृष्टावनगोचराः॥मारुतिंपूजयामासुर्दृष्ट्वाशूलंद्विधाकृतं॥७०॥सतत्तथाभग्नमवेक्ष्यशूलंचुकोपरक्षोधिपतिर्महात्मा॥उ
त्पाट्यलंकामलयात्मशृंगंजघानसुग्रीवमुपेत्यतेन॥७१॥सशैलशृंगाभिहतोविसंज्ञःपपातभूमौयुधिवानरेंद्रः॥तंवीक्ष
भूमौपतितंविसंज्ञंनेदुःप्रहृष्टायुधियातुधानाः॥७२॥समभ्युपेत्याद्भुतघोरवीर्यंसकुंभकर्णोयुधिवानरेंद्रं॥जहारसुग्रीवम
भिप्रगृह्यथानिलोमेघमिवप्रचंडः॥७३॥सतंमहामेघनिकाशरूपंउद्धृत्यगच्छन्युधिकुंभकर्णः॥रराजमेरुप्रतिमानरू
पोमेरुर्यथात्युच्छ्रितघोरशृंगः॥७४॥ततःसमादायजगामवीरःसंस्तूयमानोयुधियातुधानैः॥शृण्वन्निनादंत्रिदशालय
यानांप्लवंगराजग्रहविस्मितानां॥७५॥ततःसमादायतदासमेनेहरीद्रमिंद्रोपममिंद्रवीर्यः॥अस्मिन्हृतेसर्वमिदंहृतंस्या

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

त्सराघवंसैन्यमितीदृशत्रुः॥७३॥विद्रुतांवाहिनींदृष्ट्वावानराणामितस्ततः॥कुंभकर्णेनसुग्रीवंगृहीतंचहरीश्वरं॥७४॥हनूमां
श्चिंतयामासमतिमान्मारुतात्मजः॥एवंगृहीतेसुग्रीवेकिंकर्त्तमयाभवेत्॥७५॥यद्दैन्यायंमयाकर्त्तुंतत्करिष्यामिसर्वथा॥
भूत्वापर्वतसंकाशोनाशयिष्यामिराक्षसं॥७६॥मयाहतेसंपतिकुंभकर्णेमहाबलेमुष्टिविशीर्णदेहे॥विमोहितेवानरपा
र्थिवेचभवंतुहृष्टाःप्लवगाःसमग्राः॥७७॥अथवास्वयमप्येषमोक्षंप्राप्स्यतिपार्थिवः॥गृहीतोयंयदिभवेच्चिदशैःसासुरोरगै
७८॥मन्येनतावदात्मानंबुध्यतेवानराधिपः॥शैलप्रहाराभिहतःकुंभकर्णेनसंयुगे॥७९॥अयंमुहूर्तात्सुग्रीवोलब्धसंज्ञोम
हाहवे॥आत्मनोवानराणांचयत्पथ्यंतत्करिष्यति॥८०॥मयानुमोक्षितस्यास्यसुग्रीवस्यमहात्मनः॥अप्रीतिश्चभवेत्कष्टाकी
र्तिनाशश्चशाश्वतः॥८१॥तस्मात्क्षणंप्रतीक्षिष्येविक्रमंपार्थिवस्यनः॥भिन्नंचवानरानीकंतावदाश्वासयाम्यहं॥८२॥इत्येवंचिं
तयित्वातुहनूमान्मारुतात्मजः॥भूयःसंस्तंभयामासवानराणांमहाचमूं॥८३॥सकुंभकर्णोथविवेशलंकांस्फुरंतमादायमहा
गिरिंतं॥विमानचर्यागृहगोपुरस्थैःपुष्पाग्र्यवर्षैरभिपूज्यमानः॥८४॥पुष्पगंधोदवर्षैस्तुसिच्यमानःशनैःशनैः॥राजवीथ्यास्तु
शीलत्वात्संज्ञांलेभेहरीश्वरः॥८५॥ततःससंज्ञामुपलभ्यकृच्छ्राद्दलीयसस्तस्यभुजांतरस्थः॥अवेक्ष्यमाणःपुरराजमार्गंविचि
तयामासमुहुर्महात्मा॥८६॥एवंगृहीतेनकथंनुनामशक्यंमयासंप्रतिकर्त्तुमद्य॥तथाकरिष्यामियथाहरीणांभविष्यतीष्टं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

चहितंचकार्य॥८॥ततःकराग्रैःसहसाभिपत्यराजाहरीणाममरेंद्रशत्रुः॥खरैश्चकर्णौदशनैश्चनासांददंशपादैर्विददारपार्श्वे
८॥सकुंभकर्णोहतकर्णनासोविदारितस्तेनरदैर्नखैश्च॥रोषाभिभूतःक्षतजार्द्रगात्रःसुग्रीवमाविध्यपिपेषभूमौ॥८॥सभू
तलेभीमबलेनपिष्टः॥सुरारिहस्तैरभिहन्यमानः॥जगामखंकंदुकवज्जवेनपुनश्चरामेणसमाजगाम॥८॥कर्णनासाविहीं
नस्तुकुंभकर्णोमहाबलः॥रराजशोणितोद्गारीगिरिःप्रस्रवणैरिव॥८॥शोणिताद्रेमहाकायोराक्षसोभीमदर्शनः॥युद्धाया
भिमुखोभूयोमनश्चक्रेमहाबलः॥८॥अमर्षाच्छोणितोद्गारीसुशुभेरावणानुजः॥नीलांजनगिरिप्रख्यःससंध्यइवतोयदः॥८३॥
गतेचतस्मिन्सुरराजशत्रुःक्रोधात्प्रदुद्रावरणायभूयः॥अनायुधोस्मीतिविचिंत्यरौद्रोघोरंतदामुद्गरमाससाद॥८४॥ततःस
पुर्याःसहसामहात्मानिष्क्रम्यतद्वानरसैन्यमुग्रं॥तेनैवरूपेणबभंजरुष्टःप्रहारमुष्ट्याचपदेनसद्यः॥८५॥वभक्षरक्षोयुधि
कुंभकर्णःप्रजायुगांताग्निरिवप्रदीप्तः॥बुभुक्षितःशोणितमांसगृध्नुःप्रविश्यतद्वानरसैन्यमुग्रं॥८६॥चखादरक्षांसिहरी
न्पिशाचान्ऋक्षांश्चमोहाद्युधिकुंभकर्णः॥यथैवमृत्युर्हरतेयुगांतेसंभक्षयामासतथाहरीश्वरान्॥८७॥एकंद्वौत्रीन्ब
हुनुद्रुद्रोवानरान्महराक्षसैः॥समादायैकहस्तेनप्रचिक्षेपमुखेत्वरन्॥८८॥सप्रस्रवन्तदामेदःशोणितंचमहाबलः॥वध्य
मानोनखैर्वृक्षैर्भक्षयामासवानरान्॥८९॥तेभक्ष्यमाणाहरयोरामंजग्मुस्तदागतिं॥कुंभकर्णोभृशंक्रुद्धःकपीन्खादन्प्रधा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वति॥१०७॥ शतानिसप्तचाष्टौचविंशतिंत्रिंशतिंतथा॥संपरिष्वज्यबाहुभ्यांभक्षयन्परिधावति॥१०१॥मेदोवसाशोणितदिग्धगा
गात्रःकर्णप्रसक्तःग्रथितात्रमालः॥ववर्षशूलानिसुतीक्ष्णदंष्ट्रःकालोयुगांतस्यइवप्रवृद्धः॥२॥तस्मिन्कालेसुमित्रायाःपु
त्रःपरबलार्दनः॥चकारलक्ष्मणोयुद्धंबद्धगोधांगुलित्रवान्॥३॥सकुंभकर्णस्यशरान्शरीरेसप्तवीर्यवान्॥निचखानाददे
चान्यान्विससर्जचलक्ष्मणः॥४॥पीड्यमानस्तदास्मंतुविषेहेतत्सराक्षसः॥ततश्चुकोपबलवान्सुमित्रानंदवर्धनः॥५
अथास्यकवचंशुभ्रंजांबूनदमयंशुभं॥प्रच्छादयामासशरैःसंध्याभ्रमिवमारुतः॥६॥तीक्ष्णांजनचयःप्रख्यैःशरैःकांचनभू
षणैः॥आपीड्यमानःशुशुभेमेघैःसूर्यइवांशुमान्॥७॥ततःसराक्षसोभीमःसुमित्रानंदवर्धनं॥सावज्ञमेवप्रोवाचनान्यंमेघो
घनिस्वनः॥८॥अंत कस्यापिकष्टस्ययुधिजेतारमाहवे॥युध्यतामामभीतेनस्थापितोवीरतात्वया॥९॥प्रगृहीतायुधस्येहमृ
त्योरिवमहामृधे॥तिष्ठन्नप्यग्रतःपूज्यःकिमुयुद्धप्रदायकः॥१०॥ऐरावतसमारूढोवृतःसर्वामरैःप्रभुः॥नैवशक्रोपिसमरेस्थि
तपूर्वःकदाचन॥११॥अद्यत्वयाहंसौमित्रेबलेनापिपराक्रमैः॥तोषितोगंतुमिच्छामित्वामनुज्ञाप्यराघवं॥१२॥यत्तुवीर्यबलो
त्साहैस्तोषितोहंरणेत्वया॥राममेवैकमिच्छामिहंतुंयस्मिन्हतेहतं॥१३॥रामेमयाचेन्निहतेयेन्येस्थास्यंतिसंयुगे॥तानहंयो
धयिष्यामिस्वबलेनप्रमाथिना॥१४॥इत्युक्त्वावाक्यंतद्रक्षःप्रोवाचस्तुतिसंहितं॥मृधेघोरतरंवाक्यंसौमित्रिंप्रहसन्निव॥१५॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

यस्त्वं शक्रादिभिर्देवैरसह्यं प्राप्य पौरुषं॥ तत्सत्यं नान्यथा वीर दृष्टस्तेद्य पराक्रमः॥१६॥ एष दाशरथी रामस्तिष्ठत्यद्रीरिवाचलः॥ इति
श्रुत्वाद्य नादृत्य लक्ष्मणं सन्निशाचरः॥१७॥ अतिक्रम्य तु सौमित्रिं कुंभकर्णो महाबलः॥ राममेवाभिदुद्राव दारयन्निव मेदिनीं॥१८
अथ दाशरथी रामो रौद्रमस्त्रं प्रयोजयन्॥ कुंभकर्णस्य हृदये ससर्ज निशितान् शरान्॥१९॥ तस्य रामेण विद्धस्य सहसाभिप्रधा
वतः॥ अंगारमिश्राः क्रुद्धस्य मुखान्निश्चेरुरर्चिषः॥२०॥ रामास्त्रविद्धो गंभीरं नदन् राक्षसपुंगवः॥ अभ्यधावत संक्रुद्धो हरीन् वि
द्रावयन् रणे॥२१॥ तस्योरसि निमग्नास्ते शरा वह्निवाससः॥ रेजुर्नीलाद्रिकटके नृत्यंतइव वह्निणः॥२२॥ हस्तात्तस्यावशात्खड्ग
स्तापपातोर्यो महागदा॥ आयुधानि च सर्वाणि विप्रकीर्यंत भूतले॥२३॥ स निरायुधमात्मानं यदा मेने महाबलः॥ मुष्टिभ्यां च करा
भ्यां च चकार कदनं महत्॥२४॥ स बाणैरतिविद्धांगः क्षतजेन समुक्षितः॥ रुधिरं परिसुस्राव गिरिः प्रस्रवणं यथा॥२५॥ सुतीव्रेण
च कोपेन रुधिरेण च मूर्छितः॥ वानरान् राक्षसान् वृक्षान् खादान् स परिधावति॥२६॥ अद्रिशृंगसमाविध्य भीमं भीमपराक्रमः॥ चि
क्षेप राममुद्दिश्य बलवानंतकोपमः॥२७॥ अप्राप्तमंतराराम स्सप्तभिस्तैरजिह्मगैः॥ चिच्छेद गिरिशृंगं तं पुनः संधाय कार्मुकं॥२८
तन्मेरुशिखराकारद्योतमानमिव श्रिया॥ द्वेधा तेवानरेंद्राणां पतमानमपातयत्॥३०॥ तस्मिन्काले तु धर्मात्मा लक्ष्मणो राममब्र
वीत्॥ कुंभकर्णवधे युक्तो योगान्परिमृशन्बहून्॥३१॥ नैवायं वानरान् राजन् विजानाति न राक्षसान्॥ मत्तश्शोणितगंधेन स्वान्प

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

रान्श्वापिखादति॥३२॥साध्वेनमधिरोहंतुसर्वेतेहरयोद्रुतं॥यूथपाश्चयथामुख्यास्तिष्ठंत्वस्यसमंततः॥३३॥अद्यायंदुर्मतिःकाले
हरिभारप्रपीडितः॥प्रपतेद्राक्षसोभूमौनान्यान्हन्यात्प्लवंगमान्॥३४॥तस्यतद्वचनंश्रुत्वाराजपुत्रस्यधीमतः॥तेसमारुरुहुर्हृ
ष्टाःकुंभकर्णंप्लवंगमाः॥३५॥कुंभकर्णस्तुसंक्रुद्धःसमारूढप्लवंगमैः॥व्यधूयतान+न+न्वेगेनदुष्टहस्तीवहस्तिपान्॥३६॥तान्दृष्ट्वा
निर्धुतान्रामोरुष्टोयमितिराक्षसः॥समुत्पातवेगेनधनुश्चोत्तममादद्दे॥३७॥क्रोधरक्तेक्षणोवीरोनिर्दहन्निवचक्षुषा॥रा
घवोराक्षसंवेगादभिदुद्रावविगितः॥३८॥यूथपान्हर्षयन्सर्वान्कुंभकर्णबलार्दितान्॥सचापमादायभुजंगकल्पंदृढज्यमु
द्यंतपनीयचित्रं॥हरीन्समाश्वास्यसमुत्पपातरामोनिबद्धोत्तमतूणबाणैः॥४०॥सवानरगणैस्तैस्तुवृतःपरपुरंजयः॥लक्ष्म
णानुचरोरामःसंप्रतस्थेमहाबलः॥४१॥सददर्शमहाकायंकिरीटिनमरिंदमं॥शोणितावृतरक्ताक्षंकुंभकर्णंमहाबलं॥४२॥
हरीन्समभिधावंतंयथारुष्टंदिग्गजं॥मार्गमाणंहरीन्क्रुद्धंराक्षसैपरिवारितं॥४३॥विंध्यमंदरसंकाशंकांचनांगदभूषणं
स्रवंतंरुधिरंवक्त्राद्वर्षमेघमिवोत्थितं॥४४॥जिह्वयापलिलिह्यंतंसृक्किणीशोणितस्रुतौ॥मृद्नंतंवानरानीकंकालांतकयमो
पमं॥४५॥तंदृष्ट्वाराक्षसश्रेष्ठंप्रदीप्तानलवर्चसं॥विस्फारयामासतदाकार्मुकंपुरुषर्षभः॥४६॥सतस्यचापनिर्घोषात्कुपितोरा
क्षसर्षभः॥अमृष्यमाणस्तंघोषमभिदुद्रावराघवं॥४७॥ततस्तुवातोद्धतमेघकल्पंभुजंगराजोत्तमभोगबाहुं॥तमापतंतंधर

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

णीधराभमुवाचरामोयुधिकुंभकर्णं॥४८॥आगच्छरक्षोधिपमाविषादमवस्थितोहंप्रगृहीतचापः॥अवैहिमांशक्रसपत्नरा
मंभवान्मुहूर्त्ताद्भविताविचेताः॥४९॥रामोयमितिविज्ञायजहासविकृतस्वनं॥अभ्यधावतसंक्रुद्धोहरीन्विद्रावयन्रणे
५०॥दारयन्निवसर्वेषांहृदयानिवनौकसां॥प्रहस्यविकृतंभीमंसमेघस्तनितोपमं॥५१॥कुंभकर्णोमहातेजाराघवंवाक्यम
ब्रवीत्॥नाहंविराधोविज्ञेयोनकबंधोखरोनन॥५२॥नचवालीनमारीचःकुंभकर्णोहमागतः॥पश्यमेमुद्गरंभीमंसर्वकाल
यसंमहत्॥५३॥अनेननिर्जितादेवादानवाश्चपुरामया॥विकर्णनासइतिमानावज्ञातुंत्वमर्हसि॥५४॥अस्मापिहिनमेपीडा
कर्णनासाविकर्त्तनात्॥दर्शयेक्ष्वाकुशार्दूलवीर्यंगात्रेषुमेनघ॥५५॥ततस्त्वांभक्षयिष्यामिदृष्टपौरुषविक्रमं॥५६॥सकुंभ
कर्णस्यवचोनिशम्यरामःसुपुंखान्विससर्जबाणान्॥तैराहतोवज्रसमानवेगैर्नचुक्षुभेनव्यथतेसुरारिः॥५७॥यैःसायकैः
सालवरानिकृत्ताः बालीहतोवानरपुंगवश्च॥तेकुंभकर्णस्यतदाशरीरंवज्रोपमानव्यथयांप्रचुक्रुः॥५८॥सवारिधाराइ
वसायकांस्तान्पिबन्शरीरेणमहेंद्रशत्रुः॥जघानरामस्यशरप्रवेगंआविध्यतंमुद्गरमप्रमेयं॥५९॥ततस्तुरक्षःक्षत
जानुलिप्तंवित्रासनंदेवमहाचमूनां॥आविध्यतंमुद्गरमुग्रवेगं [illegible] विद्रावयामासचमूंहरीणां॥६०॥वायव्यमादायत
रामहास्त्रंरामःप्रचिक्षेपनिशाचराय॥समुद्गरंतेनचकर्त्तबाहुंसकृत्तबाहुंस्तुमुलंननाद॥६१॥सतस्यबाहुर्गिरिशृंगक

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

त्यः समुद्गरोराघववाणन्नुनः॥ पपात तस्मिन्हरिराजसैन्ये जघान तांवानरवाहिनीं च॥ ६२॥ ते वानरा भग्नहताव शेषाः पपंत
माश्रित्य तदा विषण्णाः॥ अपीडितांगा दद्रुः सुघोरं नरेंद्ररक्षोधिपसन्निपातं॥ ६३॥ सकुंभकर्णोस्त्रनिकृत्तबाहुर्महासिकृत्ता
यद्वाचलेंद्रः॥ उत्पाटयामास करेण सालं ततो भिदुद्रावरणे नरेंद्रं॥ ६४॥ तं तस्य बाहुं सहसालवृक्षं समुद्यतं पन्नगभोगकल्पं
ऐंद्रास्त्रयुक्तेन जघान रामो बाणेन जांबूनदचित्रितेन॥ ६५॥ सकुंभकर्णस्य भुजो निकृत्तः पपात भूमौ गिरिसन्निकाशः॥ विचेष्ट
मानो निजघान वृक्षान् शैलान् शिलावानरराक्षसांश्च॥ ६६॥ तं छिन्नबाहुं प्रसमीक्ष्य रामः समापतंतं सहसा नदंतं॥ द्वाव
र्धचंद्रौ निशितौ प्रगृह्य चिच्छेद पादौ युधि राक्षसस्य॥ ६७॥ तौ तस्य पादौ प्रदिशो दिशश्च गिरीन् गुहांश्चैव महार्णवं च॥
लंकां च सेनां कपिराक्षसानां विवादयंतौ विनिपेततुश्च॥ ६८॥ निकृत्तबाहुर्विनिकृत्तपादो विदार्यवक्त्रं वडवामुखाभं॥
दुद्रावरामं सहसाभिगर्जन् राहुर्यथा चंद्रमिवांतरिक्षे॥ ६९॥ अपूरयत्तस्य मुखं शिताग्रैः रामः शरैर्हेमपिनद्धपुंखैः॥ संपूर्ण
वक्त्रो न शशाक वक्तुं चुकूज कृच्छ्रेण सुमोह चापि॥ ७०॥ अथाददे सूर्यमरीचिकल्पं सब्रह्मदंडांतकालकल्पं॥ अरिष्टमैंद्रं
निशितं सुपुंखं रामः शरं मारुततुल्यवेगं॥ ७१॥ तं वज्रजांबूनदचारुपुंखं प्रदीप्तसूर्यज्वलनप्रकाशं॥ महेंद्रवज्राशनि
तुल्यसारं रामः प्रचिक्षेप निशाचराय॥ ७२॥ स सायको राघवबाहुसृष्टो दिशः स्वभासा दशसंप्रकाशयन्॥ सधूमवैश्वा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नरदीप्तदर्शनोजगामशक्राशनितुल्यवेगः॥७३॥सतंमहापर्वतकूटसंनिभंविवृत्तदंष्ट्रंचलचारुकुंडलं॥चकर्तरक्षोधिपतेः
शिरस्तदायथैववृत्रस्यपुरापुरंदरः॥७४॥कुंभकर्णशिरोभातिकुंडलालंकृतंमहत्॥आदित्येप्युदितेरात्रौमध्यस्तइवचं
द्रमा॥७५॥तद्रामबाणाभिहतंपपातरक्षःशिरःपर्वतकूटकल्पं बभंजचर्यापुरगोपुराणिप्राकारमुच्चतमपातयच्च॥७६
तच्चातिकायंहिमवत्प्रकाशंरक्षस्तदातोयनिधौपपात॥ग्राहांश्चरान्मीनवरान्भुजंगमान्ममर्दभूमिंचसमाविवेश
७७॥तस्मिन्हतेब्राह्मणदेवशत्रौमहाबलेसंयतिकुंभकर्णे॥चचालभूमिर्भूमिधराश्चसर्वेहृष्टास्तुदेवास्तुमुलंप्रणेदुः॥७८
ततस्तुदेवर्षिमहर्षिपन्नगासूराश्चभूतानिसुपर्णगुह्यकाः॥सयक्षगंधर्वगणानभोगताःप्रहर्षितारामपराक्रमेण॥७९॥त
तस्तुतेतस्यवधेनभूरिणामनस्विनोनैर्ऋतराजबांधवाः॥विनेदुरुच्चैर्मथितारघूत्तमंहरीसमीक्ष्यैवयथासुरार्दिताः॥८०॥
सदेवलोकस्यतमोविहत्यसूर्योयथाराहुमुखाद्विमुक्तः॥तथाप्रभासीद्धरिसैन्यमध्येनिहत्यरामोयुधिकुंभकर्णं॥८१॥
प्रहर्षमापुर्बहवस्तुवानराःप्रबुद्धपद्मप्रतिमैरिवाननैः॥अपूजयन्राघवमिष्टभागिनंहतेरिपौभीमबलेदुरासदे॥८२॥
सकुंभकर्णसुरसैन्यमर्दनंमहत्सुयुद्धेप्रजितंकदाचन॥ननंदहत्वाभरताग्रजोरणेमहासुरंवृत्रमिवामराधिपः॥८३॥इ
त्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेसप्तषष्टितमःसर्गः॥६७॥कुंभकर्णवधोनामसप्तमापहारःसमाप्तः पूर्वभागसमा०

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

सन्नम्यां कुंभकर्णवधः॥ कुंभकर्णं हतं दृष्ट्वा राघवेण महात्मना॥ राक्षसाराक्षसेंद्राय रावणाय न्यवेदयन्॥१॥ राजन्सकालसं
काशः संयुक्तः कालधर्मणा॥ विद्राव्य वानरीं सेनां भक्षयित्वा च वानरान्॥२॥ प्रतपित्वा मुहूर्तं तु प्रशांतो रामतेजसा॥ कायेना
र्धप्रविष्टेन समुद्रे भीमदर्शनं॥३॥ निकृत्तकर्णोरुभुजं विक्षरद्रुधिरं बहु॥ रुध्वा द्वारं शरीरेण लंकायाः पर्वतोपमः॥४॥ कुंभ
कर्णस्तव भ्राता कार्त्स्न्यशरपीडितः॥ अडंगभूतो विहतो दावदग्धद्रुमः॥५॥ ममार राक्षसो घोरः कुंभकर्णो महाद्युति॥ श्रु
त्वा विनिहतं संख्ये कुंभकर्णं महाबलं॥६॥ रावणः शोकसंतप्तो मुमोह च पपात च॥ पितृव्यं निहतं श्रुत्वा देवांतकनरांतकौ
॥७॥ त्रिशिराश्चातिकायश्च रुरुदुः शोकपीडिताः॥ भ्रातरं निहतं श्रुत्वा रामेणाक्लिष्टकर्मणा॥८॥ महोदरमहापार्श्वौ शोका
क्रांतौ बभूवतुः॥ ततः कृच्छ्रात्समासाद्य संज्ञां राक्षसपुंगवः॥९॥ कुंभकर्णवधाद्दीनो विललाप स रावणः॥ हा वीर रिपुदर्पघ्न कुंभकर्ण
महाबल॥१०॥ त्वं मां विहाय वै देवाद्यातोसि यमसादनं॥ मम शल्यमनुद्धृत्य बांधवानां महाबलः॥११॥ शत्रुसैन्यं प्रतापैकः क्व
मां संत्यज्य गच्छसि॥ इदानीं खल्वहं नास्मि यस्य मे दक्षिणो भुजः॥१२॥ पतितो यं समाश्रित्य न बिभेमि सुरासुरान्॥ कथमेवंविधो
वीरो देवदानवदर्पहा॥१३॥ कालाग्निप्रतिमोद्ध्वंसी राघवेण रणे हतः॥ यस्य ते वज्रनिष्पेषो न कुर्याद्व्यसनं सदा॥१४॥ स कथं रा
मबाणार्तः प्रसुप्तोसि महीतले॥ एते देवगणाः सार्धं ऋषिभिर्गगने स्थिताः॥१५॥ निहतं त्वां रणे दृष्ट्वा निनदंति प्रहर्षिताः॥ ध्रुवमद्ये

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वसंहृशलब्धुलक्षाःप्लवंगमा॥१६॥आरोक्ष्यंतीहदुर्गाणिलंकाद्वाराणिसर्वशः॥राज्येननास्तिमेकार्येकिंकरिष्यामिसीतया
१७॥कुंभकर्णविहीनस्यजीवितेनास्तिमेरतिः॥यद्यहंभ्रातृहंतारंनहन्मियुधिराघवं॥१८॥ननुमेमरणंश्रेयोनचेदंमर्थजी
वितं॥अद्यैवतंगमिष्यामिदेशंयत्रानुजोमम॥१९॥नहिभ्रातृन्समुत्सृज्यक्षणंजीवितुमुत्सहे॥देवाहिमांहसिष्यंतिदृष्ट्वापृ
थ्वीपहारिणं॥२०॥कथमिंद्रंजयिष्यामिकुंभकर्णहतेत्वयि॥२१॥तदिदंमामनुप्राप्तंविभीषणवचःशुभं॥यदज्ञानान्मयातस्य
नगृहीतंमहात्मनः॥२२॥विभीषणवचोयावत्कुंभकर्णप्रहस्तयोः॥विनाशोयंसमुत्पन्नोमांत्रीडयतिदारुणः॥२३॥तस्यायं
कर्मणःप्राप्तोविपाकोममशोकदः॥यन्मयाधार्मिकःश्रीमान्सनिरस्तोविभीषणः॥२४॥इतिबहुविधमाकुलांतरात्माकृप
णमतीवविलप्यकुंभकर्णः॥न्यपतदथदशाननोभृशार्तस्तमनुजमिंद्ररिपुंहतंविदित्वा॥२५॥इत्यार्षेश्रीरामायणेवाल्मीकी
येयुद्धकांडेअष्टषष्टितमःसर्गः॥६८॥एवंविलपमानस्यरावणस्यदुरात्मनः॥श्रुत्वाशोकाभितप्तस्यत्रिशिरावाक्यमब्रवी
त्॥१॥एवमेवमहावीर्योहतोनस्तातमध्यम॥ननुसत्पुरुषाराजन्विलपंतियथाभवान्॥२॥नूनंत्रिभुवनस्यापिपर्याप्तस्त्वम
सिप्रभो॥सकस्मात्प्राकृतइवशोचस्यात्मानमीदृशं॥३॥ब्रह्मदत्तास्तितेशक्तिःकवचंसायकोधनुः॥महस्त्ररवरसंयुक्तोरथो
मेघरवस्वनः॥४॥त्वयासहद्विशस्त्रेणविशस्तादेवदानवाः॥सर्वायुधसंपन्नोराघवंशस्तुमर्हसि॥५॥कामंतिष्ठमहाराजनिर्ग

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

मिष्याम्यहं रणं॥ उद्धरिष्याम्यहं शत्रून्गरुडः पन्नगानिव॥ घ्नंबरोदेवराजेननरकोविष्णुनायथा॥ तथाद्यसहितारामो मया
युधिनिपातितः॥ ७॥ श्रुत्वात्रिशिरसोवाक्यंरावणोराक्षसेश्वरः॥ पुनर्जातमिवात्मानंमन्यतेरावणस्तदा॥ ८॥ श्रुत्वात्रिशिरसोव
क्यंदेवांतकनरांतकौ॥ अतिकायश्चतेजस्वीबभूवुर्युद्धहर्षिताः॥ ९॥ ततोहमहइत्येवगर्जंतोनैऋतर्षभा॥ रावणस्यसुतावीराः
शक्रतुल्यपराक्रमाः॥ १०॥ अंतरिक्षगताःसर्वेसर्वेमायाविशारदाः॥ सर्वेत्रिदशदर्पघ्नाःसर्वेसमरदुर्मदाः॥ ११॥ सर्वेसुबलसंपन्ना
ःसर्वेविस्तीर्णकीर्तयः॥ सर्वेसमरमासाद्यनश्रूयंतेस्मनिर्जिताः॥ १२॥ देवैरपिसगंधर्वैःसकिन्नरमहोरगैः॥ सर्वेस्त्रविदुषोवीराः
सर्वेयुद्धविशारदाः॥ १३॥ सर्वेप्रवरविज्ञानाःसर्वेलब्धवराःसदा॥ सतैस्तथाभास्करतुल्यदर्शनैःसुतैर्वृतःशत्रुबलप्रमर्दनैः॥ र
राजराजामघवान्यथामरैर्वृतोमहादानवदर्पनाशनैः॥ १४॥ सपुत्रान्संपरिष्वज्यभूषयित्वाचभूषणैः॥ आशीर्भिश्चप्रशस्ताभिः
प्रेषयामाससंयुगे॥ १५॥ युद्धोन्मत्तंचमत्तंचभ्रातरौचापिरावणः॥ रक्षणार्थंकुमाराणांप्रेषयामाससंयुगे॥ १६॥ तेभिवाद्यमहात्मानं
रावणंरिपुरावणं॥ कृत्वाप्रदक्षिणंचैवमहाकायाःप्रतस्थिरे॥ १७॥ सर्वौषधीभिर्गंधैश्चसमालभ्यमहाबलाः॥ निजग्मुर्नैऋतश्रे
ष्ठाःषडेतेयुद्धकांक्षिणः॥ १८॥ त्रिशिराश्चातिकायश्चदेवांतकनरांतकौ॥ महोदरमहापार्श्वौनिजग्मुःकालचोदिताः॥ १९॥ ततः
सुदर्शनंनामनीलजीमूतसन्निभं॥ ऐरावतकुलेजातमारुरोहमहोदरः॥ २०॥ सर्वायुधसमायुक्तंतूणीभिश्चाप्यलंकृतंराज

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

राजमास्थायसवितेवास्तमूर्धनि॥हयोत्तमसमायुक्तंसर्वायुधसमाकुलं॥आरुरोहरथश्रेष्ठंत्रिशिरारावणात्मजः॥२२॥त्रिशिरारथमा
स्थायविरराजधनुर्धरः॥सविद्युदुल्कसज्वालःसेंद्रचापइवांबुदः॥२३॥त्रिभिःकीरीटैस्त्रिशिराःशुशुभेस्यंदनोत्तमे॥हिमवानिवशैलें
द्रस्त्रिभिःकांचनपर्वतैः॥२४॥अतिकायोतितेजस्वीराक्षसेंद्रसुतस्तदा॥आरुरोहरथश्रेष्ठंश्रेष्ठःसर्वधनुष्मतां॥२५॥सुचक्राक्षंसुसं
युक्तंसानुकर्षंसुकूबरं॥तूणीबाणासनैर्दीप्तैःप्रासासिपरिघाकुलं॥२६॥सकांचनविचित्रेणकिरीटेनविराजता॥भूषणैश्चबभौमे
रुःप्रभाभिरिवभासयन्॥२७॥सरराजरथेतस्मिन्राजसूनुर्महाबलः॥वृतोनैर्ऋतशार्दूलैर्वज्रपाणिरिवामरैः॥२८॥हयमुच्चैःश्र
वःप्रख्यंश्वेतंकनकभूषणं॥मनोजवंमहाकायंआरुरोहनरांतकः॥२९॥गृहीत्वाप्रासमुल्काभंविरराजनरांतकः॥शक्तिमादा
यतेजस्विगुहःशिखिगतोयथा॥३०॥देवांतकःसमादायपरिघंवज्रभूषितं॥परिगृह्यगुरुदोर्भ्यांवपुर्विस्तीर्यविष्ठंवयन्॥३१॥महापार्श्वो
महाकायोगदामादायवीर्यवान्॥विरराजगदापाणिकुबेरइवसंयुगे॥३२॥प्रतस्थिरेमहात्मानोबलैरप्रतिमैर्वृताः॥तान्गजेश्चतु
रंगैश्चरथैश्चांबुदनिस्वनैः॥३३॥अनुजग्मुर्महाकायाराक्षसाप्रवरायुधाः॥तेविरेजुर्महात्मानःकुमारासूर्यवर्चसः॥३४॥किरीटिनः
स्रियाजुष्टाग्रहादीप्ताइवांबरे॥प्रगृहीतावभौतेषांशस्त्राणामावलिःशिता॥३५॥शारदाभ्रप्रतीकाशाहंसावलिरिवांबरे॥मरणंवा
विनिश्चित्यशत्रूणांवापराजयं॥३६॥इतिकृत्वामतिंवीरानिर्जग्मुःसंयुगार्थिनः॥जगर्जुश्चविनेदुश्चविक्षिपुश्चापिसायकान्॥३७॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

जगृहुश्चापि तेवीरा निर्जग्मुर्युद्धदुर्मदाः॥ क्ष्वेलितास्फोटनिनदैश्चालयन्तो वसुंधरां॥३९॥ रक्षसां सिंहनादैश्च प्रस्फोटयन्तो दांबरं॥
ते भिन्निघ्नन्तो मुदिता राक्षसेंद्रा महाबलाः॥३९॥ ददृशुर्वानरानीकं समुद्यतशिलायुधं॥ हरयोपि महात्मानो ददृशुर्नैर्ऋतं बलं
४०॥ हस्त्यश्वरथसंबाधं किंकिणीशतनादितं॥ नीलजीमूतसंकाशं समुद्यतमहायुधं॥४१॥ दीप्तानलरविप्रख्यैर्नैर्ऋतैः सर्वतो
वृतं॥ तद्दृष्ट्वा बलमायातं लब्धलक्षा प्लवंगमाः॥४२॥ समुद्यतमहाशैलाः संप्रणेदुर्मुहुर्मुहुः॥ अमृष्यमाणा रक्षांसि प्रतिनेदुर्ति
वानरान्॥४३॥ ततः समुद्धृष्टरवैर्निराम्पर रक्षोगणा वानरयूथपानां॥ अमृष्यमाणाः परहर्षमुग्रं महाबला भीमतरं विनेदुः॥४४
ते राक्षसबलं घोरं प्रविश्य हरियूथपाः॥ विचेरुरुद्यतैः शैलैर्नगाः शिखरिणो यथा॥४५॥ केचिदाकाशमाविश्य केचिदुर्वीप्लवं
गमाः॥ रक्षःसैन्येषु संक्रुद्धाश्चेरुर्द्रुमशिलायुधाः॥४६॥ द्रुमांश्च विपुलस्कंधान्नृत्यन्वानरपुंगवाः॥ तद्युद्धमभवद्घोरं रक्षोवानरसं
कुलं॥४७॥ ते पादपशिलाशैलैश्चक्रुर्वृष्टिमनूपमां॥ बाणौघैर्वीर्यमाणाश्च हरयो भीमविक्रमाः॥४८॥ सिंहनादान्विनेदुश्च रणे रा
क्षसवानराः॥ शिलाभिश्चूर्णयामासुर्यातुधानान्प्लवंगमाः॥४९॥ निजघ्नुः समरे क्रुद्धाः कवचाभरणावृतान्॥ केचिद्रथगतान्वी
रान्गजवाजिगतानपि॥५०॥ निजघ्नुः सहसाप्लुत्य यातुधानान्प्लवंगमाः॥ शैलशृंगान्वितांगास्ते मुष्टिभिर्वातलोचनाः॥५१॥ चेलुः पे
तुश्च नेदुश्च तत्र राक्षसपुंगवाः॥ राक्षसाश्च शरैस्तीक्ष्णैर्विभिदुः कपिकुंजरान्॥५२॥ शूलमुद्गरखड्गैश्च जघ्नुर्ग्रासैश्च शक्तिभिः॥ अ

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

न्योन्यंपातयामासुःपरस्परजयैषिणः॥५३॥रिपुशोणितदिग्धांगास्तत्रवानरराक्षसाः॥ततःशैलैश्चखड्गैश्चविसृष्टैर्हरिराक्षसैः॥
॥५४॥मूहूर्त्तेनावृताभूमिरभवत्शोणितोक्षिता॥विकीर्णैःपर्वताकारैरक्षोभिररिमर्दनैः॥५५॥आसीद्दुमतिपूर्णातदायुद्धंमदा
न्वितैः॥आक्षिप्ताःक्षिप्यमाणाश्चभग्नशैलैश्चवानराः॥५६॥पुनरगैस्तदाचक्रुरासन्नायुद्धमद्भुतं॥वानरान्वानरैरेवजघ्नुस्तेनैऋ
तर्षभाः॥५७॥राक्षसान्राक्षसैरेवजघ्नुस्तेहरियूथपाः॥आक्षिप्यचशिलास्तेषांनिजघ्नुराक्षसाहरीन्॥५८॥तेषांचाच्छिद्यशस्त्राणि
जघ्नुरक्षांसिवानराः॥निजघ्नुश्शूलशस्त्रास्त्रैश्चिच्छिदुश्चपरस्परं॥५९॥सिंहनादान्विनेदुश्चरणेराक्षसवानराः॥छिन्नवर्मतनुत्राण
राक्षसावानरैर्हताः॥६०॥रुधिरंसुस्रुवुस्तत्रसंसारमिवद्रुमाः॥रथेनचरथंचापि वारणेनापिवारणं॥६१॥हयेनचहयंकेचिन्नि
जघ्नुर्वानरारणे॥प्रहृष्टमनसःसर्वेप्रगृहीतमहाशिलाः॥६२॥हरयोराक्षसान्जघ्नुर्द्रुमैश्चबहुशाखिभिः॥तद्युद्धमभवद्घोरंर
क्षोवानरसंकुलं॥६३॥सुरप्रैरर्द्धचंद्रैश्चभल्लैश्चनिशितैःशरैः॥राक्षसावानरेंद्राणांचिच्छिदुःपादपान्शिलाः॥६४॥विकीर्णैःपर्व
ताग्रैश्चद्रुमैश्छिन्नैश्चसंयुगे॥हतैश्चकपिरक्षोभिर्दुर्गमावसुधाभवत्॥६५॥तेवानरागर्वितहृष्टचेष्टासंग्राममासाद्यभयंविमु
च्य॥युद्धंसमसर्वेसहराक्षसैस्तैर्नानाविधैश्चक्रुरदीनसत्वाः॥६६॥तस्मिन्प्रवृत्तेतुमुलेविमर्दे प्रहृष्यमाणेषुबलीमुखेषु॥निपात्य
मानेषुचराक्षसेषुमहर्षयोदेवगणाश्चनेदुः॥६७॥तेतंहयंमारुततुल्यवेगंआरुह्यशक्तिंनिशितांप्रगृह्य॥नरांतकोवानरराम

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

जसैन्यंमहार्णवंमीनइवाविवेश॥६॥सवानरान्सप्तशतानिवीरःप्रासेदीप्तेनविनिर्विभेद॥एकःक्षणेनेंद्ररिपुर्महात्मा॥
जघानसैन्यंहरिपुंगवानां॥६॥ददृशुश्चमहात्मानंहयपृष्ठेप्रतिष्ठितं॥चरंतंहरिसैन्येषुविद्याधरमहर्षयः॥७॥संतस्पद
दृशेमार्गोमांसशोणितकर्दमः॥पतितैःपर्वताकारैर्वानरैरभिसंवृतः॥७॥यावद्विक्रमितुंबुद्धिंचक्रुस्तवगपुंगवाः॥तावदे
तानतिक्रम्यनिर्विभेदनरांतकः॥७॥ददाहहरिसैन्यानिवनानीवविभावसुः॥यावदुत्पाटयामासुर्वृक्षांछैलांश्चनौकसः
७॥तावत्प्रासहताःपेतुर्वज्रहताइवाचलाः॥ज्वलंतंप्रासमुद्यम्यसंयामाग्नेनरांतकः॥७॥दिक्षुसर्वासुबलवान्विचच
रनरांतकः॥प्रमृद्नन्सर्वतोयुद्धेप्रावृट्कालेयथानिलः॥७॥नशेकुर्द्रवितुंवीराःनस्थातुंस्पंदितुंभयात्॥उत्पतंतंस्थितंयांतं
सर्वान्विव्याधवीर्यवान्॥७॥एकेनांतककल्पेनप्रासेनादित्यतेजसा॥भग्नानिहरिसैन्यानिनिपेतुर्धरणीतले॥७॥वज्रनि
निष्पेषसदृशंप्रासस्याभिनिपातनं॥नशेकुर्वानराःसोढुंतेविनेदुर्महास्वनं॥७॥पततांहरिवीराणांरूपाणिप्रचकाशिरे॥वज्र
भिन्नाग्रकूटानांशैलानांपततामिव॥७॥येतुपूर्वंमहात्मानःकुंभकर्णेनपातिताः॥तेस्वस्थावानरश्रेष्ठाःसुग्रीवमुपतस्थिरे॥
८॥विप्रेक्षमाणःसुग्रीवोददर्शहरिवाहिनीं॥नरांतकभयत्रस्तांविद्रवंतीमितस्ततः॥८॥विद्रुतांवाहिनींदृष्ट्वासददर्शनरांत
कं॥गृहीतप्रासमायांतंहयपृष्ठप्रतिष्ठितं॥८॥दृष्ट्वोवाचमहातेजासुग्रीवोवानराधिपः॥कुमारमंगदंवीरंशक्रतुल्यपरा॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

क्रमं॥८३॥गच्छत्वंराक्षसंवीरोयोसौतुरगमास्थितः॥क्षोभयंतंहरिबलंक्षिप्रंप्राणैर्वियोजय॥८४॥सभर्तुर्वचनंश्रुत्वानिष्प
पाततोगदः॥अनीकान्मेघसंकाशादंशुमानिववीर्यवान्॥शैलसंघातसंकाशोहरीणामुत्तमोगदः॥राजांगदसन्नद्धःस
धातुरिवपर्वतः॥८६॥निरायुधोमहातेजाःकेवलंनखदंष्ट्रवान्॥नरांतकमभिक्रम्यवालिपुत्रोब्रवीदृचः॥८७॥तिष्ठत्वंप्रा
कृतैरेभिर्हरिभिःकिंकरिष्यसि॥अस्मिन्वज्रसमस्पर्शेप्रासंक्षिपममोरसि॥८८॥अंगदस्यवचःश्रुत्वाप्रचुक्रोधनरांतकः॥संद
श्यदशनैरोष्ठंविनिश्वस्यभुजंगवत्॥८९॥अभिगम्यांगदंक्रुद्धोवालिपुत्रंनरांतकः॥सप्रासमाविध्यतदांगदायसमुज्वलंतं
सहसोत्ससर्ज॥सवालिपुत्रोरसिवज्रकल्पेबभूवभग्नोन्यपतच्चभूमौ॥९०॥तंप्रासमालोक्यतथाविभग्नंसुपर्णकृतोरगभो
गकल्पं॥तलसमुद्यम्यसवालिपुत्रस्तुरंगमस्याभिजघानमूर्ध्नि॥९१॥निभग्नपादःस्फुटिताक्षितारोनिष्क्रांतजिह्वोऽचलस
न्निकाशः॥सतस्यवाजीनिपपातभूमौतलप्रहारेणविभिन्नमूर्धा॥९२॥नरांतकःक्रोधवशंजगामहतंतुरंगंपतितंसमीक्ष्य
समुष्टिमुद्यम्यमहाप्रभावोजघानशीर्षेयुधिवालिपुत्रं॥९३॥अथांगदोमुष्टिविशीर्णमूर्धासुस्रावतीव्रंरुधिरंभृशो
ष्णं॥मुहुर्विजज्वालमुमोहचापिसंज्ञांसमासाद्यविसिस्मयेच॥९४॥अथांगदोवज्रसमानवेगंसंवर्त्यमुष्टिंगिरिशृंगकल्पं
निपातयामासतदामहात्मानरांतकस्योरसिवालिपुत्रः॥९५॥समुष्टिनिष्पिष्टविभग्नवक्षाज्वालांवमन्शोणितदिग्धगा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

त्र॥नरांतकोभूमितलेपपातयथाचलोवज्रनिपातभग्नः॥९८॥अथांतरिक्षेत्रिदशोत्तमानांवनौकसांचापिमहाप्रणादः॥ब
भूवतस्मिन्निहतेतिवीर्येनरांतकेवालिसुतेनसंख्ये॥९९॥अथांगदोराममनःप्रहर्षंसुदुष्करंकृतवान्हिविक्रमं॥विसिस्म
येसोप्यतिवीर्यविक्रमःपुनश्चयुद्धेसबभूवहर्षितः॥९९॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेएकोनसप्ततितमःस
र्गः॥६९॥नरांतकंहतंदृष्ट्वाचुक्रुधुर्नैर्ऋतर्षभाः॥देवांतकस्त्रिमूर्धाचपौलस्त्यश्चमहोदरः॥१॥आरूढोमेघसंकाशंवारणं
द्रंमहोदरः॥वालिपुत्रंमहावीर्यमभिदुद्रावावेगवान्॥२॥भ्रातृव्यसनसंतप्तस्तदादेवांतकोबली॥आदायपरिघंघोरमंगदंस
मभिद्रवत्॥३॥रथमादित्यसंकाशंयुक्तंपरमवाजिभिः॥आस्थायत्रिशिरावीरोवालिपुत्रमथाभ्ययात्॥४॥सत्रिभिर्देवदर्प
घ्नैराक्षसेंद्रैरभिद्रुतः॥वृक्षमुत्पाटयामासमहाविटपमंगदः॥५॥देवांतकायतंवीरश्चिक्षेपसहसांगदः॥महावृक्षंमहाशाखं
शक्रोदीप्तमिवाशनिं॥६॥त्रिशिरास्तंप्रचिच्छेदशरैरग्निविषोपमैः॥सवृक्षंकृतमालोक्यउत्पपाततदांगदः॥७॥सववर्षततो
वृक्षान्शिलाश्चकपिकुंजरः॥तान्प्रचिच्छेदसंक्रुद्धस्त्रिशिरानिशितैःशरैः॥८॥परिघाग्रेणतान्वृक्षान्बभंजचसुरांतकः॥त्रि
शिराश्चांगदंवीरमभिदुद्रावसायकैः॥९॥गजेनसमभिद्रुत्यवालिपुत्रंमहोदरः॥जघानोरसिसंक्रुद्धःस्तोमरैर्वज्रसन्निभैः॥१०
देवांतकश्चसंक्रुद्धःपरिघेणतदांगदं॥उपगम्याभिहत्याशुव्यपचक्रामवेगवान्॥११॥सत्रिभिर्नैर्ऋतश्रेष्ठैर्युगपत्समभिद्रुतः

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नविव्यथेमहातेजावालिपुत्रःप्रतापवान्॥१२॥सवेगवान्महावेगंकृत्वापरमदुर्जयः॥तलेनसमभिद्रुत्यजघानास्यमहागजं॥
१३॥तस्यतेनप्रहारेणनागराजस्यसंयुगे॥पेततुर्लोचनेतस्यविननादसवारणः॥१४॥विषाणंचास्यनिष्कृष्यवालिपुत्रोमहाब
लः॥देवांतकमभिद्रुत्यताडयामाससंयुगे॥१५॥सविह्वलस्तुतेजस्वीवातोद्धूतइवद्रुमः॥लाक्षारससवर्णंचसुस्रावरुधिरंमु
खात्॥१६॥अथाश्वास्यमहातेजाःकृच्छ्राद्देवांतकोबली॥आविध्यपरिघंवेगाद्राजघानतदांगदं॥१७॥परिघाभिहतश्चापिवा
नरेंद्रात्मजस्तदा॥जानुभ्यांपतितोभूमौपुनरेवोत्पपातह॥१८॥समुत्पतंतंत्रिशिरास्त्रिभिर्बाणैरजिह्मगैः॥घोरैर्हरिपतेःपुत्रंललाटे
भिजघानह॥१९॥ततोगदंपरिक्षिप्तंत्रिभिर्नैर्ऋतपुंगवैः॥हनूमानभिविज्ञायनीलश्चापिप्रतस्थतुः॥२०॥ततश्चिक्षेपशैलाग्रं
नीलस्त्रिशिरसेतदा॥तद्रावणसुतोधीमान्विभेदनिशितैःशरैः॥२१॥तद्बाणशतनिर्भिन्नंविदारितशिलातलं॥सविस्फुलिंग
सज्वालंनिपपातगिरेःशिरः॥२२॥सविजृंभितमालोक्यहर्षाद्देवांतकोबली॥परिघेणाभिदुद्रावमारुतात्मजमाहवे॥२३॥तमा
पतंतमुत्पत्यहनूमान्मारुतात्मजः॥आजघानततोमूर्ध्निवज्रकल्पेनमुष्टिना॥२४॥शिरसिप्राहरद्वीरस्तदावायुसुतोबली॥
नादेनाकंपयत्सर्वान्राक्षसान्समहाबलः॥२५॥समुष्टिनिष्पिष्टविशीर्णमूर्धानिर्वांतदंताक्षिविलंबजिह्वः॥देवांतकोराक्ष
सराजसूनुर्गतासुरुर्व्यांसहसापपात॥२६॥तस्मिन्हतेराक्षसयोधमुख्येमहाबलेसंयतिदेवशत्रौ॥क्रुद्धस्त्रिमूर्धानिशिता

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

स्त्रमुद्यंववर्षनीलोरसिबालवर्षे॥२७॥महोदरस्तुसंक्रुद्धकुंजरंपर्वतोपमं॥भूयःसमभिरुत्याशुप्रुमंदरंरश्मिवानिव॥२८॥ततोबा
णमयंवर्षंनीलस्योरस्यपातयत॥गिरौवर्षंतडिच्चक्रंचापवानिवतोयदः॥२९॥ततःशरौघैरभिवर्ष्यमाणोविभिन्नगात्रःकपिसै
न्यपालः॥नीलोबभूवाथविमृष्टगात्रोविष्टंभितस्तेनमहाबलेन॥३०॥ [redacted] त
तस्तुनीलःप्रतिलब्धसंज्ञःशैलंसमुत्पाट्यसवृक्षखंडं॥ततःसमुत्पत्यमहोग्रवेगोमहोदरंतेनजघानमूर्ध्नि॥३१॥ततःसशैलाभि
निपातभग्नोमहोदरस्तेनमहाद्विपेन॥विपोथितोभूमितलेगतासुःपपातवज्राभिहतोयथाद्रिः॥३२॥पितृव्यंनिहतंदृष्ट्वात्रिशि
राश्चापमाददे॥हनूमंतंचसंक्रुद्धोविव्याधनिशितैःशरैः॥३३॥सवायुसूनुःकुपितःश्चिक्षेपशिखरंगिरेः॥त्रिशिरास्तच्छरैस्तीक्ष्णैर्वि
भेदबहुधाबली॥३४॥तद्ध्यर्थंशिखरंदृष्ट्वाद्रुमवर्षंतदाकपिः॥विससर्जरणेतस्मिन्रावणस्यसुतंप्रति॥३५॥तमापतंतीमाकाशेर
द्रुमवृष्टिंप्रतापवान॥त्रिशिरानिशितैर्बाणैश्चिच्छेदचननादच॥३६॥हनूमांस्तुसमुत्पत्यत्रिशिरसस्तदा॥विददारनखैःक्रुद्धोना
गंद्रमृगराडिव॥३७॥अथशक्तिंसमासाद्यकालरात्रिमिवांतकः॥चिक्षेपानिलपुत्राय्यत्रिशिरारावणात्मजः॥३८॥दिवःक्षिप्तामिवो
ल्कांतांशक्तिंक्षिप्तामसंगतां॥गृहीत्वाहरिशार्दूलोबभंजचननादच॥३९॥तांदृष्ट्वाघोरसंकाशांशक्तिंभग्नांहनूमता॥प्रहृष्टावानर
गणाविनेदुर्जलदायथा॥४०॥ततःखड्गंसमुद्यम्यत्रिशिरारक्षसोत्तमः॥निजघानचखड्गेनवानरेंद्रस्यवक्षसि॥४१॥खड्गप्रहाराभि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

हतोहनुमान्मारुतात्मजः॥आजघानत्रिमूर्धानंतलेनोरसिवीर्यवान्॥४२॥सतलाभिहतस्तेनस्रस्तहस्तांबरोभुवि॥निपपातमहा
तेजास्त्रिशिरास्त्यक्तचेतनः॥४३॥सतस्यपततःखड्गंसमाछिद्यमहाकपिः॥ननादगिरिसंकाशस्त्रासयन्सर्वनैर्ऋतान्॥४४॥अमृ
ष्यमाणस्तंघोषमुत्पपातनिशाचरः॥उत्पत्यचहनूमंतंताडयामासमुष्टिना॥४५॥तेनमुष्टिप्रहारेणसंचुकोपमहाकपिः॥कुपित
श्चविजग्राहकीरीटेराक्षसर्षभं॥४६॥हनुमान्रोषताम्राक्षोराक्षसंपरवीरहा॥सतस्यशीर्षाण्यसिनाचिन्तेनकीरीटञ्चुष्टानिस
कुंडलानि॥कुद्धःप्रचिच्छेदसुतोनिलस्यत्वष्टुःसुतस्यवशिरांसिशक्रः॥४७॥तान्यायतान्यप्यगसंनिभानिप्रदीप्तवैश्वानरलो
चनानि॥पेतुःशिरांसीहरिपोर्धरण्यांज्योतींषिमुक्तानियथार्कमार्गात्॥४८॥तस्मिन्हतेदेवरिपौत्रिशीर्षेहनूमतानाक्रपराक्रमे
ण॥नेदुःप्लवंगाःप्रचचालभूमीरक्षांस्यथोदुद्रुविरेसमंतात्॥४९॥हतंत्रिशिरसंदृष्ट्वामहोदरमथापिच॥हतौप्रेक्ष्यदुराधर्षौदेवां
तकनरांतकौ॥५०॥चुकोपपरमामर्षःमहापार्श्वोनिशाचरः॥जग्राहार्चिष्मतीचापिगदांसर्वायसीशुभां॥५१॥हेमपट्टपरिक्षिप्तांमां
सशोणितलेपनां॥विराजमानांवपुषाशत्रुशोणितनर्पितां॥५२॥तेजसासंप्रदीप्ताग्रांरक्तमालाविभूषितां॥ऐरावतमहापद्मसार्व
भौमभयावहां॥५३॥गदामादायसंक्रुद्धोमहापार्श्वोनिशाचरः॥हरीन्समभिदुद्रावयुगांताग्निरिवज्वलन्॥५४॥अथर्षभःसमुत्पत्यवा
नरोवरुणात्मजः॥महापार्श्वमुपागम्यतस्थौतस्याग्रतोबली॥५५॥तंपुरस्तात्स्थितंदृष्ट्वावानरंपर्वतोपमं॥आजघानोरसिक्रुद्धो

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

गदयावज्रकल्पया॥५६॥सतयाभिहतस्तेनगदयावानरर्षभः॥छिन्नवक्षाःसमाधूतःसुस्रावरुधिरंबहु॥५७॥ससंभ्राम्यचिरा
त्संज्ञामृषभोवानरर्षभः॥क्रुद्धोविस्फुरमाणोष्ठोमहापार्श्वमुदैक्षत॥५८॥सवेगवान्वेगवदभ्युपेत्यतंराक्षसंवानरयूथमु
ख्यः॥संवर्त्यमुष्टिंसहसाजघानवाङ्कंतरेशैलनिकाशरूपः॥५९॥सकृत्तमूलःसहसैववृक्षःपपातभूमौक्षतजोक्षितांगः॥तं
चास्यघोरंयमदंडकल्पांगदांप्रगृह्याशुतदाननाद॥मुहूर्त्तमासीत्सगतासुकल्पःप्रत्यागतात्मासहसासुरारिः॥उपेत्यसं
ध्याभ्रसमानवर्णःस्तंवारिराजात्मजमाजघान॥६०॥समूर्छितोभूमितलेपपातमुहूर्त्तमुत्पत्यपुनःससंज्ञः॥तामेवतस्याद्रिव
राट्रिकल्पांगदांसमाविध्यजघानसंख्ये॥६१॥सातस्यरौद्रासमुपेत्यदेहंरौद्रस्यदेवाध्वरविप्रशत्रोः॥बभूववक्षःक्षतजंच
भूमौसुस्रावधात्वंभइवाद्रिराजः॥६२॥सोभिदुद्रावचवेगेनगदांतस्यमहात्मनः॥तांगृहीत्वागदांभीमामाविध्यचपुनःपुनः॥
६३॥महापार्श्वंमहानादोजघानरणमूर्धनि॥सस्वयागदयाभग्नोविशीर्णदशनेक्षणः॥६४॥निपपातमहापार्श्वोवज्राहत
इवाचलः॥विशीर्णनयनेभूमौगतसत्वेगतायुषि॥६५॥पतितेराक्षसेतस्मिन्विद्रुतंरक्षसांबलं॥तस्मिन्हतेभ्रातरिरावणस्यत
च्चैर्द्रुतानांबलमर्णवाभं॥त्यक्तायुधंकेवलजीवितार्थिदुद्रावभिन्नार्णवसन्निकाशं॥६६॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयु
द्धकांडेसप्ततितमःसर्गः॥७०॥स्वबलंनिहतंदृष्ट्वातुमुलंरोमहर्षणं॥भ्रातरंचनिहतान्दृष्ट्वाशक्रतुल्यपराक्रमान्॥शपितृ

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

औचापिसंप्रेक्ष्यसमरेसंनिषूदितौ॥युद्धोन्मत्तंचमत्तंचभ्रातरौराक्षसोत्तमौ॥२॥चुकोपचमहातेजाब्रह्मदत्तवरोयुधि॥अति
कायोद्रिसंकाशोदेवदानवदर्पहा॥३॥सभास्करसहस्रस्यसंघातमिवभास्वरं॥रथमारुह्यशक्रारिरभिदुद्रावचानरान्॥४॥सवि
स्फार्यतदाचापंकिरीटीमृष्टकुंडलः॥नामसंश्रावयामासननादचमहास्वनः॥५॥तेनसिंहप्रणादेननामविश्रावणेनच॥ज्याश
ब्देनचभीमेनत्रासयामासवानरान्॥६॥तंदृष्ट्वादेहमाहात्म्यंकुंभकर्णोव्यमुह्यतः॥भयार्त्तावानराःसर्वेसंश्रयंतेपरस्परं॥७॥ते
तस्यरूपमालोक्ययथाविष्णोस्त्रिविक्रमं॥भयाद्वानरयूथास्तेविद्रवंतिततस्ततः॥८॥तेतिकायंसमासाद्यवानरामूढचेतसः
शरण्यंशरणंजग्मुर्लक्ष्मणाग्रजमाहवे॥९॥ततोतिकायंकाकुत्स्थोरथस्थंपर्वतोपमं॥ददर्शधन्विनंदूराद्गर्जंतंकालमेघव
त्॥१०॥सतंदृष्ट्वामहात्मानंराघवस्तुसुविस्मितः॥वानरान्सांत्वयित्वाचविभीषणमुवाचह॥११॥कोसौपर्वतसंकाशोधनुष्मान्ह
रिलोचनः॥युक्तेहयसहस्रेणविशालेस्यंदनेस्थितः॥१२॥सएषनिशितैःशूलैःसुतीक्ष्णैःप्रासमुद्गरैः॥अर्चिर्भिर्द्विर्वतोभातिभूते
रिवमहेश्वरः॥१३॥कालजिह्वाप्रकाशाभिर्यएषोतिविराजते॥आवृतोरथशक्तीभिर्विद्युद्भिरिवतोयदः॥१४॥धनूंषिचास्यसज्जा
निहेमपृष्ठानिसर्वशः॥शोभयंतिरथश्रेष्ठंशक्रचापमिवांबरं॥१५॥कएषरक्षःशार्दूलोरणभूमिविराजयन्॥अभ्येतिरथिनांश्रे
ष्ठोरथेनादित्यतेजसा॥१६॥ध्वजशृंगप्रतिष्ठेनराहुणाभिविराजते॥सूर्यरश्मिसमैर्बाणैर्दिशोदशविराजयन्॥१७॥स्तनितंमेघस

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

न्नादंहेमपृष्ठमलंकृतं॥शतक्रतुधनुःप्रख्यंधनुश्चास्यविराजते॥१७॥सध्वजःसपताकश्चसानुकर्षोमहारथः॥चतुःसादि
समायुक्तोमेघस्तनितनिस्वनः॥१९॥विंशतिर्दशचाष्टौचतूण्यस्यरथमास्थिता॥कार्मुकाणिचभीमानिज्याश्चकांचनपिंग
लाः॥२०॥द्वौचखड्गौचपार्श्वस्थौप्रदीप्तौपार्श्वशोभितौ॥चतुर्हस्तप्रमाणौचरुचितौव्यक्तहस्तदशायुतौ॥२१॥रक्तकंठगुणोधीरोमहा
पर्वतसन्निभः॥कालःकालमहावक्त्रोमेघस्थइवभास्करः॥२२॥कांचनांगदनद्धाभ्यांभुजाभ्यामेषशोभते॥शृंगाभ्यामिवतुंगा
भ्यांहिमवान्पर्वतोत्तमः॥२३॥कुंडलाभ्यांतुपश्येतद्भ्रातिवक्त्रंशुभेक्षणं॥पुनर्वस्त्रंतरगतःपरिपूर्णनिशाकरः॥२४॥आचक्ष्वमे
महाबाहोत्वमेनंराक्षसोत्तमं॥यंदृष्ट्वावानराःसर्वेभयार्ताविद्रुतादिशः॥२५॥सपृष्टोराजपुत्रेणरामेणामिततेजसा॥आचच
क्षेमहातेजाराघवायविभीषणः॥२६॥दशग्रीवोमहातेजाराजावैश्रवणानुजः॥भीमकर्मामहात्माहिरावणोराक्षसेश्वरः॥
तस्यासीद्वीर्यवान्पुत्रोरावणप्रतिमोबली॥वृद्धसेवीश्रुतधरसर्वास्त्रविदुषांवरः॥अथपृष्टेरथेनागेखड्गेधनुषिकर्षणः
भिदेसात्वेचदानेचनयेमंत्रेचसंमतः॥२९॥यस्यबाहुंसमाश्रित्यलंकाभवतिनिर्भया॥तनयंधान्यमालिन्याअतिकायमि
मंविदुः॥३०॥एतेनाराधितोब्रह्मातपसाभावितात्मना॥अस्त्राणिचाप्यवाप्तानिरिपवश्चपराजिताः॥३१॥सुरासुरैरवध्यंचद
त्तमस्मैस्वयंभुवा॥एतच्चकवचंदिव्यंरथश्चैवसुभास्वरः॥३२॥एतेनशातशोदेवदानवाश्चपराजिताः॥रक्षितानिचरक्षांसिय

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

क्षाश्चापिनिषूदिताः॥३३॥वज्रंविष्टंभितंयेनबाणेरिंद्रस्यधीमतः॥पाशाःसलिलराजस्ययुद्धेप्रतिहतस्तदा॥३४॥एषोतिकायोब
लवान्राक्षसानामयर्षभः॥सरावणसुतोधीमान्देवदानवदर्पहा॥३५॥तदस्मिन्क्रियतांयत्नःक्षिप्रंपुरुषपुंगव॥पुरावान
रसैन्यानिक्षयंनयतिसायकैः॥३६॥ततोतिकायोबलवान्प्रविश्यहरिवाहिनी॥विस्फारयामासधनुर्नादंचपुनःपुनः॥३७॥
तंभीमवपुषंदृष्ट्वारथस्थंरथिनांवरं॥अभिपेतुर्महात्मानोयेप्रधानावनौकसः॥३८॥कुमुदोद्विविदोमैंदोनीलःशरभएवच॥
पादपैर्गिरिशृंगैश्चयुगपत्समभिद्रवन्॥३९॥तेषांवृक्षांश्चशैलांश्चशरैःकांचनभूषणैः॥अतिकायोमहातेजाश्चिच्छेदास्त्रविदां
वरः॥४०॥तांश्चैवसर्वान्सहरीन्शरैःसर्वायसैर्बली॥विव्याधाभिमुखःसंख्येभीमकायोविशारदः॥४१॥तेर्दिताबाणवर्षेणभिन्नगात्रा
पराजिताः॥नशेकुरतिकायस्यप्रतिकर्तुंमहाहवे॥तत्सैन्यंहरिवीराणांत्रासयामासराक्षसः॥मृगयूथमिवक्रुद्धोहरिर्यौवनदर्पि
तः॥४३॥सराक्षसेंद्रोहरियूथमध्येनायुध्यमानंनिजघानकंचित्॥उपेत्यरामःसधनुःकलापीसगर्वितंवाक्यमिदंबभाषे॥४४
रथेस्थितोहंशरचापपाणिर्नप्राकृतंकंचनयोधयामि॥यस्यास्तिशक्तिर्व्यवसाययुक्तोददातुमेशीघ्रमिहाद्ययुद्धं॥४५॥ततस्य
वाक्यंब्रुवतोनिशम्यचुकोपसौमित्रिरमित्रहंता॥अमृष्यमाणश्चसमुत्पपातजग्राहचापंचततःसमित्वा॥४६॥क्रुद्धसौमि
त्रिरुत्पत्यतूणादाक्षिप्यसायकं॥पुरस्तादतिकायस्यविचकर्षमहद्धनुः॥४७॥पूरयन्सहीशालानाकाशंसागरंदिशः॥ज्याश

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

श्रीलक्ष्मणस्योग्रस्त्रासयन्रजनीचरान्॥४८॥ सौमित्रेश्चापनिर्घोषंश्रुत्वा प्रतिभयंतदा॥ विसिस्मियेमहातेजाराक्षसेंद्रा
त्मजस्तदा॥४९॥ तदातिकायः कुपितोदृष्ट्वालक्ष्मणमुत्थितं॥ आदायनिशितंबाणमिदंवचनमब्रवीत्॥५०॥ बालस्त्वमसिसौमि
त्रेविक्रमेष्वविचक्षणः॥ गच्छकिंकालसदृशंमांयोधयितुमिच्छसि॥५१॥ नहिमद्बाहुसृष्टानांबाणानांहिमवानपि॥ सोढुमुत्सहतेवे
गमंतरिक्षमधोमही॥५२॥ सुखप्रसुप्तंकालाग्निंविबोधयितुमिच्छसि॥ न्यस्यचापंनिवर्त्तस्वमाप्राणान्जहिमद्धतः॥५३॥ अथवा
त्वंप्रतिष्ठ्यान्नानिवर्त्तितुमिच्छसि॥ तिष्ठप्राणान्परित्यज्यगमिष्यसियमक्षयं॥५४॥ पश्यमेनिशितान्बाणान्रिपुदर्पनिषूदनान्
ईश्वरायुधसंकाशांस्तप्तकांचनभूषणान्॥५५॥ एषतेसर्पसंकाशोबाणःपास्यतिशोणितं॥ मृगराजइवक्रुद्धोनागराजस्यशोणि
तं॥५६॥ इत्येवमुक्त्वासंक्रुद्धःशरंधनुषिसंदधे॥ श्रुत्वातिकायस्यवचःसरोषंसगर्वितंसंयतिराजपुत्रः॥ससंचुकोपातिबलोदृढ
ज्यीरुवाचवाक्यंचततोमहार्थं॥५७॥ नवाक्यमात्रेणभवान्प्रधानोनकत्थनासत्पुरुषाभवंति॥ मयिस्थितेधन्विनिबाणपाणौविर
यस्वात्मबलंदुरात्मन्॥५८॥ कर्मणासूचयात्मानंनविकत्थितुमर्हसि॥ पौरुषेणतुयोयुक्तःसतुशूरइतिस्मृतः॥६०॥ सर्वायुधमायु
क्तोधन्वीत्वंरथमास्थितः॥ शरैर्वायदिवाप्यस्त्रैर्दर्शयस्वपराक्रमं॥६१॥ ततःशिरस्तेनिशितैःपातयिष्याम्यहंशरैः॥ मारुतःकालसं
पक्वंवृंतात्तालफलंयथा॥६२॥ अद्यतेमामकाबाणास्तप्तकांचनभूषणाः॥ पास्यंतिरुधिरंगात्राद्बाणशल्यांतरोत्थितं॥६३॥ बालोय

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

मितिविज्ञायनावज्ञातुंत्वमर्हसि॥बालोवायदिवावृद्धोमृत्युजानीहिसंयुगे॥६४॥बालेनविष्णुनालोकास्त्रयःक्रांतास्त्रिविक्रमैः॥ल
क्ष्मणस्यवचःश्रुत्वाहेतुमत्परमार्थवत्॥६५॥अतिकायप्रचुक्रोधबाणंचोत्तममादद॥ततोविद्याधराभूतादेवादैत्यामहर्षयः॥
६६॥गुह्यकाश्चमहात्मानस्तद्युद्धंदृष्टुमुत्सुकाः॥ततोतिकायःकुपितश्चापज्यारोप्यसायकं॥६७॥लक्ष्मणायप्रचिक्षेपसंक्षिपन्नि
वचांबरं॥तमापततंनिशितंशरमाशीविषोपमं॥६८॥अर्द्धचंद्रेणचिच्छेदलक्ष्मणःपरवीरहा॥तंनिकृत्तंशरंदृष्ट्वाकृतभोगमि
वोरगं॥६९॥अतिकायोभृशंक्रुद्धःपंचबाणान्समादद॥तान्शरान्संप्रचिक्षेपलक्ष्मणायनिशाचरः॥७०॥तानप्राप्तान्शरैस्ती
क्ष्णैर्लक्ष्मणःपरवीरहा॥पंचभिःपंचचिच्छेदपावकार्कसमप्रभैः॥७१॥आददेनिशितंबाणंज्वलंतमिवतेजसा॥तमादायधनुःश्रे
ष्ठेयोजयामासलक्ष्मणः॥७२॥विचकर्षचवेगेनविससर्जचवीर्यवान्॥पूर्णायतविसृष्टेशरेणानतपर्वणा॥७३॥ललाटेराक्षस
श्रेष्ठमाजघानचवीर्यवान्॥सललाटेशरोमग्नस्तस्यभीमस्यरक्षसः॥७४॥ददृशेशोणितेनाक्तःपन्नगेंद्रइवाचले॥राक्षसःप्रच
कंपेचलक्ष्मणेषुप्रपीडितः॥७५॥रुद्रबाणहतंभीमंयथात्रिपुरगोपुरं॥चिंतयामासचाश्चस्यविमृष्यचमहाबलः॥७६॥साधुबा
णनिपातेनश्लाघनीयोसिमेरिपुः॥विद्यायैवंनियम्यास्यंविनम्यचभुजावुभौ॥७७॥रथोपस्थंसमास्थायरथेनप्रचचारह॥एक
त्रीसंचसन्नेतिसायकान्राक्षसेश्वरः॥७८॥आददेसदधेचापिविचकर्षोत्ससर्जच॥तेबाणाःकालसंकाशाराक्षसेंद्रधनुश्च्युता

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

७९॥हेमपुंखारविप्रख्याश्चक्रुद्धमिवांबरं॥ततस्तान्राक्षसोत्सृष्टान्शरौघान्राघवानुजः॥८०॥असंभ्रांतःप्रचिच्छेदनिशितैर्बहु
भिःशरैः॥तान्शरान्युधिसंप्रेक्ष्यनिकृत्तान्रावणात्मजः॥८१॥चुकोपत्रिदशेंद्रारिर्जग्राहनिशितंशरं॥संधायमहातेजास्तंबाणं
सहतोत्सृजत्॥८२॥तेनसौमित्रिमायांतमाजघानस्तनांतरे॥अतिकायेनसौमित्रिस्ताडितोयुधिवक्षसि॥८३॥सुस्रावरुधिरंती
व्रंमदमत्तइवद्विपः॥सचकारतदात्मानंविशल्यंसहसाविभुः॥८४॥जग्राहचशरंतीक्ष्णमस्त्रेणापिसमादधे॥आग्नेयेनतदा
स्त्रेणयोजयामाससायकं॥८५॥सजज्वालतदाबाणोधनुश्चास्यमहात्मनः॥अतिकायोपितेजस्वीरौद्रमस्त्रंसमाददे॥८६॥
तेनबाणंभुजंगाभंहेमपुंखमयोजयत्॥तदस्त्रंज्वलितंघोरंलक्ष्मणःशरमाहितं॥८७॥अतिकायायचिक्षेपकालदंडमिवां
तकः॥आग्नेयास्त्राभिसंयुक्तंदृष्ट्वाबाणंनिशाचरः॥८८॥उत्ससर्जतदाबाणंरौद्रंसूर्यास्त्रयोजितं॥तावुभावंबरेबाणावन्योन्य
मभिजघ्नतुः॥८९॥तेजसासंप्रदीप्ताग्नीकुद्धाविवभुजंगमौ॥तावन्योन्यस्यनिर्दग्ध्यपेततुःपृथिवीतले॥९०॥निरर्चिषौभस्मकृतौ
नभ्राजेतेशरोत्तमौ॥तावुभौदीप्तमानौतुनभ्राजेतेमहाहवे॥९१॥ततोतिकायःसंक्रुद्धस्त्रेस्त्रमेषीकमुत्सृजत्॥तत्प्रचिच्छेद
सौमित्रिरस्त्रेणैंद्रेणवीर्यवान्॥९२॥ऐषीकंनिहतंदृष्ट्वारुषितोरावणात्मजः॥याम्येनास्त्रेणसंक्रुद्धोयोजयामाससायकं॥९३॥
ततस्तदस्त्रंचिक्षेपलक्ष्मणायनिशाचरः॥वायव्येनतदस्त्रंतुनिजघानसलक्ष्मणः॥९४॥अथैनंशरधाराभिर्धाराभिरिवतोय

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

द॥अभ्यवर्षतसंक्रुद्धोलक्ष्मणोरावणात्मजं॥९५॥तेतिकायंसमासाद्यकवचेवज्रभूषिते॥भग्नाग्रशल्यासहसापेतुर्बाणमहीतले
९६॥तान्मोघानभिसंप्रेक्ष्यलक्ष्मणःपरवीरहा॥अभ्यवर्षतबाणानांसहस्रेणमहायशाः॥९७॥सवर्ष्यमाणोबाणौघैरतिकायोम
हाबलः॥अवध्यःकवचःसंख्येराक्षसोनैवविव्यथे॥९८॥नशशाकरुजंकर्तुंयुधितस्यनरोत्तमः॥अथैनमभ्युपागम्यवाक्य
मवोचत॥९९॥ब्रह्मदत्तवरोह्येषअवध्यकवचावृतः॥ब्राह्मेणास्त्रेणभिध्येनमेषवध्योहिनान्यथा॥१००॥अवध्यएषह्यन्ये
षामस्त्राणांकवचीबली॥सतस्यवायोर्वचनंनिशम्यसौमित्रिरिंद्रप्रतिमानवीर्यः॥समादद्देबाणममोघवेगंतद्ब्राह्ममस्त्रम
हसानियोज्य॥१०१॥तस्मिन्वरास्त्रेतुनियुज्यमानेसौमित्रिणाबाणवरेशिताग्रे॥दिशःसदेवाश्चसहग्रहर्क्षैर्नभश्चकंपेचररा
सचोवः॥२॥तंब्रह्मणोस्त्रेणनियुज्यचापेशरंसुपुंखंयमदूतकल्पं॥सौमित्रिरिंद्रारिसुतस्यतस्यससर्जबाणंयुधिवज्रकल्पं॥३
तंलक्ष्मणोत्सृष्टविवृद्धवेगंसमापततंज्वलनप्रकाशं सुवर्णवज्रोत्तमचित्रपुंखंतदातिकायः [redacted]
समरेददर्श॥४॥तंप्रेक्ष्यमाणःसहसातिकायोजघानबाणैर्निशितैरनेकैः॥सतायकस्तस्यसुपर्णवेगस्तथातिकायस्यजगामप
र्श्वं॥५॥तमागतंप्रेक्ष्यतदातिकायोबाणंप्रदीप्तांतककालकल्पं॥जघानशक्त्यृष्टिगदाकुठारैःशूलैःशरैश्चाप्यविपन्नचेष्टः॥
६॥तान्यायुधान्यद्भुतविग्रहाणिमोघानिकृत्वासशरोग्निदीप्तः॥प्रसह्यतस्यैवकिरीटजुष्टंतदातिकायस्यशिरोजहार॥७॥तत्

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

शिरःसशिरस्त्राणंलक्ष्मणेषुमाहितं॥पपातसहसाभूमौशृंगंहिमवतोयथा॥८॥तंभूमौपतितंदृष्ट्वाविक्षिप्तांबरभूषणं॥बभू
वुर्व्यथिताःसर्वेहतशेषानिशाचराः॥९॥तेविषण्णमुखादीनाःप्रहारैर्जनितश्रमाः॥विनेदुरुच्चैःसहसावहवोविस्वरैःस्वरैः॥
११॥ततस्तेत्वरितंयातानिरपेक्षानिशाचराः॥पुरीमभिमुखायाताद्रवंतोनायकेहते॥१०॥प्रहर्षयुक्तावहवस्तुवानराःप्रफु
ल्लपद्मप्रतिमाननास्तदा॥अपूजयल्लक्ष्मणमिष्टभागिनंहतेरिपौभीमबलेदुरासदे॥१२॥इत्यार्षेश्रीरामायणेवाल्मीकीये
युद्धकांडेएकसप्ततितमःसर्गः॥७१॥अतिकायंहतंश्रुत्वालक्ष्मणेनमहात्मना॥उद्वेगमगमद्राजावचनंचेदमब्रवीत्॥१॥धू
म्राक्षपरमामर्षःसर्वशस्त्रभृतांवरः॥अकंपनःप्रहस्तश्चकुंभकर्णस्तथैवच॥२॥एतेमहाबलावीरारक्षसायुद्धकांक्षिणः॥
जेतारःपरसैन्यानांपरैर्नित्यापराजिताः॥३॥निहतास्तेमहावीर्यारामेणाक्लिष्टकर्मणा॥राक्षसाःसुमहाकायानानाशस्त्रवि
शारदाः॥४॥अन्येचबहवःशूरामहात्मानोनिपातिताः॥प्रख्यातबलवीर्येणपुत्रेणेंद्रजितामम॥५॥योहितोभ्रातरोवीरौबद्धौदत्त
वरैःशरैः॥यन्नशक्यंसुरैःसर्वैरसुरैर्वामहाबलैः॥घोरमोक्तुंतद्धनंघोरंसर्वैःसमुदितैरपि॥तंनजानेप्रभावेवीमायया
मोहनेन
वा॥७॥शरबंधाद्विमुक्तौतौभ्रातरौरामलक्ष्मणौ॥योयोधाराक्षसाःशूरानिर्गतामम
शासनात्॥८॥तेसर्वेनिहतायुद्धेयोद्धुरामंस
लक्ष्मणं॥९॥शासयेत्सबलंवीरंससुग्रीवंविभीषणं॥अहोसुबलवान्रामोमहदस्त्रबलंचवै॥१०॥यस्यविक्रममासाद्यराक्ष

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

सानिधनंगता॥तंमन्येराघवंवीरंनारायणमनामयं॥१२॥यद्वयाद्विपुरीलंकापिहितद्वारगोपुरा॥अप्रमत्तैश्चयुष्माभिर्गुल्मैरा
ढ्यापुरीत्वियं॥१३॥अशोकंवनिकायांचयत्रसीताभिरक्ष्यते॥निष्क्रमोवाप्र[illegible]वेशोवाज्ञातव्यःसर्वदैवनः॥१४॥यत्रयत्रभवद्गु
ल्मस्तत्रतत्रपुनःपुनः॥सर्वतश्चापितिष्ठध्वंसैन्यैपरिवृताबले॥१५॥दृष्टव्यंचबलंतेषांवानराणांनिशाचराः॥प्रदोषेवार्धरात्रे
वाप्रत्यूषेवापिसर्वशः॥१६॥नावज्ञातेषुकर्त्तव्यावानरेषुकदाचन॥द्विषतांबलमुद्युक्तमापतंतंस्थितंयथा॥१७॥ततःस्तेराक्ष
साःसर्वेश्रुत्वाकालाधिपस्यतत्॥वचनंसर्वमातिष्ठन्यथावत्तुमहाबलाः॥१८॥तान्सर्वान्समसमादिश्यरावणोराक्षसाधिपः॥म
न्युःशूलंवहन्दीप्तंप्रविवेशनिवेशनं॥१९॥ततःससंदीपितकोपवह्निर्निशाचराणामधिपोभृशार्त्तः॥तदेवपुत्रव्यसनंविचिंत
यन्मुहुर्मुहुर्निश्वसतिस्मधर्मं॥२०॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेद्विसप्ततितमःसर्गः॥७२॥ततोहतान्राक्षसपुं
गवांस्तान्देवांतकादींत्रिशिरोतिकायान्॥रक्षोगणास्तत्रहतावशेषास्तेरावणायत्वरिताःशशंसुः॥१॥ततोहतास्तान्सहसा
निशम्यराजामुमोहाश्रुपरिप्लुताक्षः॥पुत्रक्षयंभ्रातृवधंचघोरंविचिंत्यराजासुचिरंप्रदध्यौ॥२॥ततस्तुराजानमुदीक्ष्यदीनंशो
कार्णवेसंपरिपुप्लवानं॥अथर्षभोराक्षससूनुस्तत्रेंद्रजिद्वाक्यमिदंबभाषे॥३॥नतातमोहंप्रतिगंतुमर्हसियत्रेंद्रजिज्जीवा
तिराक्षसेंद्र॥नेंद्रारिवाणाभिहतोहिकश्चित्त्राणान्समर्थःसमरेभियातुं॥४॥पश्याद्यरामंसहलक्ष्मणेनमद्बाणनिर्भिन्नविकीर्णदे

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

हं॥गतायुषंभूमितलेशयानंशरैःशितैराचितसर्वगात्रं॥५॥इमांप्रतिज्ञांशृणुशक्रशत्रोःसुनिश्चितांपौरुषदैवयुक्तां॥अद्यैवरा
मंसहलक्ष्मणेनसंतर्प्यिष्यामिशरैरमोघैः॥६॥अद्यैद्रवैवस्वतविष्णुरुद्रसाध्याश्वविश्वानरसूर्याः॥द्रक्ष्यंतिमेविक्रममप्रमे
यंविष्णोरिवोग्रंबलियज्ञवाटे॥७॥सएवमुक्त्वात्रिदशेंद्रशत्रुराप्लुत्यराजानमदीनस त्वः॥समारुरोहानिलतुल्यवेगंरथं
स्वरश्रेष्ठसमाधियुक्तं॥८॥समास्थायमहातेजारथंहरिरथोपमं॥जगामसहसातत्रयुद्धभूमिमरिंदमः॥९॥तंप्रस्थितंमहात्म
नमनुजग्मुर्महाबलाः॥संहर्षमाणाबहवोधनुष्प्रवरपाणयः॥१०॥गजस्कंधगताःकेचित्केचित्परमवाजिभिः॥व्याघ्रवृश्चिकमा
र्जारखरोष्ट्रैश्चभुजंगमैः॥११॥वराहैश्चापदैःसिंहैर्जंबुकैःपर्वतोपमैः॥काकहंसमयूरैश्चराक्षसाभीमविक्रमाः॥१२॥प्रासपट्टिश
निस्त्रिंशपरस्वधगदाधराः॥भृशुंडिमुद्गरायष्टिशतघ्नीपरिघायुधाः॥१३॥सशंखनिनदैःपूर्णैर्भेरीणांचापनिस्वनैः॥जगामत्रि
दशेंद्रारिर्महासैन्येनवीर्यवान्॥१४॥सशंखहंसवर्णेनछत्रेणरिपुसूदनः॥राजनिशिपूर्णेननभश्चंद्रमसायथा॥१५॥वीज्यमा
नस्ततोवीरोहेमैर्हेमविभूषणैः॥चारुचामरमुख्यैश्चमुख्यसर्वधनुष्मतां॥१६॥ततस्त्विंद्रजितालंकासूर्यप्रतिमतेजसा॥रा
जाप्रतिवीर्येणद्यौरिवार्केणभास्वता॥१७॥ससंप्राप्यमहातेजायुद्धभूमिमरिंदमः॥स्थापयामासरक्षांसिरथंप्रतिसमंतत॥१८॥
ततस्तुहुतभोक्तारंहुतभुक्सदृशप्रभः॥जुहुवेराक्षसश्रेष्ठोमंत्रविद्विधिवत्तदा॥१९॥सहविर्लाजसत्कारैर्माल्यगंधपुरस्कृतैः॥जु

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

हावपावकंदीप्तंराक्षसेंद्रःप्रतापवान्॥२०॥शास्त्राणिशरपत्राणिसमिधोथविभीतकाः॥लोहितानिचवासांसिस्रुवंकार्ष्णायसंत
था॥२१॥ततत्राग्निसमास्तीर्यशरपत्रैःसतोमरैः॥जागस्यसर्वकृत्स्नस्यगलंजग्राहजीवतः॥२२॥सकृदेवसमिद्धस्यविधूमस्यमहर्चि
षः॥बभूवुस्तानिलिंगानिविजयंचान्यदर्शयन्॥२३॥प्रदक्षिणावर्तशिखस्तप्तकांचनसन्निभः॥हविस्मत्प्रतिजग्राहपावकः
स्वयमुत्थितः॥२४॥सोस्त्रमाहारयामासब्राह्ममस्त्रविशारदः॥धनुश्चात्मरथंचैवकवचंचाभ्यमंत्रयत्॥२५॥तस्मिन्नाहूयमाने
स्त्रेहूयमानेचपावके॥सार्कग्रहेंदुनक्षत्रंवितत्रासनभस्तलं॥२६॥सपावकंपावकदीप्ततेजादुत्वामहेंद्रप्रतिमप्रभावः॥सचा
पबाणासिरथाश्वशूलःखेंतर्दधेराक्षसराजसूनुः॥२७॥ततोहयरथाकीर्णंपताकाध्वजशोभितं॥निर्ययौराक्षससैन्यंनर्दमा
नंयुयुत्सया॥२८॥तेशरैर्बहुभिश्चित्रैस्तीक्ष्णवेगैरलंकृतैः॥तोमरैरंकुशैश्चापिवानरान्जघ्नुराहवे॥२९॥रावणिस्तुततःक्रुद्धस्त
मभीक्ष्यनिशाचरान्॥हृष्टाभवंतोयुध्यंतुवानराणांजिघांसया॥३०॥ततस्तेराक्षसाःसर्वेगर्जंतोजयकांक्षिणः॥अभ्यवर्षंस्ततोघो
रान्वानरान्शरवृष्टिभिः॥३१॥सतुनालीकनाराचैर्गदाभिर्मुसलैरपि॥रक्षोभिःसंवृतःसंख्येवानरान्चिचकर्तह॥३२॥तेवध्यमा
नासमरेवानराःपादपायुधाः॥अभ्यवर्तंतसहिताराक्षसांरणकर्कशं॥३३॥इंद्रजित्तुततःक्रुद्धोमहातेजामहाबलः॥वानरा
णांशरीराणिव्यधमद्रावणात्मजः॥३४॥शरेणैकेनचहरीन्नवपंचचसप्तच॥विभेदसमरेक्रुद्धोराक्षसान्संप्रहर्षयन्॥३५॥स

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

शरैः सूर्यसंकाशैः शातकुंभविभूषणैः॥ वानरान् समरे वीरः प्रममाथ सुदुर्जयः॥३६॥ ते भिन्नगात्राः समरे वानराः शरपीडिताः
पेतुर्मथितसंकल्पाः सुरैरिव महासुराः॥३७॥ प्रतपंतमिवादित्यं घोरैर्बाणगभस्तिभिः॥ अभ्यधावंत संक्रुद्धाः समरे वानरर्षभाः॥३८॥ ततस्तु वानराः सर्वे भिन्नदेहा विचेतसः॥ व्यथिता विद्रवंति स्म रुधिरेण समुक्षिताः॥३९॥ रामस्यार्थे पराक्रम्य वानरास्त्यक्तजीविताः॥ नर्दंतस्ते निवृत्तास्तु समरे सशिलायुधाः॥४०॥ ते द्रुमैः पर्वताग्रैश्च शिलाभिश्च प्लवंगमाः॥ अभ्यवर्तंत समरे रावणिं समवस्थिताः॥४१॥ तं द्रुमाणां शिलानां च वर्षं प्राणहरं महत्॥ व्यपोहत महातेजा रावणिः समितिंजयः॥४२॥ ततः पावकसंकाशैः शरैराशीविषोपमैः॥ वानराणामनीकानि विभेद समरे प्रभुः॥४३॥ अष्टादशशरैस्तीक्ष्णैः सविध्वा गंधमादनं॥ विव्याध नवभिश्चैव चतुर्भिर्दूरावस्थितं॥४४॥ सप्तभिस्तु महावीर्यो मैंदं मर्मविदारणैः॥ पंचभिर्विशिखैश्चैव गजं विव्याध संयुगे॥४५॥ जांबवंतं च दशभिर्नवभिस्तु त्रिभिरेव च॥ सुग्रीवमृषभं चैव सांगदं द्विविदं तथा॥४६॥ घोरैर्दशवरैस्तीक्ष्णैर्निष्प्राणानकरोत्तदा॥ अन्यानपि तदा मुख्यान् वानरान् बहुभिः शरैः॥४७॥ अर्दयामास संक्रुद्धः कालाग्निरिव मूर्छितः॥ स शरैः सूर्यसंकाशैः सुमुक्तैः शीघ्रगामिभिः॥४८॥
वानराणामनीकानि निर्ममंथ महारणे॥ आकुलावानरीसेनां शरजालेन पीडितां॥४९॥ हृष्टः सपरया प्रीत्या ददर्श क्षतजोक्षितां॥ पुनरेव महातेजा राक्षसेंद्रात्मजो बली॥५०॥ संसृज्य बाणवर्षं च शस्त्रवर्षं च दारुणं॥ ममर्द वानरानीकं मिंद्रजि[illegible]त्वरितो बली॥५१

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

स्वसैन्यमुत्सृज्यसमेत्यतूर्णंमहाहवेवानरवाहिनीषु॥अदृश्यमानःशरजालमुग्रंववर्षनीलांबुधरोयथांबु॥५१॥तेनेंद्रजिद्बा
णविशीर्णदेहामायाहताविस्वरमुन्नदंतः॥रणेनिपेतुर्हरयोद्विकल्पायथेंद्रवज्राभिहतानगेंद्राः॥५२॥तेनेंद्रजिद्बाणविशीर्ण
देहामायाहताविस्वरमुन्नदंतः॥रणेनिपेतुर्हरयोद्विकल्पायथेंद्रवज्राभिहतानगेंद्राः॥५३॥तेकेवलंसंददृशुःशितायाचा
णान्रणेवानरवाहिनीषु॥मायाविमूढंचसुरेंद्रशत्रुंनचात्रतंराक्षसमप्यपश्यन्॥५४॥ततःसरक्षोधिपतिर्महात्मासर्वादि
शोबाणगणैःशितायैः॥प्रच्छादयामासरविप्रकाशैर्विदारयामासचवानरेंद्रान्॥५५॥सशूलनिस्त्रिंशपरश्वधानिव्याविद्ध
दीप्तानलसन्निभानि॥सविस्फुलिंगोज्ज्वलपावकानिववर्षतीव्रंप्लवगेंद्रसैन्ये॥५६॥ततोज्वलनसंकाशैर्बाणैर्वानरयूथपा
ताडिताःशक्रजिद्बाणैःप्रफुल्लाइवकिंशुकाः॥५७॥तेन्योन्यमभिसर्पंतोनदंतोभैरवस्वनं॥राक्षसेंद्रास्त्रनिर्भिन्नानिपेतुर्वानरर्ष
भाः॥५८॥उदीक्षमाणागगनंकेचिन्नेत्रेषुताडिताः॥शनैर्विचिक्षुरन्योन्यंपेतुश्चभुजगतीतले॥५९॥हनूमंतंचसुग्रीवमंगदंगंधमा
दनं॥जांबवंतंसुषेणंचवेगदर्शिनमेवच॥६०॥मैंदंचद्विविदंनीलंगवाक्षंगवयंतथा॥केसरिंहरिलोमानंविद्युद्दंष्ट्रंचवानरं॥६१
सूर्याननंज्योतिमुखंतथादधिमुखंहरिं॥पावकाक्षंनलंचैवकुमुदंचैववानरं॥६२॥त्रासैःशूलैःशितैर्बाणैरिंद्रजिन्मंत्रसंहितैः
विव्याधहरिशार्दूलान्सर्वांस्तान्राक्षसेश्वरः॥६३॥सवेगदाभिर्हरियूथमुख्यान्निर्भिद्यबाणैस्तपनीयपुंखैः॥ववर्षरामंशरवृ

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

ष्टिजालैः॥सलक्ष्मणंभास्कररश्मिकल्पं॥६४॥सबाणवर्षैरभिवर्षमाणोधारानिपातानिवतानचित्रं॥समीक्ष्यमाणःपरमाद्भुतश्रीरा
मस्तदालक्ष्मणमित्युवाच॥६५॥असौपुनर्लक्ष्मणराक्षसेंद्रोब्रह्मास्त्रमाश्रित्यसुरेंद्रशत्रुः॥निपातयित्वाहरिसैन्यमुग्रमस्मान्
शरैरर्दयतिप्रसक्तं॥६६॥स्वयंभुवादत्तवरोमहात्मास्वमास्थितोतर्हितभीमकायः॥कथंनुशक्योयुधिनष्टदेहोनिहंतुमद्यैदुर्जि
दुद्यतास्त्रः॥६७॥मन्येस्वयंभूर्भगवानचिंत्योयस्यैदृतेस्त्रंप्रभवत्राभावं॥बाणावपातंत्वमिहाद्यभूमन्मया सहाद्यप्रमनाः
सहस्व॥६८॥प्रच्छादयत्येषहिराक्षसेंद्रःसर्वादिशःसायकवृष्टिजालैः॥एतच्चसर्वंपतिताग्रभूरंनभ्राजतेवानरराजसैन्यं॥
६९॥आवांतुदृष्ट्वापतितोविसंज्ञोनिवृत्तयुद्धोहतहर्षरोषो॥ध्रुवंप्रवेक्ष्यत्यमरारिवासमसौसमादायरणाग्रलक्ष्मीं॥७०॥तत
स्तुताविंद्रजिदस्त्रजालैर्बभूवतुस्तत्रतदाविशस्तौ॥सचापितौतत्रविषादयित्वाननादहर्षाद्युधिराक्षसेंद्रः॥७१॥सतंतदावान
रराजसैन्यंरामंचसंख्येसहलक्ष्मणेनाविषादयित्वासहसाविवेशपुरींदशग्रीवभुजाभिगुप्तां॥७२॥इत्यार्षेश्रीरामायणेवाल्मी
कीयेयुद्धकांडेत्रिसप्ततितमःसर्गः॥७३॥तयोस्तदासादितयोरणाग्रेसुमोहसैन्यंहरियूथपानां॥सुग्रीवनीलांगदजांबवंतो
नचापिकिंचित्प्रतिपेदिरेते॥७४॥ततोविषण्णंसमवेक्ष्यसैन्यंविभीषणोबुद्धिमतांवरिष्ठः॥उवाचशाखामृगराजवीरानाश्वासय
न्प्रतिभैर्वचोभिः॥७५॥माभैष्टनास्त्यत्रविषादकालोयदार्यपुत्रौत्र वशौविषण्णौ॥स्वयंभुवोवाक्यमथोद्वहंतौयत्सादितावेंद्रजि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

दस्त्रजालैः॥३॥तस्मैतुदत्तंपरमास्त्रमेतत्स्वयंभुवाब्राह्ममसोघवीर्यं तन्मानयंतौयुधिराजपुत्रौनिपातितौकोत्रविषादकालः॥
४॥ब्राह्ममस्त्रंतदाधीमान्मानयित्वातुमारुतिः॥विभीषणवचःश्रुत्वाहनूमानिदमब्रवीत्॥५॥एतस्मिन्निहतेसैन्येवानराणांतर
स्विनां॥योयोधारयतेप्राणान्स्तंतमाश्वायावहे॥६॥तावुभौयुगपद्वीरौहनूमद्राक्षसोत्तमौ॥उल्काहस्तौतदारात्रौरणशीर्षेवि
चेरतुः॥७॥भिन्नलांगूलहस्तोरुपादपार्श्वशिरोधरैः॥स्रवद्भिःसततंगात्रैःप्रस्रवद्भिरिवाचलैः॥८॥पतितैःपर्वताकारैर्वानरैरभि
संवृतां॥शस्त्रैश्चपतितैर्दीप्तैर्दृश्यतेवसुंधरा॥९॥सुग्रीवमंगदंनीलंशरभंगंधमादनं॥जांबवंतंसुषेणंचवेगदर्शिनमाहुकं॥१०
मैंदंनलंज्योतिमुखंद्विविदंपनसंतथा॥विभीषणोहनूमांश्चददृशातेहतान्रणे॥११॥सप्तषष्टिर्हताःकोट्योवानराणांतरस्विनां
अहूपंचमशेषेणवत्सभेनस्वयंभुवः॥१२॥ख्यातानांदेवपुत्राणामेताकोट्योनिपातिताः॥इतरेषांतुयूथानांहतानिशतसंघ
शः॥१३॥ब्रह्मास्त्रजपमानस्तुमुक्तशस्त्रोविभीषणः॥ब्रह्मणोवरदानाच्चहनूमांश्चापिवानरः॥१४॥सागरौघनिभंभीमंदृष्ट्वाबाणा
हितंबलं॥मार्गतेजांबवंतंस्महनूमान्सविभीषणः॥१५॥स्वभावजरयायुक्तंवृद्धंशरशतैश्चितं॥प्रजापतिसुतंवीरंशाम्पंतमिवपा
वकं॥१६॥दृष्ट्वातमुपसंगम्यपौलस्त्योवाक्यमब्रवीत्॥कच्चिदार्यशरैस्तीक्ष्णैर्नत्राणाध्वंसितास्तव॥विभीषणवचःश्रुत्वाजां
बवानृक्षपार्थिवः॥हृष्टाद्भ्युद्धिरन्वाक्यमिदंवचनमब्रवीत्॥१७॥नैर्ऋतेंद्रमहावीर्यस्त्वरेणत्वाभिलक्षये॥पीड्यमानःशितैर्बाणै

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

र्नत्वांपश्यामिचक्षुषा॥१९॥अंजनासुप्रजायेनमातरिश्वाचनैर्ऋत॥हनूमान्वानरश्रेष्ठःप्राणान्धारयतेक्वचित्॥२०॥श्रुत्वाजांब
वतोवाक्यमुवाचेदंविभीषणः॥राजपुत्रावतिक्रम्यकस्तच्छसिमारुति॥२१॥नैवराजनिसुग्रीवेनांगदेनापिराघवे॥आर्यसदृशि
तःस्नेहोयथावायुसुतेपरः॥२२॥विभीषणवचःश्रुत्वाजांबवा [illegible] न्वाक्यमब्रवीत॥शृणुनैर्ऋतशार्दूलयस्मात्तच्छा
मिमारुति॥२३॥अस्मिन्जीवतिवीरेतुहतमप्यहतंबलं॥हनूमत्सुप्रीतप्राणेजीवंतोपिवयंहता॥२४॥चरतेमारुतस्तातमारु
तप्रतिमोयुधि॥वैश्वानरसमोवीर्येजीविताशातदाभवेत्॥२५॥ततोवृद्धमुपागम्यनियमेनाभ्यवादयत॥गृह्यजांबवतः
पादौहनूमान्मारुतात्मजः॥२६॥श्रुत्वाहनूमतोवाक्यंतदापिव्यथितेंद्रियः॥पुनर्जातमिवात्मानंमन्यतेस्मर्क्षपुंगवः॥२७॥ततो
ब्रवीन्महातेजाहनूमंतंसजांबवान्॥आगच्छहरिशार्दूलवानरांस्त्रातुमर्हसि॥२८॥नान्योविक्रमपर्याप्तनत्वेषांपरमःसखा
त्वत्पराक्रमकालोयंनान्यंपश्यामिकंचन॥२९॥ऋक्षवानरवीराणामनीकानिप्रहर्षयः॥विशल्यौकुरुचाप्येतौसादितौराम
लक्ष्मणौ॥३०॥ग [illegible] त्वापरमध्वानमुपर्युपरिसागरं॥हिमवंतंनगश्रेष्ठंहनूमन्गंतुमर्हसि॥३१॥ततःकांचनमत्युच्चंऋषभप
र्वतोत्तमं॥कैलासशिखरंचात्रद्रक्ष्यस्यरिनिषूदन॥३२॥तयोःशिखरयोर्मध्येप्रदीप्तमतुलप्रभं॥सर्वौषधियुतंवीरद्रक्ष्य
स्योषधिपर्वतं॥३३॥तस्यवानरशार्दूलचतस्रोमूर्ध्निसंभवाः॥द्रक्ष्यस्योषधयोदीप्तादीपयंतीर्दिशोदश॥३४॥मृतसंजीवनंचै

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वविशल्यकरणीमपि॥सुवर्णकरणीं चापिसंधानीं चमहौषधिं॥३५॥ताःसर्वाहनुमन्नृत्यप्रतिगंतुंत्वमर्हसि॥आश्वासयहरीन्त्रा
णैर्योज्यगंधवहात्मज॥३६॥श्रुत्वाजांबवतोवाक्यंहनूमान्ऋक्षिमुख्यगव॥आपूर्यवेतेलोहर्षैस्तोयवेगैरिवार्णव॥३७॥सपर्वततटा
यस्थःपीडयन्पर्वतोत्तमं॥हनूमान्दृश्यतेवीरोद्वितीयइवपर्वतः॥३८॥हरिपादविनिर्भिन्नाविषसादसपर्वतः॥नशशाकत
दात्मानंसोढुंभृशनिपीडितः॥३९॥तस्यपेतुर्नगाभूमौहरिवेगाच्चजज्वलुः॥शृंगाणिचव्यशीर्यंतपीडितस्यहनूमता॥४०॥त
स्मिन्संपीड्यमानेतुभग्नद्रुमशिलातले॥नशेवीनरास्थातुंघूर्णमानेनगोत्तमे॥४१॥संघूर्णितमहाद्वाराग्रभग्नगृहगोपुरा॥
लंकात्रासाकुलाराजन्नृत्तेवाभवत्तदा॥४२॥पृथिवीधरसंकाशोनिपीड्यपृथिवीधरं॥पृथिवींक्षोभयामाससार्णवांमारु
तात्मज॥४३॥पद्भ्यांतुशैलमापीड्यवडवामुखवन्मुखं॥विवृत्योग्रंननादोच्चैस्त्रासयन्निवराक्षसान्॥४४॥तस्यनानद्य
मानस्यश्रुत्वानिनदमुत्तमं॥लंकास्थाराक्षसास्तत्रनशेकुःस्थातुंभयात्॥४५॥नमस्कृत्वाथरामायमारुतिभ्रमविक्र
मः॥राघवार्थेपरंकर्मसमीहतपरंतपः॥४६॥स्वपुच्छमुद्यम्यभुजंगकल्पंविनम्यपृष्ठंश्रवणेनिकुंच्य॥विवृत्यवक्त्रंवडवामुख
प्रभमापुप्लुवेव्योम्निसचंडवेगः॥४७॥सवृक्षखंडांस्तरसाजहारशैलान्शिलाःप्राकृतवानरांश्च॥बाहूरुवेगोद्धृतसंप्रणुन्ना
स्तेतीक्ष्णवेगाःसलिलेनिपेतुः॥४८॥सतौप्रसार्यौरगभोगकल्पौभुजौभुजंगारिनिकाशवीर्यः॥जगामसमेरुनगराजमग्र्यंदिशः

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

प्रकर्षन्निववायुसूनुः॥४९॥ससागरंघूर्णितवीचिमालंतथाभृशंभ्रामितसर्वसत्वं॥सवीक्ष्यमाणःसहसाजगामचक्रंयथा
विष्णुकरात्प्रमुक्तं॥५०॥सपर्वतान्वृक्षगणान्सरांसिनदीस्तडागानिपुरोत्तमानि॥स्फीतान्जनांस्तानपिसंप्रवीक्ष्यजगामतस्मि
न्पितृतुल्यवेगः॥५१॥आदित्यपथमास्थायजगामसगतश्रमः॥हनूमांस्त्वरितोवीरःपितृतुल्यपराक्रमः॥५२॥जवेनमह
तायुक्तोमारुतिर्मारुतोयथा॥जगामहरिशार्दूलोदिशःशब्देननादयन्॥५३॥स्मरन्जांबवतोवाक्यंमारुतिर्भीमविक्रमः
ददर्शसहसागत्वाहिमवंतंमहाकपिः॥५४॥नानाप्रस्रवणोपेतंनानाकंदरनिर्झरं॥श्वेताभ्रचयसंकाशंशिखरैश्चारुदर्शी
नं॥शोभितंविविधैर्वृक्षैरगमत्पर्वतोत्तमं॥५५॥सतंसमासाद्यमहानगेंद्रमतिप्रवृद्धोत्तमहेमशृंगं ददर्शपुण्यानिमहाश्र
माणिसुरर्षिसंघोत्तमसेवितानि॥५६॥सब्रह्मकोशंरजतालयंचशक्रालयंरुद्रशरप्रमोक्षं॥हयाननंब्रह्मशिरश्चदीप्तंद
दर्शवैवस्वतकिंकराश्च॥५७॥वध्वालयंवैश्रवणालयंचसूर्यप्रभंसूर्यनिबंधनंच॥ब्रह्माननंशंकरकार्मुकंचददर्शनाभिं
चवसुंधरायाः॥५८॥विघ्नेश्वरंतत्रसनंदिकेशंस्कंदंवृतंदेवगणैददर्श॥उमांसदुर्गामथकन्यकाभिर्विलासयंतीददृशेप्र
वीर्यः॥५९॥कैलासमुग्रंहिमवच्छिलोच्चयंवैवृषंकांचनशैलमग्र्यं॥सदीप्तसर्वौषधिसंप्रदीप्तंददर्शसर्वौषधिपर्वतेंद्रं॥६०॥स
तंसमीक्ष्यानलराशिदीप्तंविसिस्मयेवासवदूतसूनुः॥आप्लुत्यतंचौषधिपर्वतेंद्रंतत्रौषधीनांविचयंचकार॥६१॥सयोजनस

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

हस्त्राणिसमतीत्यमहाकपिः॥दिव्यौषधिधरश्चैलंव्यचरन्मारुतात्मजः॥६३॥महौषधस्तुताःसर्वास्तस्मिन्पर्वतसत्तमे॥विज्ञाया
र्थिनमायांतंततोजग्मुरदर्शनं॥६४॥सतामहात्माहनुमानपश्यंश्चुकोपरोषाच्चभृशंननाद॥अमृष्यमाणोग्निनिकाशचक्षुभ
हीधरेंद्रंतमुवाचवाक्यं॥६५॥किमेतदेवंसुविनिश्चितंतेयद्राघवेनासिकृतानुकंपः॥पश्याद्यमद्बाहुबलाभिभूतोविकीर्णमा
त्मानयथोनगेंद्रः॥६६॥सतस्यशृंगंसनगंसनागंसकांचनंधातुसहस्रजुष्टं॥विकीर्णकूटंज्वलिताग्रसानुंप्रगृह्यवेगात्सहसो
न्ममंथ॥६७॥सतंसमुत्पाट्यखमुत्पपातवित्रास्यलोकान्ससुरासुरेंद्रान्॥संस्तूयमानःखचरैरनेकैर्जगामवेगाद्गरुडो
ग्रवीर्यः॥६८॥सभास्कराध्वानमनुप्रपन्नस्तंभास्कराभशिखरंप्रगृह्य॥बभौतदाभास्करसन्निकाशोरवेःसमीपेप्रतिभास्क
राभः॥६९॥सतेनशैलेनभृशंरराजशैलोपमोगंधवहात्मजस्तु॥सहस्रधारेणसपावकेनचक्रेणरेविष्णुरिवार्पितेन॥
७०॥तंवानराःप्रेक्ष्यतदाविनेदुःसतानपिप्रेक्ष्यमुदाननाद॥तेषांसमुद्घुष्टरवंनिशम्यलंकालयाभीमतरंविनेदुः॥७१॥ततो
महात्मानिपपाततस्मिंल्लोकोत्तमेवानरसैन्यमध्ये॥हर्युत्तमेभ्यःशिरसाभिवाद्यविभीषणंतत्रचसस्वजेसः॥७२॥तावप्युभौ
मानुषराजपुत्रौतंगंधमाघ्रायमहौषधीनां॥बभूवतुस्तत्रतदाविशल्यावुत्तस्थुरन्येचहरिप्रवीराः॥७३॥सर्वेविशल्याविरु
जःक्षणेनहरिप्रवीरानिहतश्चयेस्युः॥गंधेनतासांप्रवरौषधीनांसुप्तानिशांतेद्विवसंप्रबुद्धाः॥७४॥यदाप्रभृतिलंकायां

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

युद्ध्यंतेकपिराक्षसाः॥तदाप्रभृतिमानार्थमाज्ञयारावणस्यच॥७५॥येन्यतेरणेतत्रराक्षसाकपिकुंजरैः॥हताहतास्तुक्षिप्यंते
सर्वएवतुसागरे॥७६॥ततोहरिगंधवहात्मजस्तुतमौषधीशैलमुदग्रवीर्यः॥विनायवेगाद्धिमवंतमेवपुनश्चरामेणसमा
जगाम॥७७॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेचतुःसप्ततितमःसर्गः॥७४॥ततोब्रवीन्महातेजाःसुग्रीवोवानरा
धिपः॥अर्थ्यंविज्ञापयंश्चापिहनूमंतमिदंवच॥१॥यतोहतकुंभकर्णकुमाराश्चनिषूदिताः॥नेदानीमुपनिहीरावणोदातु
महीति॥२॥येयेमहाबलाःसंतिलघवश्चप्लवंगमाः॥लंकामभ्युत्पतंत्वाशुगृह्योल्काःप्लवगर्षभाः॥३॥ततोस्तंगतआदित्येरौद्रे
तस्मिन्निशामुखे॥लंकामभिमुखाःसोल्काजग्मुस्तेप्लवगर्षभाः॥४॥उल्काहस्तैर्हरिगणैःसर्वतःसमभिद्रुताः॥आरक्षस्थावि
रूपाक्षाःसहसाविप्रदुद्रुवुः॥५॥गोपुरादृप्रतोलीषुचर्यासुविविधासुच॥प्रासादेषुचसर्वत्रससृजुस्तेहुताशनं॥६॥तेषांगृहस
हस्राणिददाहहुतभुक्तदा॥प्रासादाःपर्वताकाराःपतंतिधरणीतले॥७॥अगुरुर्दह्यतेतत्रपरंचैवसुचंदनं॥मौक्तिकामणयः
स्निग्धावज्रंचापिप्रवालजं॥८॥क्षौमंचदह्यतेतत्रकौशेयंचापिशोभनं॥आविकंविविधंत्वौर्णंकांचनंभांडमायुधं॥९॥नाना
विकृतसंस्थानंवाजिभांडपरिच्छदं॥गजग्रैवेयकक्ष्याश्वरथभांडाश्वसंस्कृताः॥१०॥तनुत्राणानियोधानांहस्त्यश्वानांचवर्मच॥
खड्गाश्चधनूंषिज्याबाणास्तोमरांकुशाशक्तयः॥११॥रोमजंवालजंचर्मव्याघ्रजंचांडजंबहु॥मुक्तामणिविचित्रांश्चप्रासादश्चसमं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

ततः॥१२॥विविधानस्त्रसंयोगानग्निर्दहतितत्रवै॥नानाविकृतसंस्थानांददाहहतभुक्तदा॥१३॥आवासान्राक्षसानांचस
र्वेषांगृहगृध्नुनां॥हेमचित्रतनुत्राणांस्वर्भांडाबरधारिणां॥१४॥सीधुपानेचसक्तानांमद्विह्वलगामिनां॥कांतालंवितवस्त्रा
णांशत्रुसंघातमन्युनां॥१५॥गदाशूलासिहस्तानांखादतांपिबतामपि॥शयनेषुमहार्हेषुप्रसुप्तानांप्रियैःसह॥१६॥त्रस्तानां
गच्छतांतूर्णंपुत्रानादायसर्वतः॥तेषांशतसहस्राणिलंकानिवासिनां॥१७॥अदहत्पावकस्तत्रजज्वलंचपुनःपुनः॥सारवं
तिमहार्हाणिगंभीरगुणवंतिच॥१८॥हेमचंद्रार्धचंद्राणिचंद्रशाखान्वितानिच॥रत्नचित्रगवाक्षाणिसाधिष्ठानानिसर्वशः॥
१९॥मणिविद्रुमचित्राणिस्पृशंतीवचभास्करं॥क्रौंचबर्हिणवीणानांभूषणानांचनिस्वनैः॥२०॥नादितान्यचलाभानिवेश्मान्य
ग्निर्दहसः॥ज्वलनेनपरीतानितोरणानिचकाशिरे॥२१॥विद्युद्भिरिवनद्धानिमेघजालानिघर्मगे॥ज्वलनेनपरीतानिगृहा
णिचप्रकाशिरे॥२२॥दवाग्निदीप्तानियथाशिखराणिमहागिरेः॥विमानेषुप्रसुप्ताश्चदह्यमानावरांगनाः॥२३॥त्यक्ताभरण
सर्वांगाहाहेत्युच्चैर्विचुक्रुशुः॥तत्रचाग्निपरीतानिनिपेतुर्भवनान्यपि॥२४॥वज्रिवज्राहतानीवशिखराणिमहागिरेः॥तानि
निर्दह्यमानानिदूरतःप्रचकाशिरे॥२५॥हिमवच्छिखराणीवदह्यमानानिसर्वशः॥हर्म्याग्रैर्दह्यमानैश्चज्वालाप्रज्वलितैर
पि॥२६॥रात्रौसादृश्यतेलंकापुष्पितैरिवकिंशुकैः॥हस्त्यश्वक्षैर्गजैर्मुक्तैर्मुक्तैश्चतुरगैरपि॥२७॥बभूवलंकालोकांतेभीतग्राह

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

इवार्णवः॥अभ्यंमुक्तंगजोदृष्ट्वाक्वचिद्भीतोपसर्पति॥२८॥भीतोभीतंगजंदृष्ट्वाक्वचिदश्वोनिवर्तते॥लंकायांदह्यमानायांशु
शुभेचमहोदधिः॥२९॥छायासंशक्तसलिलोलोहितोदइवार्णवः॥साबभूवमुहूर्तेनहरिभिर्दइपितापुरी॥३०॥लोकस्यास्य
क्षयोघोरेप्रदीप्तेववसुंधरा॥नारीजनस्यधूमेनव्याप्तस्योच्चैर्विनेदुषः॥३१॥स्वनोज्वलनदीप्तस्यशुश्रुवेशतयोजनं॥प्रदग्ध
कायानपरान्राक्षसान्निर्गतान्बहि॥३२॥सहसाभ्युत्पतंतिस्महरयोथयुयुत्सवः॥उद्धुष्टंवानराणांचराक्षसानांचनिस्व
नः॥३३॥दिशोदशसमुद्रंचपृथिवींचव्यनादयन्॥विशल्यौचमहात्मानौतावुभौरामलक्ष्मणौ॥३४॥असंभ्रांतौजगृहतुस्तदो
भौधनुषीवरे॥ततोविस्फारमानस्यरामस्यधनुरुत्तमं॥३५॥बभूवतुमुलःशब्दोराक्षसानांभयावहः॥अशोभततदारामोध
नुर्विस्फारयन्महत्॥३६॥भगवानिवसंक्रुद्धोभवोवेदमयंधनुः॥उद्धुष्टंवानराणांचराक्षसानांचनिःस्वनं॥३७॥ज्याशब्दस्ता
बुभौशब्दौअतिरामस्यशुश्रुवे॥वानरोद्धुष्टघोषश्चराक्षसानांचनिःस्वनः॥३८॥ज्याशब्दंचापिरामस्यत्रयंव्याप्यदिशोदश॥त
स्यकार्मुकनिर्मुक्तैःशरैस्तत्पुरगोपुरं॥३९॥कैलासशृंगप्रतिमंविकीर्णमपतद्भुवि॥ततोरामशरान्दृष्ट्वाविमानेषुगृहेषुच
४०॥सन्नाहोराक्षसेंद्राणांतुमुलःसमपद्यत॥तेषांसंनह्यमानानांसिंहनादंचकुर्वता॥४१॥शर्वरीराक्षसेंद्राणांरौद्रीवसमप
द्यत॥आदिष्टावानरेंद्रास्तेसुग्रीवेणमहात्मना॥४२॥आसन्नद्वारमासाद्ययुध्यध्वंचप्लवंगमाः॥यश्चवोवितथंकुर्यात्तत्रतत्रा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

प्युपस्थितः॥४३॥अहंतव्योभिसंक्रुत्यराजशासनदूषकः॥तेषुवानरमुख्येषुदीप्तोल्कोज्वलपाणिषु॥४४॥स्थितेषुद्वारमाश्रित्य
रावणंमन्युराविशत्॥तस्यजृंभितदृष्टो [illegible] भोभ्यामिश्रावैदिशोदश॥४५॥रूपवानिवरुद्रस्यमनुर्गात्रेषुदृश्यते॥सकुंभंचनिकुं
भंचकुंभकर्णस्यचात्मजौ॥४६॥प्रेषयामाससंक्रुद्धोराक्षसैर्बहुभिःसह॥यूपाक्षःशोणिताक्षश्चप्रजंघःकंपनस्तथा॥४७॥निर्य
युःकौंभकर्णिभ्यांसहरावणशासनात्॥शशासचैवतान्सर्वान्राक्षसान्समहाबलान्॥४८॥राक्षसागच्छताचैवसिंहनादंचनाद
यन्॥ततस्तुचोदितास्तेनराक्षसाज्वलितायुधाः॥४९॥लंकायानिर्ययुर्वीराःप्रणदंतःपुनःपुनः॥रक्षसांभूषणस्थाभिर्भीमिस्ता
भिश्चसर्वशः॥५०॥चक्रुस्तेप्रसभंव्योमहरयश्चाग्निभिःसह॥तत्रताराधिपस्याभातारणांचतथैवच॥तयोराभरणस्थाभाबल
योर्घोरमभासयत्॥चंद्राभाभूषणाभांचगृहाणांज्वलिताचभा॥५२॥हरिराक्षससैन्यानिभ्राजयामाससर्वतः॥तत्रचोर्ध्वप्रदीप्ता
नांगृहाणांसागरेपुनः॥५३॥भाभिःसंसक्तपातालश्चलोर्मिःशुशुभेधिकं॥पताकाध्वजसंयुक्तमुत्तमासिपरस्वधं॥५४॥भीमाश्चर
थमातंगनानापक्षिसमाकुलं॥दीप्तशूलगदाखड्गप्रासतोमरकार्मुकं॥५५॥तद्राक्षसबलंभीमंघोरविक्रमपौरुषं॥दृष्ट्वोज्ज्व
लितशासंकिंकिणीशतनादितं॥५६॥हेमजालावितभुजंव्यावेष्टितपरस्वधं॥व्याघूर्णितमहाशस्त्रंबाणसंसक्तकार्मुकं॥५७
गंधमाल्यमधूत्सेकसंमोदितमहानिलं॥घोरंशूरजनाकीर्णंमहांबुधरनिस्वनं॥५८॥तंदृष्ट्वाबलमायांतंराक्षसानांदुरासदं॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

संचचालप्लवंगानांबलमुच्चैर्ननादच॥५९॥जघानोत्प्लुत्यचपुनस्तद्बलंरक्षसांमहत्॥अभ्ययात्त्वत्परिबलंपतंगाइवपावकं॥६०
तेषांभुजंपरामर्शंयामृष्टपरिघाशनं॥राक्षसानांबलंश्रेष्ठंभूयःपरमशोभत॥६१॥तत्रोन्मत्ताइवोत्पेतुर्हरयोथाययुत्सवः॥
तरुशैलैरभिघ्नंतोमुष्टिभिश्चनिशाचरान्॥६२॥तथैवापततांतेषांहरिणांनिशितैःशरैः॥शिरांसिसहसाजह्रुराक्षसाभीमवि
क्रमाः॥६३॥दंशनैर्हृतकर्णाश्चमुष्टिभिर्भिन्नमस्तकाः॥शिलाप्रहारभिन्नागाविचेरुस्तत्रराक्षसाः॥६४॥तथैवाप्यपरेतेषांकपी
नामस्त्रिभिःशितैः॥प्रवीरानभितोजघ्नुराक्षसानांतरस्विनां॥६५॥हरिवीरान्निजघ्नुस्तेघोररूपानिशाचराः॥घ्नंतमन्यंजघानान्यः
पातयंतमपातयत्॥६६॥गर्हमाणंजगर्हान्योदशंतमपरोदशत्॥देहीत्यन्योददात्यन्योददामीत्यपरःपुनः॥६७॥किंक्लेशाय।
सितिष्ठेतितत्रान्योन्यंवभाषिरे॥विप्रलंभितशस्त्रंचविमुक्तकवचायुधं॥६८॥समुद्यतमहाप्रासमुष्टिशूलासिकुंतलं॥प्रावर्त
तमहारौद्रंयुद्धंवानरराक्षसां॥६९॥वानरान्दशसप्तेतिराक्षसाजघ्नुराहवे॥राक्षसान्दशसप्तेतिवानरास्त्वभ्यपातयन्॥७०॥
विप्रलंभितवस्त्रंचविमुक्तकवचध्वजं॥बलंराक्षसमालंब्यवानरापर्यवारयन्॥७१॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्ध
कांडेपंचसप्ततितमःसर्गः॥७५॥प्रवृत्तेसंकुलेतस्मिन्घोरेवीरजनक्षये॥अंगदःकंपनंवीरमाससादरणोत्सुकः॥१॥आहूय
सोंगदंकोपाताडयामासवेगितः॥गदयाकंपनःपूर्वंसचचालभृशोहतः॥२॥ससंज्ञांप्राप्यतेजस्वीचिक्षेपशिखरंगिरेः॥अर्दित

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

श्वप्रहारेण कंपनः पतितो भुवि ॥ ४ ॥ ततस्तु कंपनं दृष्ट्वा शोणिताक्षो हतं रणे ॥ रथेनाभ्यपतत्क्षिप्रं तत्रांगदमभीतवत् ॥ ५ ॥ सोंगदं
निशितैर्बाणैस्तदा विव्याध वेगितः ॥ शरीरं दारयैस्तीक्ष्णैः कालाग्निसमविग्रहैः ॥ ६ ॥ क्षुरक्षुरप्रनाराचैर्वत्सदंतैः शिलीमुखैः ॥ क
र्णिशल्यविपाटैश्च बहुभिर्निशितैः शरैः ॥ ७ ॥ अंगदः प्रतिविद्धांगो बालिपुत्रप्रतापवान् ॥ धनुरुद्यम्य रथं बाणान्ममर्द तरसा बली
॥ ८ ॥ शोणिताक्षस्ततः क्षिप्रमसिचर्मसमाददे ॥ उत्पपात दिवं क्रुद्धो वेगवान विचारयन् ॥ ९ ॥ तं क्षिप्रतरमाप्लुत्य परामृश्यांगदो
बली ॥ करेण तस्य तं खड्गमाच्छिद्य च ननाद च ॥ १० ॥ तस्यांसफलके खड्गं चखान ततोंगदः ॥ यज्ञोपवीतवच्चैनं चिच्छेदकपिकुंज
रः ॥ ११ ॥ तं प्रगृह्य महाखड्गं विनद्य च पुनः पुनः ॥ बालिपुत्रोभिदुद्रावरणशीर्षं परान्रीन् ॥ १२ ॥ आयसीं तु गदां गृह्य सवीरकनकां
गदः ॥ शोणिताक्षः समाश्वस्य तमेवानुपपात ह ॥ १३ ॥ प्रजंघस्तु महावीरो यूपाक्षसहितो बली ॥ गदया भिययौ क्रुद्धो बालिपुत्रं म
हाबलं ॥ तयोर्मध्ये कपिश्रेष्ठः शोणिताक्षप्रजंघयोः ॥ विशाखयोर्मध्यगतः पूर्णचंद्र इवाभवत् ॥ १४ ॥ अंगदं परिरक्षंतौ मैंदो
द्विविदावुभौ ॥ तस्य तस्य तु रभ्याशे परस्परदिदृक्षया ॥ १५ ॥ अभिपेतुर्महावीर्या महाकाया महाबलाः ॥ राक्षसा वानरान्रोषाद्
सिबाणगदाधराः ॥ १६ ॥ त्रयाणां वानरेंद्राणां त्रिभिराक्षसपुंगवैः ॥ संसक्तानां महद्युद्धमभवद्रोमहर्षणं ॥ १७ ॥ ते तु वृक्षान्समादाय सं
प्रचिक्षिपुराहवे ॥ खड्गेन प्रतिचिच्छेद तान्प्रजंघो महाबलः ॥ १८ ॥ रथानश्वान्द्रुमैः शैलैस्ते प्रचिक्षिपुराहवे ॥ स्वशरौघैः प्रचिच्छे

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

दतान्यूपाक्षोमहाबल॥१९॥सहस्रान्द्विविदमैंदाभ्यांद्रुमानुत्पाट्यवीर्यवान्॥बभंजगदयामध्येशोणिताक्षःप्रतापवान्॥२०
उद्यम्यविपुलंखड्गंपरमर्मविदारणं॥प्रजंघोवालिपुत्रायअभिदुद्रावचेगितः॥२१॥तमभ्यागतंदृष्ट्वाबानरेंद्रोमहाबलः॥आ
जघानाश्वकर्णेनद्रुमेणातिबलस्तदा॥२२॥बाहुंश्चास्यसनिस्त्रिंशमाजघानसमुष्टिना॥वालिपुत्रस्यघातेनसंपपातक्षितावि
सिः॥२३॥तंदृष्ट्वापतितंभूमौखड्गंमुसलसन्निभं॥मुष्टिंसंवर्तयामासवज्रकल्पंमहाबलः॥२४॥सललाटेमहावीर्यंगदंवा
नरर्षभं॥आजघानमहातेजाःसमुहूर्तंचचालह॥२५॥ससंज्ञांप्राप्यतेजस्वीवालिपुत्रप्रतापवान्॥प्रजंघस्यशिरःकायाद्दा
रयामासवीर्यवान्॥२६॥सयूपाक्षोभृशंपूर्णाक्षःपितृव्येनिहतेरणे॥अवरुह्यरथात्क्षिप्रंक्षीणेषुःखड्गमाददे॥२७॥तमापतंतंसंप्रे
क्ष्ययूपाक्षंद्विविदस्त्वरन्॥आजघानोरसिक्रुद्धोजग्राहबलवद्बली॥२८॥गृहीतंभ्रातरंदृष्ट्वाशोणिताक्षोमहाबलः॥आजघा
नमहातेजावक्षसिद्विविदंततः॥२९॥सतदाभिहतस्तेनचचालचमहाबलः॥उद्यतांचपुनस्तस्यजहारद्विविदोगदां॥३०
तयाचगदयाक्षिप्तंतयोरुरसिताडयत्॥तौशोणिताक्षयूपाक्षौलवणाभ्यांतरस्विनौ॥३१॥चक्रतुःसमरेतीव्रमाकर्षोत्पाटनंभृ
शं॥द्विविदःशोणिताक्षंतुविददारनखैर्मुखे॥३२॥निष्पिपेषस्वबीर्येणभूमावाविध्यवीर्यवान्॥यूपाक्षमभिसंक्रुद्धोमैंदोवान
रयूथपः॥३३॥पीडयामासबाहुभ्यांपपातसहतःक्षितौ॥हतप्रवीरान्व्यथितारक्षसेंद्रचमूपतिः॥३४॥जगामाभिमुखीसातुकुंभक

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

र्णसुतोयतः॥आपतंतीं चवेगेनकुंभस्तांसांत्वयच्छ्रमं॥३५॥अथोत्कृष्टैर्महावीर्यैर्लब्धलक्षैःप्लवंगमैः॥निपातितमहावीरांदृष्ट्वारक्षश्च
मूंतदा॥३६॥कुंभःप्रचक्रेतेजस्वीरणेकर्मसुदुष्करं॥सधनुर्धन्विनांश्रेष्ठःप्रगृह्यसुसमाहितः॥३७॥मुमोचाशीविषप्रख्यान्बा
णान्देहविदारणान्॥तस्यतत्सुशुभेभूपःसशरंधनुरुत्तमं॥३८॥विद्युदैरावतार्चिष्मत्द्वितीयेंद्रधनुर्यथा॥आकर्णाकृष्टमुक्तै
नजघानद्विविदंतदा॥३९॥तेनहाटकपुंखेनपत्रिणापत्रवाससा॥सहसाभिहतस्तेनविघ्नत्यक्तेपदःस्फुरन्॥४०॥निपपातादि
कूटाभोविह्वलःप्लवगोत्तमः॥मैंदस्तुभ्रातरंदृष्ट्वाभग्नमत्रमहाहवे॥४१॥अभिदुद्रावचवेगेनप्रगृह्यविपुलांशिलां॥तांशिलां
तुप्रचिक्षेपराक्षसायमहाबलः॥४२॥विभेदतांशिलांकुंभःप्रसन्नैःपंचभिःशरैः॥संधायचान्यंसुमुखंशरमाशीविषोपमं॥
४३॥आजघानमहातेजाःवक्षसिद्विविदाग्रजं॥सतुतेनप्रहारेणमैंदोवानरयूथपः॥४४॥मर्मण्यभिहतस्तेनपपातभुविमू
र्छितः॥अंगदोमातुलोदृष्ट्वाव्यथितोतुमहाहवे॥४५॥अभिदुद्रावचवेगेनकुंभमुद्यतकार्मुकं॥तमापतंतंविव्याधकुंभःपंचभि
रायसैः॥४६॥त्रिभिश्चान्यैःशितैर्बाणैर्मातंगमिवतोमरैः॥सोगदंबहुभिर्बाणैःकुंभोविव्याधवीर्यवान्॥४७॥अकुंठधारैर्विशि
खैस्तीक्ष्णैकनकभूषणैः॥अंगदःप्रतिविद्धांगोवालिपुत्रोनकंपते॥४८॥शिलापादपवर्षाणितस्यमूर्ध्निववर्षह॥सप्रचिक्षे
पतान्सर्वांविभेदचपुनःशिलाः॥४९॥कुंभकर्णात्मजःश्रीमान्वालिपुत्रसमीरितान्॥आपतंतंचसंप्रेक्ष्यकुंभोवानरयूथपं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

॥५०॥भ्रुवौविमाधबाणाभ्यामुल्काभ्यामिवकुंजरं॥तस्यसुस्त्रावरुधिरंपिहितेचास्यलोचने॥५१॥अंगदःपाणिनानेत्रेपिधायरुधि
रोक्षिते॥सालमासन्नमेकेनपरिजग्राहपाणिना॥५२॥संपीड्योरसिसंक्रुद्धंकरेणाभिनिवेश्यच॥किंचिदभ्यवनम्यैनमुन्म
माथयथागजः॥५३॥तमिंद्रकेतुप्रतिमंवृक्षंमंदरसन्निभं॥समुत्सृजंतंवेगेनपश्यतांसर्वरक्षसां॥५४॥सचिच्छेदशितैर्बाणैःस
प्तभिःकायभेदनैः॥अंगदोविव्यथेभीक्ष्णंससाचमुमोहच॥५५॥अंगदंमथितंदृष्ट्वासीदंतमिवसागरे॥दुरासदंहरिश्रेष्ठं
मायाथनिवेदयन्॥५६॥रामस्तुमथितंश्रुत्वावालिपुत्रेरणाजिरे॥आदिदेशहरिश्रेष्ठान्जांबवत्प्रमुखांस्तत॥५७॥तेतुवा
नरशार्दूलाःश्रुत्वारामस्यशासनं॥अभिपेतुःसुसंक्रुद्धाःकुंभमुद्यम्यकार्मुकं॥५८॥ततोद्रुमशिलाहस्ताःकोपसंरक्तलोचनाः॥
रक्षिप्यंतोमुत्प्लुपतन्नंगदंवानरर्षभाः॥५९॥जांबवांश्चसुषेणश्चवेगदर्शीचवानरः॥कुंभकर्णात्मजंवीराःक्रुद्धाःसमभिदुद्रुवुः
॥६०॥समीक्ष्यापततस्तां[illegible]स्तुराक्षसेंद्रोमहाबलः॥आववारशरौघेणनगेनेवजलाशयं॥६१॥तस्यबाणपथंप्राप्यनशेकुर
तिवर्तितुं वानरेंद्रामहात्मानोवेलामिवमहोदधिः॥६२॥तांस्तुदृष्ट्वाहरिगणान्छरवृष्टिभिरर्दितान्॥अंगदंपुरतःकृत्वा
भ्रातृजंघवगेश्वरः॥६३॥अभिदुद्रावबेगेनकुंभकर्णात्मजंरणे॥शैलसानुचरंनागंवेगवानिवकेसरी॥६४॥उत्पाट्यचमहाशै
लानश्वकर्णान्धवान्बहून्॥अन्यांश्चविविधान्वृक्षांश्चिक्षेपचमहाबलः॥६५॥तांछादयंतीमाकाशंनगवृष्टिंदुरासदां॥कुंभक

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

र्णात्मजः शीघ्रं चिच्छेद निशितैः शरैः ॥६६॥ अभिलक्ष्येण तीव्रेण कुंभेन निशितैः शरैः ॥ अर्दितास्ते द्रुमा रेजुर्यथा घोराः शतघ्नयः ॥
६७॥ द्रुमवर्षं तु तत् छिन्नं दृष्ट्वा कुंभेन वीर्यवान् ॥ वानराधिपतिः श्रीमान् महासत्वो न विव्यथे ॥६८॥ निर्भिद्यमानं सहसा सहमा
नस्तु तान् शरान् ॥ कुंभस्य धनुराक्षिप्य वभंजेंद्रधनुष्प्रभं ॥६९॥ आप्लुत्य च ततः शीघ्रं कृत्वा कर्म सुदुष्करं ॥ अब्रवीत् कुपितः कुंभं
भग्नशृंगमिव द्विपं ॥७०॥ निकुंभाग्रजवीर्यं ते बाणवेगं तदद्भुतं ॥ सन्नतिश्च प्रभावश्च तव वा रावणस्य वा ॥७१॥ प्रह्लादबलिवृत्र
घ्नकुबेरवरुणोपमं ॥ एकस्त्वमनुजातोसि पितरं बलवत्तरं ॥७२॥ त्वामेवैकं महाबाहुं शूलहस्तमरिंदमं ॥ त्रिदशानातिवर्तंते
जितेंद्रियमिवाधयः ॥७३॥ विक्रमस्व महायुद्धे कर्माणि मम पश्यतः ॥ वरदानात् पितृव्यस्ते सहते देवदानवान् ॥७४॥ कुंभकर्ण
स्तु वीर्येण सहते च सुरासुरान् ॥ धनुर्षीद्रजिता तुल्यः प्रतापे रावणस्य च ॥७५॥ त्वमद्य राक्षसं लोके श्रेष्ठोसि बलवीर्यतः ॥ महावि
मर्दं समरे मया सह तवाद्भुतं ॥७६॥ अद्य भूतानि पश्यंतु शक्रशंबरयोरिव ॥ कृतप्रतिकृतं कर्म दर्शितं चास्त्रकौशलं ॥७७॥ पा
तिता हरिवीराश्च त्वयैते भीमविक्रमाः ॥ उपालंभभयाच्चापि नास्ति वीर्यो मया हतः ॥७८॥ कृतकर्मा परिश्रांतो विश्रांतः पश्य मे
बलं तेन सुग्रीववाक्येन सावमानेन मानितः ॥७९॥ अग्नेराज्याहुतस्येव तेजस्तस्याभ्यवर्द्धत ॥ ततः कुंभस्तु सुग्रीवं बाहुभ्यां ज
गृहे तदा ॥८०॥ गजाविवाहितमदौ निश्वसंतौ मुहुर्मुहुः ॥ अन्योन्यगात्रग्रथितौ कर्षंतावितरेतरं ॥८१॥ सधूमामुखतो ज्वालां वि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

सृजंतौ परिश्रमात्॥ तयोः पादाभिघाताच्च निमग्ना चाभवन्मही॥ ८२॥ व्याघूर्णितं तरं श्चैव क्षुभेवरुणालयः॥ ततः कुंभं समु-
क्षिप्य सुग्रीवो लवणांभसि॥ ८३॥ पातयामास वेगेन दर्शयन्नुदधेस्तलं॥ ततः कुंभनिपातेन जलराशिः समुत्थितः॥ ८४॥ विंध्य
मंदरसंकाशो विससर्प समंततः॥ ततः कुंभः समुत्पत्य सुग्रीवं भिपत्य च॥ ८५॥ आजघानोरसि क्रुद्धो वज्रकल्पेन मुष्टिना॥ त
स्य वर्म च पुस्फोट संजज्ञे चास्य शोणितं॥ ८६॥ स च मुष्टिर्महावेगः प्रतिजघ्ने स्थिमंडलं॥ तस्य वेगेन तत्रासीत्तेजः प्रज्वलितं मु
हुः॥ ८७॥ वज्रनिष्पेषसंजाता ज्वाला मेरौ गिरा विव॥ मुष्टिना तेन संजज्ञे ज्वाला विद्युदिवोत्थिता॥ ८८॥ स तत्राभिहतस्तेन सु
ग्रीवो वानरर्षभः॥ मुष्टिं संवर्तयामास वज्रकल्पं महाबलः॥ ८९॥ अर्चिः सहस्रं कवचं रविमंडलसंनिभं॥ स मुष्टिं पातयामास
कुंभस्योरसि वीर्यवान्॥ ९०॥ स तु तेन प्रहारेण विह्वलो भृशताडितः॥ निपपात तदा कुंभो गतार्चिरिव पावकः॥ ९१॥ मुष्टिना भिहत
स्तेन निपपाताशु राक्षसः॥ लोहितांगद्वाकाशाद्दीप्तरश्मिर्यदृच्छया॥ ९२॥ कुंभस्य पततो रूपं भग्नस्योरसि मुष्टिना॥ बभौ रुद्रा
भिपन्नस्य यथा रूपं गवां पते॥ ९३॥ तस्मिन्हते भीमपराक्रमेण प्लवंगमानामृषभेण युद्धे॥ मही सशैला सवना च चाल भयं च
रक्षांस्यधिकं विवेश॥ ९४॥ इत्यार्षे श्रीरामायणे वाल्मीकीये युद्धकांडे कुंभवधो नाम षट्सप्ततितमः सर्गः॥ ७६॥ निकुंभो
भ्रातरं दृष्ट्वा सुग्रीवेण निपातितं॥ प्रदहन्निव कोपेन वानरेंद्रमुदैक्षत॥ १॥ ततः स्रग्दाम संनद्धं दत्तपंचांगुलं शुभं॥ आर

ग

म

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

दद्दे परिघं वीरो नगेंद्रशिखरोपमं ॥२॥ हेमपट्टपरिक्षिप्तं वज्रविद्रुमभूषितं ॥ यमदंडोपमं भीमं रक्षसां भयनाशनं ॥३॥ तमाविध्य
महातेजाः शक्रध्वजसमौजसं ॥ विननाद विवृत्तास्यो निकुंभो भीमविक्रमः ॥४॥ उरोगतेन निष्केण भुजस्थैरंगदैरपि ॥ कुंडला
भ्यां च मृष्टाभ्यां मालया च विचित्रया ॥५॥ निकुंभो भूषणैर्भाति तेन स्म परिघेण च ॥ यथेंद्रधनुषा मेघः सविद्युत्स्तनयित्नुमान्
॥६॥ परिघाग्रेण पुस्फोट वातग्रंथिर्महात्मनः ॥ प्रजज्वाल स घोषश्च विधूमइव पावकः ॥७॥ नगर्यो विटपावत्यो गंधर्वभवनो
त्तमे ॥ सह चैवामरावत्या सर्वैश्च भवनैः सह ॥८॥ सतारग्रहनक्षत्रं सचंद्रं समहाग्रहं ॥ निकुंभपरिघाघूर्णं भ्रमतीव नभस्त
लं ॥९॥ दुरासदश्च संजज्ञे परिघांतरणप्रभः ॥ कपीनां सनिकुंभाग्निर्युगांताग्निरिवोत्थितः ॥१०॥ राक्षसान्वानराश्चापि न शेकुः
स्थंदितुं भयात् ॥ हनूमांस्तु विवृत्योरस्तस्थौ प्रमुखतो बली ॥११॥ परिघौपमबाहुस्तु परिघं भास्करप्रभं ॥ बली बलवतस्तस्य
पातयामास वक्षसि ॥१२॥ स्थिरे तस्योरसि व्यूढे परिघः शतधा कृतः ॥ विकीर्यमाणस्सहसा उल्का शतमिवांबरे ॥१३॥ स तुते
न प्रहारेण विचचालमहाकपिः ॥ परिघेण समाधूतो यथा भूमिचलेचलः ॥१४॥ स तथाभिहतस्तेन हनूमान्प्लवगोत्तमः ॥
मुष्टिं संवर्तयामास बलेनातिमहाबलः ॥१५॥ तमुद्यम्य महातेजा निकुंभोरसि वीर्यवान् ॥ अभिचिक्षेप वेगेन वेगवान्वायु
विक्रमः ॥१६॥ ततः पुस्फोट चर्मास्य प्रसुस्राव च शोणितं ॥ मुष्टिना तेन संजज्ञे मेघे विद्युदिवोत्थितः ॥१७॥ स तुतेन प्रहारेण निकुं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

भोपिचचालह॥स्वस्थश्चापिनिजग्राहहनूमंतंमहाबलं॥१८॥विचुक्रुशुस्तदासंख्येभीमंलंकानिवासिनः॥निकुंभेनोद्य
तंदृष्ट्वाहनूमंतंमहाबलं॥१९॥सतथाह्रियमाणोपिकुंभकर्णात्मजेनह॥आजघानानिलसुतोवज्रकल्पेनमुष्टिना॥२०॥आ
त्मानंमोक्षयित्वाथक्षितावभ्यवपद्यत॥हनूमानुन्ममाथाशुनिकुंभंमारुतात्मज॥२१॥उत्क्षिप्यपरमायत्नोनिकुंभंनिष्पिपेष
च॥उत्पत्यचाशुवेगेनपपातोरसिवीर्यवान्॥२२॥परिगृह्यचबाहुभ्यांपरिवृत्यशिरोधरां॥उत्पाटयामासशिरोभैरवंनद
तोमहत्॥२३॥अथदेवासगंधर्वाविद्याधरमहोरगाः॥आकाशचारिणःसर्वेअप्सरोभिःसहामराः॥२४॥हनूमंतंमहाबा
हुंवायुपुत्रमरिंदमं॥प्रशंसंतःपरैर्वाक्यैःप्रसूनैरभ्यपूजयन्॥२५॥अथनिनदतिसादितेनिकुंभेपवनसुतेनरणेबभूवयु
द्धं॥दशरथसुतराक्षसेंद्रसैन्ययोर्भृशतरमागतरोषयोःसुभीमं॥२६॥व्यपेतेतुजीवेनिकुंभस्यहृष्टाविनेदुःप्लवंगादिशः
सस्वनुश्च॥पफालेवचोवश्चचालेवचद्यौर्बलंराक्षसानांभयंचाविवेश॥२७॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडे
सप्तसप्ततितमःसर्गः॥७७॥नवमाप्रहारसमाप्तः॥त्रयोविंशोहिवर्त्तमानकथासमाप्तम्॥निकुंभंनिहतंश्रुत्वाकुंभंचविनि
पातितं॥रावणःपरमामर्षःप्रज्वज्वालानलोयथा॥१॥तैर्ऋतःक्रोधशोकाभ्यांद्वाभ्यांतुपरिमूर्छितः॥खरपुत्रंविशालाक्षंम
कराक्षमचोदयत्॥२॥गच्छपुत्रमयाज्ञप्तोबलेनापिसमन्वितः॥रघवंलक्ष्मणंचैवजहितौसवनौकसौ॥३॥रावणस्यवचः

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

श्रुत्वा शूरो मानी खरात्मजः ॥ बाढमित्यब्रवीद्दृष्टो मकराक्षो निशाचरः ॥ ४ ॥ सोऽभिवाद्य दशग्रीवं कृत्वा चापि प्रदक्षिणं ॥ निर्जगा
म गृहाद्बुद्धा द्रावणस्याज्ञया बली ॥ ५ ॥ समीपस्थं बलाध्यक्षं खरपुत्रोऽब्रवीदिदं ॥ रथमानीयतां शीघ्रं सैन्यं चानीयतां त्वरन्
घ ॥ तस्य तद्वचनं श्रुत्वा बलाध्यक्षो निशाचरः ॥ स्यंदनं च बलं चैव समीपं प्रत्यपादयत् ॥ ७ ॥ प्रदक्षिणं रथं कृत्वा समारुह्य निः
शाचरः ॥ सूतं संचोदयामास शीघ्रं वै रथमावह ॥ ८ ॥ अथ तान् राक्षसान् सर्वान् मकराक्षोऽब्रवीदिदं ॥ यूयं सर्वे प्रयुध्यध्वं पुरस्ता
न्ममराक्षसाः ॥ ९ ॥ अहं राक्षसराजेन रावणेन महात्मना ॥ आज्ञप्तः समरे हंतुं तावुभौ रामलक्ष्मणौ ॥ १० ॥ अद्य रामं वधिष्यामि
लक्ष्मणं च निशाचराः ॥ शाखामृगं च सुग्रीवं वानरांश्च सुरोत्तमैः ॥ ११ ॥ अद्य शूलनिपातैश्च वानराणां महाचमूं ॥ प्रदहिष्या
मि संप्राप्तः शुष्कं धनमिवानलः ॥ १२ ॥ मकराक्षवचः श्रुत्वा विनदंतो निशाचराः ॥ सर्वे नानायुधोपेताः बलवंतः समाहिताः
१३ ॥ ते कामरूपिणः शूराः दंष्ट्रिणः पिंगलेक्षणाः ॥ मातंगाइव नर्दंतो ध्वस्तकेशा भयावहाः ॥ १४ ॥ परिवार्य महाकायामहा
कायं खरात्मजं ॥ अभिजग्मुस्ततो हृष्टाश्चालयंतो वसुंधरां ॥ १५ ॥ शंखभेरीसहस्राणां साहतानां समंततः ॥ ध्वनिताः स्फोटि
तानां च तत्र राज्ञो महानभूत् ॥ १६ ॥ प्रभ्रष्टस्तु करात्तस्य प्रतोदः सारथेस्तदा ॥ पपात सहसा भूमौ ध्वजस्तस्य तु रक्षसः ॥ १७ ॥ न
स्यते रथयुक्ताश्च हयाविक्रमवर्जिताः ॥ चरणैराकुलैर्गत्वा दीनाः तास्त्वमुखा ययुः ॥ १८ ॥ प्रवाति पवनस्तस्य सपांसुः खर

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

दारुणः॥ निर्याणेतस्यरौद्रस्यमकराक्षस्यदुर्मतेः॥१९॥तानिदृष्ट्वानिमित्तानिराक्षसावीर्यवत्तमा॥अचिन्तनिर्गताःसर्वेय
त्रतौरामलक्ष्मणौ॥२०॥घनगजमहिषांगतुल्यवर्णाःसमरमुखेषुसकृद्गदासिभिन्नाः॥अहमहमितियुद्धकौशलास्तेरज
निचरापरिवभ्रमुर्नदंतः॥२१॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेऽष्टसप्ततितमःसर्गः॥१७॥निर्गतंमकराक्षंतेदृष्ट्वा
वानरपुंगवाः॥आप्लुत्यसहसासर्वेयोद्धुकामाव्यवस्थिताः॥१॥ततःप्रवृत्तंसुमहत्तद्युद्धंरोमहर्षणं॥निशाचरैःप्लवंगानांदे
वानांदानवैरिव॥२॥वृक्षशूलनिपातैश्चशिलापरिघपातनैः॥अन्योन्यंपातयंतिस्मतदाकपिनिशाचराः॥३॥शक्तिखड्ग
दाकुंतैस्तोमरैश्चनिशाचराः॥पट्टिशैर्भिंडिपालैश्चबाणपातैःसमंततः॥४॥पाशमुद्गरदंडैश्चनिर्घातैश्चवरायुधैः॥कदनंक
पियूथानांचक्रुस्तेरजनीचराः॥५॥बाणौघैरर्दिताश्चापिखरपुत्रेणवानराः॥संभ्रांतमनसःसर्वेदुद्रुवुर्भयपीडिताः॥६॥तान्दृ
ष्ट्वाराक्षसाःसर्वेद्रवमाणान्वनौकसः॥नेदुस्तेसिंहवत्हृष्टाराक्षसाजितकाशिनः॥७॥विद्रवत्सुतदातेषुवानरेषुसमंततः
रामस्तान्वारयामासशरवर्षेणराक्षसान्॥८॥वारितान्राक्षसान्दृष्ट्वामकराक्षोनिशाचरः॥कोपानलसमाविष्टोवचनंचे
दमब्रवीत्॥९॥तिष्ठराममयासार्धंद्वंद्वयुद्धंदृढामिते॥त्याजयिष्यामितेप्राणान्धनुर्मुक्तैःशितैःशरैः॥१०॥यत्तदादंडकारण्ये
पितरंहतवान्मम॥मदग्रतःस्वकर्मस्थंदृष्ट्वाशोकोभिवर्धते॥११॥दह्यंतेभृशमंगानिदुरात्मन्ममराघव॥यन्मयासिनदृष्टः

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

स्त्वंतस्मिन्काले महावने ॥१२॥ दिष्ट्यासि दर्शनं राममम मत्वं प्राप्तवानिह ॥ कांक्षितोसि सुधार्तस्य सिंहस्येवेतरो मृग ॥१३॥ अ
द्य मद्बाणवेगेन त्वेतराट् विषयं गतः ॥ येत्वया निहताः शूराः सहतैश्च समेष्यसि ॥१४॥ बहुनात्र किमुक्तेन शृणु राम वचो मम
पश्यंतु सकला लोकास्त्वां चैव रणाजिरे ॥१५॥ अस्त्रैर्वा गदया वापि बाहुभ्यां वा रणाजिरे ॥ अभ्यस्तं येन वा राम वर्त्तितं तेन वा
युधि ॥१६॥ मकराक्षवचः श्रुत्वा रामो दशरथात्मजः ॥ अब्रवीत्प्रहसन्वाक्यमुत्तरोत्तरवादिनं ॥१७॥ कथसे किं वृथा रक्षो बहू
न्यसदृशानि तु ॥ नरणे शक्यते जेतुं विना युद्धेन वाग्बलात् ॥१८॥ चतुर्दशसहस्राणि रक्षसां त्वत्पिता च यः ॥ त्रिशिरा दूषणश्च
पिंडके निहता मया ॥१९॥ स्वाशिताश्चापि मांसेन गृध्रगोमायुवायसाः ॥ भविष्यंत्यद्य वै पापतीक्ष्णतुंडनखांकुशाः ॥२०॥ रुधि
राट्मुखा हृष्टा रक्तपक्षांडजाश्च ये ॥ खे गता वसुधायां च भ्रमिष्यंति च सर्वशः ॥२१॥ राघवेणैवमुक्तस्तु मकराक्षो महाबलः ॥
बाणौघानमुचत्तस्मै राघवाय रणाजिरे ॥२२॥ तान् शरान् शरवर्षेण रामश्चिच्छेद नैकधा ॥ निपेतुर्भुवि विच्छिन्नाः कुंखाः
सहस्रशः ॥२३॥ तद्युद्धमभवत्तत्र समेत्यान्योन्यमोजसा ॥ खररक्षसपुत्रस्य सूनोर्दशरथस्य च ॥२४॥ जीमूतयोरिवाकाशे
ज्याताडयोस्तदा ॥ धनुर्मुक्तः स्वनोत्पतंश्रूयते च रणाजिरे ॥२५॥ देवदानवगंधर्वाः किन्नराश्च महोरगाः ॥ अंतरिक्षगताः सर्वे
द्रष्टुकामास्तदद्भुतं ॥२६॥ विद्धमन्योन्यगात्रेषु द्विगुणं वर्धते बलं ॥ कृतप्रतिकृतान्योन्यं कुर्वतोस्तौ रणाजिरे ॥२७॥ राममुक्तास्तु

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

रामोवैनैकधाप्राछिनछरैः॥२८॥बाणौघवितताःसर्वादिशश्चविदिशस्तथा॥संछन्नावसुधाद्यौश्चसमंतान्नप्रकाशते॥२९
ततःक्रुद्धोमहाबाहुर्धनुश्चिछेदराक्षसः॥अष्टाभिरथनाराचैःसूतंविव्याधराघव॥३०॥भित्वारथंशरैरामोरथानश्वानपात
यत्॥विरथोवसुधांतिष्ठन्मकराक्षोनिशाचरः॥३१॥अतिष्ठद्वसुधांरक्षःशूलंजग्राहपाणिना॥त्रासनंसर्वभूतानांयुगांता
ग्निसमप्रभं॥३२॥दुरवापंमहच्छूलंरुद्रदत्तंभयंकरं॥ज्वलन्तमिवाकाशेसंहारास्त्रमिवापरं॥३३॥यद्दृष्ट्वादेवताःसर्वाभया
र्तावितुतादिशः॥विभ्राम्यचमहच्छूलंप्रज्वलंतंनिशाचरः॥३४॥सक्रोधात्प्राहिणोत्तस्मैराघवायमहात्मने॥तमापतंतंज्वलितं
खरपुत्रकराच्च्युतं॥३५॥बाणैश्चतुर्भिराकाशेशूलंचिछेदराघवः॥सछिन्नोनैकधाशूलोदिव्यहाटकमंडितः॥३६॥यशीर्यतम
होल्केवरामबाणार्दितोभुवि॥तच्छूलंनिहतंदृष्ट्वारामेणाक्लिष्टकर्मणा॥३७॥साधुसाध्वितिभूतानिव्याहरंतिनभोगताः॥तंदृष्ट्वा
निहतंशूलंमकराक्षोनिशाचरः॥३८॥मुष्टिमुद्यम्यकाकुत्स्थंतिष्ठतिष्ठेतिचाब्रवीत्॥सतंदृष्ट्वापतंतंतुप्रहस्यरघुनंदनः॥३९
पावकास्त्रंततोरामःसंदधेतुशरासने॥तेनास्त्रेणहतंराक्षःकाकुत्स्थेनतदारणे॥४०॥सछिन्नहृदयंतत्रपपातचमहीतले
दृष्ट्वातेराक्षसाःसर्वेमकराक्षस्यपातनं॥४१॥लंकामेवप्रधावंतरामबाणार्दितास्तदा॥दशरथनृपसूनुबाणवेगैरजनिचरं
निहतंखरात्मजंतं॥ददृशुरखिलदेवताःप्रहृष्टागिरिमिववज्रहतंयथाविकीर्णं॥४३॥इत्यार्षेश्रीरामायणेवाल्मीकीये

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

युद्धकांडे मकराक्षवधएकोनाशीतितमः सर्गः ॥ ७९ ॥ मकराक्षं हतं श्रुत्वा रावणः समितिंजयः ॥ रोषेण महता विष्टो दंतान्कट
कटाप्यच ॥ १ ॥ कुपितश्चतदातत्र किंकार्यमितिचिंतयन् ॥ आदिदेशाथसंक्रुद्धो रणायेंद्रजितंसुतं ॥ २ ॥ जहिवीरमहावीर्यौ
भ्रातरौरामलक्ष्मणौ ॥ अदृश्यौदृश्यमानौवासर्वथात्वंबलाधिकः ॥ ३ ॥ त्वमप्रतिमकर्माणमिंद्रंजयसिसंयुगे ॥ किंपुनर्मानुषौ
दृष्ट्वानवधिष्यसिसंयुगे ॥ ४ ॥ तथोक्तोराक्षसेंद्रेण प्रतिगृह्यपितुर्वचः ॥ यज्ञभूमौसविधिवत्पावकंजुहुवेंद्रजित् ॥ ५ ॥ जुहुवतश्च
पितत्राग्निरक्तोष्णीषधराः स्त्रियः ॥ आजग्मुस्तत्रसंभ्रांताराक्षस्योयत्रराक्षसाः ॥ ६ ॥ शस्त्राणिशरपत्राणिसमिधोथविभीतकाः ॥
लोहितानिचवासांसिस्रुवंकाष्ठीयसंतथा ॥ ७ ॥ सर्वतोग्निंसमास्तीर्यशरपत्रैःसतोमरैः ॥ छागस्यसर्वकृष्णस्यगलंजग्राहजीव
तः ॥ ८ ॥ शरहोमसमिद्धस्यविधूमस्यमहार्चिषः ॥ बभूवुस्तानिलिंगानिविजयंयान्यदर्शयन् ॥ ९ ॥ प्रदक्षिणावर्तशिखस्तप्तहा
टकसन्निभः ॥ हविस्तत्प्रतिजग्राहपावकः स्वयमुत्थितः ॥ १० ॥ हुत्वाग्निंतर्पयित्वाथदेवदानवराक्षसान् ॥ आरुरोहरथश्रेष्ठमंत
र्धानगतंशुभं ॥ ११ ॥ सवाजिभिश्चतुर्भिस्तु वाणैस्तु विविधैर्युतः ॥ आरोपितमहाचापः शुशुभेस्यंदनोत्तमे ॥ १२ ॥ जाज्वल्यमानोवपुषा
तपनीयपरिच्छदः ॥ मृगैश्चंद्रार्धचंद्रैश्चसरथः समलंकृतः ॥ १३ ॥ जांबूनदमहाकंबुदंडप्रपावकसन्निभः ॥ बभूवेंद्रजितः केतुर्वैडू
र्यसमलंकृतः ॥ १४ ॥ तेनचादित्यकल्पेनब्रह्मास्त्रेणचपालितः ॥ सबभूवदुराधर्षोरावणिः सुमहाबलः ॥ १५ ॥ सोभिनिर्यायनगरा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

दिंद्रजित्समितिंजय॥कृत्वाग्निंराक्षसैर्मंत्रैरंतर्धानगतोब्रवीत्॥१६॥अद्यहत्वारणेयौतौमिथ्याप्रव्रजितौवने॥जयंपित्रेप्र
दास्यामिरावणायरणार्जितं॥१७॥अद्यनिर्वानरामुक्तंहत्वारामंसलक्ष्मणं॥करिष्येपरमांप्रीतिमित्युक्त्वांतरधीयत॥१८॥
आपपातार्थसंक्रुद्धोदशग्रीवेणचोदितः॥तीक्ष्णकार्मुकनाराचैस्तीक्ष्णास्त्विंद्ररिपूरणे॥१९॥ददर्शमहावीर्यौनागौत्रिशिर
साविव॥सृजंताविषुधाराभिकरौवानरमध्यगौ॥२०॥इमौताविति संचिंत्यसज्यंकृत्वाचकार्मुकं॥संततानेषुजालानिप
र्जन्यइवहृष्टिमान्॥२१॥सतुवैहायसंप्रापसरथोरामलक्ष्मणौ॥अचक्षुर्विषयेतिष्ठन्विव्याधनिशितैःशरैः॥२२॥तौतस्य
शरवेगेनपरीतौरामलक्ष्मणौ॥धनुषीसशरेकृत्वादिव्यमस्त्रंप्रचक्रतुः॥२३॥प्रच्छादयंतौगगनंशरजालैर्महाबलौ॥तमस्त्रै
ःसुरसंकाशौनैवपत्रपर्शतुःशरैः॥२४॥सहिधूमांधकारंतुचक्रेप्रच्छादयन्नभः॥दिशश्चांतर्दधेश्रीमान्नीहारतमसावृतः॥
२५॥नैवज्यातलनिर्घोषंनचनेमिस्वरस्वनः॥शुश्रुवेचरतस्तस्यनचरूपंप्रकाशते॥२६॥घनांधकारेतिमिरेशरवर्षमिवाद्भुतं
सववर्षमहाबाहुर्नाराचशरवृष्टिभिः॥२७॥सरामंसूर्यसंकाशैःशरैर्दत्तवरैर्भृशं॥विव्याधसमरेक्रुद्धःसर्वगात्रेषुरावणिः
२८॥तौहन्यमानौनाराचैर्धाराभिरिवपर्वतौ॥हेमपुंखान्नरव्याघ्रौतिग्मान्मुमुचतुःशरान्॥२९॥अंतरिक्षंसमासाद्यरावणिं
कंकपत्रिणः॥निकृत्यपतगाभूमौपेतुस्तेशोणिताप्लुताः॥३०॥अतिमात्रंशरौघेणदीप्यमानौनरोत्तमौ॥तानिशून्यपततोभल्लै

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

रनेकैर्विचकर्तनुः॥३१॥यतोहिदृष्टशरतेतौशरान्निपतितांछितान्॥ततस्तुतौराघवरथीससृजातेस्त्रमुत्तमं॥३२॥रावणिस्तुरिशः
सर्वारथेनातिरथःपतन्॥विव्याधतौराघवरथीलघुस्त्रैर्निघ्नितैःशरैः॥३३॥तेनातिविद्धौतौवीरौरुक्मपुंखैःसुसंहितैः॥बभू
वतुर्दाशरथीपुष्पितावितकिंशुकौ॥३४॥नास्यवेदगतिंकश्चिन्नचरूपंधनुःशरान्॥नचास्यविदितुंकिंचित्सूर्यस्यवाभ्रसं
प्लवे॥३५॥तेनविद्धाश्चहरयोनिहताश्चगतासवः॥बभूवुःशतशस्तत्रपतिताधरणीतले॥३६॥लक्ष्मणस्ततःक्रुद्धोभ्रातरं
वाक्यमब्रवीत्॥ब्राह्ममस्त्रंप्रमोक्ष्यामिवधार्थंसर्वरक्षसां॥३७॥अ राक्षसमिमंलोकंकरिष्यामिमहा बल॥तमुवाचततोरा
मोलक्ष्मणंशुभलक्ष्मणं॥३८॥नैकस्यहेतोरक्षांसिपृथिव्यांहंतुमर्हसि॥अस्यैवतुवधेयत्नंकरिष्यावोमहा भुजः॥४०॥आदे
क्ष्यावोमहावेगानस्त्रानाशीविषोपमान्॥तमेनंमायिनंक्षुद्रमंतर्हितरथंबलात्॥४१॥राक्षसंनिहनिष्यंतिदृष्ट्वावानरयूथपाः
४२॥यद्येषभूमिंविशतिदिवंवारसातलंवापिनभस्तलंवा॥एवंविगूढोपिममास्त्रदग्धःपतिष्यतेभूमितलेगतासुः॥४३॥इत्येवमु
क्त्वावचनंमहात्मारघुप्रवीरस्तवगर्षभैर्वृतः॥वधायरौद्रस्यनृशंसकर्मणस्तदामहात्मात्वरितंनिरीक्षते॥४४॥इत्यार्षेश्रीरा
मायणेवाल्मीकीयेयुद्धकांडेअशीतितमःसर्गः॥८०॥विज्ञायतुमनस्तस्यराघवस्यमहात्मन॥संनिवर्त्याहवात्तस्मात्प्रविवेश
पुरीततः॥१॥सोनुस्मृत्यवधंतेषांराक्षसानांतरस्विनां॥क्रोधताम्रेक्षणःशूरोनिर्जगामाथरावणिः॥२॥सपश्चिमेनद्वारेणनिर्य

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

योराक्षसैर्वृतः॥इंद्रजित्सुमहावीर्यः पौलस्त्योदेवकंटकः॥३॥इंद्रजित्ततोदृष्ट्वाभ्रातरौरामलक्ष्मणौ॥रणायाभ्युद्यतौवीरौमा-
यांप्रादुष्करोत्तत॥४॥इंद्रजित्तुरथेस्थाप्यसीतांमायामयींतदा॥बलेनमहतावृत्यतस्यावधमरोचयत॥५॥मोहनार्थंतुसर्वेषां
बुद्धिंकृत्वासुदुर्मतिः॥हंतुंसीतांअवसितोवानराभिमुखोययौ॥६॥तंदृष्ट्वात्वभिनिर्यांतंसर्वेतेकाननौकसः॥उत्पेतुरभिसंक्रु
द्धाःशिलाहस्तायुयुत्सवः॥७॥हनूमान्पुरतस्तेषांजगामकपिकुंजरः॥प्रगृह्यसुमहत्शृंगंपर्वतस्यदुरासदं॥८॥सददर्शह
तानंदांसीतामिंद्रजितोरथे॥एकवेणीधरांदीनामुपवासकृशाननां॥९॥परिक्लिष्टैकवसनाममृजांराघवप्रियां॥रजोमला
भ्यामालिप्तैःसर्वगात्रैर्वरस्त्रियं॥१०॥तांनिरीक्ष्यमुहूर्तंतुमैथिलीमध्यवस्यत॥बभूवाचिरदृष्टाहितेनसाजनकात्मजा॥११॥
तांदीनामलदिग्धांगींरथस्थांप्रेक्ष्यमैथिलीं॥बाष्पपर्याकुलमुखोहनूमान्व्यथितोभवत्॥१२॥अब्रवीत्तांतुशोकार्तांनिरानंदांत
पस्विनीं॥दृष्ट्वारथस्थितांदीनांराक्षसेंद्रसुताश्रितां॥१३॥किंसमर्थितमस्येतिचिंतयन्मनसाकपिः॥सहितैर्वानरश्रेष्ठैरभ्यधा
वतरावणिं॥१४॥तद्वानरबलंदृष्ट्वारावणिःक्रोधमूर्छितः॥कृत्वाविकोशंनिस्त्रिंशंमूर्ध्नीसीतामकर्षयत्॥१५॥तांस्त्रियंपश्यतां
तेषांताडयामासराक्षसः॥क्रोशंतींरामरामेतिमाययायोजितांरथे॥१६॥गृहीतमूर्धजांदृष्ट्वाहनूमान्दैन्यमागतः॥दुःखजंवा
रिनेत्राभ्यांउत्सृजन्मारुतात्मजः॥१७॥तांदृष्ट्वाचारुसर्वांगींरामस्यमहिषींप्रियां॥अब्रवीत्परुषंवाक्यंक्रोधाद्रक्षोधिपात्मजं॥१८॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

दुरात्मनात्मन्नाशायकेशपक्षेपरामृशः॥ब्रह्मषऽर्णांकुलेजातोराक्षसीयोनिमाश्रितः॥२७॥धिक्त्वांपापसमाचारंयस्यतेमतिरी
दृशी॥नृशंसानार्यदुर्वृत्तक्षुद्रपापपराक्रम॥२८॥अनार्यस्येदृशंकर्मघृणातेनास्तिनिर्घृण॥च्युताएहाच्चराज्याच्चरामहस्ताच्चमै
थिली॥२९॥किंतवेषापराद्धाहियदेनांहंतुमिच्छसि॥सीतांहत्वातुनचिरंजीविष्यसिकथंचन॥३०॥वधार्हकर्मणानेनममहस्तगतो
ह्यसि॥येचस्त्रीघातिनोलोकालोकवध्येषुकुत्सिताः॥३१॥इहजीवितमुत्सृज्यप्रेत्यतान्प्रतिपद्यसे॥इतिब्रुवाणोहनुमान्मायु
धैर्बहुभिर्वृतः॥३२॥अभ्यधावत्संक्रुद्धोराक्षसेंद्रसुतंप्रति॥आपतंतंमहावीर्यंतदनीकंवनौकसाः॥३३॥राक्षसांभीमकोपाना
मनीकेनन्यवारयत्॥सतांबाणसहस्रेणविक्षोभ्यहरिवाहिनीं॥३४॥हनूमंतंहरिश्रेष्ठमिंद्रजित्प्रत्युवाचह॥सुग्रीवस्त्वंचरामश्च
यन्निमित्तमिहागताः॥३५॥तांवधिष्यामिवैदेहीमद्यैवतवपश्यतः॥इमांहत्वाततोरामंलक्ष्मणंत्वांचवानर॥३६॥सुग्रीवंचहनि
ष्यामितंचानार्यंविभीषणं॥नहंतव्याःस्त्रियश्चेतियद्ब्रवीषिप्लवंगम॥३७॥पीडाकरममित्राणांयत्स्यात्कर्तव्यमेवतत्॥ताटका
यावधंरामःकिमर्थंकृतवान्पुरा॥३८॥तदहंहन्मिरामस्यमहिषींजनकात्मजां॥तमेवमुक्त्वारुदतीसीतांमायामयींतदा॥३९॥शि
तघोरेणखड्गेननिजघानेंद्रजित्स्वयं॥यज्ञोपवीतमार्गेणछिन्नातेनतपस्विनी॥४०॥साएथिर्आएथुश्रोणीपपातप्रियदर्शना॥ता
मिंद्रजित्स्त्रियंहत्वाहनूमंतमुवाचह॥४१॥मयारामस्यपत्नीयमांप्रियांशस्त्रनिषूदितां॥एषाविशस्तावैदेहीविफलोवःपराक

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

मः॥३४॥ततःखड्गेनमहताहत्वातामिंद्रजित्स्वयं॥हृष्टःस्वरथमास्थायननादचमहास्वनं॥३५॥वानराःशुश्रुवुःमदूरंप्रत्यव
स्थिताः॥आदितास्यस्यनदतस्तद्दुर्गसंश्रितस्यच॥३६॥तथातुसीतांविनिहत्यदुर्मतिःप्रहृष्टचेताःसबभूवरावणिः॥तंदृष्ट
रूपंसमुदीक्ष्यवानराविषण्णरूपाःसमभिप्रदुद्रुवुः॥३७॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेएकाशितितमःस
र्गः॥८१॥श्रुत्वातंभीमनिर्ह्रादंशक्राशनिसमस्वनं॥वीक्ष्यमाणादिशःसर्वादुद्रुवुर्वानरर्षभाः॥१॥तानुवाचततःसर्वान्ह
नूमान्मारुतात्मजः॥विषण्णवदनान्दीनान्त्रस्तान्विद्रवतःपृथक्॥२॥कस्माद्विषण्णवदनाविद्रवध्वंप्लवंगमाः॥त्यक्त
युद्धसमुत्साहाःशूरत्वंकनुवोगतं॥३॥पृष्ठतोनुव्रजध्वंमामग्रतोयांतमाहवे॥शूरैरभिजनोपेतैर्नयुक्तंत्यातिवर्तितुं॥४॥ए
वमुक्ताःसुसंहृष्टावायुपुत्रेणधीमता॥शैलशृंगान्द्रुमांश्चैवजगृहुर्हृष्टमानसाः॥५॥अभिपेतुश्चगर्जंतोराक्षसान्वानरर्ष
भाः॥परिवार्यहनूमंतमन्वयुश्चमहाहवे॥६॥सतैर्वानरमुख्यैस्तुहनूमान्सर्वतोवृतः॥हुताशनइवार्चिष्मान्ननदहच्छत्रुवा
हिनीं॥७॥सराक्षसानांकदनंचकारसुमहान्कपिः॥वृतोवानरसैन्येनकालांतकयमोपमः॥८॥सतुशोकेनचाविष्टोपेनम
हताकपिः॥हनूमान्रावणिरथेमहतीपातयच्छिलां॥९॥तामापतंतींदृष्ट्वैवरथंसारथिनातदा॥विधेयाश्वसमायुक्तोवि
दूरमपवाहितः॥१०॥तमिंद्रजितमप्राप्यरथस्थंसहसारथिं॥विवेशधरणींभित्त्वासाशिलाअर्धमुद्यता॥११॥पतितायांशिला

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

यांतुव्यथितारक्षसांचमूः॥निपतंत्याःचशिलायारक्षसामथिताभृशं॥१२॥तमभ्यधावन्शतशोनदंतःकाननौकसः॥तेद्रुमां
श्चमहाकायागिरिशृंगाणिचोद्यताः॥१३॥क्षिपंतोद्रुजितःसैन्येवानराभीमविक्रमाः॥वृक्षशैलमहावर्षंविसृजंतःप्लवंगमाः
१४॥शत्रूणांकदनंचक्रुर्नेदुश्चविविधैःस्वनैः॥वानरैस्तैर्महाभीमैर्घोररूपानिशाचराः॥१५॥वीर्यादभिहतावृक्षैर्मर्मचेष्टंतरणा
क्षितौ॥स्वसैन्यमभिवीक्ष्याथवानरार्दितमिंद्रजित्॥१६॥परिगृह्यायुधंक्रुद्धःपरानभिमुखोययौ॥सशरौघानवसृजन्स्वसैन्ये
नाभिसंवृतः॥१७॥जघानकपिशार्दूलान्सबहूनहृष्टविक्रमः॥शूलैरशनिभिःखड्गैःपट्टिशैःकूटमुद्गरैः॥१८॥तेचाप्यनुचरास्त
स्यवानरान्जघ्नुरोजसा॥सस्कंधविटपैःसालैःशिलाभिश्चमहाबलाः॥१९॥हनूमान्कदनंचक्रेरक्षसांभीमकर्मणां॥तेनाथनिहता
स्त्रस्तारक्षसाभीमविक्रमाः॥२०॥विद्रुताःशतशःसर्वेरावणस्यहितैषिणः॥सनिवार्यपरानीकमब्रवीतान्वनौकसः॥२१॥हनूमा
न्सनिवर्त्तध्वंननःसाध्यमिदंबलं॥त्यक्त्वाप्राणान्विचेष्टामोरामप्रियचिकीर्षया॥२२॥यन्निमित्तंहियुध्यामोहतासाजनकात्म
जा॥इममर्थंहिविज्ञाप्यरामंसुग्रीवमेवच॥२३॥तौयत्प्रतिविधास्येतेतत्करिष्यामहेवयं॥इत्युक्त्वावानरश्रेष्ठोवारयन्सर्ववा
नरान्॥२४॥शनैःशनैरसंत्रस्तःसबलःसन्यवर्त्तत॥सतुप्रेक्षहनूमंतंव्रजंतंयत्रराघवौ॥२५॥सहोतुकामोदुष्टात्मागतश्चैत्यं
निकुंभिलां॥निकुंभिलामधिष्ठायपावकंजुहुवेंद्रजित्॥२६॥यज्ञभूम्यांतुविधिवत्पावकस्तेनरक्षसा॥हूयमानःप्रजज्वालहे

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

मशोणितभुक्तदा ॥२४॥ सार्चिःपिनद्धोदृशेहोमशोणितनर्पितः ॥ संध्यागतइवादित्यसदीप्तोग्निःसमुत्थितः ॥ अथेंद्रजिद्राक्ष
सभूतिहेतुर्जुहावहव्यंविधिनाविधानवित् ॥ दृष्ट्वाप्रतिष्ठंतचराक्षसास्तेमहासमूहेषुनयानयज्ञाः ॥ २५ ॥ इत्यार्षेश्रीरामायणेवा
ल्मीकीयेयुद्धकांडेद्व्यशीतितमःसर्गः ॥ ८२ ॥ राघवश्चापिविपुलंतंराक्षसवनौकसा ॥ श्रुत्वासंग्रामनिर्घोषंजांबवंतमुवाचह ॥
१ ॥ सौम्यनूनंहनुमताक्रियतेकर्मदुष्करं ॥ श्रूयतेहियथाभीमःसुमहानायुधस्वनः ॥ २ ॥ तद्गच्छकुरुसाहाय्यंबलेनाभिसंवृतः
क्षिप्रमृक्षपतेतस्यकपिश्रेष्ठस्ययुध्यतः ॥ ३ ॥ ऋक्षराजस्तथेत्युक्त्वातेनानीकेनसंवृतः ॥ अगच्छत्पश्चिमद्वारंहनूमान्यत्रवान
रः ॥ ४ ॥ अथायांतंहनूमंतंददर्शर्क्षपतिःपथि ॥ वानरैःकृतसंग्रामैःश्वसद्भिरभिसंवृतं ॥ ५ ॥ दृष्ट्वापथिहनूमांश्चतद्दृष्टबलमुद्यतं
नीलमेघनिभंभीमंसंनिवार्यन्यवर्तत ॥ ६ ॥ सतेनहरिसैन्येनसन्निकर्षेमहायशाः ॥ शीघ्रमागम्यरामायदुःखितोवाक्यमब्र
वीत् ॥ ७ ॥ समरेयुध्यमानानांअस्माकंप्रेक्ष्यतांपुरः ॥ जघानरुदतींसीतामिंद्रजिद्रावणात्मजः ॥ ८ ॥ उद्भ्रांतचित्तस्तांदृष्ट्वाविषणो
हमरिंदम ॥ तदहंभवतोवृत्तंविज्ञापयितुमागतः ॥ ९ ॥ तस्यतद्वचनंश्रुत्वाराघवःशोकमूर्छितः ॥ निपपातततोभूमौछिन्नमूलइ
वद्रुमः ॥ १० ॥ तंभूमौदेवसंकाशंपतंतंदृश्यराघवं ॥ अभिपेतुःसमुत्पत्यसर्वतःकपिसत्तमाः ॥ ११ ॥ असिंचन्सलिलैश्चैनंपद्मो
त्पलसुगंधिभिः ॥ तद्दहंतंमनासाद्यंसहसाग्निमिवोत्थितं ॥ १२ ॥ तंलक्ष्मणोथबाहुभ्यांपरिष्वज्यसुदुःखितः ॥ उवाचराममस्वस्थं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri.

वाक्यहेत्वर्थसंयुतं॥१३॥शुभेवर्त्मनितिष्ठंतंत्वमार्यविजितेंद्रियं॥अनर्थेभ्योनशक्नोतिचातुंधर्मोनिरर्थकः॥१४॥भूतानांस्थावरा
णांचजंगमानांचदर्शनं॥यथास्तिनतथाधर्मस्तेननास्तीतिमेमतिः॥१५॥यथैवरंव्यक्तंजंगमंचतथाविधं॥नायमर्थस्तथायु
क्तस्त्वद्विधोनविपद्यते॥१६॥यद्यधर्मोभवेद्भूतोरावणोनरकंव्रजेत्॥भवांश्चधर्मसंयुक्तोनैवव्यसनमाप्नुयात्॥१७॥तस्यचव्यस
नाभावाद्व्यसनंचगतेत्वयि॥धर्मोभवत्यधर्मश्चपरस्परविरोधिनौ॥१८॥धर्मेणोपलभेद्धर्ममधर्मंचाप्यधर्मतः॥यद्यधर्मेण
युज्येयुयेचधर्मःप्रतिष्ठितः॥१९॥यदिधर्मेणयुज्येरन्नाधर्मरुचयोजनाः॥धर्मेणवदतांधर्मस्तथातेषांफलंभवेत्॥२०॥यस्मा
दर्थाविवर्धंतेयेचधर्मःप्रतिष्ठितः॥क्लिश्यंतेधर्मशीलाश्चतस्मादेतौनिरर्थकौ॥२१॥वर्धंतेपापकर्माणोयद्यधर्मेणराघव
वधकर्महतोधर्मःसहतःकंवधिष्यति॥२२॥अथवाविहितेनार्यंहन्यतेहंतिचापरं॥विधिरालिप्यतेतेननसपापेनकर्मणा
२३॥अदृष्टप्रतिकारेणअव्यक्तेनासतासता॥कथंशक्यंपरंप्राप्तुंधर्मेणरिपुकर्शन॥२४॥यदिसत्यात्सतांमुख्यनासत्या
नवकिंचना॥त्वयायदीदृशंप्राप्तंतस्मात्सन्नोपपद्यते॥२५॥अथवादुर्बलःक्लीबोबलंधर्मोनुवर्तते॥दुर्बलोहतमर्यादोनसेव्य
इतिमेमतिः॥२६॥बलस्यपरिवेद्धर्मोगुणभूतपराक्रमे॥धर्ममुत्सृज्यवर्तस्वयथाधर्मेतथाबले॥२७॥अथचेत्सत्यवचनंधर्मः
किलपरंतप॥अनृतस्त्वप्यकरुणकिन्नबद्धस्त्वयापिता॥२८॥यदिधर्मोभवद्भूतअधर्मोवापरंतप॥नसंहत्वामुनिंवज्रीकुर्या

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

रिज्यात्रातक्रतुः॥२९॥अधर्मसंश्रितोधर्मोविनाशयतिराघव॥सर्वमेतद्यथाकामंकाकुत्स्थकुरुतेनरः॥३०॥ममचेदंमतंतात
धर्मोयमितिराघव॥धर्ममूलंतदाछिन्नंराज्यामुत्सृजतात्वया॥३१॥अर्थेभ्योपिविवृद्धेभ्यःसंवृतेभ्यस्ततस्ततः॥क्रियाःसर्वाः
प्रवर्तंतेपर्वतेभ्यइवापगा॥३२॥अर्थेनहिवियुक्तस्यपुरुषस्यात्मतेजसः॥विछिद्यंतेक्रियाःसर्वाग्रीष्मेकुसरितोयथा॥३३॥
सोयमर्थेपरित्यज्यसुखकामःसुखेधितः॥पापमाचरतेकर्तुंततोदोषःप्रवर्तते॥३४॥यस्यार्थास्तस्यमित्राणियस्यार्थास्तस्यबांध
वाः॥यस्यार्थःसपुमाल्लोकेयस्यार्थःसचपंडितः॥३५॥यस्यार्थसचविक्रांतोयस्यार्थःसचबुद्धिमान्॥यस्यार्थःसमहाबाहुर्यस्य
र्थसगुणाधिकः॥३६॥अर्थस्यैतेपरित्यागेदोषाःप्रत्याहृतामया॥राज्यमुत्सृजतावीरयेनबुद्धिस्त्वयाकृता॥३७॥यस्यार्थौधर्मका
मार्थास्तस्यसर्वप्रदक्षिणं॥अधनेनार्थकामेननार्थःशक्योविचिन्वता॥३८॥हर्षकामश्चदर्पश्चधर्मःक्रोधःशमोदमः॥अर्थादे
तानिसर्वाणिप्रवर्तंतेनराधिप॥३९॥येषांनश्यत्ययंलोकश्चरतांधर्मचारिणां॥तेर्थास्त्वयिनदृश्यंतेदुर्दिनेषुयथाग्रहाः॥४०॥त्व
यिप्रव्रजितेवीरगुरोश्चवचनेस्थिते॥रक्षसापहृताभार्याप्राणैःप्रियतरातव॥४१॥तदद्यविपुलंवीरदुःखमिंद्रजिताकृतं॥कर्मणा
व्यपनेष्यामितस्मादुत्तिष्ठराघव॥४२॥उत्तिष्ठनरशार्दूलदीर्घबाहोधृतव्रत॥किमात्मानंमहात्मानंमहात्मन्नावबुध्यसे॥४३॥भ
यमनघतवोदितःप्रियार्थंजनकसुतानिधनंनिरीक्ष्यरुष्टः॥सरथगजहयांसराक्षसेंद्रांभृशमिषुभिर्विनिपातयामिलंकां॥४४॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेअशीतितमःसर्गः॥८३॥रामस्याश्वासमानेतुलक्ष्मणेभ्रातृवत्सले॥निक्षिप्यगुल्मान्स्व
स्थानेतत्रागच्छद्विभीषणः॥१॥नानाप्रहरणैर्वीरैश्चतुर्भिरभिसंवृतः॥नीलांजनचयाकारैर्मातंगैरिवयूथपः॥२॥सोभिगम्यमहा
त्मानंराघवंशोकलालसं॥वानराश्चापिदृष्ट्वैवाप्यपर्याकुलेक्षणान्॥३॥राघवंचमहात्मानमिक्ष्वाकुकुलनंदनं॥ददर्शमोह
मापन्नंलक्ष्मणस्यांकमाश्रितं॥४॥व्रीडितंशोकसंतप्तंदृष्ट्वारामंविभीषणः॥अंतर्दुःखेनदीनात्माकिमेतदितिसोब्रवीत्॥५॥विभी
षणमुखंदृष्ट्वासुग्रीवंतांश्चवानरान्॥लक्ष्मणोवाचमंदार्थमिदंवाष्पपरिप्लुतः॥६॥हतामिंद्रजितासीतामिहश्रुत्वैवराघवः॥हृद
मद्वचनात्सौम्यततोमोहमुपाश्रितः॥७॥कथंयंतंतुसौमित्रिंसनिवार्यविभीषणः॥पुष्कलार्थमिदंवाक्यंविसंज्ञंराममब्रवीत्॥८॥
मनुजेंद्रार्तरूपेणयदुक्तस्त्वंहनूमता॥तदयुक्तमहंमन्येसागरस्येवशोषणं॥९॥अभिप्रायंतुजानामिरावणस्यदुरात्मनः॥सीतां
प्रतिमहाबाहोनचघातंकरिष्यति॥१०॥याचमानःसुबहुशोमयाहितचिकीर्षुणा॥वैदेहीमुत्सृजस्वेतिनचतत्कृतवान्वचः॥
११॥नैवसाम्नानदानेननभेदेनकुतोयुधा॥साहृष्टुमयिशक्येतनैवचान्येनकेनचित्॥१२॥वानरान्मोहयित्वातुप्रतियातःसराक्ष
सः॥चैत्यंनिकुंभिलांनामयत्रहोमंकरिष्यति॥१३॥हुतवानुपवातोहिदेवैरपिसवासवैः॥दुराधर्षोभवत्येषसंग्रामेरावणात्मजः
१४॥तेनमोहयतानूनमेषामात्याप्रयोजिता॥विघ्नमिच्छतातातवानराणांपराक्रमे॥१५॥ससैन्यास्तत्रगच्छामोयावत्तन्नसमाप्य

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

ते॥त्यजेमं नरशार्दूल मिथ्यासंतापमागतं॥२६॥सीदतेहि बलं सर्वं दृष्ट्वा त्वां शोककर्षितं॥इह त्वं स्वस्थहृदयस्तिष्ठ सत्वसमुत्थि
तः॥२७॥लक्ष्मणं प्रेषयास्माभिः सह सैन्यानुकर्षिभिः॥एष तं नरशार्दूलो रावणिं निशितैः शरैः॥२८॥त्याजयिष्यति तत्कर्म ततो व
ध्यो भविष्यति॥तस्येते निशिताः तीक्ष्णाः पत्रिपत्रांगवाजिताः॥२९॥पतत्रिण इवासोम्याः शराः पास्यंति शोणितं॥तं संदिश महाबा
हो लक्ष्मणं शुभलक्ष्मणं॥३०॥राक्षसस्य विनाशाय वज्रं वज्रधरो यथा॥मनुजवरनकालविप्रकर्षो रिपुनिधनं प्रति यस्य मोघ
कर्तृ॥३१॥त्वमतिसृज रिपोर्वधाय बाणममररिपोर्मथने यथा महेंद्रः॥३२॥समाप्तकर्मा हि सराक्षसेंद्रो भवत्यदृश्यः समरे सुरासु
रैः॥युयुत्सुना ते न समाप्तकर्मणा भवेत्सुराणामपि संशयो महान्॥३३॥इत्यार्षे श्रीरामायणे वाल्मीकीये युद्धकांडे चतुराशीति
तमः सर्गः॥८४॥तस्य तद्वचनं श्रुत्वा राघवः शोककर्षितः॥नोपधारयते वाक्यं यदुक्तं ते नरक्षसा॥१॥ततो धैर्यमवष्टभ्य रामः परपु
रंजयः॥विभीषणमुपासीनमुवाच कपिसन्निधौ॥२॥नैर्ऋताधिपते वाक्यं यदुक्तं ते विभीषण॥भूयस्तत् श्रोतुमिच्छामि ब्रूहि
यत्ते विवक्षितं॥३॥राघवस्य वचः श्रुत्वा वाक्यं वाक्यविशारदः॥यत्तत्सुनरिदं वाक्यं बभाषे स विभीषणः॥४॥यथाज्ञप्तं महाबाहो
त्वया गुल्मनिवेशनं॥तत्तथानुष्ठितं वीर त्वद्वाक्यसमनंतरं॥५॥तान्यनीकानि सर्वाणि विभक्तानि समंततः॥विन्यस्ता यूथपा
श्चैव यथान्यायं विभागशः॥६॥भूयस्तु मम विज्ञाप्यं तत् शृणुष्व महाप्रभो॥त्वय्यकारणसंतप्ते संतप्तं हृदयावयं॥७॥त्यज राज

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

न्निमंशोकं मिथ्यासंतापमागतं॥ नहि यंत्यजनांचिंताशत्रुहर्षविवर्धनी॥ ८॥ उद्यमक्रियतांवीरहर्षःसमुपसेव्यतां॥ प्राप्तव्या
यदितेसीताहंतव्याश्चनिशाचराः॥ ९॥ रघुनंदनवक्ष्यामिश्रूयतांमेहितंवचः॥ साध्वयंयातुसौमित्रिर्बलेनमहतावृतः॥ १०॥ नि
कुंभिलायांसंप्राप्तंहंतुंरावणिमाहवे॥ धनुर्मंडलनिर्मुक्तैराशीविषविषोपमैः॥ ११॥ शरैर्हंतुंमहेष्वासोरावणिंसमितिंजयः॥ ते
नवीरेणतपसावरदानात्स्वयंभुवः॥ १२॥ अस्त्रंब्रह्मशिरःप्राप्तंकामगाश्चतुरंगमाः॥ सएषसहसैन्येनप्राप्तःकिलनिकुंभिलां
१३॥ यद्युत्तिष्ठेत्कर्मकृत्वाहतास्सर्वेश्चविद्विषः॥ निकुंभिलामसंप्राप्तमहुताग्निंचयोरिपुः॥ १४॥ त्वामाततायिनंहन्यादिंद्रश
त्रोसतेवधः॥ वरोदत्तोमहाबाहोसर्वलोकेश्वरेणवै॥ १५॥ इत्येवंविहितोराजन्वधस्तस्यैषधीमतः॥ वधायेंद्रजितोराममंदि
रास्वमहाबल॥ १६॥ हतेतस्मिन्हतंविद्धिरावणंससुहृद्गणं॥ विभीषणवचःश्रुत्वारामोवाक्यमथाब्रवीत्॥ १७॥ जानामित
स्यरौद्रस्यमायांसत्यपराक्रम॥ सहिब्रह्मास्त्रवित्राज्ञोमहामायोमहाबलः॥ करोत्यसंज्ञांसंग्रामेदेवान्सवरुणानपि॥ तस्यां
तरिक्षेचरतःसरथस्यमहाहवे॥ १९॥ नगतिर्ज्ञायतेवीरसूर्यस्येवाभ्रसंप्लवे॥ राघवस्तुरिपोर्ज्ञात्वामायावीर्यंदुरात्मनः॥ २०॥
लक्ष्मणंकीर्तिसंपन्नमिदंवचनमब्रवीत्॥ यद्वानरेंद्रस्यबलंतेनसर्वेणसंवृतः॥ २१॥ जहितंराक्षससुतंमायाबलसमन्वितं॥
अयंत्वांसचिवैःसार्धंमहात्मारजनीचरः॥ २३॥ अभिज्ञस्तस्यदेशस्यपृष्ठतोनुगमिष्यति॥ राघवस्यवचःश्रुत्वालक्ष्मणःसविभी

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

षण॥२४॥ जयाहकार्मुकश्रेष्ठमन्यद्भीमपराक्रमः॥सन्नद्धः कवचीखड्गीसशरीहेमचापभृत॥२५॥रामपादावुपस्पृश्यहृष्टः
सौमित्रिरब्रवीत॥अद्यमत्कार्मुकान्मुक्ताःसरानिर्भिद्यरावणिं॥२६॥लंकामभिपतिष्यंतिहंसाःपुष्करिणीमिव॥अद्यैवतस्यरौद्र
स्यशरीरंमामकाशराः॥२७॥विधमिष्यंतिभित्वातंमहाचापगुणच्युताः॥सएवमुक्त्वावचनंद्युतिमान्भ्रातुरग्रतः॥२८॥सराव
णिवधाकांक्षीलक्ष्मणस्त्वरितोययौ॥सौमित्रिवाद्यगुरोःपादौकृत्वाचापिप्रदक्षिणं॥२९॥निकुंभिलामभिययौचैत्यंरावणिपालि
तं॥विभीषणेनसहितोराजपुत्रःप्रतापवान्॥३०॥कृतस्वस्त्ययनोभ्रात्रालक्ष्मणस्त्वरितोययौ॥वानराणांसहस्रैस्तुहनूमान्
बहुभिर्वृतः॥३१॥विभीषणश्चसामात्योलक्ष्मणंत्वरितंययौ॥महताहरिसैन्येनसुवेगमभिसंवृतः॥३२॥ऋक्षराजबलंचैवदद
र्शपथिविष्ठितं॥सगत्वादूरमध्वानंसौमित्रिर्मित्रनंदनः॥३३॥राक्षसेंद्रबलंदूरापेक्ष्यव्यूहमाश्रितं॥ससंप्राप्यधनुष्पाणिर्मा
यायोगमरिंदमः॥३४॥तस्थौब्रह्मविधानेनजेतुंतंरघुनंदनः॥विभीषणेनसहितोराजपुत्रःप्रतापवान्॥३५॥अंगदेनचवीरेण
तथानिलसुतेनच॥विविधममलशस्त्रभास्वरंतत्ध्वजगहनंविपुलंमहारथैश्च॥प्रतिभयतममप्रमेयवेगंतिमिरमिवद्विष
तांबलंविवेश॥३६॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेपंचाशीतितमःसर्गः॥८५॥अथतस्यामवस्थायांलक्ष्मणंरा
वणानुजः॥परेषामहितंवाक्यमर्थसाधकमब्रवीत॥१॥यदेतद्रक्षसानीकंमेघश्यामंविलोक्यते॥एतदायोध्यतांशीघ्रंकपि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

भिश्चशिलायुधैः॥२॥अस्यानीकस्यमहतोभेदनेयतलक्ष्मण॥राक्षसेंद्रसुतोप्यत्रभिन्नेदृश्योभविष्यति॥३॥सत्वमिंद्राशनिप्रख्यै
शरैरवकिरन्परान्॥अभिद्रवामुयावद्वैनैतत्कर्मसमाप्यते॥४॥जहिवीरदुरात्मानंमायाधरमधार्मिकं॥रावणिंक्रूरकर्माणंस
र्वलोकभयावहं॥५॥विभीषणवचःश्रुत्वालक्ष्मणःशुभलक्षणः॥ववर्षशरवर्षाणिराक्षसेंद्रसुतंप्रति॥६॥ऋक्षाःशाखामृगाश्चै
वद्रुमप्रवरयोधिनः॥अभ्यधावंतसहितास्तदनीकमवस्थितं॥७॥राक्षसाश्चशितैर्बाणैरसिभिःशक्तितोमरैः॥अभ्यवर्तंतस
मरेकपिसैन्यंजिघांसवः॥८॥ससंप्रहारस्तुमुलःसंजज्ञेकपिरक्षसां॥शक्रेनमहतालंकानादयन्वैसमंततः॥९॥शस्त्रैश्चविविधै
राकारैःशितैर्बाणैश्चपादपैः॥उद्यतैर्गिरिशृंगैश्चघोरैराकाशमावृतं॥१०॥तेराक्षसावानरेषुविकृताननबाहवः॥निवेशयंतः
शस्त्राणिचक्रुस्तेसुमहद्भयं॥११॥यथैवसकलैर्वृक्षैर्गिरिशृंगैश्चवानराः॥अभिजग्मुश्चजघ्नुश्चसमरेसर्वराक्षसान्॥१२॥ऋ
क्षवानरमुख्यैश्चमहाकायैर्महाबलैः॥रक्षसांयुध्यमानानांमहद्भयमजायत॥१३॥स्वमनीकंविषण्णंतुश्रुत्वाशत्रुभिरर्दितं
उदतिष्ठतदुर्धर्षस्तत्कर्मण्यननुष्ठिते॥वृक्षांधकारान्निर्गम्यजातक्रोधःसरावणिः॥आरुरोहरथंसज्जंपूर्वयुक्तंसराक्ष
सः॥१५॥सभीमकार्मुकशरःकृष्णांजनचयोपमः॥रक्तास्यनयनःक्रूरोवभौमृत्युरिवांतकः॥१६॥दृष्ट्वैवतुरथस्थंतंपर्यवर्तंत
तद्बलं॥रक्षसांभीमवेगानांलक्ष्मणेनयुयुत्सतां॥१७॥तस्मिन्कालेतुहनुमानुद्यम्यसुदुरासदं॥धरणीधरसंकाशोमहावृक्ष

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

मरिंदम॥१८॥सराक्षसानांतत्सैन्यंकालाग्निरिवनिर्दहन॥चचारबहुभिर्वृक्षैर्निःसंज्ञंयुधिवानरः॥१९॥विध्वंसयंतंतरसा
वृक्षैर्वपवनात्मजं॥राक्षसानांसहस्राणिहनूमंतमवाकिरन्॥२०॥शितशूलधराःशूरैरसिभिश्चापपाणयः॥शक्तिहस्ताश्च
शक्तिभिःपट्टिशैःपट्टिशायुधाः॥२१॥परिघैश्चगदाभिश्चकुंतैश्चशुभदर्शनैः॥शतघ्नीभिरायसैरपिमुद्गरैः॥२२॥घोरैः
परशुभिश्चैवभिंडिपालैश्चराक्षसाः॥मुष्टिभिर्वज्रवेगैश्चतलैरशनिसंनिभैः॥२३॥अभिजघ्नुःसमासाद्यसमंतात्पर्वतोपमं॥
तेषामपिचसंक्रुद्धश्चकारकदनंमहत्॥२४॥सददर्शकपिश्रेष्ठमचलोपममिंद्रजित्॥सूदयानममित्रघ्नममित्रान्प
वनात्मजं॥२५॥ससारथिमुवाचेदंयाहियत्रैषवानरः॥क्षयमेवहिनःकुर्याद्राक्षसानामुपेक्षितः॥२६॥इत्युक्तःसारथिस्तेन
ययौयत्रसमारुतिः॥वहन्परमदुर्धर्षंस्थितमिंद्रजितंरणे॥२७॥सोभ्युपेत्यशरान्रवङ्गान्पट्टिशासिपरश्वधान्॥अभ्यवर्षत
दुर्धर्षःकपिमूर्ध्निराक्षसः॥२८॥तानिशस्त्राणिघोराणिप्रतिगृह्यसमारुतिः॥रोषेणमहताविष्टोवाक्यंचेदमुवाचह॥२९॥युध्य
स्वयदिशूरोसिरावणात्मजदुर्मते॥वायुपुत्रंसमासाद्यनजीवन्प्रतियास्यति॥३०॥बाहुभ्यांसंप्रयुध्यस्वयदिमेद्वंद्वमाहवे॥
वेगंसहस्वदुर्बुद्धेततस्त्वांराक्षसाधम॥३१॥हनूमंतंजिघांसंतंसमुद्यतशरासनं॥रावणात्मजमाचष्टेलक्ष्मणायविभीषणः
३२ यःसवासवनिर्जेतारावणस्यात्मसंभवः॥सभूयोरथमास्थायहनूमंतंजिघांसति॥३३॥तमप्रतिमसंस्थानैःशरैःशत्रुनि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वारणैः॥ जीवितांतकरैर्घोरैः सौमित्रे रावणिं जहि॥ ५४॥ इत्येवमुक्तस्तु तदा महात्मा विभीषणेनारिविभीषणेन॥ दृष्टं पर्व
तसन्निकाशं रथस्थितं भीमबलं दुरासदं॥ ३५॥ इत्यार्षे श्रीरामायणे वाल्मीकीये युद्धकांडे षडशीतितमः सर्गः॥ ८६॥ एवमुक्त
तु सौमित्रिं जातक्रोधो विभीषणः॥ धनुःपाणिनमादाय त्वरमाणो जगाम सः॥ १॥ अविदूरं ततो गत्वा प्रविश्य तु महद्बलं॥ अद
र्शयत तत्कर्म लक्ष्मणाय न्यवेदयत॥ २॥ नीलजीमूतसंकाशं न्यग्रोधं भीमदर्शनं॥ तेजस्वी रावणभ्राता लक्ष्मणाय न्यवेदय
त्॥ ३॥ इहोपहारं भूतानां बलवान् रावणात्मजः॥ उपहृत्य ततः पश्चात् संग्राममभिवर्तते॥ ४॥ अदृश्यः सर्वभूतानां ततो भवति
राक्षसः॥ निहंति समरे शत्रून् वध्नाति च शरोत्तमैः॥ ५॥ तमत्र विष्ठं न्यग्रोधं बलिनं रावणात्मजं॥ विध्वंसय शरैस्तीक्ष्णैः सरथं सा
श्वसारथिं॥ ६॥ तथेत्युक्त्वा महातेजाः सौमित्रिर्मित्रवत्सलः॥ बभूवावस्थितस्तत्र चित्रं विस्फारयन् धनुः॥ ७॥ सरथेनाग्निवर्णे
न बलवान् रावणात्मजः॥ इंद्रजित् कवची धन्वी सध्वजः प्रत्यदृश्यत॥ ८॥ तमुवाच महातेजाः पौलस्त्यमपराजितं॥ समाह्वयेत्वं
समरे सम्यक् युद्धं प्रयच्छ मे॥ ९॥ एवमुक्त्वा महातेजा मनस्वी रावणात्मजः॥ अब्रवीत् परुषं वाक्यं तत्र दृष्ट्वा विभीषणं॥ १०॥ इहत्वं
जातसंवृद्धः साक्षाद्भ्राता पितुर्मम॥ कथं दुष्टासि पुत्रस्य पितृव्यो मम राक्षसः॥ ११॥ न ज्ञातित्वं न सौहार्दं न जातिस्तव दुर्मते॥ प्रमा
णं न च सौदर्यं न धर्मो धर्मदूषण॥ १२॥ सोऽसत्त्वमसि दुर्बुद्धे निंदनीयश्च साधुभिः॥ यस्त्वं स्वजनमुत्सृज्य परभृत्यत्वमागतः॥ १३

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नैतच्छिथिलयाबुद्ध्या त्वं वेत्सि महद्दंतरं॥ क्व च स्वजनसंवासः क्व च नीचपराश्रयः॥२४॥ गुणवान्वा परजनः स्वजनो निर्गुणोपि वा
निर्गुणः स्वजनः श्रेयान्यः परः परएव सः॥२५॥ यः स्वपक्षं परित्यज्य परपक्षं निषेवते॥ स स्वपक्षे क्षयं याते पश्चात्तेरेव हन्यते॥२६॥
तस्मात्शृणुष्व दुर्बुद्धे राक्षसानां कुलाधम॥ त्वां गृह्य बंधुरूपेण रामो बुद्धिमतां वरः॥२७॥ ज्ञात्वोपायं त्वया पूर्वं जेतुमस्मान्न
सराघवः॥ जित्वास्मान्युधि शक्रश्चेत्पश्चात्त्वां च वधिष्यति॥२८॥ शत्रुस्त्वमसि रामस्य रावणस्यानुजोसि यत्॥ निरनुक्रोशता
चेयं यादृशी ते निशाचर॥२९॥ स्वजनेन त्वया राज्ञः परुषं रावणानुज॥ इत्युक्तो भ्रातृपुत्रेण प्रत्युवाच विभीषणः॥३०॥ अजाना
न्निवमच्छीलं किं राक्षसविगर्हसे॥ राक्षसेंद्रसुतासाधो पारुषं त्यज गौरवात्॥३१॥ कुले यद्यप्यहं जातो रक्षसां क्रूरकर्मणां॥ गुणो
यः प्रथमो नृणां तन्मे शीलमराक्षसं॥३२॥ नरमेदारुणेनाहं न चाधर्मेण वैरमे॥ भ्रात्रा विषमशीलेन कथं भ्राता निरस्यते॥३३॥ धर्मा
त्प्रच्युतशीलं हि पुरुषं पापनिश्चयं॥ त्यक्त्वा सुखमवाप्नोति हस्तादाशीविषं यथा॥३४॥ परस्वहरणे युक्तं परदाराभिमर्शनं॥ त्या
ज्यमाहुर्दुराचारं वेश्मप्रज्वलितं यथा॥३५॥ परस्वानां च हरणं परदाराभिमर्शनं॥ सुहृदामतिशंका च त्रयो दोषाः क्षयावहाः॥३६॥
महर्षेर्गणावधो घोरः सर्वदेवैश्च विग्रहः॥ अभिमानश्च रोषश्च वैरत्वं प्रतिकूलता॥३७॥ एते दोषा मम भ्रातुर्जयंतेश्वर्यनाशनाः
॥ गुणान्संछादयामासुः पर्वतानिव तोयदाः॥३८॥ दोषैरेतैः परित्यक्तो मया भ्राता पिता तव॥ नेयमस्ति पुरी लंका न चत्वं न च ते पिता

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

२९॥अतिमानीचबालश्चदुर्विनीतश्चराक्षस॥बद्धस्त्वंकालपाशेनब्रूहिमांयद्यदिच्छसि॥३०॥अद्यतेमसनंप्राप्तंकिंमांत्वंचनव
क्ष्यसि॥प्रवेष्टुंनत्वयाशक्योन्यग्रोधोराक्षसाधम॥३१॥धर्षयित्वाचकाकुत्स्थोनशक्यंजीवितुंत्वया॥युध्यस्वनरदेवेनलक्ष्मणेन
रणेसह॥३२॥हतस्त्वंदेवताकार्यंकरिष्यसियमक्षये॥निदर्शयस्वात्मबलंसमुद्यतंकुरुष्वसर्वायुधसायकव्ययं॥नलक्ष्मणस्यै
त्यहिबाणगोचरंत्वमद्यजीवन्सवलोगमिष्यसि॥३३॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेसप्ताशीतितमःसर्गः॥८७॥
विभीषणवचःश्रुत्वारावणिःक्रोधमूर्छितः॥अब्रवीत्परुषंवाक्यंक्रोधेनाभ्युत्पपातच॥१॥उद्यतायुधनिस्त्रिंशोरथेसुसमलंकृते
कालाश्वयुक्तेमहतिस्थितःकालांतकोपमः॥२॥महाप्रमाणमुद्यम्यविपुलंवेगवद्दृढं॥धनुर्भ३मपरामृश्यशरांश्चामित्रकर्शना
न्॥३॥नंदर्शमहेष्वासोरथस्थसमलंकृतः॥अलंकृतममित्रघ्नोरावणस्यात्मजोबली॥४॥हनुमत्प्रष्टमासीनमुदयस्थरविप्रभं॥उ
वाचैनंसुसंरब्धंसौमित्रिंसविभीषणं॥५॥तांश्चवानरशार्दूलान्पश्यध्वंमेपराक्रमं॥अद्यमत्कार्मुकोत्सृष्टैःशरवर्षैर्दुरासदं॥६॥मु
क्तंवर्षमिवाकाशेधारयिष्यथसंयुगे॥अद्यवोमामकाबाणामहाकार्मुकनिःसृताः॥७॥विधमिष्यंतिगात्राणितूलराशिमिवानलः
तीक्ष्णसायकनिर्भिन्नान्शूलशक्त्यृष्टिपट्टिशैः॥८॥अद्यवोगमयिष्यामिसर्वानेवयमक्षयं॥सृजतःशरवर्षाणिक्षिप्रहस्तस्यमेयु
धि॥९॥नीमूतस्येवनदतःकःस्थास्यतिममाग्रतः॥रात्रियुद्धेनदाशूर्वेवज्राशनिसमैःशरैः॥१०॥रणपितौस्थोमयाभूमौविसंज्ञौसपुरःस

CC-0.Courtesy Shri K.S.Parihar-Librarian Government District Library Varanasi. Digitized by eGangotri

रो॥स्मृतिर्नतेस्तिवामन्येव्यक्तंवायमसादनं॥११॥आशीविषसमंक्रुद्धंयन्मांयोद्धुमुपस्थितः॥तत्श्रुत्वाराक्षसेंद्रस्यगर्जितं
राघवस्तदा॥१२॥अभीतवदनःक्रुद्धोरावणिंवाक्यमब्रवीत्॥उक्तश्चदुर्गमःपारःकार्याणांराक्षसत्वया॥१३॥कार्याणांकर्मणां
पारंयोगच्छतिसबुद्धिमान्॥सत्वमर्थस्यहीनार्थोदुरावापश्चकेनचित्॥१४॥वचोव्याहृत्यजानीषेकृतार्थोस्मीतिदुर्मते॥अंत
र्धानगतेनाजौयस्त्वयाचकृतःपुरा॥तस्कराचरितोमार्गोनैषवीरनिषेवितः॥यथाबाणपथंप्राप्यस्थितोस्मितवराक्षस
१६॥दर्शयस्वाद्यतेजोवाचात्वंकिंविकत्थसे॥एवमुक्तोधनुर्भूमंपरामृष्यमहाबलः॥१७॥ससर्जनिशितान्बाणानिंद्रजित्स
मितिंजयः॥तेनसृष्टामहावेगाःशराःसर्पविषोपमाः॥१८॥संप्राप्यलक्ष्मणंपेतुःश्वसंतइवपन्नगाः॥शरैरतिमहावेगैर्वेगवा
न्रावणात्मजः॥१९॥सौमित्रिमिंद्रजिद्युद्धेविव्याधशुभलक्षणं॥सशरैरतिविद्धांगोरुधिरेणसमुक्षितः॥२०॥शुशुभेलक्ष्मणः
श्रीमान्विधूमइवपावकः॥इंद्रजित्वात्मनःकर्मप्रसमीक्ष्याभिगम्यच॥२१॥विनद्यसुमहानादमिदंवचनमब्रवीत्॥पत्रिणः
शितधारास्तेशरामत्कार्मुकच्युताः॥२२॥आदास्यंतेद्यसौमित्रेजीवितंजीवितांतगाः॥अद्यगोमायुसंघाश्चश्येनसंघाश्चलक्ष्म
णः॥२३॥एधाश्चनिपतंतुत्वांगतासुंनिहतंमया॥क्षत्रबंधुःसदानार्योरामःपरमदुर्मतिः॥२४॥[illegible]भक्तंभ्रातरमद्यैवत्वांद्रक्ष्य
तिहतंमया॥विध्वस्तकवचंभूमौव्यपविद्धशरासनं॥२५॥हतोत्तमांगंसौमित्रेत्वामद्यनिहतंमया॥इतिब्रुवाणंसौमित्रिःपरु

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

षंरावणात्मजं॥२६॥हितुमहाक्यमर्थज्ञोलक्ष्मणःप्रत्युवाचह॥वाग्वलंत्यजदुर्बुद्धेक्रूरकर्महिराक्षस॥२७॥अहंकस्माद्युवस्येत
त्संपादयसुकर्मणा॥अकृत्वाकथसेकर्मकिमर्थमिहराक्षस॥२८॥कुरुतत्कर्मयेनाहंश्रद्धेयंतवकथनं॥अनुक्तापरुषंवाक्यं
किंचिदप्यनवक्षिपन्॥२९॥अविकत्थन्वधिष्यामित्वामद्यपुरुषादक॥इत्युक्त्वापंचनाराचानाकर्णापूरितान्शितान्॥३०॥नि
जघानमहावेगालक्ष्मणोराक्षसोरसि॥सुपत्रवाजिताबाणाज्वलिताइवपन्नगा॥३१॥नैर्ऋतोरस्यभाषंतसवितूरश्मयोयथा॥स
शरैराहतस्तेनसरोषोरावणात्मज॥३२॥सुप्रयुक्तैस्त्रिभिर्बाणैःप्रतिविव्याधलक्ष्मणं॥सबभूवमहाभीमोनरराक्षससिंहयोः॥
३३॥विमर्दस्तुमुलोयुद्धेपरस्परजयैषिणोः॥उभौहिबलसंपन्नौउभौविक्रमशालिनौ॥३४॥उभावपिसुविक्रांतौसर्वशस्त्रास्त्रके
विदौ॥उभौपरमदुर्जेयावतुल्यबलतेजसौ॥३५॥युयुधातेतदावीरौग्रहाविवनभोगतौ॥बलवृत्राविवहितौयुधितौदुष्प्रधर्षणौ॥
॥३६॥युयुधातेमहात्मानौतदाकेसरिणाविव॥बहूनवसृजंतौहिमार्गणौघानवस्थितौ॥३७॥नरराक्षसमुख्यौग्रहृष्टावभ्ययुध्य
तां॥सुसंग्रहृष्टौनरराक्षसौतौजयैषिणौमार्गणचापधारिणौ॥परस्परंतौप्रववर्षतुर्भृशंशरौघवर्षेणबलाहकाविव॥३९॥अथ
प्रयुद्धौयुधियुद्धकोविदौशरातिचंडौशितशस्त्रधारिणौ॥अभीक्ष्णमाविव्यथतुर्महाबलौमहाहवेशंबरवासवोपमौ॥४०॥इ
त्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेअशीतितमःसर्गः॥८०॥ततःशरान्दाशरथिःसंधायामित्रकर्शनः॥ससर्जराक्षसेंद्रा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

यक्रुद्धः सर्पइवश्वसन्॥२॥तस्यज्यातलनिर्घोषंसंश्रुत्वाराक्षसाधिपः॥विवर्णवदनोभूत्वालक्ष्मणंसमुदैक्षत॥४॥तंविषण्णमुखं
दृष्ट्वाराक्षसंरावणात्मजं॥सौमित्रिमित्रसंपन्नंप्रत्युवाचविभीषणः॥३॥निमित्तान्यनुपश्यामियान्यस्मिन्रावणात्मजे॥त्वरतेनम
हाबाहोभग्नएषनसंशयः॥४॥ततःसंधायसौमित्रिःशरानाशीविषोपमान्॥मुमोचनिशितांस्तस्मैसर्पानिवविषोल्बणान्॥५॥श
क्राशनिसमस्पर्शैर्लक्ष्मणेनाहतःशरैः॥मुहूर्तमभवन्मूढःसर्वसंक्षुभितेंद्रियः॥६॥उपलभ्यमुहूर्तेनसंज्ञांप्रत्यागतेंद्रियः॥ददर्शा
वस्थितंवीरमाजौदशरथात्मजं॥७॥सोभिचक्रामसौमित्रिंरोषात्संरक्तलोचनः॥अब्रवीच्चैनमासाद्यपुनःसपरुषंवचः॥८॥किं
नस्मरसितद्युद्धेप्रथमेमत्पराक्रमं॥निबद्धस्त्वंसहभ्रात्रायदायुधिविचेष्टसे॥९॥युवांखलुमहायुद्धेवज्राशनिसमैःशरैः॥शा
यितौप्रथमंभूमौविसंज्ञौसपुरःसरौ॥१०॥स्मृतिर्वानास्तितेमन्येअकृतंवायमसादनं॥गंतुमिच्छसियन्मांत्वंमाधर्षयितुमिच्छसि॥११
यदितेप्रथमेयुद्धेनदृष्टोमत्पराक्रमः॥अद्यत्वांदर्शयिष्यामितिष्ठेदानीमवस्थितः॥१२॥इत्युक्त्वासप्तभिर्बाणैरभिविव्याधलक्ष्म
णं॥दशभिस्तुहनूमंतंतीक्ष्णधारैःशरोत्तमैः॥१३॥ततःशरशतेनैवसुप्रयुक्तेनवीर्यवान्॥क्रोधाद्द्विगुणसंरब्धोनिर्बिभेदविभीषणं
१४॥ततदृष्ट्वेंद्रजितःकर्मक्रूंतरामानुजस्तदा॥अचिंतयित्वाप्रहसन्नेतत्किंचितदाब्रवीत्॥१५॥मुमोचचशरान्घोरान्संगृह्य
नरपुंगवः॥अभीतवदनःक्रुद्धोराक्षसंलक्ष्मणोवदत्॥१६॥नैवंरणगताःशूराःप्रहरंतिनिशाचर॥लघवश्चाल्पवीर्याश्चशराहीमे

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

मुखास्त्रव ॥१७॥ नैवंभूतास्तु युध्यंते समरे युद्धकांक्षिणः ॥ इत्येवं तं ब्रुवन् धन्वी शरैरभिववर्ष ह ॥१८॥ तस्य बाणैः सुविध्वस्तं कवचं कां
चनं महत् ॥ व्यशीर्यत रथोपस्थे तारा जालमिवांबरात् ॥१९॥ विधूतवर्मा नाराचैर्बभूव सकृतव्रणः ॥ इंद्रजित् समरे वीरः प्रसूढ इव सा
नुमान् ॥२०॥ ततः शरसहस्रेण संक्रुद्धो रावणात्मजः ॥ विभेद समरे वीरो लक्ष्मणं भीमविक्रमं ॥२१॥ व्यशीर्यत महद्दिव्यं कवचं लक्ष्म
णस्य तु ॥ कृतप्रतिकृतान्योन्यं बभूवतुररिंदमौ ॥२२॥ अभीक्ष्णं निश्वसंतौ हि युध्येतां तु मुलं युधि ॥ शरसंकृत्तसर्वांगौ सर्वतो रुधि
रोक्षितौ ॥२३॥ सुदीर्घकालतौ वीरावन्योन्यं निशितैः शरैः ॥ ततक्षतुर्महात्मानौ रणकर्मविशारदौ ॥२४॥ बभूवतुश्चात्मजयेयतो भी
मपराक्रमौ ॥ तौ शरौघैस्तथाकीर्णौ निकृत्ताविव चध्वजौ ॥२५॥ स्रवंतौ रुधिरं चोग्रं जलं प्रस्रवणाविव ॥ शरवर्षं ततो घोरं मुंचं
तौ भीमनिस्वनौ ॥२६॥ सासारयोरिवाकाशे नीलयोः कालमेघयोः ॥ तयोरथ महान् कालो व्यतीयाद्युध्यमानयोः ॥२७॥ एकादश
प्रहारः समाप्तः ॥ न च तौ युद्धवैमुख्यं क्रमं चाप्युपजग्मतुः ॥ अस्त्राण्यविदांश्चैव दर्शतौ च परस्परं ॥२८॥ शरानुच्चावचाकारमंत
रिक्षे बबंधतुः ॥ व्यपेतदोषमस्यंतौ लघुचित्रं च सुष्टु च ॥२९॥ उभौ तु तुमुलं घोरं चक्रतुर्नरराक्षसौ ॥ तयोः पृथक् पृथक् भीमश्रु
श्रुवे तुमुलस्वनः ॥३०॥ प्रकंपजननो घोरो निर्घातद्रवदारुणः ॥ सतयोर्भीजनेशाद्रस्तदा समरमत्तयोः ॥३१॥ सुघोरयोर्निघ्नतोर्ग
गनमेघयोरिव ॥ सुवर्णपुंखैर्नाराचैर्बलवंतौ कृतव्रणौ ॥३२॥ प्रसुस्रुवाते रुधिरं कीर्तिमंतौ जयैषिणौ ॥ ते गात्रयोर्निपतिताः रुक्म

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

णश्चैवपरस्परजयैषि ४

पुंखाः शरायुधि॥३३॥असृग्दिग्धावनिष्पेतुर्विविशुर्धरणीतलं॥अन्यैः सुनिशितैः शस्त्रैराकाशंसंजघट्टिरे॥३४॥बभंजुश्चिच्छि
दुश्चान्येतयोर्बाणाः सहस्रशः॥सबभूवरणे घोररुत्तयोर्बाणमयश्चयः॥३५॥यथाग्निभ्यांप्रदीप्ताभ्यांसत्रेकुशमयश्चयः॥त
योः कृतव्रणौ देहौशुशुभातेमहात्मनोः॥३६॥सुपुष्पाविवनिष्पत्रौवनेकिंशुकशाल्मली॥चक्रतुस्तुमुलंघोरंसन्निपातंमुहु
र्मुहुः॥३७॥इंद्रजिच्चलक्ष्मणौ॥लक्ष्मणोरावणिंयुद्धेरावणिश्चापिलक्ष्मणं॥३८॥अन्योन्यंतावभिघ्नंतौनश्रमंप्रत्यपद्यतां॥बाणजा
लैः शरीरस्थैरवगाढैस्तरस्विनौ॥३९॥शुशुभातेमहावीरौविरूढाविवपर्वतौ॥तयोरुधिरसिक्तानिसंवृतानिशरैर्भृशं॥४०॥बभ्रा
जुः सर्वगात्राणिज्वलंतइवपावकाः॥तयोरथमहान्कालोव्यतीयाद्युध्यमानयोः॥४१॥नचतौयुद्धवैमुख्यंश्रमंवाप्युपजग्मतुः॥
४२॥अथसमरपरिश्रमंविहंतुंसमरमुखेषुजितस्यलक्ष्मणस्य॥प्रियहितमुपपादयन्महासमरमुपेत्यविभीषणोवतस्थे॥३४
इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेएकोननवतितमःसर्गः॥९॥युध्यमानौततोदृष्ट्वाप्रसक्तौनरराक्षसैः॥प्रभिन्नाविव
मातंगौपरस्परजयैषिणौ॥१॥तौदृष्टुकामःसंग्रामेपरस्परगतौबली॥शूरः सरावणभ्रातातस्थौसंग्राममूर्धनि॥२॥तौविस्फारयामा
समहद्धनुरवस्थितः॥उत्ससर्जचतीक्ष्णाग्रान्राक्षसेषुमहाशरान्॥३॥तेशराः शिखिसंकाशानिपतंतःसमाहिताः॥राक्षसान्
दारयामासुर्वज्राइवमहागिरीन्॥४॥विभीषणस्यानुचरास्तेपिशूलासिपट्टिशैः॥चिच्छिदुःसमरेवीरान्राक्षसान्राक्षसोत्तमाः॥५॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

राक्षसैस्तैः परिवृतः सतदा तु विभीषणः॥ बभौ मध्ये प्रसुप्तानां कलभानामिव द्विपः॥ ततः संचोदयानो वै हरीन् रक्षोवधप्रियान्॥
उवाच वचनं काले कालज्ञो रक्षसां वरः॥ एको यं राक्षसेंद्रस्य परायणमवस्थितः॥ एतच्छेषं बलं तस्य किं तिष्ठत हरीश्वराः॥ अ
स्मिन्निहते पापे राक्षसे रणमूर्धनि॥ रावणं वर्जयित्वा तु शेषमस्य बलं हतं॥ प्रहस्तो निहतो वीरो निकुंभश्च महाबलः॥ कुं
भकर्णश्च कुंभश्च धूम्राक्षश्च महाबलः॥ जंबुमाली महामाली तीक्ष्णवेगो शनिप्रभः॥ सुप्तघ्नो यज्ञकोपश्च वज्रदंष्ट्रश्च राक्ष
सः॥ संह्रादिर्विकटो रश्मिस्तपनो मंदएव च॥ प्रघासः प्रघसश्चैव प्रजंघो जंघएव च॥ अग्निकेतुश्च दुर्धर्षो रश्मिकेतुश्च वी
र्यवान्॥ विद्युज्जिह्वो द्विजिह्वश्च सूर्यशत्रुश्च राक्षसः॥ अकंपनः सुपार्श्वश्च चक्रमाली च राक्षसः॥ कंपनः सत्ववंतौ च देवांतक
नरांतकौ॥ एतान्निहत्य तिबलान्बहून् राक्षससत्तमान्॥ बाहुभ्यां सागरं तीर्त्वा लंघ्यतां गोष्पदं लघु॥ एता च देवशेषं वो
जेतव्यमिति वानराः॥ हताः सर्वे समासीगम्य राक्षसा बलदर्पिताः॥ अयुक्तं निधनं कर्त्तुं पुत्रस्य जयितुर्मम॥ घृणा मयास्य रा
मार्थे निहन्यां भ्रातुरात्मजं॥ हंतुकामस्य मे वाष्पं चक्षुश्चैव निरुध्यते॥ तमेवैष महाबाहुर्लक्ष्मणः शमयिष्यति॥ वानरा
घ्नंतु संभूय भृत्यानस्य समीपगान्॥ इति तेनातियशसा राक्षसेनाभिचोदिताः॥ वानरेंद्राजहृषिरे लांगूलानि वविव्यधुः॥ तत
स्ते कपिशार्दूलाः क्ष्वेलंतश्च मुहुर्मुहुः॥ मुमुचुर्विविधांन्नादान्मेघान्दृष्ट्वेव वर्हिणः॥ जांबवानपि तैः सर्वैः स्वयूथैरभिसंवृतः

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

२१॥अश्मभिस्ताडयामासनखैर्दंतैश्चराक्षसान्॥निघ्नंतमृक्षाधिपतिंराक्षसास्तेमहाबलाः॥२२॥परिवव्रुभयंत्यक्त्वातमनेक
विधायुधाः॥शरैःपरशुभिस्तीक्ष्णैःपट्टिशैर्मुष्टितोमरैः॥२३॥जांबवंतंमृधेजघ्नुर्निघ्नंतंराक्षसीचमूः॥ससंप्रहारस्तुमुलःसंजज्ञेक
पिरक्षसां॥२४॥देवासुराणांक्रुद्धानांयथाभीमोमहास्वनः॥हनूमानपिसंक्रुद्धःसानुमुत्पाट्यपर्वतान्॥२५॥सलक्ष्मणंस्वयंदृष्ट्वा
दवरोप्यमहामनाः॥रक्षसांकदनंचक्रेशतशोथसहस्रशः॥२६॥सदत्वातुमुलंयुद्धंपितृव्यस्येंद्रजिद्बली॥लक्ष्मणंपरवीरघ्नं
पुनरेवाभ्यधावत॥२७॥तौप्रयुद्धौतदावीरौमृधेलक्ष्मणराक्षसौ॥शरौघानभिवर्षंतौजघ्नतुस्तौपरस्परं॥२८॥अभीक्ष्णमंतर्दध
तुःशरजालैर्महाबलौ॥चंद्रादित्याविवोत्क्षिप्तेयथामेघैस्तरस्विनौ॥२९॥नत्यादानंनसंधानंधनुषोवापरिग्रहः॥नविप्रमाक्षो
बाणानांनविकर्षोनसंग्रहः॥३०॥नमुष्टिप्रतिसंधानंनलक्ष्यप्रतिपादनं॥अदृश्यततयोस्तत्रयुध्यतोःपाणिलाघवात्॥३१॥वा
यवेगप्रमुक्तैश्चबाणजालैःसमंततः॥अंतरिक्षेपिसंछन्नेनरूपाणिचकाशिरे॥३२॥लक्ष्मणोरावणिंग्राप्यरावणिश्चापिल
क्ष्मणं॥अव्यवस्थाभवत्युग्राताभ्यामन्योन्यविग्रहे॥३३॥ताभ्यामुभाभ्यांतरसाविसृष्टैर्विशिखैःशितैः॥दिशश्चप्रदिशश्चैवबभू
वुःशरसंकुलाः॥३४॥तमसापिहितंसर्वमासीद्भीमतरंमहत्॥अलंगतेसहस्रांशौसंवृतंतामसैर्वहि॥३५॥रुधिरौघामहानद्यः
प्रवर्तंतसहस्रशः॥क्रव्यादारुणवाग्भिश्चक्षिपुर्भैरवनिस्वनाः॥३६॥ततदानींववौवायुर्नचज्वालपावकः॥स्वस्त्यस्तुलो

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

केभ्यइतिजजल्पुस्तेमहर्षयः॥३९॥संपेतुश्चात्रसंप्राप्तागंधर्वाःसहचारणैः॥अथराक्षससिंहस्यकृत्स्नाःकनकभूषणान्॥
३९॥शरैश्चतुर्भिःसौमित्रिर्विव्याधचतुरोहयान्॥ततोपरेणभल्लेनपीतेननिशितेनच॥४०॥संपूर्णायतमुक्तेनसुपत्रेणसुव
र्चसा॥महेंद्राशनिकल्पेनसूतस्यविचरिष्यतः॥४१॥सतेनबाणाशनिनातलशब्दानुनादिना॥लाघवाद्राघवः श्रीमान्शि
रःकायादपाहरत्॥४२॥सयंतरिमहातेजाहतेमंदोदरीसुत॥स्वयंसारथ्यमकरोत्पुनश्चधनुरस्यशत॥४३॥तदद्भुतमभूत
त्रसारथ्यंपश्यतांयुधि॥हयेषुव्यग्रहस्तंतंविव्याधनिशितैःशरैः॥४४॥धनुष्यथपुनर्व्यग्रेहयेषुमुमुचेशरान्॥ छिद्रेषु
तेषुबाणौघैःसौमित्रिःशीघ्रकृत्तमः॥४५॥अर्दयामासबाणौघैर्विचरंतमभीतवत्॥निहतंसारथिंदृष्ट्वासमरेरावणात्मजः
४६॥प्रजहौसमरोद्वर्षंविषण्णःसंबभूवह॥विषण्णवदनंदृष्ट्वाराक्षसंहरियूथपाः॥४७॥ततःपरमसंहृष्टालक्ष्मणंचाभ्यपूज
यन्॥ततःप्रमाथीरभसःशरभोगंधमादनः॥४८॥अमृष्यमाणाश्चत्वारश्चक्रुर्वेगंहरीश्वराः॥तेचास्यहयमुख्येषुतूर्णमुत्पत्य
वानराः॥४९॥चतुर्षुसुमहावीर्यानिपेतुर्भस्मविक्रमाः॥तेषामधिष्ठितानांतैर्वानरैःपर्वतोपमैः॥५०॥मुखेभ्योरुधिरंव्यक्तंहया
नांसमवर्तत॥तेहयामथिताभग्नाव्यसवोधरणींगताः॥५१॥तेनिहत्यहयांस्तस्यप्रमथ्यचमहारथं॥पुनरुत्पत्यवेगेनतस्थु
र्लक्ष्मणपार्श्वतः॥५२॥सहताश्चादवप्लुत्यरथान्मथितसारथेः॥शरवर्षेणसौमित्रिमभ्यधावनरावणिः॥५३॥ततोमहेंद्रप्रतिमः

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

सलक्ष्मणःपदातिर्नंतंनिहतैर्हयोत्तमैः॥सृजंतमाजौनिशितांछरोत्तमान्भृशंतदाबाणगणैर्व्यदारयत्॥४॥इत्यार्षेश्रीरामायणे
वाल्मीकीयेयुद्धकांडेनवतितमःसर्गः॥९०॥द्वादशापहारःसमाप्तः॥१२॥सहताश्वोमहातेजाभूमौतिष्ठन्निशाचरः॥इंद्रजित्स
रमक्रुद्धःसंधज्जज्वालतेजसा॥१॥तौधन्विनौजिघांसंतावन्योन्यमिषुभिर्भृशं॥विजयेनाभिनिष्क्रांतौवनेगजवृषाविव॥२॥नि
बर्हयंतश्चान्योन्यंतेराक्षसवनौकसः॥भर्त्तारंनजहुर्युद्धेसंपतंतस्ततस्ततः॥३॥ततस्तान्राक्षसान्सर्वान्हर्षयन्रावणा
त्मजः॥स्तुन्वानोहर्षमाणश्चइदंवचनमब्रवीत्॥४॥तमसाबहुलेनेमाःसंसक्ताःसर्वतोदिशः॥नेहविज्ञायतेस्वोवापरोवारा
सोत्तमाः॥५॥धृष्टंभवंतोयुध्यंतुहरीणांमोहनायवै॥अहंतुरथमास्थायआगमिष्यामिसंयुगे॥६॥तथाभवंतःकुर्वंतुयथेमेक
ननौकसः॥नयुद्धेयुर्दुरात्मानःप्रविष्टेनगरंमपि॥७॥इत्युक्त्वारावणसुतोवंचयित्वावनौकसः॥प्रविवेशपुरींलंकारथहेतो
रमित्रहा॥८॥सरथंभूषयित्वाथरुचिरंहेमभूषितं॥प्रासासिशरसंपूर्णंयुक्तंपरमवाजिभिः॥९॥अधिष्ठितंहयज्ञेनसूतेना
प्तोपदेशिना॥आरुरोहमहातेजारावणिःसमितिंजयः॥१०॥सराक्षसगणैर्मुख्यैर्वृतोमंदोदरीसुतः॥निर्ययौनगरात्तूर्णंकृतो
तबलचोदितः॥११॥सोभिनिष्क्रम्यनगरादिंद्रजित्परवीरहा॥अभ्ययाजवनैरश्वैर्लक्ष्मणंसविभीषणः॥१२॥ततोरथस्थमालो
क्यसौमित्रीरावणात्मजं॥वानराश्चमहावीर्याराक्षसश्चविषणः॥१३॥विस्मयंपरमंजग्मुर्लाघवात्तस्यधीमतः॥रावणिश्चापि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

संक्रुद्धेरणेवानरयूथपान्॥१४॥पातयामासबाणौघैःशतशोथसहस्रशः॥समंडलीकृतधनूरावणिःसमितिंजयः१५ हरी
नभ्यहनत्क्रुद्धःपरंलाघवमास्थितः॥तिवध्यमानाहरयोनाराचैर्भीमविक्रमाः॥१६॥सौमित्रिंशरणंप्राप्ताःप्रजापतिमिवप्रजाः
ततःसमरकोपेनज्वलितोरघुनंदनः॥१७॥चिच्छेदकार्मुकंतस्यदर्शयन्पाणिलाघवं॥सोन्यत्कार्मुकमादायसज्यंचक्रेलघुश्चि
व॥१८॥तदप्यस्यशितैर्बाणैर्लक्ष्मणोनिरकृंतत॥अथैनंछिन्नधन्वानंआशीविषविषोपमैः॥१९॥विव्याधोरसिसौमित्रिरावणिं
पंचभिःशरैः॥तस्यकायंविनिर्भिद्यमहाकार्मुकनिःसृताः॥२०॥निपेतुर्धरणीबाणाःरक्ताइवमहोरगाः॥सभिन्नधन्वारुधिरं
वमन्वक्त्रेणरावणिः॥२१॥जग्राहकार्मुकंश्रेष्ठंदृढंज्यंबलवत्तरं॥सलक्ष्मणंसमुद्दिश्यपरंलाघवमास्थितः॥२२॥ववर्षशरवर्षा
णिवर्षाणीवपुरंदरः॥मुक्तमिंद्रजितातत्तुशरवर्षमरिंदमः॥२३॥अवारयदसंभ्रांतोलक्ष्मणःसुदुरासदं॥निदर्शयामासतदारा
वणिंरघुनंदनः॥२४॥असंभ्रांतोमहातेजास्तद्द्भुतमिवाभवत्॥ततस्तान्राक्षसान्सर्वांस्त्रिभिरेकैकमाहवे॥२५॥अविध्य
त्परमक्रुद्धःशीघ्रास्त्रंसंप्रदर्शयन्॥राक्षसेंद्रसुतंचापिबाणौघैःसमताडयत्॥२६॥सोपिविद्धोबलवताशत्रुणाशत्रुघातिना
असक्तंप्रेषयामासलक्ष्मणायबहून्शरान्॥२७॥तानप्राप्तांछितैर्बाणैश्चिच्छेदरघुनंदनः॥सारथेरस्यचरणौरथिनोरथस
त्तमः॥२८॥शिरोजहारधर्मात्माभल्लेननतपर्वणा॥असूतास्तेहयास्तत्ररथमादुरविक्लवाः॥२९॥मंडलान्यभिधावंतितद्द्भुत

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

मिवाभवत्॥ अमर्षवशमापन्नः सौमित्रिर्दृढविक्रमः॥३०॥ प्रत्यविध्यद्द्वयोस्तस्य शरैर्वित्रासयन्रणे॥ अमृष्यमाणस्तत्क
र्म रावणस्य सुतो बली॥३१॥ विव्याध दशभिर्बाणैः सौमित्रिं तममर्षणं॥ ते तस्य वज्रप्रतिमाः शराः सर्पविषोपमाः॥३२॥ वि
यंजग्मुरागत्य कवचं कांचनप्रभं॥ अभेद्यकवचं मत्वा राघवं रावणात्मजः॥३३॥ ललाटे लक्ष्मणं बाणैः सुपुंखैस्त्रिभिरिंद्रजित्॥ अ
विध्यत्परमक्रुद्धः शीघ्रमस्त्रप्रदर्शयन्॥३४॥ तैः पृषत्कैर्ललाटस्थैः शुशुभे रघुनंदनः॥ रणाग्रे समरश्लाघी त्रिशृंग इव पर्वतः
॥३५॥ स तथाप्यर्दितो बाणैराक्षसेन महामृधे॥ तमाशु प्रतिविव्याध लक्ष्मणः पंचभिः शरैः॥३६॥ विरुरुचे इंद्रजितो युद्धे वदने शुभ
कुंडले॥ लक्ष्मणेंद्रजितौ वीरौ महाबलशरासनौ॥३७॥ अन्योन्यं जघ्नतुर्बाणैर्विशिखैर्भीमविक्रमौ॥ ततः शोणितदिग्धांगौ ल
क्ष्मणेंद्रजितावुभौ॥३८॥ रणे तौ रेजतुर्वीरौ पुष्पितावि किंशुकौ॥ तौ परस्परमभेत्य सर्वगात्रेषु धन्विनौ॥३९॥ घोरैर्विव्यधतुर्बाणैः
कृतभावावुभौ जयौ॥ ततः समरकोपेन संयुतो रावणात्मजः॥४०॥ विभीषणं त्रिभिर्बाणैर्विव्याध वदने शुभे॥ अयोमुखैस्त्रिभि
र्बाणैर्विध्वा तु स विभीषणं॥४१॥ एकैकेनाथ विव्याध तान्सर्वान्हरियूथपान्॥ तस्मै दृढतरक्रुद्धो जघ्नुर्घानगदयाहयान्॥४२
विभीषणो महातेजा रावणे सुदुरात्मनः॥ सहताश्वादवप्लुत्य रथान्मथितसारथेः॥४३॥ अथ राक्षिं महातेजाः पितृव्याय मु
मोच ह॥ तमापतंतीं संप्रेक्ष्य सुमित्रानंदवर्धनः॥४४॥ चिच्छेद निशितैर्बाणैः शतधा सा पपात भुवि॥ तस्मै दृढधनुः क्रुद्धो हता

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

श्वायविभीषणः॥४५॥वज्रस्पर्शसमान्पंचसंसर्जोरसिमार्गणान्॥तेतस्यकायंभित्वातुरुक्मपुंखानिमिन्नगाः॥४६॥बभूवु
र्लोहितादिग्धारक्ताइवमहोरगाः॥पितृव्यस्यतुसंक्रुद्धइंद्रजिच्छरमाददे॥४७॥उत्तमंरक्षसांमध्येयमदंडंमहाबलं॥तंसमीक्ष्य
महातेजामहेषुतेनसंहितं॥४८॥लक्ष्मणोप्याददेबाणमन्यंभीमपराक्रमः॥कुबेरेणस्वयंस्वप्नेयद्दत्तमभितात्मना॥४९॥दुर्ज
यंदुर्विषह्यंचसेंद्रैरपिसुरासुरैः॥तयोस्तेधनुषीश्रेष्ठेबाहुभिःपरिघोपमैः॥५०॥विकृष्यमाणेबलवत्क्रौंचाविवचुकूजतुः
ताभ्यांतौधनुषीश्रेष्ठेसहितौसायकोत्तमौ॥५१॥विकृष्यमाणौवीराभ्यांभृशंजज्वलतुःश्रिया॥तौभासयंतावाकाशेधनुर्भ्यां
विशिखौच्युतौ॥५२॥मुखेनमुखमाहत्यसन्निपेततुरोजसा॥सन्निपातस्तयोरासीच्छरयोर्घोररूपयोः॥५३॥सधूमविस्फुलिं
गश्चतत्राग्निर्दारुणोभवत्॥तौमहाग्रहसंकाशावन्योन्यंसन्निपत्यच॥५४॥संग्रामेशातधायातौमेदिन्याचैवपेततुः॥शरौप्रति
हतौदृष्ट्वातावुभौरणमूर्धनि॥५५॥व्रीडितौजातरोषौचलक्ष्मणेंद्रजितौतदा॥सुसंरब्धस्तुसौमित्रिरस्त्रंदारुणमाददे॥५६॥रौ
द्रमिंद्रजिदप्यस्त्रंविसृजद्युधिविष्ठितः॥तेनतद्विहतंचास्त्रंवारुणंपरमाद्भुतं॥५७॥ततःक्रुद्धोमहातेजाइंद्रजित्समितिंजयः
आग्नेयंसंदधेदीप्तंसलोकंसंक्षिपन्निव॥५८॥तोयेनास्त्रेणतद्वीरोलक्ष्मणःप्रत्यवारयत्॥अस्त्रंनिवारितंदृष्ट्वारावणिःक्रो
धमूर्छितः॥५९॥आसुरंशत्रुनाशायघोरमस्त्रमुपाददे॥तस्माच्चापाद्विनिष्पेतुर्भास्वराःकूटमुद्गराः॥६०॥शूलानिचभुशुंडी

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

श्चगदाःखड्गाःपरश्वधाः॥तद्दृष्ट्वालक्ष्मणःसंख्येघोरमस्त्रमुदारुणं॥६३॥अवार्यसर्वभूतानांसर्वशत्रुविदारणं॥माहेश्वरेणद्युतिमा
स्तदस्त्रंप्रत्यवारयत्॥६४॥तयोःसुतुमुलंयुद्धंबभूवाद्भुतोपमं॥गगनस्थानिभूतानिलक्ष्मणंपर्यवारयन्॥६५॥भैरवाभिरुतै
रुग्रैर्युद्धैर्वानरराक्षसाः॥भूतैर्बहुभिराकाशंविस्मितैरावृतंबभौ॥६६॥ऋषयःपितरोदेवागंधर्वगरुडोरगाः॥शतक्रतुंपुरस्कृत्य
ररक्षुर्लक्ष्मणंरणे॥६७॥अथान्यमार्गणश्रेष्ठंसंदधेराघवानुजः॥दुतानलसमस्पर्शंरावणात्मजदारणं॥६८॥सुपुत्रमनुवृत्तां
गंसुपर्वाणंसुसंस्थितं॥सुवर्णविकृतंवीरःशरीरांतकरंशरं॥६९॥दुरावारंदुर्विषहंराक्षसानांभयावहं॥आशीविषविषप्रख्यं
देवसंघैःसुपूजितं॥७०॥येनशक्रोमहातेजादानवानयेजत्प्रभुः॥पुराद्देवासुरेयुद्धेवीर्यवान्हरिवाहनः॥७१॥तदैंद्रमस्त्रंसौ
मित्रिःसंयुगेघ्नपराजितं॥शरश्रेष्ठधनुःश्रेष्ठेनरश्रेष्ठोभिसंदधे॥संधायामित्रमथनंविचकर्षशरासनं॥सज्यमायस्यदुर्ध
र्षकालोलोकक्षयेयथा॥७२॥संधायधनुषिश्रेष्ठेविकर्षन्निदमब्रवीत्॥लक्ष्मीवान्लक्ष्मणोवाक्यमर्थसाधकमात्मनः॥७३॥ध
र्मात्मासत्यसंधश्चरामोदाशरथीर्यदि॥पौरुषेचाप्रतिद्वंद्वस्तदैनं [illegible]जहिरावणिं॥७४॥इत्युक्त्वाबाणमाकर्षंविकृष्यचमहा
बलः॥लक्ष्मणःसमरेवीरःससर्जेंद्रजितंप्रति॥७५॥ऐंद्रास्त्रेणसमायोज्यलक्ष्मणःपरवीरहा॥तच्छिरःसशिरस्त्राणंश्रीमज्ज्वलि
तकुंडलं॥७६॥त्रमथ्येंद्रजितःकायात्पातयामासभूतले॥तद्राक्षसतनूजस्यछिन्नस्कंधशिरोमहत्॥७७॥तपनीयनिभंभूमौद

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

हृशेशोणितोक्षितं॥ हतस्तु निपपाताधरण्यां रावणात्मजः॥ ७७॥ कवची सशिरस्त्राणो विध्वस्तः सशरासनः॥ चुक्रुशुस्ततः स
र्वे वानराः सविभीषणाः॥ ७८॥ अहृष्यन्प्रतितेतस्मिन्देवा वृत्रवधे यथा॥ अथांतरिक्षे देवानामृषीणां भावितात्मनां॥ ७९॥ अभिज
ज्ञे च सन्नादो गंधर्वाप्सरसामपि॥ ऊचुश्च सहिता स्तुष्टा देवगंधर्वदानवाः॥ ८०॥ विज्वराः शांतकलुषा ऋषयो विचरंत्विति॥ त
तो भ्यनंदन्संहृष्टाः समरे हरियूथपाः॥ ८१॥ तमप्रतिबलं दृष्ट्वा हतं नैर्ऋतपुंगवं॥ विभीषणो हनूमांश्च जांबवान्ऋक्षयूथपः॥
८२॥ विजयेनाभिनंद्यंतस्तुष्टुवुश्चापि लक्ष्मणं॥ पतितं समभिज्ञाय राक्षसी सा महाचमूः॥ ८३॥ वध्यमाना दिशो भेजे हरिभिर्जि
तकाशिभिः॥ वानरैर्वध्यमानास्ते शस्त्राण्युत्सृज्य राक्षसाः॥ ८४॥ लंकामभिमुखास्तूर्णं नष्टसंज्ञा प्रधाविताः॥ दुद्रुवुः शरतप्ताभीता रा
क्षसा बहुधा दिशः॥ ८५॥ त्यक्त्वा प्रहरणान्सर्वे पट्टिशासिपरश्वधान्॥ केचिल्लंकां परित्रस्ताः प्रविष्टा वानरार्दिताः॥ ८६॥ समुद्रे प
तिताः केचित्केचित्पर्वतमाश्रिताः॥ हतमिंद्रजितं दृष्ट्वा शरयानं सरक्षितौ॥ ८७॥ राक्षसानां सहस्रेषु न कश्चित्प्रत्यदृश्यत॥ यथा
स्तंगत आदित्ये नावतिष्ठंति रश्मयः॥ ८८॥ तथा तस्मिन्निपतिते राक्षसास्तेगता दिशः॥ शांतरश्मिरिवादित्यो निर्वाणइव पावकः
८९॥ बभूव समहाबाहुर्व्यपास्तगतजीवितः॥ अशांतपीडाबहुलो विनष्टारिः प्रहर्षवान्॥ ९०॥ बभूव लोकपतिते तस्मिन्राक्षसे

जगामनिहते तस्मिन्राक्षसे क्रूरकर्मणि॥ आकाशे चापि देवानां सु

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

श्रुवेदेवदुंदुभिः॥९२॥नृत्यद्भिरप्सरोभिश्चगंधर्वैश्चमहात्मभिः॥ववर्षुःपुष्पवर्षाणितद्द्भुतमिवाभवत्॥९३॥प्रशशामहतेतस्मिन्रा
क्षसेक्रूरकर्मणि॥शुद्धाआपोनभश्चैवजहृषुर्देवदानवाः॥९४॥आजग्मुपतितेतस्मिन्सर्वेलोकभयावहे॥ऋषयश्चसहितानुष्टुदे
वगंधर्वदानवाः॥९५॥विज्वराःशांतकलुषाब्राह्मणाविचरंतिति॥ततोभ्यनंदन्संहृष्टाःसमरेहरियूथपाः॥९६॥तमप्रतिबलंदृ
ष्ट्वाहतंनैर्ऋतपुंगवं॥विभीषणोहनूमांश्चजांबवान्ऋक्षयूथपः॥९७॥विजयेनाभिनंद्यतनुष्टुवुश्चापिलक्ष्मणं॥ह्वेलंतश्चनदं
तश्चगर्जंतश्चप्लवंगमाः॥९८॥लब्धलक्षारघुवरंपरिवार्योपतस्थिरे॥लांगूलानिप्रविध्यंतःस्फोटयंतश्चवानराः॥९९॥लक्ष्मणो
जयतीत्येवंवाक्यविश्रावयंस्तदा॥अन्योन्यंचसमाश्लिष्यहरयोहृष्टमानसाः॥१००॥चक्रुश्चावचगुणाराघवाश्रयजाकथाः
तदसुकरमथाभिवीक्ष्यहृष्टाःप्रियसुहृदोयुधिलक्ष्मणस्यकर्म॥परममुपलभन्मनःप्रहर्षंविनिहतमिंद्ररिपुंनिशम्यदेवाः॥
१०२॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेएकनवतितमःसर्गः॥९१॥त्रयोदशापहारःसमाप्तः॥रुधिरक्लिन्नगात्रस्तुल
क्ष्मणःशुभलक्षणः॥बभूवहृष्टस्तंहत्वाराक्षसेंद्रंमहाहवे॥१॥ततःसजांबवंतंचहनूमंतंचवीर्यवान्॥सन्निपत्यमहातेजाता
श्चसर्वान्वनौकसः॥२॥आजगामततःशीघ्रंयत्रसुग्रीवराघवौ॥विभीषणमवष्टभ्यहनूमंतंचलक्ष्मणः॥३॥ततोराममभिक्रम्य
सौमित्रिरभिवाद्यच॥तस्थौभ्रातृसमीपस्थइंद्रस्येवबृहस्पतिः॥४॥निश्वसन्निवचागत्यराघवायमहात्मने॥आचचक्षेतदावी

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

रोघोरमिंद्रजितोवधं॥ ९॥ रावणेरुक्तशिरश्छिन्नलक्ष्मणेनमहात्मना॥ न्यवेदयतरामायतदाहृष्टोविभीषणः॥ १०॥ श्रुत्वैवतुमहावीर्यो
लक्ष्मणेनेंद्रजिद्वधं॥ प्रहर्षमतुलंलेभेरामोवाक्यमुवाचह॥ ११॥ साधुलक्ष्मणतुष्टोस्मिकर्मचासुकरंकृतं॥ रावणेहिविनाशेनजि
तमित्युपधारय॥ १२॥ सतंशिरस्युपाघ्रायलक्ष्मणंकीर्तिवर्धनं॥ लज्जमानंबलात्स्नेहादंकमारोप्यवीर्यवान्॥ १३॥ उपवेश्यतमु
त्संगेपरिष्वज्यावपीडितं॥ भ्रातरंलक्ष्मणंस्निग्धंपुनःपुनरुदैक्षत॥ १४॥ शल्यसंपीडितंशल्यंनिश्वसंतंतुलक्ष्मणं॥ रामस्तुदुःखसं
तप्तंतंतुनिःश्वासपीडितं॥ १५॥ मूर्ध्निचैनमुपाघ्रायभूयःसंस्पृश्यचत्वरन्॥ उवाचलक्ष्मणंवाक्यमाश्वास्यपुरुषर्षभं॥ १६॥ कृतं
परमकल्याणकर्मदुष्करकर्मणा॥ अद्यमन्येहतेपुत्रेरावणंनिहतंयुधि॥ १७॥ अद्याहंविजयीशत्रौहतेतस्मिन्दुरात्मनि॥ राव
णस्यनृशंसस्यदिष्ट्यावीरत्वयारणे॥ १८॥ छिन्नोहिदक्षिणोबाहुःसहितस्यप्रपाश्रयः॥ विभीषणहनूमद्भ्यांकृतंकर्ममहद्रणे
१९॥ अहोरात्रैस्त्रिभिवीरःकथंचिद्विनिपातितः॥ निरमित्रःकृतोस्म्यद्यनिर्यास्यतिहिरावणः॥ २०॥ बलव्यूहेनमहताश्रुत्वापुत्रं
निपातितं॥ तंपुत्रवधसंतप्तंनिर्यातंराक्षसाधिपं॥ २१॥ बलेनावृत्यमहतानिहनिष्यामिदुर्जयं॥ त्वयालक्ष्मणनाथेनसीताचप
थिवीचमे॥ २२॥ नदुष्प्रापाहतेत्वस्मिन्शक्रजेतरिचाहवे॥ सतंभ्रातरमाश्वास्यपरिष्वज्यचराघव॥ २३॥ रामःसुषेणमुदितःसमाभा
ष्येदमब्रवीत्॥ सशल्योयंमहाप्राज्ञःसौमित्रिर्मित्रवत्सल॥ २४॥ यथाभवतिसुस्वस्थस्तथात्वंसमुदाचर॥ विशल्यक्रियतांक्षिप्रं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

सौमित्रिः सविभीषण ॥२२॥ ऋक्षवानरसैन्यानां शूराणां द्रुमयोधिनां ॥ येवाप्यन्ये त्रयुध्यंति सशस्त्रास्त्रव्रणिनस्तथा ॥२३॥ तेपि सर्वे
प्रयत्नेन क्रियतां सुखिनस्तथा ॥ एवमुक्तः सरामेण महात्मा हरियूथपः ॥२४॥ लक्ष्मणाय ददौ नस्तः सुषेणः परमौषधं ॥ सतस्या
गंधमाघ्राय विशल्यः समपद्यत ॥२५॥ ततो निर्वेदनश्चैव संरूढव्रण एव च ॥ विभीषणमुखानां च सुहृदां राघवाज्ञया ॥२६॥ स
र्ववानरमुख्यानां चिकित्सां तु तदाकरोत् ॥ ततः प्रकृतिमापन्नो हतशल्यो गतक्लमः ॥२७॥ सौमित्रिर्मुदितस्तत्र क्षणेन विगतज्वरः
॥२८॥ तथैव रामः प्लवगाधिपस्तथा विभीषणश्चर्क्षपतिश्च वीर्यवान् ॥ अवेक्ष्य सौमित्रिमरोगमुत्थितं मुदा ससैन्याः परमं जहर्षि
रे ॥२९॥ अपूजन्कर्म सलक्ष्मणस्य सुदुष्करं दाशरथिर्महात्मा ॥ बभूव हृष्टो युधि वानरेंद्रो निशम्य तं शक्रजितं निपातितं ॥३०॥
इत्यार्षे श्रीरामायणे वाल्मीकीये युद्धकांडे द्विनवतितमः सर्गः ॥९२॥ ततः पौलस्त्यसचिवाः श्रुत्वा चेंद्रजितो वधं ॥ आचचक्षु
रभिज्ञाय दशग्रीवाय सव्यथा ॥१॥ युद्धे हतो महाराज लक्ष्मणेन तवात्मजः ॥ विभीषणसहायेन मिषतां नो महाबलः ॥२॥ शूरः
शूरेण संगम्य संयुगेष्वपराजितः ॥ लक्ष्मणेन हतः शूरः पुत्रस्ते विबुधेंद्रजित् ॥३॥ गतः स परमांल्लोकान्शरैः संतर्प्य लक्ष्मणं ॥
सतं प्रतिभयं श्रुत्वा वधं पुत्रस्य दारुणं ॥४॥ घोरमिंद्रजितः संख्ये कर्म लब्ध्वा विशान्महत् ॥ उपलभ्य चिरात्संज्ञां राजा राक्षसयुग
वः ॥५॥ पुत्रशोकाकुलो दीनो विललाप आकुलेंद्रियः ॥ हा राक्षसचमूमुख्य मम वत्स महारथ ॥६॥ जित्वेंद्रं कथमद्य त्वं लक्ष्मणस्य व

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

शंगत॥ननुत्वमिषुभिःक्रुद्धोभिंद्याःकालांतकावपि॥७॥मंदरस्यापिशृंगाणिकिंपुनर्लक्ष्मणंयुधि॥अद्यवैवस्वतोराजाभूयोव
कुमतोमम॥८॥येनाद्यत्वंमहाबाहोसंयुक्तःकालधर्मणा॥एषपंथाःसुयोधानांसर्वामरगणेष्वपि॥९॥यत्कृतेहन्यतेभर्तुःसपु
मान्स्वर्गमृछति॥अद्यदेवगणाःसर्वेलोकपालामहर्षयः॥१०॥हतमिंद्रजितंदृष्ट्वासुखंस्वप्स्यंतिनिर्भयाः॥अद्यलोकास्त्रयः
कृत्स्नाःपृथिवीचसकानना॥११॥एकेनेंद्रजिताहीनाशून्येवप्रतिभातिमे॥अद्यनैर्ऋतकन्यानांश्रोष्याम्यंतःपुरेस्वनं॥१२॥करेण
संघस्ययथानिनादंगिरिगह्वरे॥योवराज्यंचलोकांचरक्षांसिचपरंतप॥१३॥मातरंमांचभार्यांचक्वगतोसिविहायन॥मम
नामत्वयावीरगतस्ययमसादनं॥१४॥प्रेतकार्याणिकार्याणिविपरीतेहिवर्तसे॥यस्त्वंजीवतिसुग्रीवेलक्ष्मणेचसराघवे॥१५॥मम
त्राल्समनुद्धृत्यक्वगतोसिविहायन॥एवमादिविलापार्तंरावणंराक्षसाधिपं॥आविवेशमहान्कोपःपुत्रव्यसनसंभवः॥१६॥प्रकृत्या
कोपनंतस्यनंपुत्रस्यपुनराघव॥दीप्तंसंदीपयामासुर्धर्मेकमिवरश्मयः॥१७॥ललाटेभ्रुकुटीभिश्चसंहताभिर्व्यरोचत॥युगांतेसह
नक्रैस्तुमहोर्मिभिरिवोदधिः॥१८॥कोपोद्विजृंभमाणस्यवक्राद्वक्त्रमभिज्वलत्॥उत्पपातसधूमोग्निर्वृत्रस्यवदनादिव॥१९॥सपु
त्रवधसंतप्तःशूरःक्रोधवशंगतः॥समीक्ष्यरावणोबुध्यावैदेह्यारोचयद्वधं॥२०॥तस्यप्रकृत्यारक्तेचरक्तेक्रोधाग्निनापिच॥राव
णस्यमहाघोरेदीप्तेनेत्रेबभूवतुः॥२१॥घोरंप्रकृत्यारूपंतुतस्यक्रोधाग्निमूर्छितं॥बभूवरूपंरुद्रस्यरुद्रस्येवव्यवस्थितं॥२२॥न

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

स्यक्रुद्धस्यनेत्राभ्यांप्रपतन्त्यश्रुबिंदवः॥दीप्ताभ्यामिवदीपाभ्यांसार्चिषःस्नेहबिंदवः॥२४॥इंतानूविदशतस्तस्यश्रूयतेदशानस्वनः॥यं
त्रस्यावेष्टमानस्यमहतोदानवैरिव॥२५॥कालाग्निरिवसंक्रुद्धोयांयांदिशमवेक्ष्यते॥तस्यांतस्यांभयत्रस्ताराक्षसाःसंविलीलिरे॥२६॥तमंतकमिवक्रुद्धंचराचरचिखादिषुं॥वीक्षमाणंदिशःसर्वाराक्षसानोपचक्रमुः॥२७॥ततःपरमसंक्रुद्धोरावणोराक्षसाधिपः॥अब्रवीद्राक्षसांमध्येसंस्तंभयितुमाहवे॥२८॥मयावर्षसहस्राणिचरित्वापरमंतपः॥तेषुतेषवकाशेषुस्वयंभूःपरितोषितः॥२९॥तस्यैवतपसोव्युष्टयाप्रसादाच्चस्वयंभुवः॥नासुरेभ्योनदेवेभ्योभयंममकदाचन॥३०॥कवचंब्रह्मदत्तंमेयदादित्यसमप्रभं॥देवासुरविमर्देषुनच्छिन्नंवज्रशक्तिभिः॥३१॥तेनमामद्यसंयुक्तंरथस्थमिहसंयुगे॥[redacted]
[redacted]॥प्रतीयात्क्रोधमामाज्ञौसाक्षादपिपुरंदरः॥३२॥यत्तदाभिप्रसन्नेनसशरंकार्मुकंमहत्॥देवासुरविमर्देषुममदत्तंस्वयंभुवा॥३३॥अद्यतूर्यशतैर्भग्नंधनुरुत्थाप्यतांममरामलक्ष्मणयोरेववधायपरमाहवे॥३४॥सपुत्रवधसंतप्तःशूरःक्रोधवशंगतः॥समीक्ष्यरावणोबुद्ध्यासीतांहंतुंव्यवस्यतः॥३५॥प्रत्यवेक्षततताम्राक्षःसुघोरोघोरदर्शनान्॥दीनोदीनस्वरान्सर्वांस्तुवाचनिशाचरान्॥३६॥मायया ममवत्सेनवंचनार्थंवनौकसां॥किंचिदेवहतंतत्रसीतेयमितिदर्शितं॥३७॥तदिदंतथ्यमेवाहंकरिष्येप्रियमात्मनः॥विदेहींनाशयिष्यामिक्षत्रबंधुमनुव्रतां॥३८॥इत्येवमुक्त्वासचिवान्खड्गमासुपरामृशत्॥उद्धृत्यगु

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

णसंपन्नंविमलांबरवर्चसं॥३९॥निष्पपातसवेगेनसभार्यःसचिवैर्वृतः॥रावणःपुत्रशोकेनभृशमाकुलचेतसः॥४०॥संक्रुद्धःखड्ग
मादायसहसायत्रमैथिली॥व्रजंतंराक्षसंप्रेक्ष्यसिंहनादान्विचुक्रुशुः॥४१॥ऊचुश्चान्योन्यमालिंग्यसंघैराक्षसाः+संक्रुद्धंभ्रा
अन्योन्यंतावुभौदृष्ट्वाभ्रातरौप्रव्यथिष्यतः॥४२॥लोकपालाहिचत्वारःक्रुद्धेनानेननिर्जिताः॥बहवःशत्रवश्चान्येसंयुगे
ष्वभिपातिताः॥४३॥त्रिषुलोकेषुरत्नानिभुंक्तेआहृत्यरावणः॥विक्रमेचबलेचैवनास्त्यस्यसदृशोभुवि॥४४॥तेषांसंजल्प
मानानामशोकवनिकागतां॥अभिदुद्रावदेहीरावणःक्रोधमूर्छितः॥४५॥वार्यमाणःसुसंक्रुद्धःसुहृद्भिर्हितबुद्धिभिः॥
अभ्यधावतसंक्रुद्धःखेग्रहोरोहिणीमिव॥४६॥मैथिलीरक्ष्यमाणातुराक्षसीभिरनिंदिता॥ददर्शराक्षसंक्रुद्धंनिस्त्रिंशवरधारि
णं॥तंनिशाम्यसनिस्त्रिंशंव्यथिताजनकात्मजा॥निवार्यमाणंबहुशःसुहृद्भिरनुवर्तिनं॥४८॥सीतादुःखसमाविष्टाविलपंती
दमब्रवीत्॥यथायंमामभिक्रुद्धःसमभिद्रवतिस्वयं॥४९॥वधिष्यतिसनाथांमामनाथामिवदुर्मतिः॥बहुशश्चोदयामासभ
र्तारंमामनुव्रतं॥५०॥भार्यामममभवस्वेतिप्रत्याख्यातोध्रुवंमया॥सोयंमामनुपस्थानेअक्तंनैराश्यमागतः॥५१॥क्रोधमोहसमा
विष्टोव्यक्तंमांहंतुमुद्यतः॥अथवातौनरव्याघ्रौभ्रातरौरामलक्ष्मणौ॥५२॥मन्निमित्तमनार्येणसमरेद्यनिपातितौ॥भैरवोहि
महान्नादोराक्षसानांश्रुतोमया॥५३॥बहूनामिहहृष्टानांतदाविक्रोशतांप्रियं॥अहोधिक्मन्निमित्तोयंविनाशोराजपुत्रयो

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

यो॥५४॥अथवापुत्रशोकेनअहत्वारामलक्ष्मणौ॥विधमिष्यतिमांरौद्रोराक्षसःपापनिश्चयः॥५५॥हनूमतोपियद्वाक्यंनकृ
तंक्षुद्रयामया॥यद्यहंतस्यएष्टेनतदायायामनिंदिता॥५६॥नाद्यैवमनुशोचेयंभर्तुरंकगतासती॥मन्येतुहृदयंतस्याःकौस
ल्यायांफलिष्यति॥५७॥एकपुत्रायदापुत्रंश्रोष्यतेयुधिसूदितं॥सहिजन्मचबाल्यंचयौवनंचमहात्मना॥५८॥धर्मकार्याणिरूपंच
रुदंतीसंस्मरिष्यति॥निराशानिहतेपुत्रेदत्वाश्राद्धमचेतना॥५९॥अग्निमारोक्षतेनूनमापोवापिप्रवेक्ष्यति॥धिगस्तुकुब्जाम
सतींमंथरांपापनिश्चयां॥६०॥यन्निमित्तमिमंशोकंकौसल्याप्रतिपत्स्यते॥इत्येवंमैथिलींदृष्ट्वाविलपंतींतपस्विनीं॥६१॥रोहि
णीमिवचंद्रेणविनाग्रहवशंगतां॥एतस्मिन्नंतरेतस्यअमात्यःशीलवान्शुचिः॥६२॥सुपार्श्वोनाममेधावीरावणंराक्षसांवरं॥नि
वार्यमाणःसचिवैरिदंवचनमब्रवीत॥६३॥कथंनामदशग्रीवसाक्षाद्वैश्रवणानुज॥हंतुमिच्छसिवैदेहींक्रोधाद्धर्ममपास्य
च॥६४॥वेदविद्याव्रतस्नातःस्वकर्मनिरतःसदा॥स्त्रियःकस्माद्वधंवीरमन्यसेराक्षसेश्वर॥६५॥मैथिलींरूपसंपन्नांप्रत्यवेक्ष
स्वपार्थिव॥तस्मिन्नेवसहास्माभिराहवेक्रोधमुत्सृज॥६६॥अभ्युत्थानंत्वमद्यैवकृष्णपक्षचतुर्दशीं॥कृत्वानिर्याह्यमावास्यांवि
जयायबलैर्वृतः॥६७॥शूरोधीमान्रथीखड्गीरथप्रवरमास्थितः॥हत्वादाशरथिंरामंभवान्प्राप्स्यतिमैथिलीं॥६८॥सतंदुरात्मासु
हृदानिवेदितंवचःसुधर्म्यंप्रतिगृह्यरावणः॥गृहंजगामाथततश्चवीर्यवान्पुनःसभांचप्रययौसुहृद्वृतः॥६९॥इत्यार्षेश्रीरा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

मायणेवाल्मीकीयेयुद्धकांडेत्रिनवतितमःसर्गः॥९३॥सप्रविश्यसभांराजादीनःपरमदुःखित॥निषसादासनेमुख्येसिंहःकु
द्धइवश्वसन्॥१॥अब्रवीच्चसतान्सर्वान्बलमुख्यान्महाबलः॥रावणःप्रांजलिर्वाक्यंपुत्रव्यसनकर्षित॥२॥सर्वेभवंतःसर्वेणह
स्त्यश्वेनसमाहृताः॥निर्यातुरथसंघैश्चपदातैश्चोपशोभिताः॥३॥एकंरामंपरिक्षिप्यसमरेहंतुमर्हथ॥प्रहृष्टाःशरवर्षेणप्रावृ
ट्कालइवांबुदाः॥४॥अथवातंशरैस्तीक्ष्णैर्भिन्नगात्रंमहारणे॥भवद्भिःश्वोनिहंतास्मिरामंलोकस्यपश्यतः॥५॥इत्येतद्वाक्य
मादायराक्षसेंद्रस्यराक्षसाः॥निर्ययुस्तेरथैःशीघ्रैर्नागानीकैश्चसंयुताः॥६॥परिघान्पट्टिशांश्चैवशरखड्गपरश्वधान्॥शरीरांत
करान्सर्वेचिक्षिपुर्वानरान्प्रति॥७॥वानराश्चद्रुमान्शैलान्राक्षसान्प्रतिचिक्षिपुः॥ससंग्रामोमहाभीमसूर्यास्योदयनंप्रति॥८॥
रक्षसांवानराणांचतुमुलंसमपद्यत॥तेगदाभिर्विचित्राभिःप्रासैःखड्गैःपरश्वधैः॥९॥अन्योन्यंसमरेजघ्नुस्तदावानरराक्षसाः॥
एवंप्रवृत्तेसंग्रामेत्यद्भुतंसुमहद्रजः॥१०॥रक्षसांवानराणांचशोणितंशोणितस्रवैः॥मातंगरथकूलाश्ववाजिमत्स्याध्वजद्रुमाः
११॥शरीरसंघाटवहाःप्रसस्रुःशोणितापगा॥ततस्तेवानराःसर्वेशोणितौपरिघप्लुताः॥१२॥ध्वजवर्मरथानश्वान्नानाप्र
हरणानिच॥आप्लुत्याप्लुत्यसमरेवानरेंद्राबभंजिरे॥१३॥केशान्कर्णौस्त्रटांश्चनासिकाश्चप्लवंगमाः॥रक्षसांदशनैस्तीक्ष्णै
र्नखैश्चापिव्यदारयन्॥१४॥एकैकंराक्षसंसंख्येशतंवानरपुंगवाः॥अभ्यधावंतफलितंवृक्षंशकुनयोयथा॥१५॥तदागदा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

भिगुवरैभिः ग्रासैः खड्गैः परश्वधैः॥ निर्जघ्नुर्वानरान्घोरान्राक्षसाः पर्वतोपमाः॥१९॥ राक्षसैर्वध्यमानानां वानराणां महाचमूः॥
रारण्यं रारणं यातारामं दशरथात्मजं॥१७॥ ततो रामो महातेजा धनुरादाय वीर्यवान्॥ प्रविश्य राक्षससैन्यं शरवर्षैर्ववर्ष
ह॥१८॥ प्रविष्टं तु तदा रामं मेघाः सूर्यमिवावरे॥ नाधिजग्मुर्महाघोरं निर्दहंतं शराग्निना॥१९॥ कृतान्येव सुघोराणि रामेण रजनीचरा॥
रणे रामस्य ददृशुः कर्माण्यसुकराणि ते॥२०॥ चालयंतं महानीकं विधमंतं महारथान्॥ ददृशुस्ते न वै रामं वातं वनगतं यथा॥२१॥
छिन्नं भिन्नशरैर्दग्धं प्रभग्नं शस्त्रपीडितं॥ बलं रामेण ददृशुर्न रामं शीघ्रकारिणं॥२२॥ प्रहरंतं शरीरेषु न ते पश्यंति राघवं॥
इंद्रियार्थेषु तिष्ठंतं भूतात्मानमिव प्रजाः॥२३॥ एष हंति गजानीकमेष हंति महारथान्॥ एष हंति शरैस्तीक्ष्णैः
पदातीन्वाजिभिः सह॥२४॥ इति ते राक्षसा सर्वे रामस्य सदृशा रणे॥ अन्योन्यं कुपिता जघ्नुः सादृश्याद्राघवस्य ते॥२५॥ न ते ददृ
शिरे रामं दहंतमिव पावकं॥ मोहिताः परमास्त्रेण गांधर्वेण महात्मना॥२६॥ ते तु रामसहस्राणि रणे पश्यंति राक्षसाः॥ पुनः प
श्यंति काकुत्स्थमेकमेव महारथं॥२७॥ भ्रमंतीं काचनीं कोटिं कार्मुकस्य महात्मनः॥ अलातचक्रप्रतिमां ददृशुस्ते नराघवं॥
२८॥ शरीरनाभिः सत्वार्चिः शरारं नेमिकार्मुकं॥ ज्याघोषतलनिर्घोषं तेजोबुद्धिगुणप्रभं॥२९॥ दिव्यास्त्रगुणसंपन्नं निघ्नंतं युधि
राक्षसान्॥ ददृशुराम चक्रं तत्कालचक्रमिव प्रजाः॥३०॥ अनीकं दशसाहस्रं रथानां वातरंहसां॥ अष्टादशसहस्राणि कुंजरा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

णांतरस्विनां॥३१॥चतुर्दशसहस्राणिसारोहाणांचवाजिनां॥पूर्णेशतसहस्रेद्वेराक्षसानांपदातिनां॥३२॥दिवसस्याष्टभागेनशा
रैरग्निशिखोपमैः॥हतान्येकेनरामेणराक्षसांकामरूपिणां॥३३॥तेहताश्चाहतरथाःशांताविमथितध्वजाः॥अभिपेतुपुरींलं
कांहतशेषानिशाचराः॥३४॥हतैर्गजपदात्यश्वैस्तद्बभूवरणाजिरं॥अक्रीडभूमिकुद्धस्यरुद्रस्येवमहात्मनः॥३५॥ततोदेवाः
सगंधर्वाःसिद्धाश्चपरमर्षयः॥साधुसाध्वितिरामस्यतत्कर्मसमपूजयन्॥३६॥अब्रवीच्चतदारामःसुग्रीवंप्रत्यनंतरं॥विभी
षणंचधर्मात्माहनूमंतंचवानरं॥३७॥जांबवंतंहरिश्रेष्ठमंगदंद्विविदंमवच एतदस्त्रबलंदिव्यंमवाच्यंवकस्यवा॥३८॥निह
त्यतांराक्षसराजवाहिनींरामस्तदाशक्रसमोमहात्मा॥अस्त्रेषुशस्त्रेषुजितक्लमश्चसंस्तूयतेदेवगणैःप्रहृष्टैः॥३९॥इत्या
र्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेचतुर्नवतितमःसर्गः॥९४॥तानिनागसहस्राणिसारोहाणांचवाजिनां॥रथानांचाग्नि
वर्णानांसध्वजानांसहस्रशः॥१॥राक्षसानांसहस्राणिगदापरिघयोधिनां॥कांचनध्वजचित्राणांशूराणांकामरूपिणां॥२॥नि
हतानिशरैस्तीक्ष्णैस्तप्तकांचनभूषणैः॥रावणेनप्रयुक्तानिरामेणाक्लिष्टकर्मणा॥३॥दृष्ट्वाक्लांतसंभ्रांताहतशेषानिशाच
राः॥राक्षस्यश्चसमागम्यदीनाश्चिंतापरिप्लुताः॥४॥विधवाहतपुत्राश्चक्रोशंत्योहतबांधवाः॥राक्षस्यःसहसंगम्यदुःखार्तापर्य
देवयन्॥५॥कथंशूर्पनखावृद्धाकराली निर्णतोदरी॥आससादवनेरामंकंदर्पसमरूपिणं॥६॥सुकुमारंमहासत्वंसर्वभूतर

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

हितेरतं॥तंदृष्ट्वालोकवध्यासारूपहीनाप्रकामिता॥७॥कथंसर्वगुणैर्हीनागुणवंतमहौजसं॥सुमुखंदुर्मुखीरामंकामया
मासराक्षसी॥८॥जनस्यास्यात्मभाग्यत्वात्बलिनीश्वेतमूर्धजा॥अकार्यमपहास्यंचसर्वलोकविगर्हितं॥९॥राक्षसानांविनाश
यदूषणस्यखरस्यच॥चकारात्रतिरूपासाराघवस्यप्रधर्षणं॥१०॥तन्निमित्तमिदंवैरंरावणेनकृतंमहत्॥वधायनीतासासी
तादशग्रीवेणरक्षसा॥११॥नचसीतांदशग्रीवःप्राप्नोतिजनकात्मजां॥बद्धंबलवतावैरमक्षयंराघवेणच॥१२॥वैदेहीप्रार्थ
यानंतंविराधंप्रेक्ष्यराक्षसं॥हतमेकेनबाणेनपर्याप्तंतन्निदर्शनं॥१३॥चतुर्दशसहस्राणिरक्षसांभीमकर्मणां॥निहतानि
जनस्थानेशरैरग्निशिखोपमैः॥१४॥खरश्चनिहतःसंख्येत्रिशिरादूषणस्तथा॥शरैरादित्यसंकाशैःपर्याप्तंतन्निदर्शनं॥१५॥
हतोयोजनबाहुश्चकबंधोरुधिराशनः॥क्रोधान्नादंनदन्घोरंपर्याप्तंतन्निदर्शनं॥१६॥जघानबलिनंरामःसहस्रनयना
त्मजं॥वालिनंमेघसंकाशंपर्याप्तंतन्निदर्शनं॥१७॥ऋष्यमूकेवसन्शैलेदीनोभग्नमनोरथः॥सुग्रीवःस्थापितोराज्येपर्याप्तं
तन्निदर्शनं॥१८॥धर्मार्थसहितंवाक्यंसर्वेषांरक्षसांहितं॥युक्तंविभीषणवचःकुर्याद्यदिस्मधनदानुज॥श्मशानभूतादुःख
तांनैवंलंकापुरीभवेत्॥१९॥कुंभकर्णंहतंश्रुत्वाराघवेणमहाबलं॥अतिकायंचदुर्धर्षंलक्ष्मणेनहतंतदा॥२०॥प्रियंचेंद्रजितंपु
त्रंरावणोनैवबुध्यते॥पुराहनूमतालंकादग्धालांगूलवह्निना॥२१॥हतमक्षकुमारंचदृष्ट्वासोनावबुध्यते॥ममपुत्रोममभ्रा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

तामम भर्त्तीहतोरणे॥२३॥इत्येषश्रूयतेशब्दोराक्षसानांकुलेकुले॥रथाश्वाश्वाश्वनागाश्चहताःशतसहस्रशः॥२४॥रणेरामे
णशूरेणराक्षसाश्चपदातयः॥रुद्रोवायदिवाविष्णुर्महेंद्रोवाशतक्रतुः॥२५॥हंतिनोरामरूपेणयदिवास्वयमंतकः॥हतप्रवी
रारामेणनिराशाजीवितेवयं॥२६॥अपश्यंत्योभयस्यांतमनाथाविलपामहे॥रामहस्ताद्दशग्रीवःशूरोदत्तमहावरः॥२७॥इदं
भयंमहद्घोरंसमुत्पन्नंनबुध्यते॥तंनदेवानगंधर्वानपिशाचानराक्षसाः॥२८॥उपसृष्टंपरित्रातुंशक्तारामेणसंयुगे॥उत्पाता
श्चापिदृश्यंतेरावणस्यरणेरणे॥२९॥कथयिष्यंतिरामेणरावणस्यनिबर्हणं॥पितामहेनप्रीतेनदेवदानवराक्षसैः॥३०॥राव
णस्याभयंदत्तंमानुषेभ्योनयाचितं॥तदिदंमानुषंमन्येप्राप्तंनिःसंशयंभयं॥३१॥जीवितांतकरंघोरंराक्षसांरावणस्यच॥पी
ड्यमानास्तु [redacted] बलिनावरदानेनराक्षसाः॥३२॥दीप्तैस्तपोभिर्विबुधाःपितामहमपूजयन्॥देवतानांहितार्थायमहात्मावे
पितामहः॥३३॥उवाचदेवताःसर्वाइदंतुष्टोमहद्वचः॥अद्यप्रभृतिलोकांस्त्रीन्सर्वेदानवराक्षसाः॥३४॥भयेनप्रावृतानित्यंवि
चरिष्यंतिशाश्वतं॥दैवतैस्तुसमागम्यसर्वैश्चेंद्रपुरोगमैः॥३५॥वृषध्वजस्त्रिपुरहामहादेवःप्रसादितः॥प्रसन्नस्तुमहादेवोदे
वानेतद्वचोब्रवीत्॥३६॥उत्पत्स्यतिहितार्थंवोनारीरक्षःक्षयावहा॥एषादेवैःप्रयुक्तंतुसुद्यथादानवान्पुरा॥३७॥भक्षयिष्यति
नःसीताराक्षसघ्नीसरावणान्॥रावणस्याविनीतेनदुर्विनीतस्यदुर्मतेः॥३८॥अयंनिष्ठानकोघोरःशोकेनसमभिप्लुतः॥तंनपश्या

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

महेलोकेयोनःशरणदोभवेत्॥३९॥राघवेणोपसृष्टानांकालेनेवयुगक्षये॥नास्तिनःशरणंकश्चिद्भयेमहतितिष्ठता॥४०॥दवा
ग्निनावेष्टितानांकरेणूनांयथावने॥प्राप्तकालंकृतंतेनपौलस्त्येमहात्मना॥४१॥यतएवभयंदृष्टंतमेवशरणंगतः॥इतीवस
र्वारजनीचरस्त्रियःपरस्परंसंपरिरभ्यबाहुभिः॥विलेपुरार्त्ताभयभारपीडिताविनेदुरुच्चैश्चतदासुदारुणं॥४२॥इत्यार्षेश्री
रामायणेवाल्मीकीयेयुद्धकांडेपंचनवतितमःसर्गः॥९५॥आर्त्तानांराक्षसीनांतुलंकायांवैकुलेकुले॥रावणःकरुणंशब्दं
शुश्रावपरिदेवितं॥१॥सतुदीर्घंविनिश्वस्यमुहूर्तंध्यानमास्थितः॥बभूवपरमःक्रुद्धोरावणोभीमदर्शनः॥२॥संदृश्यदशनै
रोष्ठंक्रोधसंक्तलोचनः॥राक्षसैरपिदुर्दर्शःकालाग्निरिवमूर्छितः॥३॥उवाचचसमीपस्थान्राक्षसान्राक्षसेश्वरः॥भयाव्यक्त
कथंस्तत्रनिर्दहन्निवचक्षुषा॥४॥महोदरंमहापार्श्वंविरूपाक्षंचराक्षसं॥शीघ्रंवदतसैन्यानिनिर्यातेतिममाज्ञया॥५॥त
स्यतद्वचनंश्रुत्वाराक्ष[illegible]सास्तेभयाकुलाः॥चोदयामासुरव्यग्रान्राक्षसान्रावणाज्ञया॥६॥तेतुसर्वेतथेत्युक्त्वाराक्षसाघोर
दर्शनाः॥कृतस्वस्त्ययनाःसर्वेरणायाभिमुखाययुः॥७॥प्रतिपूज्यंयथान्यायंरावणंतंमहारथाः॥तस्थुःप्रांजलयःसर्वेभर्तुर्विज
यकांक्षिणः॥८॥अथोवाचप्रहस्तेतान्रावणःक्रोधमूर्छितः॥महोदरंमहापार्श्वौविरूपाक्षंचराक्षसं॥९॥अद्यबाणैर्धनुर्मुक्तै
र्युगांतादित्यसन्निभैः॥राघवंलक्ष्मणंचैवनेष्यामियमसादनं॥१०॥खरस्यकुंभकर्णस्यप्रहस्तेंद्रजितोस्तथा॥करिष्यामिप्रतीकार

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

मद्यशत्रुवधादहं॥११॥नैर्वांतरिक्षं नदिशो नचद्यौर्नापिसागरा॥प्रकाशत्वं गमिष्यंति मद्बाणजलदावृता॥१२॥अद्य वानरमुख्या
नांतानियूथानिभागशः॥धनुषाशरजालेनवधिष्यामिपतत्रिणा॥१३॥अद्य वानरसैन्यानिरथेनपवनौजसा॥धनुःसमुद्रा
दुद्धूतैर्मथिष्यामिशरोर्मिभिः॥१४॥आकीर्णपद्मवक्त्राणिपद्मकेसरवर्चसां॥अद्य व्यूहतटाकानिगजवत्प्रमथाम्यहं॥१५॥सश
रैरद्यवदनैः संख्येवानरयूथपाः॥मंडयिष्यंतिवसुधांसनालैरिवपंकजैः॥१६॥अद्य युद्धप्रचंडानांहरीणांद्रुमयोधिनां
मुक्तेनेकेषुणायुद्धे भेत्स्यामिचशतंशतं॥१७॥हतोभ्राताहतोभर्तायासांचतनयाहता॥वधेनाद्यरिपोस्तासांकरोम्यस्रुप्र
मार्जनं॥१८॥अद्य मद्बाणनिर्भिन्नैः प्रकीर्णैर्गतचेतनैः॥करोमिवानरैर्युद्धे यत्रावेष्टयतलां महीं॥१९॥अद्य गोमायवोगृध्राः ये
चमांसाशिनोऽपरे॥सर्वास्तांस्तर्पयिष्यामिशत्रुमांसैः शरार्पितैः॥२०॥कल्पतांमेरथः शीघ्रंक्षिप्रमानीयतां धनुः॥अनुप्रयांतुमांस
र्वेये चशिष्टानिशाचराः॥२१॥तस्यतद्वचनंश्रुत्वामहापार्श्वोब्रवीद्वचः॥बलाध्यक्षान्स्थितांस्तत्र बलंसंत्वर्यतामिति॥२२॥बला
ध्यक्षास्तुतच्छ्रुत्वामहापार्श्वस्यभाषितं॥बलाध्यक्षाः क्रूतरसारक्षसांस्तान्प्रहाद्रुहान्॥२३॥ततोमुहूर्तान्निष्पेतू राक्षसा भीम
दर्शनाः॥नदंतोभीमवदनानानाप्रहरणैर्भुजैः॥२४॥असिभिः पट्टिशैः शूलैर्गदाभिर्मुसलैर्हतैः॥शक्तिभिस्तीक्ष्णधाराभिर्महद्भिः
कूटमुद्गरैः॥२५॥यष्टिभिर्विविधैश्चक्रैर्निशितैश्च परश्वधैः॥भिंडिपालैः शतघ्नीभिरन्यैश्चापिवरायुधैः॥२६॥अथानयन्बलाध्य

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

क्षाश्चत्वारोरावणाज्ञया॥रथानांनियुतंसाग्रंनागानांनियुतत्रयं॥२७॥अश्वानांषष्टिकोट्यस्तुखरोष्ट्राणांतथैवच॥पदातय
स्त्वसंख्याताजग्मुस्तेराजशासनात्॥२८॥बलाध्यक्षाश्वसंस्थाप्यराज्ञःसेनांपुरःस्थिताः॥एतस्मिन्नंतरेसूतःस्थापयामासतंरथं
२९॥दिव्यस्त्रग्वस्त्रसंपन्नंनानालंकारभूषितं॥दिव्यवाजिसमायुक्तंदिव्यालंकारभूषितं॥३०॥नानायुधसमाकीर्णंकिंकिणीजाल
संयुतं॥नानारत्नपरिक्षिप्तंनानास्तंभैर्विराजितं॥३१॥जांबूनदमयैश्चैवसहस्रकलशैर्युतं॥तंदृष्ट्वाराक्षसाःसर्वेविस्मयंपरमंग
ताः॥३२॥तंदृष्ट्वासहसोत्थायरावणोराक्षसेश्वरः॥कोटिसूर्यप्रतीकाशंज्वलंतमिवपावकं॥३३॥द्रुतंसूतसमायुक्तंयुक्ताष्टतुरगंर
थं॥आरुरोहतदाभीमोदीप्यमानःस्वतेजसा॥३४॥ततःप्रयातःसहसाराक्षसैर्बहुभिर्वृतः॥रावणःसत्वगांभीर्याद्दारयन्निवमेदि
नीं॥३५॥ततश्चासीन्महानादस्तूर्याणांचततस्ततः॥मृदंगैःपटहैःशंखैःकाहलैःसहराक्षसां॥३६॥आगतोरक्षसांराजाछत्रचामर
संयुतः॥सीतापहारीदुर्वृत्तोब्रह्मघ्नोदेवकंटकः॥३७॥योद्रुरघुवरेणेतिशुश्रुवेकाहलध्वनिः॥तेननादेनमहताएथिवीसमकंपत
३८॥तंशब्दंसहसाश्रुत्वावानरादुद्रुवुर्भयात्॥रावणस्तुमहाबाहुसचिवैःपरिवारितः॥३९॥आजगाममहातेजाविजयायरण
प्रति॥रावणेनाभ्यनुज्ञातौमहापार्श्वमहोदरौ॥४०॥विरूपाक्षश्चदुर्धर्षौरथानारुरुहुस्तदा॥नेतुहृष्टाविनर्दंतौभिंदंतमिवमेदि
नीं॥४१॥नादंघोरंविमुंचंतौनिर्ययुर्जयकांक्षिणः॥ततोयुद्धायतेजस्वीरक्षोगणबलैर्वृतः॥४२॥निर्ययावुद्यतधनुःकालांतक

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

यमोपमः॥ततः प्रव्रजिताश्चैनं रथेन समहाबलः॥४३॥द्वारेण निर्ययौ तेन यत्र तौ रामलक्ष्मणौ॥ततो नष्टप्रभः सूर्यो दिशश्च ति
मिरावृताः॥४४॥द्विजा विनेदुर्घोराश्च संचचाल च मेदिनी॥ववर्ष रुधिरं देवश्चस्रवुश्च तुरंगमाः॥४५॥ध्वजाग्रेन्यपतद्गृध्रो वि
नेदुश्चाशिवं शिवाः॥नयनं चास्फुरद्वामं वामोबाहुरकंपत॥४६॥विवर्णवदनश्चासीत्किंचिदध्यवतस्वनः॥ततो निष्क्रमतो
युद्धे दशग्रीवस्य रक्षसः॥४७॥रणे निधनशंसीनि रूपाण्येतानि जज्ञिरे॥अंतरिक्षात्पपातोल्का निर्घातसमनिस्वना॥४८॥विनेदुर
शिवा गृध्रा वायसैरभिमिश्रिताः॥एतानि चिंतयन्घोरानुत्पातान्समवस्थितान्॥४९॥निर्ययौ रावणो मोहाद्बधाय कालचो
दितः॥तेषां तुरथघोषेण राक्षसानां महात्मनां॥५०॥वानराणामपि च मूर्युद्धायैवाभ्यवर्तत॥तेषां तु तुमुलं युद्धं बभूव कपिरक्ष
सां॥५१॥अन्योन्यमाह्वयानानां क्रुद्धानां जयमिच्छतां॥ततः क्रुद्धो दशग्रीवः शरैः कांचनभूषणैः॥५२॥वानराणामनीकेषु चकार
कदनं महत्॥निकृत्तशिरसः केचिन्निष्टनंतो महीं गताः॥५३॥केचिन्निकृत्तशिरसो रावणेन बलीमुखाः॥केचिद्विच्छिन्नहृदया
केचित्स्रग्त्रविवर्जिताः॥५४॥निरुच्छ्वासाहताः केचित्केचित्पार्श्वेषु दारिताः॥केचिद्विभिन्नशिरसः केचिच्चक्षुर्विनाकृताः॥५५॥द
शाननः क्रोधविवृत्तनेत्रो यतो यतोभ्येति रथेन संख्ये॥ततस्ततस्तस्य शरप्रवेगसंहतैर्नशेकुर्हरियूथपास्ते॥५६॥इत्यार्षे
श्रीरामायणे वाल्मीकीये युद्धकांडे षण्णवतितमः सर्गः॥९६॥तथा तैः क्षतगात्रैस्तु दशग्रीवेण मार्गणैः॥बभूव वसुधा तत्र प्रकी

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

ष्पीहरिभिस्तदा॥१॥रावणस्याप्रसह्यंतंशरसंपातमेकतः॥नशेकुःसहितुंदीप्तंपतंगाज्वलनंयथा॥२॥तेर्दिताशितैर्बाणैःक्रोशं
तोविप्रदुद्रुवुः॥पावकार्चिःसमाविष्टादह्यमानायथागजाः॥३॥प्लवगानामनीकानिमहाभ्राणीवमारुतः॥सयथौसमरेतस्मिन्
विधमन्रावणःशरैः॥४॥कदनंतरसाकृत्वाराक्षसेंद्रोवनौकसां॥आससादततोयुद्धेत्वरितंराघवंरणे॥५॥सुग्रीवस्तान्कपीन्दृ
ष्ट्वाभग्नान्विद्राविताञ्रणे॥गुल्मेसुषेणंनिक्षिप्यचक्रेयुद्धेद्रुतंमनः॥६॥आत्मनःसदृशंवीरःसतंनिक्षिप्यवानरः॥सुग्रीवोभि
मुखःशत्रुंप्रतस्थेपादपायुधः॥७॥पार्श्वतःपृष्ठतश्चास्यसर्वयूथाधिपाःस्वयं॥अनुजग्मुर्महाशैलान्विविधांश्चमहीरुहा
न्॥८॥उत्पाट्ययुधिसुग्रीवःस्वरेणमहतामहान्॥योधयन्विविधांश्चान्यान्ममंथोत्तमराक्षसान्॥९॥ममर्दचमहाकायोरा
क्षसान्वानरेश्वरः॥युगांतसमयेवायुःप्रवृद्धानगमानिव॥१०॥राक्षसानामनीकेषुशैलवर्षंववर्षह॥अश्मवर्षंयथामेघःप
क्षिसंघेषुकानने॥११॥कपिराजविमुक्तैस्तैःशैलवृक्षैस्तुराक्षसाः॥विकीर्णाशिरसापेतुःविकीर्णाइवपर्वताः॥१२॥अथसंक्षी
यमाणेषुराक्षसेषुसमंततः॥सुग्रीवेणप्रभग्नेषुनदत्सुचपतत्सुच॥१३॥विरूपाक्षःस्वकंनामधन्वीविश्राव्यराक्षसः॥रथाद
वप्लुत्यदुर्धर्षोगजस्कंधमुपारुहत्॥१४॥सतंद्विरदमारुह्यविरूपाक्षोमहाबलः॥ननर्दभीमनिर्ह्रादंवानरानभ्यधावत॥१५॥
सुग्रीवंसशरान्घोरान्विससर्जचमूमुखे॥स्थापयामासचोद्विग्नान्राक्षसान्संप्रहर्षयन्॥१६॥सोतिविद्धःशितैर्बाणैःक

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

पीड्स्तेनरक्षसा॥चुक्रोधचमहाक्रोधोवधेतस्यमनोदधे॥१७॥ततःपादपमुद्धृत्यशूरःसंप्रथनेहरि॥अभिपत्यजघानास्यप्र
मुखेतंमहागजं॥१८॥सतुप्रहाराभिहतःसुग्रीवेणमहागजः॥अपासर्पद्धनुर्मात्रंनिषसादननादच॥१९॥गजातुमथितात्तूर्णम
पक्रम्यसवीर्यवान्॥राक्षसोभिमुखःशत्रुंप्रत्युद्गम्यततःकपिं॥२०॥आर्षभंचर्मखड्गंचप्रगृह्यलघुविक्रमः॥भर्त्सयन्निवसु
ग्रीवमाससादव्यवस्थितं॥२१॥सहितस्यापिसंक्रुद्धःप्रगृह्यविपुलांशिलां॥विरूपाक्षायचिक्षेपसुग्रीवोजलदोपमां॥२२॥सतां
शिलामापततींदृष्ट्वाराघवंक्षसपुंगवः॥अपक्रम्यसुविक्रांतःखड्गेनप्राहरत्तदा॥२३॥तेनखड्गप्रहारेणरक्षसाबलिनाहतः॥
मुहूर्त्तमभवद्दीनोविसंज्ञइवचानघ॥२४॥सतदासहसोत्पत्यराक्षसस्यमहाहवे॥मुष्टिंसंवर्त्यवेगेनपातयामासवक्षसि॥२५
मुष्टिप्रहाराभिहतोविरूपाक्षोनिशाचरः॥तेनखड्गेनसंक्रुद्धसुग्रीवस्यचमूमुखे॥२६॥कवचंपातयामाससखड्गाभिहतोपत
त्॥ससमुत्थायपतितःकपिस्तस्यव्यसर्जयत्॥२७॥तलप्रहारमशनैःसमानंभीमनिस्वनं॥तलप्रहारंतद्रक्षःसुग्रीवेणसमुद्यतं॥
२८॥निपुण्यान्मोचयित्वैनंमुष्टिनोरस्यताडयत्॥ततःसंक्रुद्धतरःसुग्रीवोवानरेश्वरः॥२९॥मोक्षितंचात्मनोदृष्ट्वाप्रहारंतेनर
क्षसा॥संददर्शतरंतस्यविरूपाक्षस्यवानरः॥३०॥ततोत्पपातयक्रोधाच्छंखदेशेमहत्तरं॥महेंद्राशनिकल्पेनतलेनाभिहतःशि
तो॥३१॥पपातरुधिरक्लिन्नःशोणितंतुसमुद्गरन्॥स्रोतोभ्यस्तुविरूपाक्षोमदंदिग्द्विरदोयथा॥३२॥विवृत्तनयनंक्रोधात्फेनरु

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

धिराप्लुतं॥ ददृशुस्तेविरूपाक्षंविरूपाक्षतरंकृतं॥३३॥स्फुरंतंपरिवर्त्तंतंपार्श्वेनरुधिरोक्षितं॥करुणंचविनर्दंतंददृशुःकपयोरिपुं
३४॥तदातुतौसंयतिसंप्रयुक्तौतरस्विनौवानरराक्षसानां॥बलार्णवौसस्वनतुश्चभीमौमहार्णवौद्वाविवभिन्नवेलौ॥३५॥निपा
तितंप्रेक्ष्यविरूपनेत्रंमहाबलंतंहरिपार्थिवेन॥बलंसमस्तंकपिराक्षसानामुन्मत्तगंगाप्रतिमंबभूव॥३६॥इत्यार्षेश्रीरामाय
णेवाल्मीकीयेयुद्धकांडेविरूपाक्षवधसप्तनवतितमःसर्गः॥९७॥हन्यमानेबलेतूर्णमन्योन्यंतेमहामृधे॥सरसीवमहाघर्मे
सोपक्षीणेबभूवतुः॥१॥स्वबलस्यतुघातेनविरूपाक्षवधेनच॥बभूवद्विगुणंक्रुद्धोरावणोराक्षसेश्वरः॥२॥प्रक्षीणंस्वबलंदृ
ष्ट्वावध्यमानंबलीसुरैः॥बभूवास्यव्यथायुद्धेदृष्ट्वादैवविपर्ययं॥३॥उवाचचसमीपस्थंमहोदरमरिंदमं॥अस्मिन्काले
महाबाहोजयाशात्वयिमेस्थिता॥४॥जहिशत्रुचमूंवीरदर्शयाद्यपराक्रमं॥भर्तृपिंडस्यकालोयंनिर्देष्टुंसाधुयुध्यतां॥५॥ए
वमुक्तस्तथेत्युक्त्वारावणेनमहोदरः॥प्रविवेशारिसेनांतांपतंगइवपावकं॥६॥ततःसकदनंचक्रेवानराणांमहाबलः॥भर्तृ
वाक्येनतेजस्वीस्वेनवीर्येणचोदितः॥७॥वानराश्चमहासत्वाःप्रगृह्यविपुलाःशिलाः॥प्रविश्यारिबलंभीमंजघ्नुस्तेरजनीचरा
न्॥८॥महोदरस्तुसंक्रुद्धःशरैःकांचनभूषणैः॥चिच्छेदपाणिपादोरूंवानराणांमहाहवे॥९॥ततस्तेवानराःसर्वेराक्षसेनार्दि
ताभृशं॥दिशोदशद्रुताःकेचित्केचित्सुग्रीवमाश्रिताः॥१०॥प्रभग्नांसमरेदृष्ट्वावानराणांमहाचमूं॥अभिदुद्रावसुग्रीवोमहोद्र

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

रमनंतरं ॥१२॥ प्रगृह्य विपुलां घोरां महीधरसमां शिलां ॥ चिक्षेप च महातेजास्तद्वधाय हरीश्वरः ॥१३॥ तामापतंतीं सहसा शिलां
दृष्ट्वा महोदरः ॥ असंभ्रांतस्ततो बाणैर्विभेद सुरदुःसहां ॥१४॥ रक्षसा तेन बाणौघैर्निकृत्ता सा सहस्रधा ॥ निपपात शिला भूमौ गृध्र
चक्रमिवाकुलं ॥१५॥ तां तु भिन्नां शिलां दृष्ट्वा सुग्रीवः क्रोधमूर्छितः ॥ सालमुत्पाट्य चिक्षेप राक्षसेरणमूर्धनि ॥१६॥ नखैश्च विदद
रैनं शूरः परबलार्दनः ॥ सददर्श ततः क्रुद्धः परिघं पतितं भुवि ॥१७॥ आविध्यतु सतं दीप्तं परिघं तस्य दर्शयन् ॥ परिघेणोग्रवेगेन ज
घानास्य हयोत्तमान् ॥१८॥ तस्माद्धतहयाद्वीरः सोवप्लुत्य महारथात् ॥ गदां जग्राह संक्रुद्धो राक्षसोथ महोदरः ॥१९॥ गदापरिघ
हस्तौ तौ युधि वीरौ समीयतुः ॥ नर्दंतौ गोवृषप्रख्यौ घनाविव सविद्युतौ ॥२०॥ ततः क्रुद्धो गदां तस्मै चिक्षेप रजनीचरः ॥ ज्वलंतीं
भास्कराभासां सुग्रीवाय महोदरः ॥२१॥ गदां तां सुमहाघोरामापतंतीं महाबलः ॥ सुग्रीवो रोषताम्राक्षः समुद्यम्य महाहवे ॥२२॥
आजघान गदां तस्य परिघेण हरीश्वरः ॥ पपात समरोद्भिन्ना परिघस्तस्य भूतले ॥२३॥ ततो जग्राह तेजस्वी सुग्रीवो वसुधात
लात् ॥ आयसं मुसलं घोरं सर्वतो हेमभूषितं ॥२४॥ तत मुद्यम्य चिक्षेप सोप्यन्यां व्याक्षिपद्गदां ॥ भिन्नावन्योन्यमासाद्य पेततुश्च
महीतले ॥२५॥ ततो भिन्नप्रहरणौ मुष्टिभ्यां तौ समीयतुः ॥ तेजोबलसमाविष्टौ दीप्ताविव हुताशनौ ॥२६॥ जघ्नतुस्तौ यदान्योन्यं न
दंतौ च पुनः पुनः ॥ तलैश्चान्योन्यमासाद्य पेततुश्च महीतले ॥२७॥ उत्पेततुस्तदा तूर्णं जघ्नतुश्च परस्परं ॥ भुजैश्चिक्षेपतुश्चाव

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

न्योन्यमपराजितौ ॥२७॥ जग्मतुस्तौ श्रमं वीरौ बाहुयुद्धे परंतपौ ॥ जहार च तदा खड्गमदूरपरिवर्तिनं ॥२८॥ राक्षसश्चर्मणा सार्धं
महावेगो महोदरः ॥ तथैव च महाखड्गं चर्मणा पतितं सह ॥२९॥ जग्राह वानरश्रेष्ठः सुग्रीवो वेगवत्तरः ॥ तौ तु रोषपरीतांगौ नर्द
तावभ्यधावतां ॥३०॥ उद्यतासीरणे हृष्टौ चर्मखड्गविशारदौ ॥ दक्षिणं मंडलं चोभौ सुतूर्णं संपरीयतुः ॥३१॥ अन्योन्यमभिसंक्रु
द्धौ जयेप्सू निहितावुभौ ॥ स तु शूरो महावेगो वीर्यश्लाघी महोदरः ॥३२॥ महाचर्मणि तं खड्गं पातयामास दुर्मतिः ॥ लग्नमुत्क
र्षतः खड्गं खड्गेन कपिकुंजरः ॥३३॥ जहार स शिरस्त्राणं कुंडलोपगतं शिरः ॥ निकृत्तशिरसस्तस्य पतितस्य महीतले ॥३४॥ तद्ब
लं राक्षसेंद्रस्य दृष्ट्वा तत्र न तिष्ठते ॥ हत्वा तं वानरैः सार्द्धं ननाद मुदितो हरिः ॥३५॥ चुक्रोध च दशग्रीवो बभौ हृष्टश्च राघवः ॥ वि
षण्णवदनाः सर्वे राक्षसा दीनचेतसः ॥३६॥ विद्रवन्ति पतिताः सर्वे भयवित्रस्तचेतसः ॥३७॥ महोदरं तं विनिपात्य भूमौ महागि
रिः शीर्णमिवैकदेशे ॥ सूर्यात्मजस्तत्र रराज लक्ष्म्या सूर्यः स्वतेजोभिरिवाप्रधृष्यः ॥३८॥ अथ विजयमवाप्य वानरेंद्रः सम
रमुखे सुरसिद्धयक्षसंघैः ॥ अवनितलगतैश्च भूतसंघैर्जहर्षे समाकुलितैर्निरीक्ष्यमाणः ॥३९॥ इत्यार्षे श्रीरामायणे वाल्मी
कीये युद्धकांडे महोदरवधोऽष्टनवतितमः सर्गः ॥९८॥ महोदरे तु निहते महापार्श्वो महाबलः ॥ सुग्रीवं च समीक्ष्याथ क्रोधसंरक्त
लोचनः ॥१॥ अंगदस्य च मूर्ध्नि मांसैरभयामास मार्गणैः ॥ स वानराणां मुख्यानां उत्तमांगानि राक्षसः ॥२॥ पातयामास कायेभ्यः फलं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वृंतादिवानलः॥ केषांचिदिषुभिर्बाहून्स्कंधान्चिच्छेदराक्षसः॥ ३॥ वानराणांसुसंरब्धःपार्श्वेकेषांचिदाक्षिपत्॥ तैर्दिताबाण
वर्षेणमहापार्श्वेनवानराः॥ ४॥ विषादविमुखाःसर्वेबभूवुर्गतचेतसः॥ निशम्यबलमुद्विग्नमंगदोराक्षसार्दितं॥ ५॥ वेगंचक्रे
महाबाहुःसमुद्रइवपर्वसु॥ आयसंपरिघंगृह्यसूर्यरश्मिसमप्रभं॥ ६॥ समरेवानरश्रेष्ठोमहापार्श्वेन्यपातयत्॥ सतुतेन
प्रहारेणमहापार्श्वोविचेतनः॥ ७॥ ससूतःस्यंदनात्तस्माद्विसंज्ञश्चापतद्भुवि॥ सऋक्षराजस्तेजस्वीनीलांजनचयोपमः॥ ८॥
निष्पत्यसुमहावीर्यःस्वयूथान्मेघसन्निभात्॥ प्रगृह्यगिरिशृंगाभांक्रुद्धःसुविपुलांशिलां॥ ९॥ अश्वान्जघानतरसाबभंज
स्यंदनंतत्॥ मुहूर्तंतीक्ष्णसंज्ञस्तुमहापार्श्वोमहाबलः॥ १०॥ अंगदंबहुभिर्बाणैर्भूयस्तत्प्रत्यविध्यत॥ जांबवंतंत्रिभिर्बाणैराज
घानस्तनांतरे॥ ११॥ ऋक्षराजंगवाक्षंचजघानबहुभिःशरैः॥ गवाक्षंजांबवंतंचसदृष्ट्वाशरपीडितौ॥ १२॥ जग्राहपरिघंघोर
मंगदःक्रोधमूर्छितः॥ तस्यांगदःप्रकुपितोराक्षसस्यतमायसं॥ १३॥ दूरस्थितस्यपरिघंरविरश्मिसमप्रभं॥ द्वाभ्यांभुजाभ्यांसंगृ
ह्यभ्रामयित्वाचवेगवान्॥ १४॥ महापार्श्वायचिक्षेपवधार्थंवालिनःसुतः॥ सतुक्षिप्तोबलवतापरिघस्तस्यरक्षसः॥ १५॥ धनुश्च
सशरंहस्तात्शिरस्त्राणमपातयत्॥ तंसमासाद्यतेजस्वीवालिपुत्रःप्रतापवान्॥ १६॥ तलेनाभ्यहनत्क्रुद्धःकर्णमूलेसकुंडले॥
सतुक्रुद्धोमहावेगोमहापार्श्वोमहाद्युतिः॥ १७॥ करेणैकेनजग्राहसुमहांतंपरश्वधं॥ तंतैलधौतंविमलंशैलसारमयंदृढं॥ १८

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

राक्षसः परमक्रुद्धो वालिपुत्रेन्यपातयत्॥ तेनवामांसफलके भृशं प्रत्यवपातितं॥१९॥ अंगदो मोक्षयामास सरोषपरमस्वरं॥ सवी
रो वज्रसंकाशमंगदो मुष्टिमात्मनः॥२०॥ संवर्तयत्सुसंक्रुद्धः पितृतुल्यपराक्रमः॥ राक्षसस्य स्तनाभ्याशे मर्मज्ञो हृदयं प्रति॥२१
इंद्राशनिसमस्पर्शं समुष्टिं विनिपातयत्॥ तेनतस्य निपातेन राक्षसस्य महामृधे॥२२॥ पफाल हृदयं चाशु सपपात हतो भुवि॥
तस्मिन्विनिहते भूमौ तत्सैन्यं संप्रचुक्षुभे॥२३॥ अभवच्च महान्क्रोधः समरे रावणस्य तु॥ वानराणां प्रहृष्टानां सिंहनादश्च पुष्क
लः॥२४॥ स्फोटयन्निव शब्देन लंकां सप्राकारगोपुरां॥ महेंद्रेणेव देवानां नादः समभवन्महान्॥२५॥ अथेंद्रशत्रुस्त्रिदशालयानां
वनौकसां तत्र महाप्रणादं॥ श्रुत्वा सरोषं युधि राक्षसेंद्रः पुनश्च युद्धाभिमुखो बभूव॥२६॥ इत्यार्षे श्रीरामायणे वाल्मीकीये यु
द्धकांडे महापार्श्ववधे एकोनशततमः सर्गः॥१९९॥ महोदरमहापार्श्वौ हतौ दृष्ट्वा दुरासदौ॥ तस्मिन्विनिहते वीरे विरूपाक्षे म
हाबले॥१॥ आविवेश महान्क्रोधो रावणं तु महामृधे॥ सूतं संचोदयामास वाक्यं चेदमुवाच ह॥२॥ निहतानामामात्यानां रुद्धस्य
नगरस्य च॥ दुःखमेकोपनेष्यामि हत्वा तौ रामलक्ष्मणौ॥३॥ रामवृक्षं रणे हन्मि सीतापुष्पफलप्रदं॥ प्रशाखायस्य सुग्रीवो जांब
वान्पनसो नलः॥४॥ मैंदश्च द्विविदश्चैव अंगदो गंधमादनः॥ हनूमांश्च सुषेणश्च सर्वे च हरियूथपाः॥५॥ सदिशो दशघोषेण रथ
स्यातिरथो महान्॥ नादयन्प्रययौ तूर्णं राघवं चाभ्यवर्तत॥६॥ पूरितां तेन शब्देन सनदीगिरिकाननां॥ संचचाल मही सर्वा सच

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

दा॥तेभित्वाबाणरूपाणिपंचशीर्षाइवोरगाः॥४९॥श्वसंतोविविशुर्भूमिंरावणप्रतिकूलिताः॥पुनरेवायतंरामोरथस्थंराक्षसाधिपं
पं॥५०॥ललाटेपरमास्त्रेणदिव्यास्त्रेकुशलोभिनत्॥निहत्यराघवस्यास्त्रंरावणःक्रोधमूर्छितः॥५१॥आसुरं सुमहाघोरंअस्त्रं
शादुश्चकारह॥सिंहव्याघ्रमुखांश्चैवकंककाकमुखानपि॥५२॥गृध्रश्येनमुखांश्चापिशृगालवदनांस्तथा॥ईहामृगमुखांश्चापि
व्यादितास्यान्भयावहान्॥५३॥पंचास्यांस्त्रेलिहानांश्चससर्जनिशितांछरान्॥शरान्खरमुखांश्चान्यन्वराहमुखसंस्थितान्॥५४॥
श्वानकुक्कुटवक्त्रांश्चमकराशीविषाननान्॥एतानन्याश्चविविधान्ससर्जनिशितान्शरान्॥५५॥रामंप्रतिमहातेजाःक्रुद्धःस
र्पइवश्वसन्॥आसुरेणसमाविष्टःसोस्त्रेणरघुपुंगव॥५६॥ससर्जास्त्रंमहोत्साहंपावकंपावकप्रभः॥अग्निदीप्तमुखान्बाणां
स्तत्रसूर्यमुखानपि॥५७॥चंद्रार्धचंद्रवक्त्रांश्चधूमकेतुमुखानपि॥ग्रहनक्षत्रवर्णांश्चमहोल्कामुखसंस्थितान्॥५८॥विद्युज्जिह्वो
पमांश्चापिससर्जविविधान्शरान्॥तेरावणशराघोराराघवास्त्रसमाहताः॥५९॥विजग्मुरकाशेजग्मुश्चैवसहस्रशः॥तदस्त्रं
निहतंदृष्ट्वारामेणाक्लिष्टकारिणा॥६०॥हृष्टानेदुस्ततःसर्वेकवयःकामरूपिणः॥सुग्रीवप्रमुखावीराःपरिवार्यतुराघवं॥६१॥ततस्त
दस्त्रंविनिहत्यराघवःप्रसह्यतद्रावणबाहुनिःसृतं॥मुदान्वितोदाशरथिर्महात्माविनेदुरुच्चैर्मुदिताःकपीश्वराः॥६२॥इत्यार्षे
श्रीरामायणेवाल्मीकीयेयुद्धकांडेशततमःसर्गः॥१००॥तदस्त्रंनिहतंदृष्ट्वारावणोराक्षसाधिप॥क्रोधंचद्विगुणंचक्रेक्रोधाच्चा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

स्त्रमनंतरं॥१॥मयेनविहितंरौद्रमन्यदस्त्रंमहाद्युतिः॥उत्सृष्टंरावणोभीमंराघवायपराक्रमे॥२॥ततःशूलानिनिश्चेरुर्गदाश्चमुस
लानिच॥कार्मुकादीप्यमानानिवज्रसाराणिसर्वशः॥३॥मुद्गराःकूटपाशाश्चदीप्ताश्चानयस्तथा॥निष्पेतुर्विविधास्तीक्ष्णावा
ताइवयुगक्षये॥४॥तदस्त्रंराघवःश्रीमानक्रमादस्त्रविदांवरः॥जघानपरमास्त्रेणगांधर्वेणमहाद्युतिः॥५॥तस्मिन्प्रतिहतेस्त्रे
तुराघवेणमहात्मना॥रावणःक्रोधताम्राक्षःसोन्यदस्त्रमुदीरयत्॥६॥ततश्चास्त्राणिनिष्पेतुर्भास्वराणिमहांतिच॥कार्मुकाद्भीम
वेगस्यदशग्रीवस्यधीमतः॥७॥तैरासीद्गगनंदीप्तंसंपतद्भिःसमंततः॥पतद्भिश्चदिशोदीप्तैश्चंद्रसूर्यग्रहैरिव॥८॥तानिचिच्छेदवा
णौघैश्चक्राणितुसराघवः॥आयुधानिचचित्राणिरावणस्यचमूमुखे॥९॥तदस्त्रंतुहतंदृष्ट्वारावणोराक्षसाधिपः॥विव्याधदशभि
र्बाणैरामंसर्वेषुमर्मसु॥१०॥सविद्धोदशभिर्बाणैर्महाकार्मुकनिसृतैः॥रावणेनमहातेजानप्राकंपतराघवः॥११॥ततोविव्याधगा
त्रेषुसमितिंजयः॥राघवस्तुसुसंक्रुद्धोरावणंबहुभिःशरैः॥१२॥एतस्मिन्नंतरेक्रुद्धोराघवस्यानुजोबली॥लक्ष्मणःसायकान्स
प्तजग्राहपरवीरहा॥१३॥तैःसायकैर्महावेगैःरावणस्यमहाद्युतिः॥ध्वजंमानुष्यशीर्षंतुतस्यचिच्छेदनैकधा॥१४॥सारथेश्चापि
बाणेनशिरोज्वलितकुंडलं॥जहारलक्ष्मणःश्रीमान्नैर्ऋतस्यमहाबलः॥१५॥तस्यबाणैश्चचिच्छेदधनुर्गजकरोपमं॥लक्ष्मणो
राक्षसेंद्रस्यपंचभिर्निशितैःशरैः॥१६॥नीलमेघनिभंश्वास्यसदश्वान्पर्वतोपमान्॥जघानाशुत्सगदयारावणस्यविभीषणः

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

॥१४॥हताश्चातुतदावेगादवप्लुत्यमहारथात्॥कोपमाहारयन्नीलंभ्रातरंप्रतिरावणः॥१५॥ततःशक्तिंमहाशक्तिःप्रदीप्तामशनी
मिव॥विभीषणायचिक्षेपराक्षसेंद्रःप्रतापवान्॥१६॥अप्राप्तामेवतांबाणैस्त्रिभिश्चिच्छेदलक्ष्मणः॥अथोदतिष्ठत्संनादोवा
नराणांतथारणे॥१७॥सपपातत्रिधाछिन्नाशक्तिःकांचनमालिनी॥सविस्फुलिंगाज्वलितामहोल्केवदिश्च्युता॥१८॥ततःसं
भावितंतरांकालेनापिदुरासदां॥जग्राहविपुलांशक्तिंदीप्यमानांस्वतेजसा॥१९॥सावेगितावलवतारावणेनदुरासदा॥ज
ज्वालसुमहातेजाःशक्राशनिसमप्रभा॥२०॥एतस्मिन्नंतरेवीरोलक्ष्मणस्तंविभीषणं॥त्रणिसंधायमापन्नंतूर्णमभ्यवपद्यत
२१॥तंविमोक्षयितुंवीरश्चापमायम्यलक्ष्मणः॥रावणंशक्तिहस्तंवैशरवर्षैरवाकिरत्॥२२॥कीर्यमाणशरौघेणविसृष्टेनम
हात्मना॥नप्रहर्तुंमनश्चक्रेविमुखीकृतविक्रमः॥२३॥मोक्षितंभ्रातरंदृष्ट्वालक्ष्मणेनसरावणः॥लक्ष्मणाभिमुखस्तिष्ठन्नि
दंवचनमब्रवीत्॥२४॥मोक्षितस्तेबलश्लाघिन्यस्मादेवंविभीषणः॥विमुञ्चराक्षसंशक्तिस्त्वयीयंविनिपात्यते॥२५॥एषातेहृद
यंभित्त्वाशक्तिर्लोहितल[illegible]क्षणा॥महाद्रुपरिघोत्सृष्टाप्राणानादाययास्यति॥२६॥इत्येवमुक्त्वातांशक्तिमष्टघंटांमहामनाः॥
मयेनमायाविहितामभोघांशत्रुघातिनीं॥२७॥लक्ष्मणायसमुद्दिश्यज्वलंतीमिवतेजसा॥रावणःसमरेक्रुद्धश्चिक्षेपचननादच॥
२८॥याक्षिप्ताभीमवेगेनवज्राशनिसमस्वना॥शक्तिरभ्यपतद्वेगात्लक्ष्मणंरणमूर्धनि॥२९॥तामनुव्याहरच्छक्तिमापतंतींसराघ

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वः॥ स्वस्त्यस्तु लक्ष्मणायेति मोघाभवहतोद्यमा॥३३॥ रावणेन रणे शक्तिः क्रुद्धेनाशीविषोपमा॥ मुक्ताभूरस्यभीतस्य लक्ष्मणस्य
ममज्जसा॥३४॥ न्यपतत्सा महावेगा लक्ष्मणस्य महोरसि॥ जिह्वेवोरगराजस्य दीप्यमाना महाद्युतिः॥३५॥ ततो रावणवेगेन सुदू
रमवगाढया॥ शक्त्या विभिन्नहृदयः पपात भुवि लक्ष्मणः॥३६॥ तदवस्थं समीपस्थो लक्ष्मणं प्रेक्ष्य राघवः॥ भ्रातृस्नेहा महाते
जा विषण्णहृदयो भवत्॥३७॥ मुहूर्तमिव ध्यात्वा बाष्पव्याकुललोचनः॥ बभूव संरब्धतरो युगांतइव पावकः॥३८॥ न विषादस्य
कालोयमिति संचिंत्य राघवः॥ चक्रे स्वतुमुलं युद्धं रावणस्य वधे धृतः॥३९॥ सर्वयत्नेन महता लक्ष्मणं समिरीक्ष्य च॥ ददर्श
ततो रामः शक्त्या भिन्नं महाहवे॥४०॥ लक्ष्मणं रुधिरादिग्धं सपन्नगमिवाचलं॥ तामपि ग्रहितां शक्तिं रावणेन लीयसा॥४१॥ यत्न
तस्तेहरिश्रेष्ठा न शेकुरवमर्दितुं॥ अर्दिताश्चैव बाणौघैः क्षिप्तहस्तेन राक्षसा॥४२॥ सोमित्रिं सा विनिर्भिद्य प्रविष्टा धरणीतलं॥
तां करा भ्यां परामृश्य रामः शक्तिभयावहां॥४३॥ बभंज समरे क्रुद्धो बलवान्विचकर्ष ह॥ तस्य निष्कर्षतः शक्तिं रावणेन बलीय
सा॥४४॥ शराः सर्वेषु गात्रेषु पातिता मर्मभेदिनः॥ अचिंतयित्वा तान्बाणान्समाश्लो[illegible]ष्य च लक्ष्मणः॥४५॥ अब्रवीच्च हनू
मंतं सुग्रीवं तं च राघवः॥ लक्ष्मणं परिवार्यैव तिष्ठध्वं वानरोत्तमाः॥४६॥ पराक्रमस्य कालोयं संप्राप्तो मे च रिक्षितः॥ पापात्मा
यं दशग्रीवो वध्यतां पापनिश्चयः॥४७॥ कांक्षतश्चातकस्येव घर्मांते मेघदर्शनं॥ अस्मिन्मुहूर्ते न चिरात्तत्संप्रति शृणोमि वः

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

४८॥अरावणमरामंवाजगद्रक्षथवानराः॥राज्यनाशंवनेवासंदंडकेपरिधावनं॥४९॥वैदेह्याश्चपरामर्शंरक्षोभिश्चसमागमं
प्राप्तंदुःखंमहत्घोरंक्लेशश्चनिरयोपमः॥५०॥अद्यसर्वमहंत्यक्ष्येहत्वातंरावणंरणे॥यदर्थंवानरानीकंसमानीतमिदंम
या॥५१॥सुग्रीवश्चकृतोराज्यनिहत्वावालिनंरणे॥यदर्थंसागरःक्रांतःसेतुर्बद्धश्चसागरे॥५२॥[redacted]
[redacted]सोयमद्यरणेपापश्चक्षुर्विषयमागतः॥चक्षुर्विषयमागम्यनायंजीवितुमर्हसि॥५३॥दृष्टिदृष्टिविषस्येवसर्पस्यम
रावणः॥सुखंपश्यतदुर्धर्षायुद्धंवानरपुंगवाः॥५४॥आसीनाःपर्वताग्रेषुममभेदंरावणस्यच॥अद्यपश्यंतुरामस्यराम
त्वेममसंयुगे॥५५॥त्रयोलोकाःसगंधर्वाःसिद्धगंधर्वजंगमाः॥अद्यकर्मकरिष्यामियत्लोकोःसचराःचराः॥५६॥सदेवाक
थयिष्यंतियावद्भूमिर्धरिष्यति॥समागम्यसदालोकेयदायुद्धंप्रवर्तितं॥५७॥एवमुक्त्वाशितैर्बाणैस्तप्तकांचनभूषणैः
आजघानरणेरामौदशग्रीवंसमाहितः॥५८॥यथाप्रविद्धैर्नाराचैर्मुसलैश्चापिरावणः॥अभ्यवर्षतदारामंधाराभिरिव
तोयदः॥५९॥रामरावणमुक्तानामन्योन्यमभिनिघ्नतां॥शराणांचशराणांचबभूवतुमुलस्वनः॥६०॥विछिन्नाश्चविकी
र्णाश्चरामरावणयोःशराः॥अंतरिक्षात्प्रदीप्ताग्रानिपेतुर्धरणीतले॥६१॥तयोर्ज्यातलनिर्घोषौरामरावणयोर्महा
न्॥त्रासयन्सर्वभूतानांबभूवाद्भुतदर्शनः॥६२॥विकीर्यमाणशरजालवृष्टिभिर्महात्मनादीप्तधनुष्मतार्दितः॥भया

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

त्रदुद्रावसमेत्यरावणोयथानिलेनाभिहतोबलाहकः॥६३॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेएकाधिशततम
मःसर्गः॥१०१॥शक्त्याविनिहतंदृष्ट्वारावणेनबलीयसा॥लक्ष्मणंसमरेशूरंशोणितौघपरिप्लुतं॥१॥सदृष्ट्वातुमुलंयुद्धरा
वणस्यदुरात्मनः॥विसृजन्नेववाणौघान्सुषेणमिदमब्रवीत्॥२॥एषरावणवीर्येणलक्ष्मणःपतितःक्षितौ॥सर्पवद्वेष्ट
तेभूमौममशोकमुदीरयन्॥३॥शोणिताक्तमिमंवीरंप्राणैरिष्टतमंममपश्यतोममकाशक्तिर्योद्धुंपर्याकुलात्मनः॥४॥
अयंससमरश्लाघीभ्रातामेशुभलक्षणः॥यदिपंचत्वमापन्नःप्राणैर्मेकिंसुखेनवा॥५॥उज्झितोवहिमेवीर्यंभ्रंशयतीव
कराद्धनुः॥सायकाश्चावसीदंतिदृष्टिर्वाप्यवशंगता॥६॥अवसीदंतिगात्राणिस्वप्नयानेनृणामिव॥चिंतामेवर्द्धतेतीव्रा
मुमूर्षाचोपजायते॥७॥भ्रातरंनिहतंदृष्ट्वारावणेनदुरात्मना॥निश्वसंतंतुदुःखार्तंमर्मण्यभिहतंभृशं॥८॥राघवोभ्रातरं
दृष्ट्वाप्रियंप्राणंबहिश्चरं॥दुःखेनमहताविष्टोध्यानशोकपरायणः॥९॥परंविषादमापन्नोविललापाकुलेंद्रियः॥किं
मेयुद्धेनमेकार्येनैवप्राणैर्नसीतया॥१०॥भ्रातरंनिहतंदृष्ट्वालक्ष्मणंरणपांसुषु॥किंत्वाराज्येनकिंप्राणैर्युद्धकार्यंनविद्य
ते॥११॥यत्रायंनिहतःशेतेरणमूर्धनिलक्ष्मणः॥इत्येवंविलपंतंतंशोकविह्वलितेंद्रियं॥१२॥विचेष्टमानंकरुणंनिश्वसं
तंपुनःपुनः॥रामंमाश्वासयन्वीरःसुषेणोवाक्यमब्रवीत्॥१३॥नमृतोयंमहाबाहोलक्ष्मणोलक्ष्मिवर्धनः॥नह्यस्यविकृतं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वक्त्रंनापिश्यामंननिश्रभं॥१४॥सुप्रभंचप्रसन्नंचमुखमस्याभिलक्ष्यते॥पद्मरक्ततलौहस्तौसुप्रसन्नेचलोचने॥१५॥एवं
नविद्यतेरूपंगतासूनांविशांपते॥दीर्घायुषस्तुयेमर्त्यास्तेषांतुमुखमीदृशं॥१६॥नायंप्रेतत्वमापन्नोलक्ष्मणोलक्ष्मिवर्धनः
माविषादंकृथावीरप्राणोयमरिंदमः॥१७॥आख्यास्यतेप्रसुप्तस्यस्त्रस्तगात्रस्यभूतले॥सोश्वासंहृदयंवीरकंपमानंमुहु
र्मुहुः॥१८॥एवमुक्त्वातुवाक्यज्ञःसुषेणोराघवंवचः॥१९॥सौम्यशीघ्रमितोयाहिशैलमौषधिपर्वतं॥पूर्वेतेकथितोयोसौवी
रजाबवताशुभः॥२०॥दक्षिणेशिखरेतस्यजातमौषधिमानय॥विशल्यकरणींनामविशल्यकरणींशुभां॥२१॥सुवर्णकर
णींचापिगत्वाशीघ्रमिहानय॥२२॥संजीवनार्थंवीरस्यलक्ष्मणंमहात्मनः॥२३॥इत्येवमुक्तोहनुमान्गत्वाचौषधिपर्वतं॥२४॥
चिंतामभ्यगमत्श्रीमान्नजानंस्तामहौषधीः॥तस्यबुद्धिःसमुत्पन्नामारुतेरमितौजसः॥२५॥इदमेव[illegible]गमिष्यामिगृही
त्वाशिखरंगिरेः॥अस्मिन्हिशिखरेजातेऔषधीस्ताःसुखावहाः॥२६॥प्रतर्केणावगच्छामिसुषेणोप्येवमब्रवीत्॥अगृह्य
यदिगच्छामिविशल्यकरणींमहीं॥२७॥कालात्ययेनदोषस्याद्वैक्लव्यंचमहद्भवेत्॥इतिसंचिंत्यहनुमान्गत्वाक्षिप्रंमहाब
लः॥२८॥आसाद्यपर्वतश्रेष्ठंत्रिःप्रकंप्यगिरेस्तटं॥कुर्वन्नानातरुगणंसमुत्पाट्यमहाबलः॥२९॥गृहीत्वाहरिशार्दूलोहस्ता
भ्यांसमतोलयत्॥सनीलमिवजीमूतंतोयपूर्णंनभस्तलात्॥३०॥आपपातगृहीत्वातुहनूमान्शिखरंगिरेः॥अध्वायास

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

परिश्रांतः पर्वतत्वधरोत्तरं ॥३४॥ कृत्वा मुखे संनिवर्त्य प्रसस्रुर्जलराशयः ॥ समागम्य महावेगः सन्यस्य शिखरं गिरेः ॥३५॥ वि
श्राम्य किंचिद्धनुमान्सुषेणमिदमब्रवीत् ॥ औषधीर्नावगच्छामि ताञ्जहि हरिपुंगव ॥३६॥ तदिदं शिखरं कृत्स्नं गिरस्तस्य हृ
तं मया ॥ एवं कथयमानं तं प्रश्रयस्य पवनात्मजं ॥३७॥ सुषेणो वानरश्रेष्ठो जग्राहोत्पद्य चौषधीः ॥ विस्मिताश्च बभूवुस्ते सर्वे
वानरराक्षसाः ॥३८॥ दृष्ट्वा तु हनुमत्कर्म सुरैरपि सुदुष्करं ॥ ततः संक्षोदयित्वा तामौषधीर्वानरोत्तमः ॥३९॥ लक्ष्मणस्य ददौ न
स्यं सुषेणः सुमहाद्युतेः ॥ सशल्यः ससमाघ्राय लक्ष्मणः परवीरहा ॥४०॥ विशल्यो विरुजः शीघ्रमुदतिष्ठन्महीतलात् ॥ तमु
त्थितं ते हरयो भूतलात्प्रेक्ष्य लक्ष्मणं ॥४१॥ साधु साध्विति सुप्रीताः सुषेणं प्रत्यपूजयन् ॥ अथोवाच नृपं तं रामः सुग्रीवसन्निधौ
॥४२॥ पर्वतो नीयतां वीर मर्यादामाश्रयस्व तु ॥ एवमुक्तस्तु हनुमान्वानरैर्महाकपिः ॥४३॥ दोर्भ्यां मुत्पाट्य शैलेंद्रं प्रयातुमुपच
क्रमे ॥ अथोदतिष्ठतीक्ष्णांशुर्लंघयित्वा महोदधिं ॥ एह्येहीत्यब्रवीद्रामो लक्ष्मणं परवीरहा ॥४४॥ सस्वजे गाढमालिंग्य वाष्प
पर्याकुलेक्षणः ॥ अब्रवीच्च परिष्वज्य सौमित्रिं राघवस्तदा ॥४५॥ दिष्ट्या त्वां वीर पश्यामि मरणात्पुनरागतं ॥ नहि मे जीवितेनार्थः
सीतया चापि लक्ष्मण ॥४६॥ को हि मे जीवितेनार्थस्त्वयि पंचत्वमागते ॥ इत्येवं वदतस्तस्य राघवस्य महात्मनः ॥४७॥ खिन्नः शि
थिलया वाचा लक्ष्मणो वाक्यमब्रवीत् ॥ नाप्रतिज्ञां प्रतिज्ञाय पुरा सत्यपराक्रम ॥४८॥ लघुः कश्चिदिवासत्वो नैवं त्वं वक्तुम

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

हसि॥नहिप्रतिज्ञांकुर्वंतिवितथासाधवोनघ॥४३॥लक्ष्मणंहिमहत्वस्यप्रतिज्ञामनुपालनं॥नैराश्यमुपगंतुंतेतदलंमल्कृ
तेनघ॥४४॥वधेनरावणस्याद्यप्रतिज्ञामनुपालय॥नजीवन्यास्यतेशत्रुस्तववाणवशंगतः॥४५॥वर्द्धतस्तीक्ष्णदंष्ट्रस्यसिं
हस्येवमहागजः॥अहंतुवधमिच्छामिशीघ्रमस्यदुरात्मनः॥४६॥यावदस्तंनयात्येषकृतकर्मादिवाकरः॥४७॥यद्विधं
मिच्छसिरावणस्यसंख्येयदिचकृतांतद्वेच्छसिप्रतिज्ञां॥यदितवराजसुताभिलाषमस्तिकुरुचवचोममशीघ्रमद्य
वीर॥४८॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेद्विशततमःसर्गः॥१०२॥लक्ष्मणेनतुतद्वाक्यमुक्तंश्रुत्वासराघवः
संदधेपरवीरघ्नोधनुरादायवीर्यवान्॥१॥रावणायशरान्घोरान्विससर्जचमूमुखे॥अथान्यंरथमारुह्यरावणोराक्ष
साधिपः॥२॥अभ्यधावतकाकुत्स्थंस्वर्भानुरिवभास्करं॥दशग्रीवोरथस्थस्तुरामंवज्रोपमैःशरैः॥३॥आजघानमहाशै
लंधारामिरिवतोयदः॥दीप्तपावकसंकाशैःशरैःकांचनभूषणैः॥४॥निर्विभेदरणेरामोदशग्रीवंसमाहितः॥भूमिस्थित
स्परामस्यरथस्थस्यचराक्षसः॥५॥नसमंयुद्धमित्याहुर्देवगंधर्वदानवाः॥ततोदेववरःश्रीमान्श्रुत्वातेषांवचोमृतं॥६॥आ
हूयमातलिंशक्रोवचनंचेदमब्रवीत्॥रथेनममभूमिस्थंशीघ्रंयाहिरघूत्तमं॥आहूयभूतलंयातःकुरुदेवहितंमहत्॥
इत्युक्तोदेवराजेनमातलिर्देवसारथिः॥७॥प्रणम्यशिरसादेवंततोवचनमब्रवीत्॥शीघ्रंयास्यामिदेवेंद्रसारथ्यंचकरो

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

म्यहं॥ ततोहयैश्चसंयोज्यहरितैस्यंदनोत्तमं॥ ततः कांचनचित्रांगः किंकिणीशतभूषितः॥१०॥ तरुणादित्यसंकाशो वैडूर्यम
यकूबरः॥ सदश्वैः कांचनापीडैर्युक्तः श्वेतप्रकीर्णके॥११॥ हरिभिः सूर्यसंकाशैर्हेमजालविभूषितैः॥ रुक्मवेणुध्वजः श्रीमा
न्देवराजरथोवरः॥१२॥ देवराजेनसंदिष्टो रथमारुह्यमातलिः॥ अभ्यवर्त्ततकाकुत्स्थं अवतीर्यत्रिविष्टपात्॥१३॥ अब्रवीच्च
तदारामं सप्रतोदोरथेस्थितः॥ प्रांजलिर्मातलिर्वाक्यं सहस्राक्षस्यसारथिः॥१४॥ सहस्राक्षेणकाकुत्स्थ रथोयंविजयाय
ते॥ दत्तस्तवमहासत्वश्रीमान्शत्रुनिवर्हण॥१५॥ इदमैंद्रंमहच्चापंकवचंचाग्निसंनिभं॥ शराश्चादित्यसंकाशाः शक्तिश्चवि
मलाशिताः॥१६॥ आरुह्येमंरथंवीरराक्षसंजहिरावणं॥ मयासारथिनाराममहेंद्रइदानवान्॥१७॥ इत्युक्तः संपरिक्रम्यरथं
तमभिवाद्यच॥ आरुरोहतदारामोस्त्रोकांस्त्रस्याविराजयन्॥१८॥ तद्बभूवाद्भुतंयुद्धं रथंरामहर्षणं॥ रामस्यचमहाबाहोर
वणस्यचरक्षसः॥१९॥ गांधर्वेणचगांधर्वं दैवंदैवेनराघवः॥ अस्त्रंराक्षसराजस्यजघानपरमास्त्रवित्॥२०॥ अस्त्रंतुपरमंघो
रंराक्षसंराक्षसाधिपः॥ ससर्जपरमक्रुद्धः पुनरेवनिशाचरः॥२१॥ तेरावणधनुर्मुक्ताः शराः कांचनभूषणाः॥ अभ्यवर्त्ततकाकु
त्स्थंसर्पाभूत्वामहाविषाः॥२२॥ तेदीप्तवदनादीप्तंवमंतोज्वलनंमुखैः॥ राममेवाभ्यवर्त्ततआशिताश्चाभयावहाः॥२३॥ तेर्वासु
किसमस्पर्शैर्दशनभोगैर्महाविषैः॥ दिशश्चसंततास्सर्वाः प्रदिशश्चसमावृताः॥२४॥ तान्दृष्ट्वापन्नगान्रामः समापतआहवे

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

अस्त्रं पाशुपतं घोरं प्रादुश्चक्रे भयावहं ॥२०॥ तेराघव धनुर्मुक्ता रुक्मपुंखाः शिखिप्रभाः ॥ सुपर्णाः कांचनाभूत्वा विचेरुस
र्पशत्रवः ॥२१॥ तेतान्सर्वांछरान्जघ्नुसर्परूपान्महाजवान् ॥ सुपर्णरूपा रामस्य विशिखाः कामरूपिणः ॥२२॥ अस्त्रं प्रतिह
तं क्रुद्धो रावणो राक्षसाधिपः ॥ अभ्यवर्षत दाराम घोराभिश्शरवृष्टिभिः ॥२३॥ ततः शरसहस्रेण राममक्लिष्टकारिणं ॥ अर्पयित्वा
शरौघेण मातलिं प्रत्यविध्यत ॥२४॥ चिच्छेद केतुमिंद्रस्य शरेणैकेन रावणः ॥ पातयित्वा रथोपस्थे रथात्केतुं च कांचनं ॥२५॥ ऐंद्रा
नपि जघानाश्वान्शरजालेन रावणः ॥ तद्दृष्ट्वा सुमहत्कर्म रावणस्य दुरात्मनः ॥२६॥ विषेदुर्देवगंधर्वाः दानवाश्चारणैः सह ॥
राममार्त्ततु तेदृष्ट्वा सिद्धाश्चपरमर्षयः ॥२७॥ भयितावानरेंद्रश्च भूवुः सविभीषणाः ॥ राम चेंद्रमसं दृष्ट्वा ग्रस्तं रावणराहुणा ॥
२८॥ प्राजापत्यं च नक्षत्रं रोहिणीं शशिनः प्रियां ॥ समाक्रम्य बुधस्तस्थौ प्रजानामशुभावहः ॥२९॥ सधूमः परिवृत्तोर्मिः प्रज्वल
न्निव सागरः ॥ उत्पपात ततः क्रुद्धः शनिर्वदिवाकरं ॥३०॥ शस्त्रवर्णः सुपरुषो मंदरश्मिर्दिवाकरः ॥ अदृश्यतकबंधांगः संस
क्तो धूमकेतुना ॥३१॥ कोसलानां तु नक्षत्रं यत्तमिंद्राग्निदैवतं ॥ आक्रम्यांगारकस्तस्थौ विशाखमपि चांबरे ॥३२॥ दृश्यास्यो वि
शतिभुजः प्रगृहीतशरासनः ॥ अदृश्यतु महासत्वो मैनाकइव पर्वतः ॥३३॥ निरस्यमानो रामस्तु दशग्रीवेण रक्षसा ॥ नाश
क्नोदभिसंधातुं सायकान्रणमूर्धनि ॥३४॥ सकृत्वा भ्रुकुटीं क्रुद्धः किंचित्संरक्तलोचनः ॥ जगाम क्रोधसंरंभं निर्दहन्निव

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

चक्षुषा॥४॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेत्रिंशोत्तरशतमःसर्गः॥१०३॥तस्यक्रुद्धस्यवदनंदृष्ट्वारामस्यधीमतः॥
सर्वेभूतानिचित्रेसुर्मेदिनीकंपतचमेदिनी॥१॥सिंहशार्दूलवान्शैलःसंचचालाचलद्रुमः॥बभूवचातिक्षुभितःसमुद्रःसरितां
पति॥२॥घनाश्चखरनिर्घोषागगनेपरुषस्वना॥औत्पातिकाश्चनर्दंतःसमंतात्परिचक्रमुः॥३॥रामंदृष्ट्वासुसंक्रुद्धमुत्पातां
श्चसुदारुणान्॥चित्रेसुःसर्वभूतानिरावणस्याभवद्भयं॥४॥विमानस्थातदादेवागंधर्वाश्चमहोरगाः॥ऋषिदानवदैत्याश्च
गरुत्मंतश्चखेचराः॥५॥ददृशुस्तेतदायुद्धंलोकसंवर्तसंस्थितं॥नानाप्रहरणैर्भीमैःशूरयोःसंप्रयुध्यतोः॥६॥ऊचुःसुरासु
राःसर्वेतदाविग्रहमागताः॥वीक्षमाणामहायुद्धंवाक्यंभक्त्याप्रहृष्टवत्॥७॥दशग्रीवंजयेत्याहुरसुराःसमवस्थिताः॥दिवारा
ममथोचुस्तेत्वंजयेतिपुनःपुनः॥८॥एतस्मिन्नंतरेक्रोधाद्राघवंसचरावणः॥प्रहर्तुंकामोदुष्टात्माससृजेशस्त्रहरणंमहत्॥९॥
वज्रसारंमहानादंसर्वशत्रुनिबर्हणं॥शैलशृंगनिभैःकूटैश्चित्तदृष्टिभयावहैः॥१०॥सधूममिवतीक्ष्णाग्रंयुगांताग्निचयो
पमं॥अतिरौद्रमनासाद्यंकालेनापिदुरासदं॥११॥त्रासनंसर्वभूतानांदारुणंभेदनंतथा॥प्रदीप्तइवरोषेणशूलंजग्राहरावण
ः॥१२॥तच्छूलंपरमक्रुद्धोजग्राहयुधिवीर्यवान्॥अनीकैःसमरेशूरैःराक्षसैःपरिवारितः॥१३॥समुद्यम्यमहाकायोनना
दयुधिभैरवं॥संरक्तनयनोरोषात्ससैन्यमभिहर्षयन्॥१४॥पृथिवींचांतरिक्षंचदिशश्चप्रदिशस्तथा॥प्राकंपयत्तदाशब्देरा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

क्षसेंद्रस्य दारुणः॥१५॥अतिकायस्यनादेनतेनतस्यदुरात्मनः॥सर्वभूतानिवित्रेसुः सागरश्चप्रचुक्षुभे॥१६॥स गृही
त्वामहावीर्यः शूलंतद्रावणोमहत्॥विनद्यसुमहानादंरामंपरुषमब्रवीत्॥१७॥शूलेयंवज्रसारस्तेरामरोषान्मयोद्य
तः॥तवभ्रातृसहायस्यसद्यःप्राणान्हरिष्यति॥१८॥रक्षसामद्यशूराणां निहतानांचमूमुखे॥त्वांनिहत्यरणश्लाघिन्करो
मितरसासमं॥१९॥तिष्ठेदानीं निहन्मित्वामेषशूलेनराघव॥एवमुक्त्वासचिक्षेपतच्छूलंराक्षसाधिपः॥२०॥तद्रावणक
रान्मुक्तंविद्युज्ज्वालासमाकुलं॥अष्टघंटंमहानादंविपद्गतमशोभत॥२१॥तच्छूलंराघवोदृष्ट्वाज्वलंतंघोरदर्शनं॥सस
र्जविशिखान्रामश्चापमा यम्यवीर्यवान्॥२२॥आपपतंतंशरौघेणवारयामासराघवः॥उत्पतंतंयुगांताग्निजलौघैरि
ववासवः॥२३॥निर्दहंसतान्बाणान्रामःकार्मुकनिःसृतान्॥रावणस्यमहाशूलःपतंगानिवपावकैः॥२४॥तांदृष्ट्वा
भस्मसाद्भूतान्शूलसंस्पर्शचूर्णितान्॥सायकानंतरिक्षस्थान्राघवःक्रोधमाहरत्॥२५॥सतांमातलिनानीतांशक्तिंवासवनिर्मि
तां॥जग्राहपरमक्रुद्धोराघवोरघुनंदनः॥२६॥सातोलितावलवताशक्तिर्घंटाकृतस्वना॥नभःप्रज्वालयामासयुगांतोल्के
वसप्रभा॥२७॥साक्षिप्ताराक्षसेंद्रस्यतस्मिन्शूलेपपातह॥भिन्नःशक्त्यामहान्शूलोनिपपातगतद्युतिः॥२८॥साधुसाधि
तिभूतानिप्रशशंसूरघूत्तमं॥निर्विभेदततोबाणैर्हयानस्यमनोजवान्॥२९॥रामस्तीक्ष्णैर्महावेगैर्वज्रकल्पैरजिह्मगैः॥निर्वि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

भेदोरसितदारावणंनितैः शरैः॥३॥राघवः परमापतौललोटेपत्रिभिस्त्रिभिः॥सशरैर्भिन्नसर्वांगोगात्रप्रस्रुतशोणितः॥३॥रा
क्षसेंद्रः समुद्दस्य कुत्वाशोकद्रवाबभौ॥सरामबाणैरतिविद्धगात्रोनिशाचरेंद्रस्तजाईगात्रः॥जगामरवेदंचसआजिमध्ये
क्रोधंचक्रेसुभृशंदशास्यः॥३॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेचतुर्नवतितमः शतः सर्गः॥१०४॥सतुतेनप्रहारेणकाकु
त्स्थेनार्दितोभृशं॥रावणः समरश्लाघीमहाक्रोधमुपागमत्॥१॥सदीप्तनयनोमर्षाच्चापमुद्यम्यवीर्यवान्॥अभ्यधावत्सुसं
क्रुद्धोराघवंपरमाहवे॥२॥बाणधारासहस्रैस्तुसतोयदइवांबरात्॥राघवंरावणोबाणैस्तटाकमिवपूरयन्॥३॥पूरितः शर
जालेनधनुर्मुक्तेनसंयुगे॥महागिरिरिवाकंप्यः काकुत्स्थोनैवकंपते॥४॥सशरैः शरजालानिवारयन्समरेस्थितः॥गभस्तीनि
वसूर्यस्यप्रतिजग्राहवीर्यवान्॥५॥ततः शरसहस्राणिक्षिप्रहस्तोनिशाचरः॥निजघानोरसिक्रुद्धोराघवस्यमहात्मनः॥६॥स
शोणितसमादिग्धसमरेलक्ष्मणाग्रजः॥दृष्टः फुल्लइवारण्येसुमहान्किंशुकद्रुमः॥७॥शराभिघातःसंरब्धः सोभिजग्राहसा
यकान्॥काकुत्स्थः सुमहातेजायुगांतादित्यवर्चसः॥८॥ततोन्योन्यंसुसंरब्धौतावुभौरामरावणौ॥शरांधकारेसमरेनोपल
क्षयतांतदा॥ततः क्रोधसमाविष्टोरामोदशरथात्मजः॥उवाचरावणंवीरप्रहस्यपरुषंवचः॥१०॥ममभार्यांजनस्थानाद्दृष्ट्वा
राक्षसाधम॥हृतातेविक्षयस्मातस्मात्त्वंनासिवीर्यवान्॥११॥मयाविरहितांदीनांवर्त्तमानांमहावने॥वैदेहींसंप्रभंहृत्वा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

शूरोहमिति मन्यसे॥२२॥स्त्रीषु शूरविनाथासु परदारामिमर्शिका॥कृत्वा कापुरुषं कर्म शूरोहमिति मन्यसे॥२३॥शूरेण धनदभ्रात्रा बलैः
समुदितेन च॥श्लाघनीयमहत्कर्म यशस्यं च कृतं त्वया॥२४॥उत्सेकेनाभिपन्नस्य गर्हितस्य हितस्य च॥कर्मणः प्राप्तुहीदानीं तस्या
द्य सुमहत्फलं॥२५॥शूरोहमिति चात्मानमवगच्छसि दुर्मते॥नैव लज्जास्ति ते सीतां चोरवद्यपकर्षतः॥२६॥यदि मत्सन्निधौ सीता
धर्षितास्यात्त्वया बलात्॥भ्रातरं तु खरं पश्येस्तदा तत्सायकैर्हतः॥२७॥दिष्ट्यासि मम मंदात्मन् चक्षुर्विषयमागतः॥अद्य त्वां सायकै
स्तीक्ष्णैर्नयामि यमसादनं॥२८॥अद्य ते मच्छरैश्छिन्नं शिरोज्वलितकुंडलं॥कव्यादाः प्रकर्षंतु विकीर्णं रणपांसुषु॥२९॥निप
त्य रसि गृध्रास्ते क्षितौ क्षिप्तस्य सायकैः॥पिबंतु रुधिरं तप्तं द्राणशल्यातरोत्थितं॥३०॥अद्य मद्बाणभिन्नस्य गतासोः पतितस्य ते
कर्षंत्वां त्राणि पतगा गरुत्मंतद्वोरगान्॥३१॥दृष्टोसि महतः कालात् दिष्ट्या दृष्टिपथं गतः॥अद्य क्रोधं विमोक्ष्यामि सीताहरणसं
भवं॥३२॥इत्येवं संवदन्वीरो रामः शत्रुनिबर्हणः॥राक्षसेंद्रं समीपस्थं शरवर्षैरवाकिरत्॥३३॥बभूव द्विगुणं वीर्यं बलं हर्षश्च संयुगे
रामस्यास्त्रबलं चैव शत्रोर्निधनकांक्षिणः॥३४॥प्रादुर्बभूवुरस्त्राणि सर्वाणि विहितात्मनः॥प्रहर्षाच्च महातेजाः शीघ्रहस्ततरोभव
त्॥३५॥शुभान्येतानि चिह्नानि विज्ञायात्मगतानि सः॥भूयएवार्दयद्रामो रावणं राक्षसांतकृत्॥३६॥हरीणां चारमविकरैः शरव
र्षाच्च राघवात्॥हन्यमानो दशग्रीवो विघूर्णहृदयो भवत्॥३७॥यदा च शस्त्रं नारेभे नव्यकर्षच्छरासनं॥नास्य प्रत्यकरोद्वीर्यं विज्ञ

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi.-Digitized by eGangotri

वेनांतरात्मना॥ २९॥ क्षिप्ताश्चापिशरास्तेन शस्त्राणि विविधानि च॥ मरणार्थीयवर्त्तंतेमृत्युकालेभ्यवर्त्तत॥ ३०॥ सूतस्तुरथने
तास्यतद्वस्थंनिरीक्ष्यत॥ शरैर्युद्धादसंभ्रांतोरथंतस्यापवाहयत्॥ ३१॥ रामबाणविभिन्नांगोरावणोराक्षसेश्वरः॥ निरस्तविक्रमः
संख्येरणेभ्रांतःपपातसः॥ ३२॥ सूतस्तुव्यथितंबाणैःस्यंदनस्थंनिरीक्ष्यतं॥ तस्याद्रणादपोवाहरावणंहतपौरुषं॥ ३३॥ रथंचत
स्याथजवेनसारथिर्निवार्यभीमंजलदस्वनंतदा॥ जगामभीत्यासमरान्महीपतिंनिरस्तवीर्यंपतितंसमीक्ष्य॥ ३४॥ इत्यार्षे
श्रीरामायणेवाल्मीकीयेयुद्धकांडेपंचोत्तरशततमःसर्गः॥ १०५॥ सतुमोहात्सुसंक्रुद्धःकृतांतबलचोदितः॥ क्रोधसंरक्तन
यनोरावणःसूतमब्रवीत्॥ १॥ हीनवीर्यमिवाशक्तंपौरुषेणविवर्जितं॥ भीरुंलघुमिवासत्वंविहीनमिवतेजसा॥ २॥ विमुक्तमि
वमायाभिरस्त्रैरिवबहिष्कृतं॥ मामवज्ञायदुर्बुद्धेत्वयाबुद्ध्याविचेष्टसे॥ ३॥ किमर्थंमामवज्ञायमच्छंदमनवेक्ष्यच॥ त्वयाश
त्रुसमक्षंमेरथोयमपवाहितः॥ ४॥ त्वयाद्यहिममानार्यचिरकालसमार्जितं॥ यशोवीर्यंचतेजश्चप्रत्ययश्चविनाशितः॥ ५॥
शत्रोःप्रख्यातवीर्यस्यरंजनीयस्यविक्रमैः॥ पश्यतोयुद्धलुब्धोहंकृतःकापुरुषस्त्वया॥ धीयस्त्वंकथमिमंमोहात्नचोद्वहसि
दुर्मते॥ सत्योयंप्रतितर्कोमेपरेणत्वामपस्कृतः॥ ७॥ नहितद्विद्यतेकर्मसुहृद्धितकांक्षिणः॥ रिपूणांसदृशंचैतद्यत्त्वयैतदनु
ष्ठितं॥ ८॥ निवर्त्तयरथंशीघ्रंयावन्नोपैतिमेरिपुः॥ यदिवाध्युषितोसित्वंस्मर्यंतेयदिवागुणाः॥ ९॥ एवंपरुषमुक्तस्तुहितबुद्धिर

CC-0. Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

बुद्धिना॥अब्रवीद्रावणंसूतोहितंसानुनयंवचः॥१०॥नभीतोस्मिनमूढोस्मिनोपजप्तोस्मिशत्रुभिः॥नप्रमत्तोस्मिनस्नेहोविस्मृ
तानचसत्क्रिया॥११॥मयातुहितकामेनयशश्चपरिरक्षिता॥स्नेहप्रसन्नमनसाहितमित्यप्रियंकृतं॥१२॥नास्मिन्नर्थेमहाराज
त्वंमांप्रियहितेरतं॥कच्चिल्लघुमिवानार्योहीयतोगंतुमर्हसि॥१३॥श्रूयतांचाभिधास्यामियन्निमित्तंमयारथः॥नदीवेगइवोभो
भिःसंयुगेविनिवर्तितः॥१४॥श्रमार्तंत्वावगच्छामिमहतारणकर्मणा॥नहितेवीरसोमुख्यंप्रकर्षंचोपधारये॥१५॥रथोद्वहनखि
खिन्नाश्चतइमेरथवाजिनः॥दीनाघर्मइवश्रांतागावोवर्षहताइव॥१६॥निमित्तानिचभूयिष्ठंयानिप्रादुर्भवंतिनः॥तेषुतेष
भिपन्नेषुलक्ष्ययाम्यप्रदक्षिणं॥१७॥देशकालौचविज्ञेयौलक्षणानीगितानिच॥दैन्यंहर्षश्चखेदश्चरथिनश्चबलाबलं॥१८॥
स्थलनिम्नानिभूमेश्चसमानिविषमानिच॥युद्धकालश्चविज्ञेयःपरस्यान्तरदर्शनं॥१९॥उपयानापयानेचस्थानंप्रत्यपसर्प
णं॥सर्वमेतद्रथस्थेनज्ञेयंरथकुटुंबिना॥२०॥तवविश्रामहेतोस्तुतथैषांरथवाजिनां॥द्वौद्वंवर्जयतारवेदक्षमंकृतमिदंमया॥
२१॥स्वेच्छयानमयावीररथोयमपवाहितः॥भर्तृस्नेहपरीतेनमयेदंयत्कृतंप्रभो॥२२॥आज्ञापययथातत्वंवक्षस्यरिनिषूदन
तत्करिष्याम्यहंवीरगतानृण्येनचेतसा॥२३॥संतुष्टस्तेनवाक्येनरावणस्तस्यसारथेः॥प्रशस्यैनंबहुविधंयुद्धलुब्धोब्रवीदि
दं॥२४॥रथंशीघ्रमिमंसूतराघवाभिमुखंनय॥नाहत्वासमरेशत्रूंनिवर्तिष्यतिरावणः॥२५॥एवमुक्तानतोहृष्टोरावणोराक्षसे

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

श्वरः॥ ददौ तस्य शुभं त्वेकं हस्ताभरणमुत्तमं॥ १६॥ श्रुत्वा रावणवाक्यानि सारथिः सन्यवर्त्तत॥ ततो द्रुतं रावणवाक्यचोदितः प्र
चोदयामास हरन्सारथिः॥ स राक्षसेंद्रस्य ततो महारथः क्षणेन रामस्य रणाग्रतो भवत्॥ १७॥ इत्यार्षे श्रीरामायणे वाल्मी
कीये युद्धकांडे षष्ठोत्तरशततमः सर्गः॥ १०६॥ ततो युद्धपरिश्रांतं समरे चिंतयास्थितं॥ रावणं चाग्रतो दृष्ट्वा युद्धाय समुप
स्थितं॥ १॥ दैवतैश्च समागम्य द्रष्टुमभ्यागतो रणं॥ उपगम्याब्रवीद्राममगस्त्यो भगवांस्तदा॥ २॥ राम राम महाबाहो शृणु गुह्यं
सनातनं॥ येन सर्वानरीन्वत्स समरे विजयिष्यसि॥ ३॥ आदित्यहृदयं पुण्यं सर्वशत्रुविनाशनं॥ जयावहं जपेन्नित्यमक्षयं प
रमं शिवं॥ ४॥ सर्वमंगलमांगल्यं सर्वपापप्रणाशनं॥ चिंताशोकप्रशमनमायुर्वर्धनमुत्तमं॥ ५॥ रश्मिमंतं समुद्यंतं देवासुरनम
स्कृतं॥ पूजयस्व विवस्वंतं भास्करं भुवनेश्वरं॥ ६॥ सर्वदेवात्मको ह्येष तेजस्वी रश्मिभावनः॥ एष देवासुरगणाँल्लोकान्पाति
गभस्तिभिः॥ ७॥ एष ब्रह्मा च विष्णुश्च शिवः स्कंदः प्रजापतिः॥ महेंद्रो धनदः कालो यमः सोमो ह्यपांपतिः॥ ८॥ पितरो वसवः साध्या
अश्विनौ मरुतो मनुः॥ वायुर्वह्निः प्रजाप्राणः ऋतुकर्त्ता प्रभाकरः॥ ९॥ आदित्यः सविता सूर्यः खगः पूषा गभस्तिमान्॥ सुपर्णस्तपनो
भानुः स्वर्णरेता दिवाकरः॥ १०॥ हरिदश्वः सहस्रार्चिः सप्तसप्तिर्मरीचिमान्॥ तिमिरोन्मथनः शंभुस्त्वष्टा मार्तंड अंशुमान्॥ ११॥ हि
रण्यगर्भः शिशिरस्तपनो भास्करो रविः॥ अग्निगर्भोदितेः पुत्रः शंखः शिशिरनाशनः॥ १२॥ व्योमनाथस्तमोभेदी ऋग्यजुःसामपार

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

ग॥घनवृष्टिरपांमित्रोविंध्यवीथीप्लवंगमः॥२३॥आतपीमंडलीमृत्युःपिंगलःसर्वतापनः॥कविर्विश्वोमहातेजारक्तःसर्वभवोद्भवः
॥२४॥नक्षत्रग्रहताराणामधिपोविश्वतापनः॥तेजसामपितेजस्वीद्वादशात्मन्नमोस्तुते॥२५॥नमःपूर्वायगिरयेपश्चिमेगिरयेन
मः॥ज्योतिर्गणानांपतयेदिनाधिपतयेनमः॥२६॥जयायजयभद्रायहर्यश्वायनमोनमः॥नमोनमःसहस्रांशोआदित्यायन
मोनमः॥२७॥नमउग्रायवीरायसारंगायनमोनमः॥नमःपद्मप्रबोधायमार्तंडायनमोनमः॥२८॥ब्रह्मेशानाच्युतेशायसूर्यायादि
त्यवर्चसे॥भास्वतेसर्वभक्षायरौद्रायवपुषेनमः॥२९॥तमोघ्नायहिमघ्नायशत्रुघ्नायामितात्मने॥कृतघ्नघ्नायदेवायज्योति
षांपतयेनमः॥३०॥तप्तचामीकराभायवह्नयेविश्वकर्मणे॥नमस्तमोभिनिघ्नायरुचयेलोकसाक्षिणे॥३१॥नाशयत्येषवैभूतंत
मेवसृजतेपुनः॥पायत्येषपिवत्ये [redacted] षवर्षत्येषगभस्तिभिः॥३२॥एषसुप्तेषुजागर्तिभूतेषुपरिनिष्ठितः॥एषचैवाग्निहोत्रंच
फलंचैवाग्निहोत्रिणां॥३३॥वेदाश्चक्रतवश्चैवक्रतूनांफलमेवच॥यानिकृत्यानिलोकेषुसर्वएषरविःप्रभुः॥३४॥एनमापत्सुकृ
च्छ्रेषुकांतारेषुभयेषुच॥कीर्तयन्पुरुषःकश्चिन्नावसीदतिराघव॥३५॥पूजयस्वैनमेकाग्रोदेवदेवंजगत्पतिं॥एतत्त्रिगुणितंजप्त्वा
युद्धेषुविजयिष्यसि॥३६॥अस्मिन्क्षणेमहाबाहोरावणंत्वंजयिष्यसि॥एवमुक्त्वाततोगस्त्योजगामसयथागतं॥३७॥एतच्छ्रु
त्वामहातेजानष्टशोकोभवत्तदा॥धारयामासुप्रीतोराघवःप्रयतात्मवान्॥३८॥आदित्यंप्रेक्ष्यजप्त्वात्रिःपरंहर्षमवाप्तवा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

न॥ त्रिराचम्यशुचिर्भूत्वाधनुरादायवीर्यवान्॥२९॥रावणंप्रेक्ष्यहृष्टात्मायुद्धायसमुपागमत्॥सर्वयत्नेनमहतावधेतस्यधृतो
भवत्॥३०॥अथरविरवदन्निरीक्ष्यरामंमुदितमनाःपरमंप्रहृष्यमाणः॥निशिचरपतिसंक्षयंविदित्वासुरगणमध्यगतोव
चस्त्वरेति॥३१॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेशततमःसर्गः॥१०७॥सरथंसारथिंदृष्ट्वापरसैन्यप्रहर्षणं॥गंध
र्वनगराकारंसमुच्छ्रितपताकिनं॥१॥युक्तंपरमसंपन्नैर्वाजिभिर्हेममालिभिः॥युद्धोपकरणैःपूर्णंपताकाध्वजमालिनं॥२॥
ग्रसंतमिवचाकाशंनादयंतंवसुंधरां॥प्रणाशंपरसैन्यानांस्वसैन्यस्यप्रहर्षणं॥३॥रावणस्यरथंक्षिप्रंचोदयामाससारथिः
तमापतंतंसहसास्वनवंतंमहाध्वजं॥रथंराक्षसराजस्यनरराजोददर्शह॥कृष्णवाजिसमायुक्तंयुक्तंरौद्रेणवर्चसा॥५॥उ
द्यमानमिवाकाशेविमानंसूर्यवर्चसं॥तडित्पताकागहनंदर्शितेंद्रायुधायुधं॥६॥शरधारांविमुंचंतंधारासारमिवांबुदं॥
सदृक्षामेघसंकाशमापतंतंरथंरिपोः॥७॥गिरेर्वज्राभिमृष्टस्यदीर्यतःसदृशस्वनं॥विस्फारयित्वावेगेनबालचंद्राननंधनुः
॥८॥उवाचमातलिंरामःसहस्राक्षस्यसारथिः॥मातलेपश्यसंरब्धमापतंतंरथंरिपोः॥९॥यथापसर्पंपतताविगेनमहतापुनः
समरेहंतुमात्मानंतथानेनकृतामतिः॥१०॥तदप्रमादमातिष्ठप्रत्युद्गच्छरथंरिपोः॥विध्वंसयितुमिच्छामिवायुर्मेघमिवोत्थितं॥
११॥अविक्लवमसंभ्रांतमव्यग्रहृदयेक्षणं॥रश्मिसंचारनियतंप्रचोदयरथंद्रुतं॥१२॥कामंनत्वंसमाधेयःपुरंदररथोचितः॥युयु

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

त्सुरहमेकाग्रः स्मारयेत्वां न शिक्षये ॥१३॥ परितुष्टः सरामस्य तेन वाक्येन मातलिः ॥ प्रचोदयामास रथं सुरसारथिसत्तमः ॥१४॥
अपसर्पंततः कुर्वन् रावणस्य महारथं ॥ चक्रोत्क्षिप्तेन रजसा रावणं अवधूनयत् ॥१५॥ ततः क्रुद्धो दशग्रीवस्तान्त्रविस्फारि
तेक्षणः ॥ रथप्रतिमुखं रामं सायकैरवधूनयत् ॥१६॥ धर्षणामर्षितो रामो धैर्यरोषेण लंघयन् ॥ जघाहसुमहावेगमैंद्रं युधि शरा
सनं ॥१७॥ शरांश्च सुमहावेगान् सूर्यरश्मिसमप्रभान् ॥ तदुपोढं महद्युद्धमन्योन्यवधकांक्षिणोः ॥१८॥ परस्पराभिमुखयोर्दृप्तयो
रिव सिंहयोः ॥ ततो देवाः सगंधर्वाः सिद्धाश्च परमर्षयः ॥१९॥ समीयुर्द्वैरथं द्रष्टुं रावणक्षयकांक्षिणः ॥ समुत्पेतुरथोत्पाता दारुणा
रोमहर्षणाः ॥२०॥ रावणस्य विनाशाय राघवस्य जयाय च ॥ ववर्षरुधिरं देवो रावणस्य रथोपरि ॥२१॥ वाता मंडलिनस्तीक्ष्णा
स्त्वपसर्पंप्रचक्रमुः ॥ महद्गृध्रकुलं चास्य भ्रममाणं नभस्तले ॥२२॥ येन येन रथो याति तेन तेन प्रधावति ॥ संध्यया चावृतालंका
जपापुष्पनिकाशया ॥२३॥ दृश्यते संप्रदीप्तेव दिवसे पि वसुंधरा ॥ सनिर्घाता महोल्काश्च संप्रचेरुर्महास्वनाः ॥२४॥ विषादयंस्ते
रक्षांसि रावणस्य तदाहिताः ॥ रावणश्च यतस्तत्र प्रचचाल वसुंधरा ॥२५॥ रक्षसां च प्रहरतां गृहीताइव बाहवः ॥ ताम्रा पीताइ
व श्वेताः पतिता सूर्यरश्मयः ॥२६॥ दृश्यंते रावणस्यांगे पर्वतस्येव धातवः ॥ गृध्रैरनुगताश्चास्य वमंत्योज्वलनं मुखैः ॥२७॥ प्रणेदु
र्मुखमीक्षंतः संरब्धमशिवाः शिवाः ॥ प्रतिकूलं ववौ वायूरणे पांसून्समुत्किरन् ॥२८॥ तस्य राक्षसराजस्य कुर्वन् दृष्टिविलोपनं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

निपेतुरिंद्राशनयः सैन्ये चास्य समंततः ॥२९॥ दुर्विषह्यस्तराघोराः विनाजलधरोदयं ॥ दिशश्च प्रदिशः सर्वा बभूवुस्तिमिरावृ
ताः ॥३०॥ पांसुवर्षेण महता दुर्दर्शं चनभोभवत् ॥ कुर्वत्यकलहं घोरं सारिकास्तद्रथं प्रति ॥३१॥ निपेतुः शतशस्तत्र दारुणं दारु
णारुताः ॥ जघनेभ्यः स्फुलिंगाश्च नेत्रेभ्यो श्रूणि संततं ॥३२॥ मुमुचुस्तस्य तुरगास्तुल्यमग्निं च वारि च ॥ एवंप्रकाराबहवः समु
त्थाताभयावहाः ॥३३॥ रावणस्य विनाशाय दारुणं संप्रजज्ञिरे ॥ रामस्यापि निमित्तानि सौम्यानि च शिवानि च ॥३४॥ बभूवुर्जयशं
सीनि प्रादुर्भूतानि सर्वशः ॥ निमित्तानीह सौम्यानि राघवस्य जयाय च ॥३५॥ दृष्ट्वा परमसंहृष्टो हतं मेने स रावणं ॥ ततो निरीक्ष्या
त्मगतानि राघवो रणे निमित्तानि निमित्तकोविदः ॥ जगाम हर्षं च परं च निर्वृतिं च कार युद्धे त्यधिकं च विक्रमं ॥३६॥ इत्यार्षे श्री
रामायणे वाल्मीकीये युद्धकांडे अशीतितमः सर्गः ॥१०८॥ ततः प्रवृत्तं सुक्रूरं रामरावणयोस्तदा ॥ सुमहद्दैरथं युद्धं सर्वलो
कभयावहं ॥१॥ ततो राक्षससैन्यं च हरीणां च महद्बलं ॥ प्रगृहीतप्रहरणं निश्चेष्टं समतिष्ठत ॥२॥ संप्रयुद्धौ तु तौ दृष्ट्वा बलव
न्नरराक्षसौ ॥ व्याक्षिप्तहृदयाः सर्वे परं स्मयमागताः ॥३॥ नानाप्रहरणैर्व्यग्रैर्भुजैर्विस्मितबुद्धयः ॥ तस्थुः प्रेक्ष्य च तं सर्वे नाभिज
ग्मुः परस्परं ॥४॥ रक्षसां रावणं चापि वानराणां च राघवं ॥ पश्यतां विस्मिताक्षाणां सैन्यं चित्रमिवाबभौ ॥५॥ तौ तु तत्र निमित्तानि
दृष्ट्वा राघवरावणौ ॥ कृतबुद्धी स्थितावेतौ युयुधाते त्यभीतवत् ॥६॥ जेतव्यमिति काकुत्स्थो मर्तव्यमिति रावणः ॥ धृतौ स्ववीर्य

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

सर्वस्वं युद्धे दर्शयतां तदा ॥ ७ ॥ एवं जपंतः पश्यंतो देवाः सर्षिगणास्तदा ॥ ततः क्रोधादशग्रीवः शरान्संधाय वीर्यवान् ॥ मुमोच
ध्वजमुद्दिश्य राघवस्य रथे स्थितं ॥ ते शरास्तमनासाद्य पुरंदररथध्वजं ॥ ९ ॥ रथशक्तिं परामृश्य निपेतुर्धरणीतले ॥ ततो रामो
पि संक्रुद्धश्चापमाकृष्य वीर्यवान् ॥ १० ॥ कृतप्रतिकृतं कर्तुं मनसा संप्रचक्रमे ॥ रावणध्वजमुद्दिश्य मुमोच निशितं शरं ॥ ११ ॥
महासर्पमिवासह्यं ज्वलंतमिव तेजसा ॥ रामश्चिक्षेप तेजस्वी केतुमुद्दिश्य सायकं ॥ १२ ॥ जगाम समहीं भित्त्वा दशग्रीवध्वजं
शरः ॥ स निकृत्तो पतद्भूमौ रावणस्य रथध्वजः ॥ ध्वजस्योन्मथनं दृष्ट्वा रावणः सुमहाबलः ॥ १३ ॥ क्रोधजेनाग्निना संख्ये प्रदी
प्त इव पावकः ॥ संप्रदीप्तो भवत्क्रोधादमर्षात्प्रदहन्निव ॥ १४ ॥ सरोषवशमापन्नः शरवर्षं ववर्ष ह ॥ १५ ॥ रामस्य तुरगान्दीप्तैः
शरैर्विव्याध रावणः ॥ १६ ॥ ते हताहयस्तत्र नास्खलन्नापि वभ्रमुः ॥ १७ ॥ बभूवुस्त्वस्थहृदयाः पद्मनालैरिवाहताः ॥ तेषामसंभ्रमं
दृष्ट्वा वाजिनां रावणस्तदा ॥ १८ ॥ भूयएव सुसंक्रुद्धः शरवर्षं मुमोच ह ॥ गदाश्च परिघाश्चैव चक्राणि मुसलानि च ॥ १९ ॥ गिरिशृं
गाणि वृक्षांश्च तथा शूलपरश्वधान् ॥ मायाविहितमेतत्तु शस्त्रवर्षमपातयत् ॥ २० ॥ सहस्रशस्तदा बाणान्न श्रांतहृदयो युधि ॥
तुमुलं त्वासजननं भीमभीमप्रतिस्वनं ॥ २१ ॥ तद्दर्षमभवद्युद्धे नैकशमयं महत् ॥ विमुच्य राघवरथं समंताद्वानरे बले ॥ २२ ॥ सा
यकैरंतरिक्षं च चकाराशु निरंतरं ॥ मुमोच च दशग्रीवो निःसंगेनांतरात्मना ॥ २३ ॥ आयच्छमानं तं दृष्ट्वा तत्परं रावणं रणे ॥ प्रहस

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

न्निकोवेकुत्स्थः संदधेनिशितांछरान् ॥२३॥ समुमोचततोबाणान्नातशोथसहस्रशः ॥ तान्दृष्ट्वारावणश्चक्रेविशिखैः खंनिरंत
रं ॥२४॥ चक्रातेतौशरौघाभ्यांनिरुच्छ्वासमिवांबरं ॥ ततस्ताभ्यांप्रयुक्तेनशरवर्षेणभास्वता ॥२५॥ शरबंधमिवाभातिद्वितीयमिवचांब
रं ॥ नानिमित्तोभवद्बाणो नातिभेत्ताननिष्फलः ॥२६॥ अन्योन्यंतेथसंहत्यनिपेतुर्धरणीतले ॥ तथाविसृजतोबाणान्रामरावणयो
र्मृधे ॥२७॥ प्रमुखेतावविच्छिन्नमस्यंतौसव्यदक्षिणं ॥ चक्रतुश्चशरौघैश्चनिरुच्छ्वासमिवांबरं ॥२८॥ नांतरंददृशेकिंचित्पश्यद्भि
रनिमेषणं ॥ भूमिस्थैःकपिरक्षोभिःखस्थैर्वादेवदानवैः ॥२९॥ रावणस्यहयान्रामोहयान्रामस्यरावणः ॥ जघ्नतुस्तौतदान्योन्यंकृ
तानुकृतकारिणौ ॥३०॥ एवंतुतौसुसंक्रुद्धौचक्रतुर्युद्धमुत्तमं ॥ मुहूर्तमभवद्युद्धंतुमुलंरोमहर्षणं ॥३१॥ प्रयुद्ध्यमानौसमरेमहाब
लौशितैःशरैरावणलक्ष्मणाग्रजौ ॥ ध्वजावपातेनसराक्षसाधिपोभृशंप्रचुक्रोधतदारघूत्तमे ॥३२॥ इत्यार्षेश्रीरामायणेवाल्मी
कीयेयुद्धकांडेनवोत्तरशततमःसर्गः ॥१०९॥ तौतथायुध्यमानौतुसमरेरामरावणौ ॥ ददृशुःसर्वभूतानिविस्मितेनांतरात्मना ॥१॥
अर्दयंतौतुसमरेतयोस्तौस्यंदनोत्तमौ ॥ परस्परमभिक्रुद्धौपरस्परमभिद्रुतौ ॥२॥ परस्परवधेयुक्तौघोररूपौबभूवतुः ॥ मंडलानि
चवीथीश्चगतप्रत्यागतानिच ॥३॥ दर्शयंतौबहुविधांसूतसारथ्यजागतिं ॥ अर्दयत्रावणंरामोराघवंचापिरावणः ॥४॥ गतिवेग
समापन्नौप्रवर्त्तननिवर्त्तने ॥ क्षिपंतौशरजालानितयोस्तौस्यंदनोत्तमौ ॥५॥ चेरतुःसंयुगमहीसासारौजलदाविव ॥ दर्शयंतौतदा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

तौतुरगतिंबहुविधांरणे॥८॥परस्परस्याभिमुखौपुनरेवचतस्थतुः॥धुरंधुरेणरथयोर्वक्रंवक्रेणवाजिनां॥९॥पताकाश्चपताक
भिःसमीयुःस्थितयोस्तदा॥रावणस्यततोरामोधनुर्मुक्तैःशितैःशरैः॥१०॥चतुर्भिश्चतुरोदीप्तान्हयान्नत्यपसर्पयत्॥सक्रोधरा
मापन्नोहयानामपसर्पणे॥११॥मुमोचनिशितान्बाणान्राघवायदशाननः॥सोतिविद्धोबलवतादशग्रीवेणराघवः॥१२॥जगा
मनविकारंचनचापिव्यथितोभवत्॥चिक्षेपचपुनर्बाणान्वज्रपातसमस्वनान्॥१३॥सारथिंवज्रहस्तस्यसमुद्दिश्यदशान
नः॥मातलेरुक्तमहावेगाःशरीरेपतिताःशराः॥१४॥नसूक्ष्ममपिसंमोहंव्यथांवाप्रददुर्युधि॥तयाधर्षणयाक्रुद्धोमातलेर्नतथा
त्मनः॥१५॥चकारशरजालेनराघवोविमुखंरिपुं॥विंशतिंत्रिंशतिंषष्टिंशतसोथसहस्रशः॥१६॥मुमोचराघवोवीरःसायकान्
स्यंदनेरिपोः॥रावणोपिततःक्रुद्धोरथस्थोराक्षसेश्वरः॥१७॥गदामुसलवर्षेणरामंप्रत्यर्दयद्रणे॥तत्प्रवृत्तंपुनर्युद्धंतुमुलंरोम
हर्षणं॥१८॥गदानांमुसलानांचपरिघानांचनिस्वनैः॥शराणांपुंखपातैश्चक्षुभिताःसप्तसागराः॥१९॥क्षुब्धानांसगराणांचपा
तालतलवासिनः॥व्यथितादानवाःसर्वेपन्नगाश्चसहस्रशः॥२०॥चकंपेमेदिनीकृत्स्नासशैलवनकानना॥भास्करोनिष्प्रभश्चा
सीन्नववौचापिमारुतः॥२१॥ततोदेवाःसगंधर्वाःसिद्धाश्चपरमर्षयः॥चिंतामापेदिरेसर्वेसकिन्नरमहोरगाः॥२२॥स्वस्तिगोब्राह्म
णेभ्यस्तुलोकास्तिष्ठंतुशाश्वताः॥जयतांराघवःसंख्येरावणंराक्षसेश्वरं॥२३॥एवंजपंतःपश्यंतेदेवाःसर्षिगणास्तदा॥रामरावण

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

योर्युद्धं रामरावणयोरिव ॥ एवं ब्रुवंतो ददृशुस्तद्युद्धं रामरावणं ॥ २४ ॥ न [illegible] ततः क्रोधान्महाबाहुर्घूर्णाकीर्तिवर्धनः ॥ संधाय धनुषा
रामः शरमाशीविषोपमं ॥ २५ ॥ रावणस्य शिरश्छिंदत् श्रीमज्ज्वलितकुंडलं ॥ तच्छिरः पतितं भूमौ दृष्टं लोकैस्त्रिभिस्तदा ॥ २६ ॥ तस्यैव
सदृशं चान्यद्रावणस्योत्थितं शिरः ॥ ततः क्षिप्रं क्षिप्रहस्तेन रामेण क्षिप्रकारिणा ॥ २७ ॥ द्वितीयं रावणशिरश्छिन्नं संयति सायकैः
छिन्नमात्रं च तच्छीर्षं पुनरेव प्रदृश्यते ॥ २८ ॥ तदप्यशनिसंकाशैश्छिन्नं रामस्य साकैर्यैः ॥ एवमेकशतं छिन्नं शिरसां तुल्यव
र्चसां ॥ २९ ॥ न चैव रावणस्यांतो दृश्यते जीवितक्षये ॥ ततः सर्वास्त्रविद्वीरः कोसलानंदवर्धनः ॥ ३० ॥ मार्गणैर्बहुभिर्युक्तश्चिंतय
यामास राघवः ॥ मारीचो निहतो येस्तु खरो येस्तु सदूषणः ॥ ३१ ॥ क्रौंचारण्यकबंधस्तु विराधो दंडकावने ॥ यैः सालागिरयो भग्ना
वाली च सुभितो बुधः ॥ ३२ ॥ तद्मे सायकाः सर्वे युद्धे प्रायापिका मम ॥ किंतु तत्कारणं येन रावणं मंदतेजसः ॥ ३३ ॥ इति चिंतापरश्चा
सीद्रथमत्तश्च संयुगे ॥ ववर्ष शरवर्षाणि राघवो रावणोरसि ॥ ३४ ॥ रावणोपि ततः क्रुद्धो रथस्थो राक्षसेश्वरः ॥ गदामुसलवर्षेण
रामं प्रत्यर्दयद्रणे ॥ ३५ ॥ तत्प्रवृत्तं पुनर्युद्धं तुमुलं रोमहर्षणं ॥ अंतरिक्षे च भूमौ च पुनश्च गिरिमूर्धनि ॥ ३६ ॥ देवदानवयक्षा
णां पिशाचोरगरक्षसां ॥ पश्यतां तन्महद्युद्धं सर्वरात्रमवर्तत ॥ ३७ ॥ न चरात्रिं न दिवसं न मुहूर्तं न चक्षणं ॥ रामरावणयोर्युद्धं वि
रामं नोपगच्छति ॥ ३८ ॥ दशरथसुतराक्षसेंद्रयोर्जयमनवेक्ष्य रणे नराघवस्य ॥ सुरवररथसारथिर्महात्मा रणगतरामं मुवाच

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वाक्यमाप्तु॥३७॥इत्यार्षे श्रीरामायणे वाल्मीकीये युद्धकांडे दशोत्तरशततमः सर्गः॥११०॥अथ तं स्मारयामास राघवं मातलिस्तदा
अज्ञानन्निव किं वीरत्वमेनमनुवर्त्तसे॥१॥विसृजास्त्रमेव धायत्वं मस्त्रं पैतामहं प्रभो॥विनाशः कथितो रामयः सुरैः सोद्यवर्त्तते॥
२॥ततः संस्मारितो रामस्तेन वाक्येन मातलेः॥जग्राहमशरं दीप्तं निश्वसंतमिवोरगं॥३॥यमस्मै प्रथमं प्रादादगस्त्यो भगवानृ
षिः॥ब्रह्मदत्तं महाबाणममोघं युधि वीर्यवान्॥४॥ब्रह्मणा निर्मितं पूर्वमिंद्रार्थमिति तेजसा॥दत्तं सुरपतेः पूर्वं त्रिलोकजय
कांक्षिणा॥५॥यस्य वाजेषु पवनः फलेषु पावकभास्करौ शरीरमाकाशमयं गौरवे मेरुमंदरौ॥६॥जाज्वल्यमानं वपुषा सुपुंखं हे
मभूषितं॥तेजसा सर्वभूतानां कृतं भास्करवर्चसं॥७॥सधूममिव कालाग्निं दीप्तमाशीविषोपमं॥स्थनागाश्वहृदानां भेदनं क्षि
प्रकारिणं॥८॥द्वाराणां परिघाणां च गिरीणां चापि भेदनं॥नानारुधिरदिग्धांगं मेदोदिग्धसुदारुणं॥९॥वज्रसारं महानादं नाना
समितिदारुणं॥सर्वविद्रावणं भीमं श्वसंतमिव पन्नगं॥१०॥कंकगृध्रबलानां च गोमायुगणरक्षसां॥नित्यं भक्षप्रदं युद्धे यमरू
पं भयावहं॥११॥नंदनं वानरेंद्राणां रक्षसामवसादनं॥वाजितं विविधैर्वाजैश्चारुचित्रैर्गरुत्मतः॥१२॥नमुत्तमेषु लोकानामि
क्ष्वाकुभयनाशनं॥द्विषतां कीर्त्तिहरणं प्रहर्षकरमात्मनः॥१३॥अभिमंत्र्य ततो रामः स्वमहेषुं महाबलः॥वेदप्रोक्तेन विधिना संं
दधे कार्मुके बली॥१४॥तस्मिन् संधीयमाने तु राघवेण शरोत्तमे॥सर्वभूतानि वित्रेसुश्चचाल च वसुंधरा॥१५॥सरावणाय संक्रुद्धे

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

भृशमायम्य कार्मुकं॥ चिक्षेप परमायत्तश्चरमर्मविदारणं॥१६॥ स वज्रइव दुर्धर्षो वज्रिबाहुविसर्जितः॥ कृतांतइव चावार्यो न्य
पतद्रावणोरसि॥१७॥ स विसृष्टो महावेगः शरीरांतकरः शरः॥ विभेद हृदयं तस्य रावणस्य दुरात्मनः॥१८॥ रुधिराक्तः सवेगे
न शरीरांतकरः शरः॥ रावणं हरन्प्राणान् विवेश धरणीतलं॥१९॥ स शरो रावणं हत्वा रुधिराद्रकृतच्छविः॥ कृतकर्मा निभृ
तवत्स्वतूणीं पुनराविशत्॥२०॥ तस्य हस्ताद्धतस्याशु कार्मुकं तत्ससायकं॥ निपपात सहस्राणैः भक्ष्यमाणस्य जीवितात्॥
२१॥ गतासुर्भीमवेगस्तु नैर्ऋतेंद्रो महाद्युतिः॥ पपात स्यंदनाद्भूमौ वृत्रो वज्रधरो यथा॥ तं दृष्ट्वा पतितं भूमौ हतशेषा निशा
चराः॥ हतनाथा भयत्रस्ताः सर्वतः संप्रदुद्रुवुः॥२३॥ नदंतश्चाभिपेतुश्च वानरा द्रुमयोधिनः॥ दशग्रीवं वधं दृष्ट्वा विजयं रा
घवस्य च॥२४॥ अर्दिता वानरैर्हृष्टैर्लंकामभ्यपतन्भयात्॥ हताश्रयत्वात्करुणैर्बाष्पप्रस्रवणैर्मुखैः॥२५॥ ततो विनेदुः सं
हृष्टा वानराजितकाशिनः॥ वदंतो राघवजयं रावणस्य च तद्वधं॥२६॥ अथांतरिक्षे व्यनदत्घोषवान्देवदुंदुभिः॥ दिव्यगंध
वहस्तत्र मारुतः ससुखो ववौ॥२७॥ निपपात तदांतरिक्षाच्च पुष्पवृष्टिस्तदा भुवि॥ किरंती राघवरथं दुरवापा मनोहरा॥२८॥ रा
घवस्तव संयुक्ता गगने च विशुश्रुवे॥ साधु साध्विति वागग्र्या देवतानां महात्मनां॥२९॥ आविवेश महान्हर्षो देवानां चार
णैः सह॥ रावणं विहतं रौद्रं सर्वलोकभयावहं॥३०॥ ततः सकामं सुग्रीवमंगदं च महाबलं॥ चकार राघवः प्रीतो हत्वा राक्षस

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

पुंगवं॥३१॥ततः प्रजग्मुः प्रशमं मरुद्गणा दिशः प्रसेदुर्विमलं नभो भवत्॥ महीं चकंपे न हि मारुतो ववौ स्थिरप्रभश्चाप्यभवद्दिवा
करः॥३२॥ततस्तु सुग्रीवविभीषणांगदाः सुहृद्विशिष्टाः सहलक्ष्मणास्तदा॥ समेत्य हृष्टा विजयेन राघवं रणे भिरामं विधिना भ्य
पूजयन्॥३३॥ स तु निहतरिपुः कृतप्रतिज्ञः स्वजनबलाभिवृतो रणे रराज॥ रघुकुलनृपनंदनो महौजा स्त्रिदशगणैरभिसं
वृतो यथेंद्रः॥३४॥ इत्यार्षे श्रीरामायणे वाल्मीकीये युद्धकांडे अमावास्यां रावणवधो नामैकादशोत्तरशततमः सर्गः॥१११॥
भ्रातरं निहतं दृष्ट्वा शयानं रामनिर्जितं॥ शोकवेगपरीतात्मा विललाप विभीषणः॥१॥ वीरविक्रांत विख्यात विनीत नयको
विद॥ महार्हशयनोपेत किं शेषे ह्यहतो भुवि॥२॥ निक्षिप्य दीर्घनिश्वेष्टौ भुजावंगदभूषितौ॥ मुकुटेनापवृत्तेन भास्करा कारव
र्चसा॥३॥ तदिदं वीरसंग्राम यन्मया पूर्वमीरितं॥ काममोहपरीतस्य यत्तेन रुचितं वचः॥४॥ यदा दर्पात्प्रहस्तो वा नेंद्रजिन्नापरे ज
नाः॥ न कुंभकर्णो न रथो नातिकायो न रांतकः॥५॥ न स्वयं किं नु मन्येथास्तस्योदर्कोयमागतः॥ गतः सेतुः सुनीतानां गतो धर्मस्य वि
ग्रहः॥६॥ गतः सत्वस्य संक्षेपः प्रस्तवानागतिर्गता॥ आदित्यः पतितो भूमौ मग्नस्तमसि चंद्रमाः॥७॥ चित्रभानुः प्रशांतार्चिर्व्यवसा
यो निरुद्यमः॥ अस्मिन्निपतिते वीरे भूमौ शस्त्रभृतां वरे॥८॥ किं शेषमिव लोकस्य हतवीर्यस्य सांप्रतं॥ रणे राक्षसशार्दूले प्रसुप्त इ
व पांसुषु॥९॥ धृतिप्रवालः प्रसहाग्रपुष्पस्तपोबलः शौर्यनिबद्धमूलः॥ रणे महाराक्षसराजवृक्षः संमर्दितो राघवमारुतेन॥१०॥ ते

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

प्रतापः

जोविषाणःकुलवंशवंशःकोपप्रसादात्परगात्रहस्तः॥इक्ष्वाकुसिंहावगृहीतदेहःसुप्तःक्षितौरावणगंधहस्ती॥११॥पराक्रमोत्सा
हविजृंभितार्चिर्निश्वासधूमःस्वबलप्रतापवान्संयतिराक्षसाग्निर्निर्वापितोरामपयोधरेण॥१२॥सिंहर्क्षलांगूलककुद्विषाणःपराभिजिद्गंधनगंधहस्ती॥रक्षोवृषश्चापलकर्णचक्षुःक्षितीश्वरस्याग्रहतोवसन्नः॥१३॥वदंतंहेतुमद्वाक्यंदृष्ट्वापरिर्थनिश्चयं॥रामःशोकसमाविष्टमित्युवाचविभीषणं॥१४॥नायंविनष्टोनिश्चेष्टःसमरेचंडविक्रमः॥अत्युन्नतमहोत्साहःपतितोयमशंकितः॥१५॥नैवंविनष्टाःशोच्यंतेक्षत्रधर्मेव्यवस्थिताः॥वृद्धिमाशंसमानायेनिपतंतिरणाजिरे॥१६॥येनसंद्रास्त्रयोलोकास्त्रासितायुधिधीमता॥अस्मिन्कालसमायुक्तेनकालःपरिशोचितुं॥१७॥नैकांतविजयोयुद्धेभूतपूर्वकदाचन॥परेवोहन्यतेवीरःपराचाहंतिसंयुगे॥१८॥इयंहिपूर्वैःसंदिष्टागतिःक्षत्रियसंमता॥क्षत्रियोनिहतःसंख्येनशोच्यइतिनिश्चितः॥१९॥तदेवंनिश्चयंदृष्ट्वातत्वमास्थायविज्वरः॥यदिहानंतरंकार्यंकल्पंतमनुचिंतय॥२०॥तमुक्तवाक्यंविक्रांतंराजपुत्रंविभीषणः॥उवाचशोकसंतप्तोभ्रातुर्हितमनंतरं॥२१॥योयंविमर्दैषुनभग्नपूर्वःसुरैःसमेतैःसहवासवेन॥भवंतमासाद्यरणेविभग्नोवेलामिवासाद्ययथासमुद्रः॥२२॥अनेनदत्तानिसुपूजितानिभुक्ताश्चभोगाविभृताश्चभृत्याः॥धनानिमित्रेषुसमर्पितानिवैराण्यमित्रेषुचयापितानि॥२३॥एषोहिनिश्चेयमहातपाश्चवेदांतगःकर्मसुचाग्र्यशूरः॥एतस्ययत्स्वेतगतस्यकृत्यंतत्कर्तुमिच्छामितवप्रसा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

दात्॥२४॥सतस्यवाक्यैःकरुणैर्महात्मासंबोधितःसाधुविभीषणेन॥आज्ञापयामासनरेंद्रसूनुस्वगृह्यमाधानविधिंवि
धिज्ञ॥२५॥मरणांतानिवैराणिनिवृत्तंनःप्रयोजनं॥क्रियतामस्यसंस्कारोममाप्येषयथातव॥२६॥इत्यार्षेश्रीरामायणेवा
ल्मीकीयेयुद्धकांडेद्वादशोत्तरशततमःसर्गः॥११२॥रावणंनिहतंश्रुत्वाराघवेणमहात्मना॥अंतःपुराद्विनिष्पेतूराक्षस्य
शोककर्शिताः॥१॥वार्यमाणावर्षवरैर्वेष्टंत्यःक्षितिपांसुषु॥त्यक्तकेश्यःसुदुःखार्त्तागावोवत्सहताइव॥२॥उत्तरेणविनि
ष्क्रम्यद्वारेणसहराक्षसैः॥त्रिविश्योयोधनंघोरंविचिन्वंत्योहतंपतिं॥३॥आर्यपुत्रेतिवादिन्योहानाथेतिचसर्वशः॥परिपेतुः
कबंधांकांमहींशोणितकर्दमां॥४॥तावाप्यपरिपूर्णाक्ष्योभर्तृशोकपराजिताः॥करिण्यइवनर्दंत्योनरेंद्रुर्हतयूथपाः॥५॥
ददृशुस्तंमहाकायंमहावीर्यंमहाद्युतिं॥रावणंनिहतंभूमौनीलांजनचयोपमं॥६॥ताःपतिंनिहतंदृष्ट्वाशयानंरणपां
सुषु॥निपेतुस्तस्यगात्रेषुछिन्नावनलताइव॥७॥बहुमानात्परिष्वज्यकाचिदेनंरुरोदह॥चरणौकाचिदालंब्यकाचित्कं
ठेवलंब्यच॥८॥उत्क्षिप्यचभुजौकाचिंभूमौस्मपरिवर्त्तते॥हतस्यवदनंदृष्ट्वाकाचिन्मोहमुपागमत्॥९॥काचिदंकेशिरःकृत्वा
रुरोदमुखमीक्षती॥स्नापयंतीमुखंबाष्पैस्तुषारैरिवपंकजं॥१०॥एवमार्त्ताःपतिंदृष्ट्वारावणंनिहतंभुवि॥चुक्रुशुर्बहुधाशोक
द्रूयस्ताःपर्यदेवयन्॥११॥येनवित्रासितःशक्रोयेनवित्रासितोयमः॥येनवैश्रवणोराजापुष्पकेणवियोजितः॥१२॥गंधर्वाणा

त

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

मृषीणांचसुराणांभावितात्मनां॥भयंयेनमहद्दत्तंसोयंशेतेरणेहतः॥१३॥असुरेभ्यःसुरेभ्योवापन्नगेभ्योपिवापुनः॥भयं
योनविजानातितस्येदंमानुषाद्भयं॥१४॥अवध्योदेवतानांयस्तथादानवरक्षसां॥हतःसोयंरणेशेतेमानुषेणपदातिना
१५॥योनशक्यःसुरैर्हंतुंनयक्षैर्नासुरैस्तथा॥सोयंकश्चिदिवासत्वोमृत्युंमर्त्येनलंभितः॥१६॥एवंवदंत्योबहुधारुदंतेस्त
स्यताःस्त्रियः॥भूयएवचदुःखार्ताविलेपुश्चपुनःपुनः॥१७॥असृण्वतातुसुहृदांसततंहितवादिना॥मरणायाहृतासीता
घातिताश्चनिशाचराः॥१८॥एतैःसमभिदानीतेवयमात्माचपातितः॥ब्रुवाणोपिहितंवाक्यमिष्टोभ्राताविभीषणः॥१९॥दृष्टंपरु
परुषितोमोहायात्मवधकांक्षिणा॥यदिनिर्यातितातस्यात्सीतारामायमैथिली॥२०॥ननःस्याद्व्यसनंघोरमिदंमूलहरंमहत्
हृतकामोभवेद्भ्रातारामोमित्रकुलंभवेत्॥२१॥वयंत्वविधवाःसर्वाःसकामानचशत्रवः॥त्वयापुनर्नृशंसेनसीतांसरुंध
ताबलात्॥२२॥राक्षसावयमात्माचत्रयंतुल्यंनिपातितं॥नकामकारःकामंवातवराक्षसपुंगव॥२३॥दैवंचेष्टयतेसर्वंहतंदै
वेनहन्यते॥वानराणांविनाशोयंराक्षसानांचतेरणे॥२४॥नवचैवमहाबाहोदैवयोगादुपागतः॥नैवार्थेननकामेनविक्र
मेणनचाज्ञया॥२५॥शक्यादेवगतिर्लोकेनिवर्तयितुमुद्यता॥विलेपुरेवंदीनास्ताराक्षसाधिपयोषितः॥कुर्वंत्यइवदुःखा
र्तावाष्पपर्याकुलेक्षणाः॥२६॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेत्रयोदशोत्तरशततमःसर्गः॥११३॥तासांविलपमा

CC-0.Courtesy Shri K.S.Parihar, Librarian Government District Library Varanasi. Digitized by eGangotri

नानांतथारावणयोषितां॥ज्येष्ठापत्नीप्रियादीनामर्त्तारंसमुदैक्षत॥१॥दशग्रीवंहतंदृष्ट्वारामेणाचिंत्यकर्मणा॥पतिमंदोदरी
तत्रकृपणापर्यदेवयत॥२॥ननुनाममहाबाहोतववैश्रवणानुज॥क्रुद्धस्यप्रमुखेस्थातुंत्रस्यत्यपिपुरंदरः॥३॥ऋषयश्च
महात्मानोगंधर्वाश्चयशस्विनः॥ननुनामतवोद्वेगाच्चारणाश्चदिशोगताः॥४॥सत्वंमानुषमात्रेणरामेणयुधिनिर्जितः॥
नत्वपत्रपसेराजन्किमिदंराक्षसेश्वर॥५॥कथंत्रैलोक्यमाक्रम्यश्रियावीर्येणचान्वितं॥अविषह्यंजघानत्वांमानुषावन
गोचरः॥६॥मानुषाणामविषह्येचरतःकामरूपिणः॥विनाशस्तवरामेणसंयुगेनोपपद्यते॥७॥नचैतत्कर्मरामस्यश्रद्दधा
मिचमूमुखे॥सर्वतःसमुपेतस्यतवतेनाभिमर्शनं॥८॥अथवारामरूपेणकृतांतःस्वयमागतः॥मायांतवविनाशाय विधाया
प्रतितर्कितां॥९॥अथवावासवेनत्वंधर्षितोसिमहाबल॥वासवस्यकुतःशक्तिस्त्वांदृष्टुमपिसंयुगे॥१०॥यदेवनगरींलंकांदुश्च
वेशांसुरैरपि॥प्रविष्टोहनुमान्वीरस्तदैवव्यथितावयं॥११॥यदेवहिजनस्थानेराक्षसैर्बहुभिर्वृतः॥खरस्तवहतोभ्रातातदैवा
सीनमानुषः॥१२॥यदैववानरैर्घोरैर्बद्धःसेतुमहार्णवे॥तदैवहृदयेनाहंशंकेराममनामयं॥१३॥व्यक्तमेषमहायोगीपरमात्मा
सनातनः॥अनादिमध्यनिधनोमहतःपरमोमहान्॥१४॥तपसःपरमोधाताशंखचक्रगदाधरः॥श्रीवत्सवक्षानित्यश्चीर
जयःशाश्वतोध्रुवः॥१५॥मानुषंरूपमास्थायविष्णुःसत्यपराक्रमः॥सर्वैःपरिवृतोदेवैर्वानरत्वमुपागतैः॥१६॥सर्वलोकेश्वरःश्री

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

मात्रोकानांहितकाम्यया॥महावीर्यमहाशक्तिंदेवशत्रुंभयावहं॥१९॥सराक्षसपरीवारंहतवांस्त्वांमहोद्युतिः॥इद्रि
याणिपुराजित्वाजितंत्रिभुवनंत्वया॥१९॥स्मरद्भिरिवतद्वैरमिंद्रियैरेवनिर्जितः॥क्रियतामविरोधेनराघवेणेतियन्मया॥१९॥उ
च्यमानोनगृह्णासितस्येयंबुद्धिमागता॥अकस्माच्चाभिलाषोसिसीताराक्षसपुंगव॥२०॥ऐश्वर्यस्यविनाशायदेहस्यस्व
जनस्यच॥अरुंधत्याविशिष्टांतांरोहिण्याश्चापिदुर्मते॥२१॥सीतांधर्षयतामान्यांत्वयात्वसदृशंकृतं॥वसुधायाश्चवसुधांश्रियःश्री
भर्तृवत्सलां॥२२॥सीतांसर्वानवद्यांगींमरण्येविजनेशुभां॥आनयित्वातुतांदीनांछद्मनात्मस्वदूषण॥२३॥अप्राप्यचैवतंकामंमैथि
लीसंगमेकृतं॥पतिव्रतायास्तपसानूनंदग्धोसिमेत्र॥२४॥तदेवयन्नदग्धस्त्वंधर्षयेस्तनुमध्यमां॥देवाहिबिभ्यतेसर्वेसेंद्राःसा
ग्निपुरोगमाः॥२५॥अवश्यमेवलभतेफलंपापस्यकर्मणः॥घोरंपर्यागतेकालेकर्तानास्त्यत्रसंशयः॥२६॥शुभंकल्याणमाप्नोतिपापकृ
त्पापमश्नुते॥विभीषणःसुखंप्राप्तस्त्वंप्राप्तःपापमीदृशं॥२७॥संत्यन्याःप्रमदास्तुभ्यंरूपेणाभ्यधिकास्ततः॥अनंगवशमापन्नस्त्व
तुमोहान्नबुध्यसे॥२८॥नकुलेननरूपेणनदाक्षिण्येनमैथिली॥मयाधिकावातुल्यावात्वंतुमोहान्नबुध्यसे॥२९॥सर्वथासर्वभूता
नांनास्तिमृत्युरलक्षणः॥तवतद्धृदयंमृत्युर्मैथिलीकृतलक्षणः॥३०॥सीतानिमित्तजामृत्युस्त्वयादुरादुपाहृतः॥मैथिलीसाहिरामे
णविशोकाविहरिष्यति॥३१॥अस्मत्पुण्यात्वहंघोरेपतिताशोकसागरे॥कैलासेमंदरेमेरौतथाचैत्ररथेवने॥३२॥दिव्योद्यानेषुसर्वे

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

षु विहृत्य सहितात्वया ॥ विमानेनानुरूपेण यायाम्यतुलया श्रिया ॥३३॥ पश्यंती विविधान्देशांस्तांस्तांश्चित्रस्रगंबरा ॥ भ्रंशि
ताकामभोगेभ्यः सास्मि वीरवधात्तव ॥३४॥ सैवान्येवास्मि संवृत्ता धिग्राज्ञां चंचलां श्रियं ॥ हे राजन्सुकुमारं ते सुभ्रुस्वक्षि समुन्न
सं ॥३५॥ कीर्त्तिश्रीद्युतिभिस्तुल्यमिंदुपद्मदिवाकरैः ॥ किरीटकूटोज्ज्वलितं ताम्राक्षं दीप्तकुंडलं ॥३६॥ मदव्याकुललोलाक्षं भूत्वा
यत्पानभूमिषु ॥ विविधस्रग्धरं चारुवल्गुस्मितयुतं शुभं ॥३७॥ तदेवाद्य तवैवेहि वक्त्रं नभ्राजते प्रभो ॥ रामसायकनिर्भिन्नं रक्तं
रुधिरविस्रवैः ॥३८॥ विशीर्णमेदोमस्तिष्कं रूक्षं स्यंदनरेणुभिः ॥ हा पश्चिमामसंप्राप्ता दृश्यावैधव्यदायिनी ॥३९॥ यामयासीन्नसंबु
द्धा कदाचिदपि मंदया ॥ पिता दानवराजो मे भर्त्ता मे राक्षसेश्वरः ॥४०॥ पुत्रो मे शक्रनिर्जेता इत्यहं गर्विता भृशं ॥ दीप्तारिमर्दनाः शूरा
राः प्रख्यातबलपौरुषाः ॥४१॥ अकुतश्चिद्भयानाथ ममेत्यासीन्मतिर्ध्रुवा ॥ तेषामेवं प्रभावाणां युष्माकं राक्षसर्षभ ॥४२॥ कथं भय
मसंबद्धं मानुषादिदमागतं ॥ स्निग्धेंद्रनीलसदृशं शाद्वलशैलोपमं महत् ॥४३॥ केयूरांगदवैडूर्यमुक्ताहारस्रगुज्ज्वलं ॥ कांतं वि
हारेष्वधिकं दीप्तं संग्रामभूमिषु ॥४४॥ विनीतं गुरुपूजासु शांतं शंकरपूजने ॥ भात्याभरणभाभिर्यद्विद्युद्भिरिव तोयदः ॥४५॥ तदेवा
द्य शरीरं ते तीक्ष्णैर्नैकशरैश्चितं ॥ पुनर्दुर्लभसंस्पर्शं परिष्वक्तुं न शक्यते ॥४६॥ श्वाविदः शल्लकैर्युक्तैर्लग्नैर्बाणैर्निरंतरं ॥ स्वर्पितैर्म
र्मसु भृशं संछन्नस्त्रायुबंधनं ॥४७॥ क्षितौ निपतितं राजन्श्यामं वै रुधिरच्छवि ॥ वज्रप्रहारपतितो विकीर्णद्रुपर्वतः ॥४८॥ हास्य

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

न्नः सत्यमेवेदं त्वं रामेण कथं हतः॥ त्वं मृत्योरपि मृत्युः स्याः कथं मृत्युवशं गतः॥४९॥ त्रैलोक्यवसुभोक्तारं त्रैलोक्योद्वेगदं महत्॥
जेतारं लोकपालानां क्षेप्तारं शंकरस्य च॥५०॥ दृप्तानां निग्रहीतारमाविष्कृतपराक्रमं॥ लोकक्षोभयितारं च नादैर्भूतविदार
णं॥५१॥ ओजसाध्वस्तवाक्यानां वक्तारं रिपुसन्निधौ॥ स्वयूथं भृशगोप्तारं हंतारं भीमकर्मणां॥५२॥ हंतारं दानवेंद्राणां यक्षा
णां च सहस्रशः॥ विवांतकवचानां तु संगृहीतारमीश्वरं॥५३॥ नैकयज्ञविलोप्तारं त्रातारं स्वजनस्य च॥ धर्मव्यवस्थाभेत्तारं मा
यास्रष्टारमाहवे॥५४॥ देवासुरनृकन्यानामाहर्त्तारं ततस्ततः॥ शत्रुस्त्रीशोकदातारं नेतारं निजसैनिकान्॥५५॥ लंकाद्वी
पस्य गोप्तारं हर्त्तारं वधवैरिणां॥ अस्माकं कामभोगानां दातारं रथिनां वरं॥५६॥ एवंप्रभावं भर्त्तारं दृष्ट्वा रामेण पातितं॥ स्थिता स्म
हं देहमिमं धारयामि हतत्रिया॥५७॥ शयनेषु महार्हेषु शयित्वा राक्षसेश्वर॥ इह कस्मात्त्वसुप्तोसि धरण्यां रेणुपाटलः॥५८॥
यदा मे तनयः शस्तो लक्ष्मणेनेंद्रजिद्युधि॥ तदा त्वभिहता तीव्रमद्य त्वस्मिन्निपातिता॥५९॥ सा हं बंधुजनैर्हीना हीनाथैर्नानच
त्वया॥ विहीना कामभोगैश्च शोचिष्ये शाश्वतीः समाः॥६०॥ प्रपन्नो दीर्घमध्वानं राजन्नद्य सुदुर्गमं॥ नयमामपि दुःखार्त्तां नवर्ति
ष्ये त्वया विना॥६१॥ कस्मात्त्वं मां विहायेह कृपणां गंतुमिच्छसि॥ दीनां विलपतीं मंदां किंचिन्मां नाभिभाषसे॥६२॥ दृष्ट्वा नरखल्वसि
कुद्धोमामिहानवकुंठितां॥ निर्गतां नगरद्वारात्स्थ्यामेवागतां प्रभो॥६३॥ परयेष्टदारदारांस्त्वं भ्रष्टलज्जावकुंठितान्॥ वहिर्निष्पति

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

तान्सर्वान्कथंदृष्ट्वानकुप्यसि॥६४॥अयंक्रीडासहायस्तेहीनाथलालप्यतेजनः॥नचैनमाश्वासयसेकिंवानबहुमन्यसे॥६५
६५॥यास्त्वयाविधवाराजन्कृतानैकाःकुलस्त्रियः॥पतिव्रताधर्मरताःगुरुशुश्रूषणेरताः॥६६॥ताभिःक्रोधाभितप्ताभिःशापः
परवशंगतः॥त्वयाविप्रकृताभिश्चयदाशापंतदागतं॥६७॥प्रवादःसत्यएवायंत्वांप्रतिप्राप्तोनृप॥पतिव्रतानांनाकस्मात्प
तेत्यश्रूणिभूतले॥६८॥कथंचनामतेराजन्लोकानाक्रम्यतेजसा॥नारीचौर्यमिदंक्षुद्रंकृतंशौंडीर्यमानिना॥६९॥अपनीयाश्रमा
द्रामंयन्मृगच्छद्मनात्वया॥आनीतारामपत्नीसायत्तेकातर्यलक्षणं॥७०॥कातर्यंचनतेयुद्धेकदाचित्संस्मराम्यहं॥ततुभाग्य
विपर्यासान्नूनंतेपक्वलक्षणं॥७१॥अतीतानागतार्थज्ञोवर्तमानविचक्षणः॥मैथिलीमाहृतांदृष्ट्वाध्यात्वानिश्वास्यचार्यतं॥
७२॥सत्यवाक्समहाबाहुर्दैवरोमेयदब्रवीत्॥अयंराक्षसमुख्यानांविनाशःसमुपस्थितः॥७३॥कामक्रोधसमुत्थेनव्यसनेनाप्रसं
गिना॥निवृत्तस्त्वत्कृतेनार्थःसोयंमूलहरोमहान्॥७४॥त्वयाकृतमिदंसर्वमनाथंरक्षसांकुलं॥नहित्वंशोचितव्योमेप्रख्यात
बलपौरुषः॥७५॥स्त्रीस्वभावात्तुमेबुद्धिःकारुण्यपरिवर्तते॥सुकृतंदुष्कृतंचत्वंगृहीत्वास्वागतिंगतः॥७६॥आत्मानमनुशोचा
मित्वद्विनाशेनदुःखिता॥सुहृदांहितकामानांनश्रुतंवचनंत्वया॥७७॥भ्रातृणांचैवकार्त्स्न्येनहितमुक्तंदशानन॥हेत्वर्थयुक्तंवि
धिवच्छ्रेयस्करमदारुणं॥७८॥विभीषणेनाभिहितंनकृतंहेतुमत्त्वया॥मारीचकुंभकर्णाभ्यांवाक्यंममपितुस्तदा॥७९॥नकृतंवी

CC-0.Courtesy Shri K.S.Parlhar Librarian Government District Library Varanasi. Digitized by eGangotri

र्यमन्तेनतस्येदंफलमीदृशं॥नीलजीमूतसंकाशपीतांबरसुभांगद॥८७॥स्वगात्राणिचनिक्षिप्यकिंशेषेरुधिरावृत॥प्रसुप्तइवशो
कार्तोकिंमांनप्रतिभाषसे॥८८॥महावीर्यस्यदक्षस्यसंयुगेष्वपलायिनः॥यातुधानस्यदौहित्रोकिंमांनप्रतिभाषसे॥८९॥उत्तिष्ठो
त्तिष्ठकिंशेषेनवेपरिभवेकृते॥अद्यवैनिर्भयालंकांप्रविष्टाःसूर्यरश्मयः॥९०॥येनसूदयसेशत्रूनसमरेसूर्यवर्चसा॥वज्रोवज्र
धरस्येवसोयंसेतेतमार्चित॥९१॥रणेबाहुप्रहरणेहेमजालपरिष्कृत॥परिघोपयवकीर्णस्तेबाणैश्छिन्नःसहस्रधा॥९२॥प्रिया
मिवोपगूह्यत्वंशेषेसमरमेदिनीं॥अप्रियामिवकस्माच्चमांनेच्छस्यभिभाषितुं॥९३॥धिगस्तुहृदयंयस्याममेदंनसहस्रधा॥त्वयि
पंचत्वमापन्नेफलतेशोकपीडितं॥९४॥इत्येवंविलपंतीसाबाष्पपर्याकुलेक्षणा॥स्नेहोपस्कन्नहृदयातदामोहमुपागमत्॥
९५॥करमलाभिहतासन्नावभौसारावणोरसि॥संध्यानुरक्तेजलदेदीप्तविद्युदिवोज्ज्वला॥९६॥तथागतांसमुत्थाप्यसपत्नस्त्रा
भृशातुरा॥पर्यवस्थापयामासरुदंत्योरुदतीभृशं॥९७॥किंतेनविधिनादेविलोकानांस्थितिरध्रुवा॥दृश्याविभागपर्यायेराज्ञांचंच
लयाश्रिया॥९८॥इत्येवमुच्यमानासासशब्दंप्ररुरोदह॥स्त्रापयंतीत्वभिमुखोस्त्रनावस्त्रांबुविस्त्रवे॥९९॥एतस्मिन्नंतरेरामोवि
भीषणमुवाचह॥संस्कारक्रियतांभ्रातुःस्त्रीगणःपरिसांत्यतां॥१००॥तंप्रश्रितमथोरामंश्रुतवाक्योविभीषणः॥विमृश्यबुध्या
धर्मज्ञोधर्मार्थसहितंवचः॥१०१॥रामस्यैवानुवृत्त्यर्थमुत्तरंप्रत्यभाषत॥त्यक्तधर्मव्रतंक्रूरंनृशंसममृतंतथा॥१०२॥नाहमर्हामि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

संस्कर्तुं परदाराभिमर्शनं॥ भ्रातृरूपोहि मे शत्रुरेष सर्वाहितेरतः॥ ९२॥ रावणो नार्हते पूजां पूज्योपि गुरुगौरवात्॥ नृशंसदुर्ति
मां राम वक्ष्यंति मनुजा भुवि॥ ९३॥ श्रुत्वा तस्य गुणान्सर्वे वक्ष्यंति सुकृतं पुनः॥ तत् श्रुत्वा परमप्रीतो रामो धर्मभृतां वरः॥ ९४॥ विभी
षणमुवाचेदं वाक्यज्ञो वाक्यकोविदः॥ तवापि मे प्रियं कार्यं त्वत्प्रभावाच्च मे जितं॥ ९५॥ अवश्यं तु क्षमं वाच्यो मया त्वं राक्षसेश्व
र॥ अधर्मानृतसंयुक्तः कामं त्वेष निशाचरः॥ ९६॥ तेजस्वी बलवान् शूरः संग्रामेषु च नित्यशः॥ शतक्रतुमुखैर्देवैः श्रूयते न पराजि
तः॥ ९७॥ महात्मा बलसंपन्नो रावणो लोकरावणः॥ मरणांतानि वैराणि निर्वृत्तं नः प्रयोजनं॥ ९८॥ क्रियतामस्य संस्कारो ममाप्येष य
था तव॥ त्वत्सकाशान्महाबाहो संस्कारं विधिपूर्वकं॥ ९९॥ क्षिप्रमर्हति धर्मेण त्वं यशोभाक् भविष्यसि॥ राघवस्य वचः श्रुत्वा त्वर
माणो विभीषणः॥ १००॥ संस्कारेणानुरूपेण योजयामास रावणं॥ ततः प्रविश्य लंकां तु राक्षसेंद्रो विभीषणः॥ १०१॥ रावणस्याग्निहोत्रं तदा
दाय च विनिःसृतः॥ तथा चंदनकाष्ठानि काष्ठानि विविधानि च॥ १०२॥ अगुरूणि सुगंधीनि गंधांश्च सुरभींस्तथा॥ मणिमुक्ताप्रवालानि
निर्वपिष्यति राक्षसः॥ १०३॥ सौवर्णं शिबिकां दिव्यां आरोप्य क्षौमवाससा॥ रावणं राक्षसाधीशमश्रुपूर्णमुखा द्विजाः॥ १०४॥ तूर्यघोषैश्च
विविधैः स्तुवद्भिश्चाभिनंदिनः॥ एताभिश्च विचित्राभिः सुमनोभिश्च चित्रितां॥ १०५॥ उत्क्षिप्य शिबिकां तां तु विभीषणपुरोगमाः॥ दक्षिणा
भिमुखाः सर्वे गृह्य काष्ठानि भेजिरे॥ १०६॥ अंतःपुराणि सर्वाणि रोदमानानि सत्वरं॥ पृष्ठतो नुययुस्तानि स्रवमानानि सर्वतः॥ १०७॥ रावणं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

त्रपतेदेशेस्थाप्यतेभृशदुःखिता॥चितांचंदनकाष्ठानांपद्मकौशेयसंवृतां॥ब्राह्मणांचोदयामासूरांकवास्तरसंवृतां
वर्त्ततेवेदविधिनाराज्ञोवैपश्चिमंक्रतु॥१३॥चक्रतूराक्षसेंद्रस्यपितृमेधमनुत्तमं॥वेदिंचदक्षिणाप्राचींयथास्थानंच
पावकं॥१४॥एषदाज्येनपूर्णेनस्रुचंसर्वेप्रचिक्षिपुः॥पादयोःशकटंप्रादादंतरूवौरूलूखलं॥१५॥दारुपात्राणिसर्वा
णिअरणिंचोत्तरारणिं॥दत्वातुतुमुलंचान्यंयथास्थानंविचक्रमुः॥१६॥शास्त्रदृष्टेनविधिनामहर्षिविहितेनच॥तत्रमेध्यं
पशुंहत्वाराक्षसेंद्रस्यराक्षसाः॥१७॥अनुस्तरणिकांराज्ञोघृताक्तांसमवेशयन्॥गंधैर्माल्यैरलंकृत्यरावणंदीनमानसाः॥
१८॥विभीषणसहायास्तेवस्त्रै[illegible]श्चविविधैरपि॥लाजैरवकिरंतिस्मवाष्पपूर्णमुखास्तदा॥१९॥सदद्दौपावकंतस्यविधियुक्तं
विभीषणः॥स्नात्वाचैवार्द्रवस्त्रेणतिलान्दर्भविमिश्रितान्॥२०॥उदकेनचसंमिश्रान्प्रदायविधिपूर्वकं॥प्रदायचोदकंत
स्मैमूर्ध्नीचैनंनमस्यच॥२१॥ताःस्त्रियोनुनयामाससांत्वमुक्त्वापुनःपुनः॥गम्यतामितिताःसर्वाविविशुर्नगरंततः॥२२॥प्रविशासु
चसर्वासुराक्षसीषुविभीषणः॥रामपार्श्वमुपागम्यतदातिष्ठद्विनीतवत्॥२३॥रामोपिसहसैन्येनससुग्रीवःसलक्ष्मणः॥हर्षं
लेभेरिपुंहत्वायथावृत्रंशतक्रतुः॥२४॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेचतुर्दशोत्तरशततमःसर्गः॥११४॥तेरावं
णवधंदृष्ट्वादेवगंधर्वदानवाः॥जग्मुस्तैस्तैर्विमानैःस्वैःकथयंतःशुभाकथाः॥१॥रावणस्यवधोघोरंराघवस्यपराक्रमं॥सुयुद्धं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

वानराणांचसुग्रीवस्यचमित्रतां॥२॥अनुरागंचवीर्यंचमारुतेर्लक्ष्मणस्यच॥कथयंतोमहाभागाःजग्मुर्हृष्टायथागतं॥३॥राघवो
पिरथंदिव्यमिंद्रदत्तंरथिप्रभं॥अनुज्ञायमहाबाहुर्मातलिंप्रत्यपूजयत॥४॥राघवेणाभ्यनुज्ञातोमातलिःशक्रसारथिः॥दि
व्यंतंरथमास्थायदिवमेवारुरोहस॥५॥तस्मिंस्तुदिवमारूढेसुरसारथिसत्तमे॥राघवःपरमप्रीतःसुग्रीवंपरिषस्वजे॥६॥प
रिष्वज्यचसुग्रीवंलक्ष्मणेनाभिचोदितः॥पूज्यमानोहरिश्रेष्ठैराजगामबलालयं॥७॥अब्रवीच्चतदारामःसमीपपरिवर्तिनं॥
सौमित्रिंसत्वसंपन्नंलक्ष्मणंदीप्ततेजसं॥८॥विभीषणमिमंसौम्यलंकायामभिषेचय॥अनुरक्तंचभक्तंचममचैवोपकारिणं
९॥एषनःपरमःकामोयदिमंरावणानुजं॥लंकायांसौम्यपश्येयमभिषिक्तंविभीषणं॥१०॥एवमुक्तस्तुसौमित्रीराघवेणमहात्म
ना॥तथेत्युक्त्वातुसंहृष्टःसौवर्णंघटमाददे॥११॥तंघटंवानरेंद्राणांहस्तेदत्वामनोजवान्॥आदिदेशमहासत्वान्समुद्रात्सलि
लानये॥१२॥अतिशीघ्रंततोगत्वावानरास्तेमहाबलाः॥आगतास्तज्जलंगृह्यसमुद्राद्वानरोत्तमाः॥१३॥ततस्तंकंघटंगृह्यसंस्था
प्यपरमासने॥घटेनतेनसौमित्रिरभ्यषिंचद्विभीषणं॥१४॥लंकायांराक्षसांमध्येराजानंरामशासनात्॥विधिनामंत्रदृष्टेनसुहृ
द्गणसमावृतं॥१५॥अभ्यषिंच्यतुधर्मात्माशुद्धात्मानंविभीषणं॥तस्यामात्याजहृषिरेभक्तायेचास्यराक्षसाः॥१६॥दृष्ट्वाभिषिक्तंलं
कायांराक्षसेंद्रंविभीषणं॥सतद्राज्यंमहत्प्राप्यरामदत्तंविभीषणः॥१७॥आजह्रुरर्थसंहृष्टाःपौरास्तस्मैनिशाचराः॥सतान्गृही

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

त्वादुर्धर्षोराघवायन्यवेदयत्॥१९॥मंगल्यंमंगलंसर्वलक्ष्मणायचवीर्यवान्॥कृतकार्यंसमृद्धार्थंदृष्ट्वारामोविभीषणं॥२०
॥प्रतिजग्राहतत्सर्वंतस्यैवप्रियकाम्यया॥ततःशैलोपमंवीरंप्राञ्जलिंपुरतःस्थितं॥२१॥अब्रवीद्राघवोवाक्यंहनूमंतंप्लवंग
मं॥अनुमान्यमहाराजमिमंसौम्यविभीषणं॥२२॥गच्छसौम्यपुरींलंकामनुज्ञाप्ययथाविधि॥प्रविश्यरावणगृहंविजयेनाभि
नंद्यच॥२३॥वैदेह्यामांकुशलिनंससुग्रीवंसलक्ष्मणं॥आचक्ष्वजयतांश्रेष्ठरावणंचमयाहतं॥२४॥प्रियमेतदुदाहृत्यमैथिल्या
स्त्वहरीश्वर॥प्रतिगृह्यचसंदेशमुपावर्तितुमर्हसि॥२५॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेपंचदशोत्तरशततमःसर्गः
॥१५॥इतिप्रतिसमादिष्टोहनूमान्मारुतात्मजः॥प्रविवेशपुरींलंकांपूज्यमानोनिशाचरैः॥१॥प्रविश्यचमहातेजारावणस्यनि
वेशनं॥ददर्शमृजयाहीनांसातंकामिवरोहिणीं॥२॥वृक्षमूलेनिरानंदांराक्षसीभिःपरिवृतां॥निभृतःप्रणतप्रह्वःसोभिगम्याभि
वाद्यच॥३॥दृष्ट्वातमागतंदेवीहनूमंतंमहाबलं॥तूष्णींमारुतिंतदादृष्ट्वास्मृत्वाप्रमुदिताभवत्॥४॥सौम्यंतस्यामुखंदृष्ट्वाहनूमा
न्मारुतात्मजः॥रामस्यवचनात्सर्वमाख्यातुमुपचक्रमे॥५॥वैदेहिकुशलीरामःससुग्रीवसलक्ष्मणः॥विभीषणसहायश्चहरी
णांसहितोबलैः॥६॥कुशलंत्वाहसिद्धार्थोहतशत्रुररिंदमः॥विभीषणसहायेनरामेणहरिभिःसह॥७॥निहतोरावणोदेवीलक्ष्
मणस्यनयेनच॥प्रियमाख्यामितेदेवित्वांचभूयःसभाजये॥८॥दिष्ट्याजीवसिधर्मज्ञजयोमेप्रतिगृह्यतां॥दृष्ट्वाचकुशलंरा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

मोवीरस्त्वारघुनंदन॥९॥अब्रवीत्परमप्रीतःकृतार्थेनांतरात्मना॥दिष्ट्यावर्द्धसिधर्मज्ञेमज्जयेनचसंयुगे॥१०॥लब्धोयंविजयःसी
तेत्वत्स्थाभगवतव्यथा॥रावणोनिहतःपापःसामात्यःससुतोमृधे॥११॥मयालब्धश्चनिर्द्रेणधृतेनतवनिर्जये॥प्रतिज्ञापालिता
देविबध्वासेतुंमहोदधौ॥१२॥संदेहोनचकर्तव्योवर्त्तेत्वाराक्षसालये॥विभीषणविधेयंहिलंकैश्वर्यमिदंकृतं॥१३॥तदाश्वसि
हिविश्वस्तास्वगृहेपरिवर्तते॥अयंचाभ्येतिसंहृष्टस्त्वद्दर्शनसमुत्सुकः॥१४॥एवमुक्त्वासमुत्पत्यसीताशशिनिभानना॥प्रह
र्षणावरुह्यासाव्याजहारनकिंचन॥१५॥अब्रवीच्चहरिश्रेष्ठःसीतामप्रतिजल्पतीं॥किंत्वंचिंतयसेदेविकिंचमांनाभिभाषसे॥
१६॥एवमुक्ताहनुमतासीताधर्मव्यवस्थिता॥अब्रवीत्परमप्रीताहर्षगद्गदयागिरा॥१७॥प्रियमेतदुपश्रुत्यभर्त्तुर्विजयसंश्रि
तं॥प्रहर्षवशमापन्नानिर्वाक्यास्मिक्षणांतरं॥१८॥नहिपश्यामिसदृशंचिंतयंतीप्लवंगम॥मत्प्रियाख्यानकस्येहतवप्रत्यभि
नंदनं॥१९॥नचपश्यामितत्सौम्यपृथिव्यामपिवानर॥सदृशंमत्प्रियानेतत्तवदातुंभवेत्समं॥२०॥हिरण्यंवासुवर्णंवारत्नानिवि
विधानिच॥राज्यंवात्रिपुलोकेषुनेतदर्हतिभाषितुं॥२१॥एवमुक्तस्तुवैदेह्याप्रत्युवाचप्लवंगमः॥प्रगृहीतांजलिर्वाक्यंसीताया
प्रमुखेस्थितः॥२२॥भर्त्तुःप्रियहितेयुक्तेभर्त्तुर्विजयकांक्षिणि॥स्निग्धमेवंविधंवाक्यंत्वमेवार्हसिभाषितुं॥२३॥नवैतद्वचनंसौम्यं
सारवत्स्निग्धमेवच॥रत्नौघाद्विविधाच्चापिदेवराज्याद्विशिष्यते॥२४॥अर्थतश्चमयाप्राप्तादेवराज्यादयोगुणाः॥हतशत्रुर्वि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

जयिनंरामंपश्यामिसुस्थितं॥२५॥तस्यतद्वचनंश्रुत्वामैथिलीजनकात्मजा॥ततःशुभतरंवाक्यमुवाचपवनात्मजं॥२६॥अ
तिलक्षणसंपन्नंमाधुर्यगुणभूषितं॥बुध्यात्वष्टांगयायुक्तंत्वमेवार्हसिभाषितुं॥२७॥श्लाघनीयोनिलस्यत्वंसुतःपरमधार्मि
क॥बलंशौर्यंश्रुतंसत्वंविक्रमौदार्यमुत्तमं॥२८॥तेजःक्षमाधृतिःस्थैर्यंविनीतत्वंनसंशयः॥एतेचान्येचबहवोगुणास्त्वय्ये
वशोभनाः॥२९॥अथोवाचपुनःसीतामसंभ्रांतोविनीतवत्॥प्रगृहीतांजलि[illegible]र्हर्षात्सीतायाःप्रमुखेस्थितः॥३०॥इमासुख
लुराक्षस्योयदित्वमनुमन्यसे॥हंतुमिच्छाम्यहंसर्वाःयाभिस्त्वंतर्जितापुरा॥३१॥क्लिश्यंतीपतिदेवांत्वामशोकवनिकांगतां॥घोर
रूपसमाचाराःक्रूराःक्रूरतरेक्षणाः॥३२॥राक्षस्योदारुणकथावरमेतत्प्रयच्छमे॥मुष्टिभिःपाणिभिःसर्वाश्चरणैश्चापिशोभने
३३॥इच्छामिविविधैर्घातैर्हंतुमेवासुदारुणा॥घोरैर्जानुप्रहारैश्चदर्शनानांचपातनैः॥३४॥कृंतनैःकर्णिनासानांकेशानांलुंच
नैस्तथा॥भृशंशुष्कमुखैश्चैवदारुणैर्लंघनैर्हतैः॥३५॥विभिन्नशंकुग्रीवासपार्श्वकै[illegible]श्चकलेवरैः॥निपात्यहंतुमिच्छामितववि
प्रियकारिणी॥३६॥एवंप्रकारैर्बहुभिर्विप्रकारैर्यशस्विनि॥हंतुमिच्छाम्यहंदेवितवैताःकृतकिल्बिषाः॥३७॥एवमुक्ताहनुमता
वैदेहीजनकात्मजा॥उवाचधर्मसहितंहनूमंतंयशस्वि[illegible]नी॥३८॥राजसंश्रयवश्यानांकुर्वतीनापराज्ञया॥विधेयानांचदासी
नांकःकुप्येद्वानरोत्तम॥३९॥भाग्यवैषम्ययोगेनपुराकृश्चरितेनच॥मयेतत्प्राप्यतेसर्वंस्वकृतंह्युपभुज्यते॥४०॥प्राप्तमंतुदशा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

योगान्मयैतदिति निश्चितं॥ दासीनां रावणस्याहं मर्षयामीह दुर्बला॥४७॥ आज्ञप्ता रावणेनैता राक्षस्यो मामतर्जयन्॥ हते तस्मि
न्न कुर्वीत तर्जनं वानरोत्तम॥४८॥ अयं माघ समीपे तु पुराणो धर्मसंहितः॥ ऋषिणा गीतः श्लोको लिखितं निबोध प्लवंगम॥४९॥ नर
ः पापमादत्ते परेषां पापकर्मणां॥ समयो रक्षितव्यस्तु संतश्चारित्रभूषणाः॥५०॥ पापानां वा शुभानां वध्यार्हाणां प्लवंगम॥ कार्यं कस
णमार्षेण न कश्चिन्नापराध्यति॥५१॥ लोकहिंसाविहाराणां राक्षसां कामरूपिणां॥ कुर्वतामपि पापानि नैवं कार्यं मनोभवं॥५२॥
एवमुक्तस्तु हनुमान् सीतया वाक्यकोविदः॥ प्रत्युवाच ततः सीतां रामपत्नीं यशस्विनीं॥५३॥ युक्तं रामस्य भवती धर्मपत्नी यश
स्विनी॥ प्रतिसंदिशमां देवि गमिष्ये यत्र राघवः॥५४॥ एवमुक्ता हनुमता वैदेही जनकात्मजा॥ अब्रवीद्द्रष्टुमिच्छामि भर्तारं वानरोत्त
म॥५५॥ तस्यास्तद्वचनं श्रुत्वा हनुमान् पवनात्मजः॥ हर्षयन्मैथिलीं वाक्यमुवाचेदं महाद्युतिः॥५६॥ पूर्णचंद्राननं रामं द्रक्ष्यस्या
र्थसलक्ष्मणं॥ स्थितमित्रं हतामित्रं शचीवत्रिदशेश्वरं॥५७॥ तामेवमुक्त्वा राजर्षिं सीतां साक्षादिव श्रियं॥ आजगाम महातेजा हनू
मान्यत्र राघवः॥५८॥ सपदि हरिवरस्ततो हनूमान् प्रतिवचनं जनकेश्वरात्मजायाः॥ कथितमकथयद्यथाक्रमेण त्रिदशवरस्य
तिमायराघवाय॥५९॥ इत्यार्षे श्रीरामायणे वाल्मीकीये युद्धकांडे षोडशोत्तरशततमः सर्गः॥११६॥ स उवाच महाप्राज्ञमभिगम्य
प्लवंगमः॥ रामं वचनमर्थज्ञो वरं सर्वधनुष्मतां॥१॥ यन्निमित्तोयमारंभः कर्मणां च फलोदयः॥ सीतां तां शोकसंतप्तां मैथिलीं दृष्टु

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi, Digitized by eGangotri

मर्हसि॥२॥साहि शोकसमाविष्टा बाष्पपर्याकुलेक्षणा॥मैथिली विजयं श्रुत्वा तत्र हर्षमुपागमत्॥३॥पूर्वकात्प्रत्ययाच्चाहमु
क्तो विश्वस्तया तया॥भर्तारं द्रष्टुमिच्छामि कृतार्थं सह लक्ष्मणं॥४॥एवमुक्तो हनुमता रामो धर्मभृतां वरः॥आगच्छत्सहसा ध्या
नमीषद्बाष्पपरिप्लुतः॥५॥सदीर्घमुष्णं निश्वस्य मेदिनीमवलोकयन्॥उवाच मेघसंकाशं विभीषणमुपस्थितं॥६॥दिव्यांगरागां
वैदेहीं दिव्याभरणभूषितां॥इहसीतां शिरःस्नातां उपस्थापय माचिरं॥७॥एवमुक्तस्तु रामेण त्वरमाणो विभीषणः॥प्रविश्यांतः
पुरं सीतां स्वाभिः स्त्रीभिरचोदयत्॥८॥ततः सीतां महाभागां दृष्ट्वोवाच विभीषणः॥मूर्ध्नि बद्धांजलिः श्रीमान् द्वितीयो राक्षसेश्वरः॥९
दिव्यांगरागा वैदेही दिव्याभरणभूषिता॥यानमारोह भद्रं ते भर्ता त्वां द्रष्टुमिच्छति॥१०॥एवमुक्तास्तु वैदेही प्रत्युवाच विभीषणं॥
अस्नाता द्रष्टुमिच्छामि भर्तारं राक्षसेश्वर॥११॥तस्यास्तद्वचनं श्रुत्वा प्रत्युवाच विभीषणः॥यथा हि रामो धर्मात्मा तत्तथा कर्तुमर्ह
सि॥१२॥तस्य तद्वचनं श्रुत्वा मैथिली पतिदेवता॥भर्तृभक्तिवृता साध्वी तथेति प्रत्यभाषत॥१३॥ततः सीतां शिरःस्नातां युवती
भिरलंकृतां॥महार्हाभरणोपेतां महार्हांबरधारिणीं॥१४॥आरोप्य शिबिकां दीप्तां पराद्धौवरसंवृतां॥राक्षसैर्बहुभिर्गुप्तां राज
हारविभीषणः॥१५॥सोऽभिगम्य महात्मानं ज्ञात्वापि ध्यानमास्थितं॥प्रणतश्च प्रहृष्टश्च प्राप्तां सीतां न्यवेदयत्॥१६॥तामागतामु
पश्रुत्य रक्षोगृहचिरोषितां॥हर्षादैन्यं च रोषश्च त्रयं राघवमाविशत्॥१७॥ततः पार्श्वगतां दृष्ट्वा सविमर्शं विचारयन्॥विभीषणमि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

दंवाक्यंप्रहृष्टोराघवोब्रवीत्॥१९॥राक्षसाधिपतेसौम्यनित्यंमद्विजयेरताविदेहीसंनिकर्षंमेशीघ्रंसमुपगच्छतु॥२०॥तस्यत
द्वचनंश्रुत्वाराघवस्यविभीषणः॥तूर्णमुत्सारणेयत्नंकारयामाससर्वतः॥२१॥कंचुकीस्त्रीविणस्तत्रेत्रझर्झरपाणयः॥उत्सा
रयंतःपुरुषास्तमंतात्परिचक्रमुः॥२२॥ऋक्षाणांवानराणांचराक्षसानांचसर्वशः॥वृंदान्युत्सार्यमाणानिदूरमुत्सस्रुस्ततः
२३॥तेषामुत्सार्यमाणानांसर्वेषांध्वनिरुत्थितः॥वायुनोद्धूतमानस्यसमुद्रस्येवनिस्वनः॥२४॥उत्सार्यमाणांस्तान्दृष्ट्वासमंता
ज्जातसंभ्रमान्॥राक्षिण्यात्तदमर्षाच्चवारयामासराघवः॥२५॥संरब्धश्चाब्रवीद्रामश्चक्षुषाप्रदहन्निव॥विभीषणंमहाप्राज्ञं
सोपालंभमिदंवचः॥२६॥किमर्थंमामनादृत्यक्रियतेयंत्वयाजनः॥निवर्तयैषामुद्योगंजनोयंस्वजनोममा॥२७॥नगृहाणिन
वस्त्राणिनप्राकारास्तिरस्कराः॥नदृश्याराजसत्कारावृत्तमावरणंस्त्रियः॥२८॥व्यसनेषुनकृच्छ्रेषुनयुद्धेनस्वयंवरे॥नक्रतौनवि
वाहेषुदर्शनंदूष्यतेस्त्रियः॥२९॥सेषायुद्धगताचैवकृच्छ्रेमहतिचस्थिता॥दर्शनेननदोषोस्यामत्समीपेविशेषतः॥३०॥तदान
यसमीपंमेशीघ्रमेनांविभीषण॥सीतापश्यतुमामेषासुहृद्गणवृतंस्थितं॥३१॥एवमुक्तस्तुरामेणसविमर्षोविभीषणः॥रामस्या
पानयत्सीतांसन्निकर्षंविनीतवत्॥३२॥ततोलक्ष्मणसुग्रीवौहनुमांश्चप्लवंगमः॥निशम्यवाक्यंरामस्यबभूवुर्व्यथिताभृ
शं॥३३॥कलत्रनिरपेक्षंतमिंगितैरस्यदारुणैः॥अशीतमिवसीतायांतर्कयंतिस्मराघवं॥३४॥लज्जयात्ववलिप्तंतीस्वेषुगात्रेषुमै

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

थिली॥ विभीषणेनानुगता भर्त्तारं साभ्यवर्त्तत॥३४॥ सावस्त्रसंरुद्धमुखी लज्जया जनसंसदि॥ रुरोदासाद्य भर्त्तारं मार्यपुत्रेति
भाषिणी॥३५॥ विस्मयाच्च प्रहर्षाच्च स्नेहाच्च पतिदेवता॥ उदैक्षत मुखं भर्त्तुः सौम्यं सौम्यतराननां॥३६॥ अथ संत्रणुदन्मनः
क्लमं सा सुचिरं दृष्टमुदीक्ष्य वैप्रियस्य॥ वदनमुदितपूर्णचंद्रकांतं विमलशशांकनिभाननातदासीत्॥३७॥ इत्यार्षे श्रीरा
मायणे वाल्मीकीये युद्धकांडे सप्तदशोत्तरशततमः सर्गः॥११७॥ तां तु पार्श्वे स्थितां प्रेक्ष्य रामः संप्रेक्ष्य मैथिलीं॥ हृदयांतर्गतं द्वे
षो व्याहर्तुमुपचक्रमे॥१॥ एषा सि निर्जिता भद्रे शत्रुं जित्वा मया रणे॥ पौरुषाद्यदनुष्ठेयं तदेतदुपपादितं॥२॥ गतोस्म्यमर्षण
स्यांतं धर्षणा संप्रमार्जिता॥ अवमानश्च शत्रुश्च मया युगपदुद्धृतौ॥३॥ अद्य मे पौरुषं दृष्टमद्य मे सफलः श्रमः॥ अद्य तीर्ण
प्रतिज्ञत्वात्प्रभवामीह चात्मनः॥४॥ या त्वं विरहितानीता चलच्चित्तेन रक्षसा॥ दैवसंपादितो दोषो मानुषेण मया जितः॥५॥ सं
प्राप्तमवमानं यस्तेजसा न प्रमार्जति॥ कस्तस्य पुरुषार्थोस्ति पुरुषस्यात्मतेजसः॥६॥ लंघनं च समुद्रस्य लंकायाश्च प्रमर्दनं
॥ सफलं तस्य च श्लाघ्यमद्य कर्म हनूमतः॥७॥ युद्धं विक्रमतश्चैव हितं मंत्रयतश्च नः॥ सुग्रीवस्य ससैन्यस्य सफलोद्य परि
श्रमः॥८॥ निर्गुणं भ्रातरं त्यक्त्वा योमास्त्वयमुपस्थितः॥ विभीषणस्य भक्तस्य सफलोद्य परिश्रमः॥९॥ इत्येवं वदतस्तस्य सीता
रामस्य तद्वचः॥ मृगीवोत्फुल्लनयना बभूवाश्रुपरिप्लुता॥१०॥ पश्यतस्तां तु रामस्य भूयः क्रोधोभ्यवर्धत॥ प्रभूताज्यावसिक्त

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

स्यपावकस्येव दीप्यतः ॥१०॥ तवध्वा भ्रुकुटीं च क्रोतिर्यक्प्रेक्षितलोचनः ॥ अब्रवी[illegible] तपुरुषं सीतां मध्ये वानररक्षसां ॥१०॥ यत्क
र्तव्यं मनुष्येण धर्षणा परिमार्जिता ॥ मया पितृतृप्तं सीतेशत्रुहस्तादमर्षणात् ॥१०॥ निर्जिता जीवलोकस्य तपसा भावितात्म
ना ॥ अगस्त्येन दुराधर्षा मुनिना दक्षिणे वदिक् ॥ विदितश्चास्तु भद्रं ते योयं रणपरिश्रमः ॥ सतीर्णः सुहृदां वीर्यान्नत्वदर्थं मया
कृतः ॥१०॥ रक्षता तु मया वृत्तमपवादेन सर्वशः ॥ प्रख्यातस्यात्मवंशस्य न्यंगं च परिरक्षता ॥१०॥ ग्राम्यचारित्रसंदेहात्मम प्रति
मुखे स्थिता ॥ दीपो नेत्रातुरस्येव प्रतिकूलासि मे दृढं ॥१०॥ तद्गच्छाद्य भ्यनुज्ञाता यथेष्टं जनकात्मजे ॥ एतादृशदिशो भद्रे कार्य
मस्ति न मे त्वया ॥१०॥ कः पुमान्हि कुले जातः स्त्रियं परगृहोषितां ॥ तेजस्वी पुनरादद्यात्सुहृत्त्वेन चेतसा ॥१०॥ रावणांके रि
क्लिष्टां दृष्टां दुष्टेन चक्षुषा ॥ कथं त्वां पुनरादद्यां कुलं व्यपदिशन्महत् ॥१०॥ तदर्थं निर्जिता मे त्वं यशः प्रत्याहृतं मया ॥ नास्ति
मे त्वयि विश्वासो यथेष्टं गम्यतामितः ॥१०॥ इति प्रत्याहृतं भद्रे मयैतत्कृतबुद्धिना ॥ लक्ष्मणे भरते वा त्वं कुरु बुद्धिं यथासुखं ॥१०
॥ सुग्रीवे वानरेंद्रे वा राक्षसेंद्रे विभीषणे ॥ निवेशय मनः सीते यथा वा सुखमात्मनः ॥१०॥ नहि त्वां रावणो दृष्ट्वा दिव्यरूपां मर
नोरमां ॥ मर्षयेत चिरं सीते स्वगृहे परिवर्तिनीं ॥१०॥ ततः प्रियार्हं श्रवणात्तदप्रियं प्रियादुपश्रुत्य चिरस्य मैथिली ॥ मुमोच वा
ष्पं सुभृशं प्रवेपिता गजेंद्रहस्ताभिहते व वल्लरी ॥१०॥ इत्यार्षे श्रीरामायणे वाल्मीकीये युद्धकांडे अष्टादशोत्तरशततमः०

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

११॥एवमुक्त्वा तु वैदेही परुषं रोमहर्षणं॥राघवेण सरोषेण भृशं व्यथिता भवत्॥१॥सा तदश्रुतपूर्वं हि जनेमहति मैथिली
श्रुत्वा भर्तृवचो रूक्षं लज्जया वनता भवत्॥२॥प्रभूविशत्येव गात्राणि स्वान्येव जनकात्मजा॥वाक्शरैस्तैः सशल्येव भृशं व्यथिता भवत्॥३॥ततो बाष्पपरिक्लिष्टं मार्जयंती स्वमाननं॥शनैर्नेदं हृदयावाचा भर्तारमिदमब्रवीत्॥४॥किं मामसदृशं वाक्यं
मीदृशं श्रोत्रदारुणं॥रूक्षं श्रावयसे वीर प्राकृतः प्राकृतामिव॥५॥न तथास्मि महाबाहो यथा त्वमवगच्छसि॥प्रत्ययं गच्छ मे स्वे
न चारित्रेण च ते शपे॥६॥पृथक्स्त्रीणां च चारेण ज्ञातिं त्वं परिशंकसे॥परित्यजेमां शंकां तु यदि ते हं परीक्षिता॥७॥यद्यहं गात्र
संस्पर्शं गतास्मि विवशा प्रभो॥कामकारो न मे तत्र दैवं तत्रापराध्यति॥८॥मदधीनं तु यत्तन्मे हृदयं त्वयि वर्त्तते॥पराधीनेषु
गात्रेषु [illegible] किं करिष्याम्यनीश्वरा॥९॥सहस्रं वृद्धभावाच्च संसर्गेण च मानदा॥यदहं तेन विज्ञाता हता तेनास्मि शाश्वते॥
१०॥प्रेषितस्तेन यदा वीरो हनूमान्वलोककः॥लंकास्थां त्वयाराम किमिदानीं विसर्जिता॥११॥प्रत्यक्षं वानरेंद्रस्य तद्वाक्यसम
नंतरं॥त्वया संत्यक्तया वीर त्यक्तं स्याज्जीवितं मया॥१२॥न वृथा ते श्रमो यं स्यात्संशयेन्यस्य जीवितं॥सुहृज्जनपरिक्लेशो न
चायं निष्फलस्तव॥१३॥त्वया तु नरशार्दूल क्रोधमेवानुवर्त्तता॥लघुनेव मनुष्येण स्त्रीत्वमेव पुरस्कृतं॥१४॥अपदेशेन जन
कादुत्पतिर्वसुधातलात्॥ममवृत्तं च वृत्तज्ञ बहुतेन पुरस्कृतं॥१५॥न त्वया पाणिरालम्भे ममनिष्पीडितः॥ममभक्तिं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

चरशीलंचसर्वंतेपृष्ठतःकृतं॥२६॥एवंब्रुवाणारुदतीबाष्पगद्गदभाषिणी॥अब्रवीलक्ष्मणंसीतादीनंध्यानपरंस्थितं॥२७॥
चितामेकुरुसौमित्रेज्वलनस्यास्यभेषजं॥मिथ्यापवादोपहतानाहंजीवितुमुत्सहे॥२८॥अप्री[illegible]तस्यगुणैर्भर्तुस्त्यक्तया
जनसंसदि॥यासमामेगतिर्गंतुंप्रवेक्ष्येहव्यवाहनं॥२९॥एवमुक्तस्तुवैदेह्यालक्ष्मणःपरवीरहा॥अमर्षवशमापन्नोरा
घवाननमैक्षत॥३०॥सविज्ञायततश्चिह्नंरामस्याकारसूचितं॥चितांचकारसौमित्रिर्मतेरामस्यवीर्यवान्॥३१॥अधोमुखं
ततोरामंशनैःकृत्वाप्रदक्षिणं॥उपासर्पतवैदेहीदीप्यमानंहुताशनं॥प्रणम्यदेवतेभ्यश्चब्राह्मणेभ्यश्चमैथिली॥बद्धांज
लिपुटाचेदमुवाचाग्निसमीपतः॥३२॥यथामेहृदयंनित्यंनापसर्पतिराघवात्॥तथालोकस्यसाक्षीमांसर्वतःपातुपावकः॥
३४॥यथामांशुद्धचारित्रांदुष्टांजानातिराघवः॥तथालोकस्यसाक्षीमांसर्वतःपातुपावकः॥३५॥कर्मणामनसावाचायथानातिच
रम्यहं॥राघवंसर्वधर्मज्ञंतथामांपातु[illegible]पावकः॥३६॥एवमुक्त्वातुवैदेहीपरिक्रम्यहुताशनं॥विवेशज्वलनंदीप्तंनिःसंगेनां
तरात्मना॥३७॥जनस्तुसुमहांस्तत्रबालवृद्धसमाकुलः॥ददर्शमैथिलींतत्रप्रविशंतींहुताशनं॥३८॥सतप्तनवहेमाभातप्त
कांचनभूषणा॥पपातज्वलनंदीप्तंसर्वलोकस्यसन्निधौ॥३९॥ददृशुस्तांविशालाक्षींपतंतींहव्यवाहनं॥सीतांसर्वाणिभू
तानिरुक्मवेदिनिभांतथा॥४०॥ददृशुस्तांत्रयोलोकादेवगंधर्वदानवाः॥रामांपतंतींनिरयेत्रिदिवादेवतामिव॥४१॥तस्या

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

मग्निविशंत्यांतुहाहेतिविपुलस्वनः॥रक्षसांवानराणांचसंबभूवाद्भुतोपमः॥२४॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्ध
कांडेएकोनविंशोत्तरशततमःसर्गः॥११९॥ततोहिदुर्मनारामःश्रुत्वैववदतांगिरः॥दध्यौमुहूर्तंधर्मात्मावाष्पव्याकुललो
चनः॥१॥ततोवैश्रवणोराजायमश्चाग्निसमप्रभः॥सहस्राक्षोमहेंद्रश्चवरुणश्चपरंतपः॥२॥यउर्ध्वनयनःश्रीमान्महादे
वोवृषध्वजः॥कर्त्तासर्वस्यलोकस्यब्रह्माब्रह्मविदांवरः॥३॥एतेसर्वेसमागम्यविमानैःसूर्यसन्निभैः॥आगम्यनगरींलंकाम
भिजग्मुश्चराघवं॥४॥ततःसहस्राभरणान्प्रगृह्यविपुलान्भुजान्॥अब्रुवंस्त्रिदशश्रेष्ठाराघवंप्राञ्जलिंस्थितं॥५॥कर्त्तास
र्वस्यलोकस्यश्रेष्ठोज्ञानवतांविभुः॥उपेक्षसेकथंसीतांपतंतींहव्यवाहने॥६॥कथंदेवगणश्रेष्ठमात्मानंनावबुध्यसे॥ऋतधा
मावसुःपूर्वंवसूनांत्वंप्रजापतिः॥७॥त्वंत्रयाणांहिलोकानांआदिकर्त्तास्वयंप्रभुः॥रुद्राणामष्टमोरुद्रसाध्यानामपिपंचमः॥८॥
अश्विनौचापितेकर्णौचंद्रसूर्यौचचक्षुषी॥अंतेचादौचभूतानांदृश्यसेत्वंपरंतप॥९॥उपेक्षसेचवैदेहींमानुषःप्राकृतोयथा
॥इत्युक्तोलोकपालैस्तैःस्वामीलोकस्यराघवः॥१०॥अब्रवीत्त्रिदशश्रेष्ठान्रामोधर्मभृतांवरः॥आत्मानंमानुषंमन्येरामंदश
रथात्मजं॥११॥योहंयस्यतश्चाहंभगवंस्तद्ब्रवीहिमे॥इतिब्रुवाणंकाकुत्स्थंब्रह्माब्रह्मविदांवरः॥१२॥अब्रवीच्छृणुमेरामसत्यं
सत्यपराक्रम॥भवान्नारायणोदेवःश्रीमांश्चक्रायुधःप्रभुः॥१३॥एकशृंगोवराहस्त्वंभूतभव्यसपत्नजित्॥अक्षरंब्रह्मसत्यंचम

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

ध्येचांतेचराघव॥१४॥लोकानांत्वंपरोधर्मोविष्वक्सेनश्चतुर्भुजः॥शार्ङ्गधन्वाहृषीकेशःपुरुषःपुरुषोत्तमः॥१५॥अजितःखड्ग।
धृग्विष्णुःकृष्णश्चैवबृहद्बलः॥सेनानीर्ग्रामणीःसत्यस्त्वंबुद्धिस्त्वंक्षमादमः॥१६॥प्रभवश्चाप्ययश्चत्वमुपेंद्रोमधुसूदनः॥इंद्रक
र्मामहेंद्रस्त्वंपद्मनाभोरणांतकृत्॥१७॥शरण्यंशरणंचत्वामाहुर्दिव्यामहर्षयः॥सहस्रशृंगोवेदात्मारातजिह्वःसहस्रदृक्
१८॥त्वंत्रयाणांहिलोकानामादिकर्तास्वयंप्रभुः॥सिद्धानामपिसाध्यानामाश्रयश्चासिपूर्वजः॥१९॥त्वंयज्ञस्त्वंवषट्कारस्त्व
मोंकारस्परात्परः॥प्रभवंनिधनंवातेनविदुःकोभवानिति॥२०॥दृश्यसेसर्वभूतेषुब्राह्मणेषुचगोषुच॥दिक्षुसर्वासुगगनेपर्वते
षुनदीषुच॥२१॥सहस्रचरणःश्रीमान्शतशीर्षःसहस्रदृक्॥त्वंधारयसिलोकानांवसुधांचसपर्वतां॥२२॥अंतेपृथिव्याःस
लिलेदृश्यसेत्वंमहोरगः॥त्रीँल्लोकान्धारयन्रामदेवगंधर्वदानवान्॥२३॥अहंतेहृदयंसौम्यजिह्वादेवीसरस्वती॥देवागा।
त्रेषुरोमाणिब्राह्मणानिर्मिताःप्रभो॥२४॥निमिषस्तेभवद्रात्रिरुन्मिषस्तेभवद्दिवा॥संस्कारास्तेभवन्वेदानैतदस्तित्वयावि
ना॥२५॥जगत्सर्वंशरीरंतेस्थैर्यंतेवसुधातलं॥अग्निःकोपःप्रसादस्तेसोमःश्रीवत्सलक्षणः॥२६॥त्वयालोकास्त्रयःकांताःपु
राणेविक्रमैस्त्रिभिः॥महेंद्रश्चकृतोराजाबलिंबध्वामहासुरं॥२७॥सीतालक्ष्मीर्भवान्विष्णुर्देवःकृष्णःप्रजापतिः॥वधार्थंरावण
स्यहप्रविष्टोमानुषींतनुं॥२८॥तदिदंनःकृतंकर्मत्वयाधर्मभृतांवर॥निहतोरावणोरामप्रहृष्टोदिवमाक्रम॥२९॥अमोघंव

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

लवीर्यतेनतेमोघाःपराक्रमः॥अमोघंदर्शनंरामनचमोघस्तवस्तव॥३०॥अमोघास्तेभविष्यंतिभक्तिमंतस्तुयेनरा॥येत्वां
देवंध्रुवंभक्ताःपुराणंपुरुषोत्तमं॥३१॥प्राप्नुवंतःसदाकामानिहलोकेपरत्रच॥इममार्षंस्तवंदिव्यमितिहासंपुरातनं॥३२
इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेविंशोत्तरशततमःसर्गः॥१२०॥एतच्छ्रुत्वाशुभंवाक्यंपितामहसमीरितं॥अंके
नादायवैदेहीमुत्पपातविभावसुः॥१॥विधूयाथचितांतांतुवैदेहींहव्यवाहनः॥उत्तस्थौमूर्तिमानाशुगृहीत्वाजनक
कात्मजां॥२॥तरुणादित्यसंकाशांतप्तकांचनभूषणां॥रक्तांबरधरांबालांनीलकुंचितमूर्धजां॥३॥अक्लिष्टमाल्याभरणां
तथारूपांमनस्विनीं॥ददौरामायवैदेहींमंकेकृत्वाविभावसुः॥४॥अब्रवीच्चतदारामंसाक्षीलोकस्यपावकः॥एषातेरामवै
देहीपापमस्यानविद्यते॥५॥नैववाचानमनसानानुध्यानान्नचक्षुषा॥सुवृत्तावृत्तशौंडीरनत्वामतिचचारह॥६॥रावणेनो
पनीतैषावीर्योत्सिक्तेनरक्षसा॥त्वयाविरहितादीनाविवशानिर्जनेवने॥७॥रुद्धांचांतःपुरेगुप्तांत्वच्चित्तांत्वत्परायणां॥रक्षि
तांराक्षसीसंघैर्विकृतैर्घोरदर्शनैः॥८॥प्र[illegible]लोभ्यमानांविविधंभर्त्स्यमानांचमैथिलीं॥नाचिंतयंततद्दुःखंत्वद्गतेनांतरात्मना
॥९॥विशुद्धभावांनिष्पापांप्रतिगृह्णीष्वराघव॥किंचिदभिधातव्यंमहमाज्ञापयामिते॥१०॥ततःप्रीतमनारामःश्रुत्वैवंवदतां
वरः॥दध्यौमुहूर्तंधर्मात्माहर्षव्याकुललोचनः॥११॥एवमुक्तोमहातेजाधृतिमान्दृढविक्रमः॥अब्रवीत्त्रिदशश्रेष्ठंरामोध

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

र्मभृतांवरः॥३२॥अवश्यंत्रिषुलोकेषुसीतापावनमर्हति॥दीर्घकालोषिताचेयंरावणांतःपुरेशुभा॥१३॥वालिशःखलुका
मात्मारामोदशरथात्मजः॥इतिवक्ष्यंतिमांसंतोजानकीमविशोध्यहि॥१४॥अनन्यहृदयोभक्तामच्चित्तपरिरक्षणी॥अहमप्य
वगच्छामिमैथिलीजनकात्मजां॥१५॥प्रत्ययार्थंतुलोकानांत्रयाणांसत्यसंश्रयः॥उपेक्षेस्मवैदेहींप्रविशंतींहुताशनं॥१६॥इ
मपिविशालाक्षीरक्षितांस्वेनतेजसा॥रावणोनानिवर्तेतवेलामिवमहोदधिः॥१७॥नहिशक्तःसुदुष्टात्मामनसापिचमैथि
लीं॥प्रधर्षयितुमप्राप्तांदीप्तामग्निशिखामिव॥१८॥नियमर्हतिचैश्वर्यंरावणांतःपुरेशुभा॥अनन्याहिमयासीताभास्करेण
प्रभायथा॥१९॥विशुद्धात्रिषुलोकेषुमैथिलीजनकात्मजा॥नहिहातुमियंशक्याकीर्तिरात्मवतायथा॥२०॥अवश्यंचमयाक
र्यंसर्वेषांवोवचोहितं॥स्निग्धानांलोकमान्यानामेवंचब्रुवतांहितं॥२१॥इत्येवमुक्त्वावचनंमहाबलाःप्रशस्यमानस्वकृतेनक
र्मणा॥समेत्यरामःप्रियया महारथःसुखंसुखार्होनुबभूवराघवः॥२२॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेएकोनवि
शोत्तरशततमःसर्गः॥१२९॥एतच्छ्रुत्वाशुभंवाक्यंराघवेणानुभाषितं॥इदंशुभतरंवाक्यंव्याजहारमहेश्वरः॥१॥पुष्कराक्षमहा
बाहोमहावक्षःपरंतप॥दिष्ट्याकृतमिदंकर्मत्वयाधर्मभृतांवर॥२॥दिष्ट्यासर्वस्यलोकस्यप्रवृद्धंदारुणंतमः॥अपवृत्तंत्वया
संघेरामरावणजंभयं॥३॥आश्वास्यभरतंदीनंकौसल्यांचयशस्विनीं॥कैकेयींचसुमित्रांचदृष्ट्वालक्ष्मणमातरं॥४॥प्राप्यरा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

ज्यमयोध्यांचनंदयित्वासुहृज्जनं॥इक्ष्वाकूणांकुलेवंशंस्थापयित्वामहाबल॥५॥इष्ट्वातुरगमेधेनप्राप्यचानुत्तमंयशः
ब्राह्मणेभ्योधनंदत्वात्रिदिवंगंतुमर्हसि॥६॥एषराजादशरथोविमानस्थःपितातव॥काकुत्स्थमानुषेलोकेगुरुस्तवमहा
यशाः॥७॥इंद्रलोकंगतःश्रीमान्त्वयापुत्रेणतारितः॥लक्ष्मणेनसहभ्रात्रात्वमेनमभिवादय॥८॥महादेववचःश्रुत्वाराघ
वःसहलक्ष्मणः॥विमानशिखरस्थस्यप्रणाममकरोत्पितुः॥९॥दीप्यमानंस्वयालक्ष्म्याविरजोंबरधारिणं॥लक्ष्मणेनस
हभ्रात्राददर्शपितरंप्रभुः॥१०॥हर्षेणमहताविष्टोविमानस्थोमहीपतिः॥प्राणैःप्रियतरंदृष्ट्वापुत्रंदशरथस्तदा॥११॥आरोप्यां
केमहाबाहुर्वरासनगतःप्रभुः॥बाहुभ्यांसंपरिष्वज्यततोवाक्यंसमाददे॥१२॥नमेस्वर्गोबहुमतःसमानश्चसुरर्षभैः
त्वयारामविहीनस्यसत्यंप्रतिशृणोमिते॥१३॥कैकेय्यायानिचोक्तानिवाक्यानिवदतांवर॥तवप्रव्रजनार्थानिस्थितानिहृ
दयेममा॥१४॥त्वांतुदृष्ट्वाकुशलिनंपरिष्वज्यसलक्ष्मणं॥अद्यदुःखाद्विमुक्तोस्मिनीहारादिवभास्करः॥१५॥तारितोहंत्वया
पुत्रसुपुत्रेणमहात्मना॥अष्टावक्रेणधर्मात्माकहोलोब्राह्मणोयथा॥१६॥इदानींचविजानामियथासौम्यसुरेश्वरैः॥वधार्थं
रावणस्यहपिहितंपुरुषोत्तमं॥१७॥सिद्धार्थारवलुकौसल्यायात्वांरामगृहंगतं॥वनान्निवृत्तंसंहृष्टाद्रक्षतेशत्रुसूदन॥१८॥
सिद्धार्थाःखलुतेरामनरायेत्वांपुरींगतं॥जलार्द्रमभिषिक्तंचद्रक्षंतेवसुधाधिपं॥१९॥अनुरक्तेनबलिनाशुचिनाधर्मचारिणा॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

इच्छेयं त्वामहं द्रष्टुं भरतेन समागतं ॥२०॥ चतुर्दश समाः सौम्य वने निर्यापितास्त्वया ॥ वसता सीतया सार्धं लक्ष्मणेन च धीमता ॥२१
निवृत्तवनवासोऽसि प्रतिज्ञा सफलाकृता ॥ कृतं कर्म यशः श्लाघ्यं प्राप्तं ते शत्रुसूदन ॥ भ्रातृभिः सह राज्यस्थो दीर्घमायुरवाप्नुहि
२२॥ इति ब्रुवाणं राजानं रामः प्रांजलिरब्रवीत् ॥ कुरु प्रसादं धर्मज्ञ कैकेय्या भरतस्य च ॥ सपुत्रां त्वां त्यजामीति यदुक्ता कैकेयी
त्वया ॥ सा शापः कैकेयीं घोरः सपुत्रां न स्पृशेत्प्रभो ॥२४॥ तथेति महाराजो रामं मुक्त्वा कृतांजलिं ॥ लक्ष्मणं च परिष्वज्य पुनर्वाक्य
मुवाच ह ॥२५॥ रामं शुश्रूषता भक्त्या वैदेह्या सह सीतया ॥ कृता मम महाप्रीतिः प्राप्तं धर्मफलं च ते ॥२६॥ धर्मं प्राप्स्यसि धर्मज्ञ यश
श्च विपुलं भुवि ॥ रामे प्रसन्ने स्वर्गोऽस्ति महिमानं तथैव च ॥२७॥ रामं शुश्रूषमाणं ते सुमित्रानंदवर्धन ॥ रामः सर्वस्य लोकस्य सुरेष्व
भिरतः सदा ॥२८॥ एते सेंद्रास्त्रयो लोकाः सिद्धाश्च परमर्षयः ॥ अभिगम्य महात्मानमर्चंति पुरुषोत्तमं ॥२९॥ एतत्तदुक्तमव्यग्रमक्ष
रं ब्रह्मनिर्मितं ॥ वेदानां हृदयं सौम्य गुह्यं रामः परंतप ॥३०॥ अवाप्तं धर्मचरणं यशश्च विपुलं त्वया ॥ तथोक्तं तु महाबाहुर्लक्ष्मणं
प्रांजलिं स्थितं ॥३१॥ उवाच राजा धर्मात्मा वैदेहीवचनं शुभं ॥ कर्तव्यो न तु वैदेहि मन्युस्त्यागमिमं प्रति ॥३२॥ रामेण त्वद्विशुद्ध्यर्थं
कृतमेतद्धितैषिणा ॥ न त्वं सुभ्रु समाधेया [illegible]पतिशुश्रूषणं प्रति ॥३३॥ अवश्यं तु मया वाच्यमेषते दैवतं परं ॥ इति प्रतिसमादिश्य
पुत्रौ सीतां तथा स्नुषां ॥३४॥ इदं लोकं विमानेन ययौ दशरथोज्वलन् ॥३५॥ इत्यार्षे श्रीरामायणे वाल्मीकीये युद्धकांडे द्वाविंशो

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नरशततमः सर्गः ॥१२२॥ प्रतिप्रयातेकाकुत्स्थे महेंद्रः पाकशासनः ॥ अब्रवीत्परमप्रीतो राघवं प्राञ्जलिस्थितं ॥१॥ अमोघं दर्शनं रा-
मतवास्माकं परंतप ॥ प्रीतियुक्ताः स्मतेनत्वं ब्रूहियन्मनसेच्छसि ॥२॥ एवमुक्तस्तुकाकुत्स्थः प्रत्युवाचकृतांजलिः ॥ लक्ष्मणेन
सहभ्रात्रासीतयाचापिभार्यया ॥३॥ यदिप्रीतिःसमुत्पन्नामयिसर्वसुरेश्वर ॥ वरयामिकुरुमेसत्यंवचनंवदतांवर ॥४॥ ममहेतो
पराक्रांतायेगतायमसादनं ॥ तेसर्वेजीवितंप्राप्यसमुत्तिष्ठंतुवानराः ॥५॥ मत्कृतेविप्रयुक्तायेपुत्रैर्दारैश्चवानराः ॥ तान्प्रीतम
नसःसर्वान्द्रष्टुमिच्छामिमानद ॥६॥ विक्रांताश्चापिशूराश्चनमृत्युंगणयंतिते ॥ कृतयत्नाविपन्नाश्चजीवयुस्तेसुरर्षभ ॥७॥
मत्प्रियेषुभिरक्ताश्चनमृत्युंगणयंतिते ॥ त्वत्प्रसादात्समेयुस्तेवरमेतमहंवृणे ॥८॥ निरुजान्निर्व्रणांश्चैवसंपन्नबलपौरुषा
न्गोलांगूलांस्तथैवर्क्षान्द्रष्टुमिच्छामिमानद ॥९॥ अकालेचापिमुख्यानिमूलानिचफलानिच ॥ नद्यश्चविमलास्तत्रतिष्ठेयु-
र्येत्रवानराः ॥१०॥ श्रुत्वातुवचनंतस्यराघवस्यमहात्मनः ॥ महेंद्रःप्रत्युवाचेदंवचनंप्रतिलक्षणं ॥११॥ महानयंवरस्तातस्त्वयो
क्तोरघुसत्तम ॥ द्विर्मयानोक्तपूर्वंचतस्मादेतद्भविष्यति ॥१२॥ समुत्तिष्ठंतुतेसर्वेयेहतायुधिराक्षसैः ॥ ऋक्षाश्चसहगोपुच्छैर्नि
कृतानवाहवः ॥१३॥ निरुजोनिर्व्रणाश्चैवसंपन्नबलपौरुषाः ॥ समुत्थास्यंतिहरयःसुप्तानिद्राक्षयेयथा ॥१४॥ सुहृद्भिर्बांधवैश्चैव
ज्ञातिभिःस्वजनेनच ॥ सर्वएवसमेष्यंतिसंयुक्ताःपरयामुदा ॥१५॥ अकालेपुष्पसबलाःफलवंतश्चपादपाः ॥ भविष्यंतिमहेष्वास

CC-0.Courtesy Shri K.S.Parihar, Librarian Government District Library Varanasi. Digitized by eGangotri

नद्यश्च सलिलायुताः॥ रघ्वासव्रणैः प्रथमं गात्रैर्निव्रणैः पुनः॥ ततः समुत्थिताः सर्वे सुखेव हरिपुंगवाः॥ १७॥ बभूवुर्वीनराः स
र्वे किं त्वेतदिति विस्मिताः॥ काकुत्स्थं परिपूर्णार्थं दृष्ट्वा सर्वे सुरोत्तमाः॥ १८॥ ऊचुस्ते प्रांजलिं रामं सहसीतं सलक्ष्मणं॥ गच्छायोध्या
मितो वीर विसर्जय च वानरान्॥ १९॥ मिथिलीं सांत्वयस्वैनामनुरक्तां तपस्विनीं॥ भ्रातरं भरतं पश्य त्वच्छोकाद्व्रतचारिणं॥ २०॥
शत्रुघ्नं च महात्मानं मातृः सर्वा परंतप॥ अभिषेचय मात्मानं पौरान्गत्वा प्रहर्षय॥ २१॥ एवमुक्तो तमामंत्र्य रामः सौमित्रिणा स
ह॥ विमानैः सूर्यसंकाशैर्हृष्टा जग्मुः सुरादिवं॥ २२॥ अभिवाद्य च काकुत्स्थः सर्वांस्तांस्त्रिदिवौकसः॥ लक्ष्मणेन सहभ्रात्रा वा
समाज्ञापयत तदा॥ २३॥ ततस्तु सा लक्ष्मणराम पालिता महाचमूर्हृष्टमनाय रास्विनी॥ श्रिया ज्वलंती विरराज सर्वतो निशाप्र
पीते वह्नीशीतरश्मिना॥ २४॥ इत्यार्षे श्रीरामायणे वाल्मीकीये युद्धकांडे त्रयोविंशोत्तरशततमः सर्गः॥ १२३॥ तां रात्रिमुषितं रा
मं सुखोषितमरिंदमं॥ अब्रवीत्प्रांजलिर्वाक्यं जयं दृष्ट्वा विभीषणः॥ १॥ स्नानानि चांगरागाणि वस्त्राण्याभरणानि च॥ चंदनानि च
माल्यानि दिव्यानि विविधानि च॥ २॥ अलंकारविदश्चैताः नार्यः पद्मदलेक्षणाः॥ उपस्थितास्त्वां विधिवत्स्नापयिष्यंति राघव॥ ३॥
एवमुक्तस्तु काकुत्स्थः प्रत्युवाच विभीषणं॥ हरीन्सुग्रीवमुख्यांस्त्वं स्नानेनाभिनिमंत्रय॥ ४॥ सतु ताम्यति धर्मात्मा ममहेतोः सुखो
चितः॥ सुकुमारो महाबाहुः कुमारः सत्यसंश्रयः॥ ५॥ तं विना कैकयीपुत्रं भरतं धर्मचारिणं॥ न मे स्नानं बहुमतं वस्त्रान्याभरणानि च

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

॥घ॥इत एव यथाक्षिप्रं प्रतिगच्छामि तां पुरीं॥अयोध्यामागतो ह्येष पंथाः परमदुर्गमः॥७॥एवमुक्तस्तु काकुत्स्थं प्रत्युवाच विभीषणः
अहं त्वां त्रापयिष्यामि तां पुरीं पार्थिवात्मज॥८॥पुष्पकं नाम भद्रं ते विमानं सूर्यसन्निभं॥मम भ्रातुः कुबेरस्य रावणेनाहृतं बलात्॥९॥
हृतं निर्जित्य संग्रामे कामगं दिव्यमुत्तमं॥त्वदर्थे पालितं चेदं तिष्ठत्यतुलविक्रम॥१०॥तदिदं मेघसंकाशं विमानमिह तिष्ठति॥ते
नयास्यमि यानेन त्वमयोध्यां गतज्वरः॥११॥अहं ते यद्यनुयात्रो यदि स्मरसि मे गुणान्॥वसतावदिह प्राज्ञ यद्यस्ति मयि सौहृदं
१२॥लक्ष्मणेन सह भ्रात्रा वैदेह्या चैव सीतया॥अर्चितः सर्वकामैस्त्वं ततो राम गमिष्यसि॥१३॥प्रीतियुक्तस्य विहितां ससैन्यः ससु
हृद्गणः॥सत्क्रियां राम मे तावद्गृहाणत्वमयोद्यतं॥१४॥प्रणयाद्बहुमानाच्च सौहृदेन च राघव॥प्रसादयामि प्रेष्यो हं नरवल्वाज्ञापय
यामि ते॥१५॥एवमुक्तस्तु रामः प्रत्युवाच विभीषणं॥रक्षसां वानराणां च सर्वेषां चोपशृण्वतां॥१६॥पूजितो हं त्वया वीर सा चिन्त्येन प
रंतप॥सर्वात्मना च चेष्टाभिः सौहृदेनोत्तमेन च॥१७॥नरवल्वेतन्न कुर्यां ते वचनं राक्षसेश्वर॥तं तु मे भ्रातरं द्रष्टुं भरतं त्वरते मनः॥१८॥मां
निवर्तयितुं योसौ चित्रकूटमुपागतः॥शिरसा याचितो यस्य वचनं न कृतं मया॥१९॥कौसल्यां च सुमित्रां च कैकेयीं च यशस्विनीं॥गु
रूंश्च सुहृदश्चैव पौरांश्च तनयैः सह॥२०॥उपस्थापयमे क्षिप्रं विमानं राक्षसेश्वर॥कृतकार्यस्य मे वासः कथं स्विदिह संमतः॥२१॥अ
नुजानीहि मां सौम्य पूजितोस्मि विभीषण॥मन्युर्न खलु कर्तव्यस्त्वरितं यान मानय॥२२॥राघवस्य वचः श्रुत्वा राक्षसेंद्रो विभीषणः॥तं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

विमानंसमादायतूर्णंप्रतिनिवर्तते॥२३॥ततःकांचनचित्रांगंवैडूर्यमणिविद्रुमं॥कूटागारैःपरिक्षिप्तंसर्वतोरजतप्रभं॥२४॥पांडु
राभिःपताकाभिर्ध्वजैश्चसमलंकृतं॥कांचनंकांचनैर्हर्म्यैर्हैमपद्मविभूषितैः॥२५॥प्रकीर्णकिंकणीजालैर्मुक्तामणिगवाक्षकं॥घं
टाजालैःपरिक्षिप्तंसर्वतोमधुरस्वनं॥२६॥तंमेरुशिखराकारंनिर्मितंविश्वकर्मणा॥बहुभिर्भूषितंहर्म्यैर्मुक्तारजतसंनिभैः॥२७
तलैःस्फटिकचित्रांगैर्वैडूर्यैश्चवरासनैः॥महार्हास्तरणोपेतैरुपपन्नंमहाधनैः॥२८॥उपस्थितमनाधृष्यंतद्विमानंमनोजवं
निवेदयित्वारामायतस्थौतत्रविभीषणः॥२९॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेविंशोत्तरशततमःसर्गः॥१२०॥उपस्थि
तंतुतंदृष्ट्वापुष्पकंपुष्पभूषितं॥अविदूरेस्थितंरामंप्रत्युवाचविभीषणः॥१॥सतुबद्धांजलिःप्रह्वोविनीतोराक्षसेश्वरः॥अब्रवी
त्त्वरयोपेतःकिंकरोमीतिराघवं॥२॥तमब्रवीन्महातेजालक्ष्मणस्योपशृण्वतः॥विमृश्यराघवोवाक्यमिदंस्नेहपुरस्कृतं॥३॥कृत
प्रयत्नकर्माणोविभीषणवनौकसः॥रत्नैरर्थैश्चवस्त्रैश्चविविधैश्चप्रपूजय॥४॥सहैभिरर्जितालंकानिर्जिताराक्षसेश्वरा॥हृष्टैःप्र
णभयंत्यक्त्वासंग्रामेष्वनिवर्त्तिभिः॥५॥तइमेकृतकर्माणःपूज्यतांसाधुवानराः॥धनंरत्नंप्रदानेनकर्मैषांसफलंकुरु॥६॥एवंसंमा
नितांश्चैतेनंद्यमानायथात्वया॥भविष्यंतिकृतज्ञेनानिवृत्ताहरियूथपाः॥७॥त्यागिनंसंगृहीतारंसानुक्रोशंयशस्विनं॥सर्वेत्वा
मभिगच्छंतिततःसंबोधयाम्यहं॥८॥हीनंरणिगुणैःसर्वैरभिहंतारमाहवे॥त्यजंतिनृपतिंसैन्याःसंविग्नास्तंनरेश्वरं॥९॥एवमुक्तस्तु

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

रामेणवानरास्तान्विभीषणः॥रत्नार्थसंविभागेनसर्वानेवान्वपूजयत्॥२०॥ततस्तान्पूजितान्दृष्ट्वारत्नैश्चहरियूथपान्॥आरुरो
हततोरामस्तद्विमानमनुत्तमं॥२१॥अंकेनादायवैदेहीं लज्जमानांयशस्विनीं॥लक्ष्मणेनसहभ्रात्राविक्रांतेनधनुष्मता॥२२॥अब्र
वीच्चविमानस्थःपूजयन्सर्ववानरान्॥सुग्रीवंचमहावीर्यंकाकुत्स्थसविभीषणं॥२३॥मित्रकार्यंकृतमिदंभवद्भिर्वानरोत्तमाः
अनुज्ञातामयासर्वेयथेष्टंप्रति[illegible]गच्छत॥२४॥यत्तुकार्यंवयस्येनसुहृदावापरंतप॥कृतंसुग्रीवतत्सर्वंभवताधर्मभीरुणा॥
२५॥किष्किंधांप्रतियास्याम्यसुखसैन्येनाभिसंवृतः॥स्वराज्येवसलंकायांमयादत्तेविभीषणः॥२६॥नत्वांधर्षयितुंशक्ताःसेंद्राअपि
दिवौकसः॥अयोध्यांप्रतियास्यामिराजधानींपितुर्मम॥२७॥अभ्यनुज्ञातुमिच्छामिसर्वांश्चामंत्रयामिवः॥एवमुक्तास्तुरामेणवानरा
स्तेमहाबलाः॥२८॥ऊचुःप्रांजलयेभूत्वाराक्षसश्चविभीषणः॥अयोध्यांगंतुमिच्छामःसर्वान्नयतुनोभवान्॥२९॥सुद्युक्ताविचरिष्या
मोवनानिनगराणिच॥दृष्ट्वात्वामभिषेकार्द्रेकौसल्यामभिवाद्यच॥३०॥अचिरेणागमिष्यामःस्वगृहान्नृपतेःसुत॥एवमुक्तस्तुधर्मा
त्मावानरैःसविभीषणैः॥३१॥अब्रवीद्राघवःश्रीमान्ससुग्रीवविभीषणान्॥प्रियात्प्रियतरंलब्धंयदहंससुहृज्जनः॥३२॥सर्वैर्भ
द्रैःसहितःप्रीतिंलप्स्येपुरींगतः॥क्षिप्रमारोहसुग्रीवविमानंवानरैःसह॥३३॥त्वमभ्यारोहसामात्योराक्षसेंद्रविभीषण॥ततस्त
त्पुष्पकंदिव्यंसुग्रीवःसहसेनया॥३४॥अध्यारोहततःश्रीमान्सामात्यसविभीषणः॥तेषुरूढेषुसर्वेषुकौबेरंपरमासनं॥३५॥राघवे

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

णाभ्यनुज्ञातमुत्पपातविहायसं॥ यथौतेनविमानेनहंसयुक्तेनभास्वता॥२१॥ प्रहृष्टश्चप्रतीतश्चबभौरामःकुबेरवत्॥ तेसर्वेवा
नरर्क्षाश्चराक्षसाश्चमहाबलाः॥२२॥ यथासुखमसंबाधंदिव्येतस्मिन्नुपाविशन्॥२३॥ इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकां
डेपंचविंशोत्तरशततमःसर्गः॥१२५॥ अनुज्ञातंतुरामेणतद्विमानमनुत्तमं॥ हंसयुक्तंमहानादमुत्पपातविहायसं॥१॥ पातयि
त्वाततश्चक्षुःसर्वतोरघुनंदनः॥ अब्रवीन्मैथिलींसीतांरामःशशिनिभाननां॥२॥ कैलासशिखराकारेत्रिकूटशिखरेस्थितां॥
लंकामीक्षस्ववैदेहिनिर्मितांविश्वकर्मणा॥३॥ एतदायोधनंपश्यमांसशोणितकर्दमं॥ हरीणांराक्षसानांचसीतेविशसनंमह
त्॥४॥ एषदत्तवरःशेतेप्रमाथीराक्षसेश्वरः॥ तवहेतोविशालाक्षिरावणोनिहतोमया॥५॥ कुंभकर्णोत्रनिहतःप्रहस्तश्चनिश
चरः॥ धूम्राक्षश्चात्रनिहतोवानरेणहनूमता॥६॥ विद्युन्मालीहतश्चात्रसुषेणेनमहात्मना॥ लक्ष्मणेनेंद्रजिच्चात्रराक्षसोनिह
तोरणे॥७॥ अंगदेनात्रनिहतोविकटोनामराक्षसः॥ विरूपाक्षस्तुदुष्प्रेक्षोमहापार्श्वमहोदरौ॥८॥ अकंपनश्चनिहतोबलिनोने
चराक्षसाः॥ त्रिशिराश्चातिकायश्चदेवांतकनरांतकौ॥९॥ युद्धोन्मत्तश्चमत्तश्चराक्षसप्रवरावुभौ॥ निकुंभश्चैवकुंभश्चकुंभक
र्णात्मजौबली॥१०॥ वज्रदंष्ट्रश्चदंष्ट्रश्चबहवोराक्षसाहताः॥ मकराक्षश्चदुर्धर्षोमयायुधिनिपातितः॥११॥ अकंपनश्चनिहतःशो
णिताक्षश्चवीर्यवान्॥ यूपाक्षश्चप्रजंघश्चनिहतौतौमहाहवे॥१२॥ विद्युज्जिह्वोत्रनिहतोराक्षसोभीमदर्शनः॥ यज्ञशत्रुश्चनिह

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

तःसुतघ्नश्चमहाबलः॥२३॥सूर्यशत्रुश्चनिहतोब्रह्मशत्रुस्तथापरः॥अत्रमंदोदरीनामभार्यातंपर्यदेवयत्॥२४॥सपत्नीनांसह
स्त्रेणसास्त्रेणपरिवारिता॥एतत्तुदृश्यतेतीर्थंसमुद्रस्यवरानने॥२५॥यत्रसागरमुत्तीर्यरात्रिमुषितावयं॥एषसेतुर्मयाबद्धःसा
गरेलवणार्णवे॥२६॥तवहेतोर्विशालाक्षिनलसेतुःदुरासदः॥पश्यसागरमक्षोभ्यंवैदेहीवरुणालयं॥२७॥अपारमभिगर्जं
तंशंखशुक्तिसमाकुलं॥हिरण्यनाभंशैलेंद्रंकांचनंपश्यमैथिलि॥२८॥विश्रमार्थंहनुमतोभित्वासागरमुत्थितः॥एतत्कुक्षौ
समुद्रस्यस्कंधावारनिवेशनं॥२९॥एतत्पवित्रंपरमंमहापातकनाशनं॥अत्रपूर्वंमहादेवःप्रसादमकरोद्विभुः॥३०॥अत्र
राक्षसराजोयमाजगामविभीषणः॥एषासादृश्यतेसीतेकिष्किंधाचित्रकानना॥३१॥सुग्रीवस्यपुरीरम्यायत्रवालीमयाहतः
अथदृष्ट्वापुरीसीताकिष्किंधांवालिपालितां॥३२॥अब्रवीत्प्रश्रितंवाक्यंरामंप्रणयसाध्वसा॥सुग्रीवःप्रियभार्याभिस्तारप्रभृ
तिभिर्नृप॥३४॥अन्येषांवानरेंद्राणांस्त्रिभिःपरिवृतात्वहं॥गंतुमिच्छेसहायोध्यांराजधानींत्वयासह॥३५॥एवमुक्तोथवैदेह्या
रघवःप्रत्युवाचतां॥एवमस्त्वितिकिष्किंधांप्राप्यसंस्थाप्यरघव॥३६॥विमानंप्रेक्ष्यसुग्रीवंवाक्यमेतदुवाचह॥ब्रूहिवानरराज
दूलसर्वान्वानरपुंगवान्॥३७॥स्त्रीभिःपरिवृतासर्वैस्त्वयोध्यांयातुसीतया॥तथात्वमेभिःसर्वाभिःस्त्रीभिःसहमहाबल॥३८॥अ
भित्वरस्वसुग्रीवगच्छामलवणाधिप॥एवमुक्तस्तुसुग्रीवोरामेणामिततेजसा॥३९॥वानराधिपतिश्रीमांस्तैश्चसर्वैःसमावृतः॥प्र

तां

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

प्रविश्यांतःपुरंशीघ्रंतारामुद्दीक्ष्यसोब्रवीत्॥३४॥प्रियेत्वंसहनारीणांवानराणांमहात्मनां॥राघवेणाभ्यनुज्ञातामैथिलीप्रि
यकाम्यया॥३५॥त्वरत्वमभिगच्छामोगृह्यवानरयोषितः॥अयोध्यांदर्शयिष्यामःसर्वादशरथस्त्रियः॥३६॥सुग्रीवस्यवचःश्रु
त्वातारासर्वांगशोभना॥आहूयचाब्रवीत्सर्वावानराणांतुयोषितः॥३७॥सुग्रीवेणाभ्यनुज्ञातागंतुंसर्वैश्चवानरैः॥ममचापिप्रियं
कार्यमयोध्यादर्शनेनच॥३८॥प्रवेशंचैवरामस्यपौरजानपदैःसह॥विभूतिंचैवसर्वासांस्त्रीणांदशरथस्यच॥३९॥तारयाचा
भ्यनुज्ञाताःसर्वावानरयोषितः॥नैपथ्यविधिपूर्वेणकृत्वाचापिप्रदक्षिणां॥४०॥अध्यारोहन्विमानंतत्सीतादर्शनकांक्षया॥ता
भिःसहोत्थितंशीघ्रंविमानंप्रेक्षराघवः॥४१॥ऋष्यमूकसमीपेतुवैदेहीपुनरब्रवीत्॥दृश्यतेसौमहाभीतेसविद्युदिवतोयदः॥
४२॥ऋष्यमूकोगिरिश्रेष्ठःकांचनैर्धातुभिर्वृतः॥अत्राहंवानरेंद्रेणसुग्रीवेणसमागतः॥४३॥समयश्चकृतःसीतेवधार्थेवालिनो
मया॥एषासादृश्यतेपंपानलिनीचित्रकानना॥४४॥त्वयाविहीनोयत्राहंविललापसुदुःखितः॥अस्यास्तीरेमयादृष्टाशबरी
धर्मचारिणी॥४५॥अत्रयोजनबाहुश्चकबंधोनिहतोमया॥दृश्यतेसौजनस्थानेसीतेश्रीमान्वनस्पतिः॥४६॥यत्रयुद्धमहद्भू
तंतवहेतोर्विलासिनि॥खरश्चनिहतःसंख्येदूषणश्चनिपातितः॥४७॥त्रिशिराश्चमहावीर्योमयाबाणैरजिह्मगैः॥जटायुश्चम
हातेजास्तवहेतोर्विलासिनि॥४८॥रावणेनहतोयत्रपक्षिणांप्रवरोबली॥एतत्तदाश्रमपदमस्माकंवरवर्णिनि॥४९॥पर्णशा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

लातथाचित्रादृश्यतेशुभदर्शने॥यत्रत्वंराक्षसेंद्रेणरावणेनहृताबलात्॥४६॥एषागोदावरीरम्याप्रसन्नःसलिलाशिवा
अगस्त्यस्याश्रमोह्येषदृश्यतेपश्यमैथिलि॥४७॥दीप्तश्चैवाश्रमश्चैषसुतीक्ष्णस्यमहात्मन॥वैदेहिदृश्यतेचासौशरभंगाश्र
मोमहान्॥४८॥उपयातःसहस्राक्षोयत्रशक्रःपुरंदरः॥एतेतेतापसावासादृश्यंतेतनुमध्यमे॥४९॥अत्रिःकुलपतिर्यत्रसूर्य
वैश्वानरप्रभः॥अत्रसीतेत्वयादृष्टातापसीधर्मचारिणी॥५०॥अस्मिन्देशेमहाकायोविराधोनिहतोमया॥असौसुतनुशैलेंद्र
श्चित्रकूटःप्रकाशते॥५१॥यत्रमांकैकयीपुत्रःप्रसादयितुमागत॥एषासायमुनादूरादृश्यतेचित्रकानना॥५२॥भरद्वाजाश्रमो
यत्रश्रीमानेषप्रकाशते॥एषात्रिपथगापुण्यादृश्यतेवरवर्णिनि॥५३॥नानाद्विजगणाकीर्णासंप्रपुष्पितकानना॥शृंगवेरपु
रंचैतद्गुहोयत्रसमागतः॥५४॥एषाचदृश्यतेसीतेसरयूर्यूपमालिनी॥नानातरुगणाकीर्णासप्रपुष्पितकानना॥५५॥एषाचदृ
श्यतेसीतेराजधानीपितुर्मम॥अयोध्यांकुरुवैदेहिप्रणामंपुनरागताः॥५६॥ततस्तेवानराःसर्वेराक्षसश्चविभीषणः॥उत्सवो
त्सवदृष्टुस्तांपुरींशुभकाननां॥५७॥ततस्तुतांपाडुरहर्म्यमालिनीं विशालकक्ष्यांगजवाजिसंकुलां॥पुरींमयोध्यांददृशुःप्लव
ंगमाःपुरींमहेंद्रस्ययथाऽमरावतीं॥५८॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेषाड्विंशोत्तरशततमःसर्गः॥१२६॥पूर्णेच
तुर्दशेवर्षेपंचम्यांलक्ष्मणाग्रजः॥भरद्वाजाश्रमंप्राप्यववंदेनियतंमुनिं॥१॥सोऽपृच्छदभिवाद्यैनंभरद्वाजंतपोधनं॥शृणोषिक

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

चिद्भगवन्सुभिक्षानामयंपुरे॥२॥कच्चित्सुयुक्तोभरतोजीवंत्यपिचमातरः॥एवमुक्तस्तुरामेणभरद्वाजोमहामुनिः॥३॥प्रत्युवाच
रघुश्रेष्ठंस्मितपूर्वंप्रहृष्टवत्॥आज्ञावशस्तेभरतोजटिलस्त्वांप्रतीक्षते॥४॥पादुकेतेपुरस्कृत्यसर्वंचकुशलंगृहे॥त्वांपुराचीर
वसनंप्रविशंतंमहावनं॥५॥स्त्रीतृतीयंच्युतंराज्यात्धर्मकामंचकेवलं॥पदातिंत्यक्तसर्वस्वंपितृनिर्देशकारणं॥६॥सर्वभो
गैःपरित्यक्तंस्वर्गच्युतमिवामरं॥दृष्ट्वातुकरुणापूर्वंममासीत्समितिंजया॥७॥कैकेयीवचनेयुक्तंवन्यमूलफलाशनं॥सांप्रतं
सुसमृद्धार्थंसमित्रगणबांधवं॥८॥समीक्ष्यविजितारिंचममाभूत्प्रीतिरुत्तमा॥सर्वंचसुखदुःखंतेविदितंममराघव॥९॥यत्त
याविपुलंप्राप्तंजनस्थानवधादिकं॥ब्राह्मणार्थेनियुक्तस्यरक्षतःसर्वतापसान्॥१०॥रावणेनहृताभार्यावभूवयमनिंदिता
मारीचदर्शनंचैवतस्योन्मथनमेवच॥११॥कबंधदर्शनंचैवपंपाभिगमनंतथा॥सुग्रीवेणचतेसख्यंयत्रवालीहतस्त्वया॥
१२॥मार्गणंचैववैदेह्याःकर्मवातात्मजस्यच॥विदितायाचवैदेह्यानलसेतुर्यथाकृतः॥१३॥यथावारीपितालंकाप्रहृष्टैर्हरियू
थपैः॥सपुत्रबांधवामात्यःसबलःसहवाहनः॥१४॥यथाचनिहतःसंख्येरावणोवरदर्पितः॥यथाचनिहतेतस्मिन्रावणेदेवकं
टके॥१५॥समागमश्चत्रिदशैर्यथादत्तश्चतेवरः॥सर्वंममैतद्विदितंतपसाधर्मवत्सल॥१६॥संपतंतिचमेशिष्याःप्रवृत्तास्यापु
रीमितः॥अहमप्यत्रतेदग्निवरंशस्त्रभृतांवर॥१७॥अर्घ्यंप्रतिगृह्णीदमयोध्यांश्वोगमिष्यसि॥तस्यतच्छिरसावाक्यंप्रतिगृह्य

राम

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नृपात्मजः॥१९॥बाढमित्येवसंहृष्टःश्रीमान्वरमयाचत॥अकालफलिनोवृक्षाःसर्वेचापिमधुस्रवाः॥१९॥फलान्यमृतगंधीनि
बहूनिविविधानिच॥भवंतुमार्गेभगवन्नूनयोध्यांप्रतिगच्छतः॥२०॥तथेतिचप्रतिज्ञातेवचनात्समनंतरं॥अभवन्पादपास्त
त्रस्वर्गपादपसन्निभाः॥२१॥निष्फलाफलिनश्चासन्विपुष्पाःपुष्पशालिनः॥शुष्काःसमग्रपत्रास्तेनगाश्चैवमधुस्रवाः॥२२॥सर्वे
तोयोजनास्तिस्रोगच्छतामभवंस्तदा॥ततःप्रहृष्टःप्लवगर्षभास्तेबहूनिदिव्यानिफलानिचैव॥कामादुपाश्नंतिसहस्रशस्तेमुदा
न्विताःस्वर्गजितोमुदेव॥२३॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेसप्तविंशोत्तरशततमःसर्गः॥१२७॥अयोध्यांतुसमालो
क्यचिंतयामासराघवः॥प्रियकामःप्रियंरामस्ततस्त्वरितविक्रमः॥१॥चिंतयित्वाततोदृष्टिंवानरेषुन्यपातयत्॥उवाचधीमां
स्तेजस्वीहनूमंत[redacted]प्लवंगमं॥२॥अयोध्यांत्वरितोगच्छशीघ्रंप्लवगसत्तम॥जानीहिकच्चित्कुशलीजनोनृपतिमंदिरे॥३॥शृंग
वेरपुरंप्राप्यगुहंगहनगोचरं॥निषादाधिपतिंब्रूहिकुशलंवचनान्मम॥४॥श्रुत्वातुमांकुशलिनमरोगंविगतज्वरं॥भविष्यतिगु
हःप्रीतःसममात्मसमःसखा॥५॥अयोध्यायाश्चतेमार्गंप्रवृत्तिंभरतस्यच॥निवेदयिष्यतिप्रीतोनिषादाधिपतिर्गुहः॥भरतस्तु
त्वयावाच्यःकुशलंवचनान्मम॥सिद्धार्थंरामसंमांतस्यसभार्यंसहलक्ष्मणं॥७॥हरणंचापिवैदेह्यारावणेनबलीयसा॥सुग्रीवेण
चसंवादंवालिनश्चवधंरणे॥८॥मैथिल्यन्वेषणंचैवयथाचाधिगतात्वया॥लंघयित्वामहांतोयमापगापतिमव्ययं॥९॥उपवा

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नंसमुद्रस्यसागरस्यचदर्शनं॥यथाचकारितःसेतुरावणश्चयथाहतः॥१९॥वरदानंमहेंद्रेणवरुणावरुणेनच॥महादेवप्रसा
दाच्चपित्रामसमागमं॥२०॥उपयातंचमांसौम्यभरतायनिवेदय॥सहराक्षसराजेनहरीणामीश्वरेणच॥२१॥जित्वाशत्रुगणान्
रामःप्राप्यचानुत्तमंयशः॥उपयातिसमृद्धार्थःसहमित्रैर्महाबलैः॥२२॥एतत्श्रुत्वायमाकारंभजतेभरतस्ततः॥सचतेवेदितव्य
स्यात्सर्वंयच्चापिमांप्रति॥२३॥ज्ञेयाःसर्वेचवृत्तांताभरतस्येंगितानिच॥तत्त्वेनमुखवर्णेनदृष्ट्याभाषितेनच॥२४॥सर्वंकामसमृ
द्धंहिहस्त्यश्वरथसंकुलं॥पितृपैतामहंराज्यंकस्मान्नावर्त्तयेन्मनः॥२५॥संगत्याभरतंश्रीमान्राज्येनाथ॥स्वयंभवेत्॥प्रशास्तुवसु
धांसर्वामखिलांरघुनंदनः॥२६॥तस्यबुद्धिंचविज्ञायव्यवसायंचवानर॥यावन्नदूरयाताःस्मःक्षिप्रमागंतुमर्हसि॥२७॥इतिप्रतिस
मादिष्टोहनूमान्मारुतात्मजः॥मानुषंधारयन्रूपमयोध्यांत्वरितोययौ॥२८॥अथोत्पपातवेगेनहनुमान्मारुतात्मजः॥गरुत्मानि
ववेगेनजिघृक्षन्नुरगोत्तमं॥२९॥लंघयित्वापितृपथंविहगेंद्रालयंशुभं॥गंगायमुनयोर्भ॥संसमतीत्यसमागमं॥३०॥शृंगिवेरपुरंप्रा
प्यगुहमासाद्यवीर्यवान्॥सवाचाशुभयाहृष्टोहनूमानिदमब्रवीत्॥३१॥सखातुतवकाकुत्स्थोरामःसत्यपराक्रमः॥ससीतासह
सौमित्रिःसत्वांकुशलमब्रवीत्॥३२॥पंचमीमद्यरजनीमुषित्वावचनान्मुनेः॥भरद्वाजाभ्यनुज्ञातंद्रक्ष्यस्यद्यैवराघवं॥३३॥एवमु
क्त्वामहातेजाःसंप्रहृष्टतनूरुहः॥उत्पपातमहावेगाद्वेगवानविचारयन्॥३४॥सोपश्यद्गामतीर्थंचनदींवालुकिनंतथा॥वरूथी

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

गोमतीं चैव भीमशालवनं तथा ॥२२॥ प्रजाश्च बहुसाहस्रीः स्फीतान् जनपदानपि ॥ संगत्वा दूरमध्वानं त्वरितः कपिकुंजरः ॥
आससाद द्रुमान् फुल्लान् नंदिग्रामसमीपगान् ॥ सुराधिपस्योपवने यथा चैत्ररथे द्रुमान् ॥२४॥ स्त्रीभिः सपुत्रैः पौत्रैश्च रममाणैः
स्वलंकृतैः ॥ कोशमात्रे त्वयोध्यायाश्चीरकृष्णाजिनांबरं ॥२५॥ ददर्श भरतं दीनं कृशमाश्रमवासिनं ॥ जटिलं मलदिग्धांगं भ्रा
तृव्यसनकर्शितं ॥२६॥ फलमूलाशिनं दांतं तापसं धर्मचारिणं ॥ समुन्नतजटाभारं वल्कलाजिनवाससं ॥२७॥ नियतं भाविता
त्मानं ब्रह्मर्षिसमतेजसं ॥ पादुके ते पुरस्कृत्य प्रशासंतं वसुंधरां ॥२८॥ चातुर्वर्ण्यं च लोकस्य त्रातारं सर्वतो भयात् ॥ उपस्थितम
मात्यैश्च शुचिभिश्च पुरोहितैः ॥२९॥ बलमुख्यैश्च युक्तैश्च काषायांबरधारिभिः ॥ नहि ते राजपुत्रं तं चीरकृष्णाजिनांबरं ॥३०॥ परिभो
कुं व्यवस्यति पौरा वै धर्मवत्सलाः ॥ तं धर्ममिव धर्मज्ञं देहवंतमिवापरं ॥३१॥ उवाच प्रांजलिर्वाक्यं हनूमान्मारुतात्मजः ॥ वसंतं दं
डकारण्ये त्वं चीरजटाधरं ॥३२॥ अनुशोचति काकुत्स्थं सत्वां कोसलमब्रवीत् ॥ प्रियमाख्यामि ते देव शोकं त्यज सुदारुणं ॥३३॥ अ
स्मिन्मुहूर्ते भ्रातात्वं रामेण सह संगतः ॥ निहत्य रावणं रामः प्रतिलभ्य च मैथिलीं ॥३४॥ उपयाति समृद्धार्थः सह मित्रैर्महाबलैः ॥ ल
क्ष्मणश्च महातेजा वैदेही च यशस्विनी ॥३५॥ सीता समग्रा रामेण महेंद्रेण शची यथा ॥ एवमुक्तो हनुमता भरतः कैकयीसुतः ॥
४०॥ पपात सहसा हृष्टो हर्षान्मोहमुपागमत् ॥ ततो मुहूर्तादुत्थाय प्रत्याश्वस्य च राघवः ॥४१॥ हनूमंतमुवाचेदं भरतः प्रियवादिनं ॥

यं

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

अशोकजैः प्रीतिमयैः कपिमालिंग्यसंभ्रमात्॥४२॥ सिषेच भरतः श्रीमान् विपुलैरश्रुबिंदुभिः॥ देवो वा मानुषो वा त्वमनुक्रोशा
दिहागतः॥४३॥ प्रियाख्यानस्य ते सौम्य ददामि ब्रुवतः प्रियं॥ गवां शतसहस्रं च ग्रामाणां च शतं परं॥४४॥ सकुंडलाः शुभाचा
रभार्याः कन्यास्तु षोडश॥ हेमवर्णाः सुनासोरुः शशिसौम्याननाः स्त्रियः॥४५॥ सर्वाभरणसंपन्नाः संपन्नाः कुलजातिभिः॥ निशम्य
रामागमनं नृपात्मजः कपिप्रवीरस्य तदाद्भुतोपमं॥ प्रहर्षितो राममदिदृक्षया भवत् पुनश्च हर्षादिदमब्रवीद्वचः॥४६॥ इत्यार्षे
श्रीरामायणे वाल्मीकीये युद्धकांडे अष्टविंशोत्तरशततमः सर्गः॥१२८॥ बहूनि नामवर्षाणि गतस्य सुमहद्वनं॥ शृणोम्यहं प्रीति
करं ममनाथस्य कीर्त्तनं॥१॥ कल्याणी वत गाथेयं लौकिकी प्रतिभाति मां॥ एतिजीवंतमानंदो नरं वर्षशतादपि॥२॥ राघवस्य हरी
णां च कथमासीत् समागमः॥ कस्मिन्देशे किमाश्रित्य तत्त्वमाख्याहि पृच्छतः॥३॥ सपृष्टो राजपुत्रेण वृद्धस्यांसमुपवेशितः॥ आचचक्षे
ततः सर्वं रामस्य चरितं वने॥४॥ यथा प्रव्राजितो रामो मातुर्दत्तवरेण वै॥ यथा च पुत्रशोकेन राजा दशरथो मृतः॥५॥ यथा दूतैस्त्व
मानीतस्तूर्णं राजगृहात् प्रभो॥ त्वया योध्याप्रविष्टेन यथा राज्यं न चेप्सितं॥६॥ चित्रकूटगिरिं गत्वा राज्येनामित्रकर्शनः॥ निमंत्रि
तस्त्वया भ्राता धर्ममाचरता सतां॥७॥ स्थितेन राज्ञो वचने यथा राज्यं विसर्जितं॥ भार्यस्य पादुके गृह्य यथासि पुनरागतः॥८॥ सर्व
मेतन्महाबाहो यथावद्विदितं तव॥ त्वयि प्रतिप्रयाते तु यद्वृत्तं तन्निबोध मे॥९॥ अपयाते त्वयि तदा समुद्भ्रांतमृगद्विजं॥ परिधू

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नमिवात्यर्थंतद्वनंसमपद्यत॥१०॥तद्वस्तिमृदितंघोरंसिंहव्याघ्रमृगाकुलं॥प्रविवेशाथविजनंसुमहद्दंडकावनं॥१०॥तेषांपुरस्ता
द्बलवान्गच्छतांगहनेवने॥विनदन्सुमहानादंविराधःप्रत्यदृश्यत॥१२॥तमुक्षिप्यमहानादमूर्ध्वबाहुमधोमुखं॥निरवातेप्र
क्षिपंतिस्मनदंतमिवकुंजरं॥१३॥तत्कृत्वादुष्करंकर्मभ्रातरौरामलक्ष्मणौ॥सायाह्नेशरभंगस्यरम्यमाश्रममीयतुः॥१४॥शरभं
गेदिवंप्राप्तेरामःसत्यपराक्रमः॥अभिवाद्यमुनीन्सर्वान्जनस्थानमुपागमत्॥१५॥पश्चाच्छूर्पनखानामरामपार्श्वमुपागता॥त
तोरामेणसंदिष्टोलक्ष्मणःसहसोत्थितः॥१६॥प्रगृह्यखड्गंचिच्छेदकर्णनासंमहाबलः॥चतुर्दशसहस्राणिजनस्थाननिवासिनां
॥१७॥हतानिवसतातत्रराघवेणमहात्मना॥एकेनसहसंगम्यरामेणरणमूर्धनि॥१८॥अद्भ्यश्चतुर्थभागेननिशेषाराक्षसाःकृताः॥
महाबलामहावीर्यास्तपसोविघ्नकारिणः॥१९॥निहताराघवेणाजौदंडकारण्यवासिनः॥राक्षसाश्चविनिष्पिष्टाःखरश्चनिहतो
रणे॥२०॥दूषणंचाग्रतोहत्वात्रिशिरास्तदनंतरं॥ततस्तेनार्दिताबालारावणंसमुपागता॥२१॥रावणानुचरोघोरोमारीचोनामरा
क्षसः॥लोभयामासवैदेहीभूत्वारत्नमयोमृगः॥२२॥सारामभब्रवीद्दृष्टावैदेहीगम्यतामिति॥अहोमनोहरःकांतआश्चर्योभ
विष्यति॥२३॥ततोरामोधनुष्पाणिर्मृगंतमनुधावति सतंजघानधावंतंशरेणानतपर्वणा॥२४॥अथसौम्यदशग्रीवोमृगयांया
तिराघवे॥लक्ष्मणेवापिनिष्क्रांतेप्रविवेशाश्रमंतदा॥२५॥ग्रहाहतरसासीतांग्रहःखेरोहिणीमिव॥प्रातुकामंततोयुद्धेहत्वागृ

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

ध्वंजदायुषं॥२६॥प्रगृह्य सहसा सीतां जगामाशु स राक्षसः॥ततस्त्वद्भुतसंकाशाः स्थिता पर्वतमूर्धनि॥२७॥सीतां गृहीत्वा गच्छं
तं वानराः पर्वतोपमाः॥ददृशुर्विस्मिताकारा रावणं राक्षसाधिपं॥२८॥ततः शीघ्र तरंगत्वा तद्विमानं मनोजवं॥आरुह्य सह
वैदेह्या पुष्पकं स महाबलः॥२९॥प्रविवेश ततो लंकां रावणो राक्षसेश्वरः॥तां सुवर्णपरिक्रांते शुभे महति वेश्मनि॥३०॥प्र
विश्य मैथिलीं वाक्यैः सांत्वयामास रावणः॥तृणवद्भाषितं तस्य तं च नैर्ऋतपुंगवं॥३१॥अचिंतयित्वा वैदेही शोकवनि
कां गता॥न्यवर्तत ततो रामो मृगं हत्वा तदा वने॥३२॥निवर्तमानः काकुत्स्थो दृष्ट्वा गृध्रं सविस्मयः॥गृध्रं हतं तदा दृष्ट्वा रामः प्रि
यतरं पितुः॥३३॥मार्गमाणस्तु वैदेहीं राघवः सह लक्ष्मणः॥गोदावरीमनुचरन् वनोद्देशांश्च पुष्पितान्॥३४॥आसेदतुर्महार
ण्ये कबंधं नाम राक्षसं॥ततः कबंधवचनाद्रामः सत्यपराक्रमः॥३५॥ऋष्यमूकं गिरिं गत्वा सुग्रीवेण समागतः॥ततः समागमः
पूर्वं प्रीत्या हार्द्दो मजायत॥३६॥भ्रात्रा निरस्तः क्रुद्धेन सुग्रीवो वालिना पुरा॥इतरेतरसंवादात्प्रगाढाः प्रणयस्तयोः॥३७॥रामः स्ववा
हुवीर्येण स्वराज्यं प्रत्यपादयत्॥वालिनं समरे हत्वा महाकायं महाबलं॥३८॥सुग्रीवः स्थापितो राज्ये सहितः सर्ववानरैः॥रामाय
प्रतिजानीते राजपुत्र्यास्तु मार्गणं॥३९॥आदिष्टा वानरेंद्रेण सुग्रीवेण महात्मना॥दशकोट्यः प्लवंगानां सर्वाः प्रस्थापिता दिशः॥तेषां
नो विप्रनष्टानां विंध्ये पर्वतसत्तमे॥भृशं शोकाभितप्तानां महान्कालोत्यवर्तत॥४०॥भ्राता तु गृध्रराजस्य संपातिर्नाम वीर्यवान्

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

समाख्यातिस्मवसंतीसीतांरावणमंदिरे॥४२॥सोहंदुःखपरीतानांदुःखंतज्ज्ञातिनांनुदन्॥आत्मवीर्यंसमास्थायप्रयोजनानांश
तंश्रुतः॥४३॥तत्राहमेकामद्राक्षमशोकवनिकांगतां॥कौशेयवस्त्रांमलिनांनिरानंदांदृढव्रतां॥४४॥तयासमेत्यविधिवत्पृष्टा
सर्वमनिंदितां॥अभिज्ञानंमयादत्तंरामनामांगुलीयकं॥४५॥अभिज्ञानंमणिंलब्ध्वाचरितार्थोहमागतः॥मयाचपुनरागम्यराम
स्याक्लिष्टकर्मणः॥अभिज्ञानंमयादत्तमर्चिष्मान्महामणिः॥श्रुत्वातांमैथिलींरामस्त्वांशशंसोचजीवितं॥४७॥जीवितांत
मनुप्राप्तःपीत्वामृतमिवातुरः॥उद्योजयिष्यतुद्योगंदध्रेलंकावधेमनः॥४८॥जिघांसुरिवलोकांतेसर्वांल्लोकान्विभावसुः॥ततः
समुद्रमासाद्यनलंसेतुमकारयत्॥४९॥अतरत्कपिवीराणांवाहिनीतेनसेतुना॥प्रहस्तमवधीन्नीलःकुंभकर्णंतुराघवः॥५०॥
लक्ष्मणोरावणसुतंस्वयंरामस्तुरावणं॥सशक्रेणसमागम्ययमेनवरुणेनच॥५१॥महेश्वरस्वयंभूभ्यांतथादशरथेनच॥तैश्च
दत्तवरःश्रीमानृषिभिश्चसमागतैः॥५२॥सुरर्षिभिश्चकाकुत्स्थोवरांल्लेभेपरंतपः॥सतुदत्तवरःश्री[illegible]त्यावानरैश्चसमागतः॥५३॥
पुष्पकेणविमानेनकिष्किंधामभ्युपागमत्॥तांगंगांपुनरासाद्यवसंतंमुनिसंनिधौ॥५४॥अविघ्नंपुष्पयोगेनश्वोरामंदृष्टुमर्हसि॥
ततःसवाक्येमधुरैर्हनूमतोनिशम्यहृष्टोभरतःकृतांजलिः॥उवाचवाणींमनसःप्रहर्षणींचिरस्यपूर्णाःखलुमेमनोरथाः॥
५५॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेएकोनत्रिंशोत्तरशततमःसर्गः॥१२९॥श्रुत्वातुपरमानंदंभरतःसत्यविक्रमः॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

हृष्टमाज्ञापयामासशत्रुघ्नंपरवीरहा॥५॥विष्टीरनेकसाहस्रीश्चोदयामाससवीर्यवान्॥समीकुरुतनिम्नानिविषमाणिसमानिच॥
घ॥स्थानानिचनिरस्यंतांनंदिग्रादितःपरं॥सिंचंतुपृथिवींकृत्स्नांहिमशीतेनवारिणा॥७॥ततोभ्यवकिरंत्वन्येलाजैःपुष्पैश्चसर्वतः
समुच्छ्रितपताकास्तुरथ्याःपुरवरोत्तमे॥८॥शोभयंतुचवेश्मानिसूर्यस्योदयनंप्रति॥स्रग्दाममुक्तपुष्पैश्चसुवर्णरजतैरपि॥९॥राज
मार्गमसंबाधंकिरंतुशतशोनराः॥ततस्तच्छासनंश्रुत्वाशत्रुघ्नस्यमुदान्विताः॥१०॥धृष्टिर्जयंतोविजयःसिद्धार्थश्चार्थसाधकः॥अ
शोकोमंत्रपालश्चसुमंत्रश्चापिनिर्ययुः॥११॥मत्तैर्नागसहस्रैश्चसध्वजैःसुविभूषितैः॥अपरैर्हेमकक्ष्याभिःसगजाभिःकरेणुभिः॥१२॥
निर्ययुस्तुरगाक्रांतारथैश्चसुमहारथाः॥शक्त्यृष्टिपाशहस्तानांसध्वजानांपताकिनां॥१३॥तुरगाणांसहस्रस्यमुख्यैर्मुख्यतमान्वि
तैः॥पदातीनांसहस्रैश्चवीराःपरिवृतायययुः॥१४॥ततोयानान्युपारूढाःसर्वादशरथस्त्रियः॥कौसल्यांप्रमुखेकृत्वासुमित्राचा
पिनिर्ययुः॥१५॥द्विजातिमुख्यैर्धर्मात्माश्रेणीमुख्यैस्तथैवच॥माल्यमोदकहस्तैश्चमंत्रिभिर्भरतोवृतः॥१६॥शंखभेरीनिनादैश्चबं
दिभिश्चाभिनंदितः॥पादुकेतेगृहीत्वातुशिरसाधर्मकोविदः॥१७॥पांडुरंछत्रमादायशुक्लमाल्योपशोभितं॥शुक्लेचवालव्यजनेरा
जार्हेहेमभूषिते॥१८॥उपवासकृशोदीनश्चीरकृष्णाजिनांबरः॥भ्रातुरागमनंश्रुत्वातत्पूर्वंहर्षमागतः॥१९॥प्रत्युद्ययौतदारामंमहात्मा
सचिवैःसह॥अश्वानांखुरशब्दैश्चरथनेमिस्वनेनच॥२०॥शंखदुंदुभिनादेनसंचचालेवमेदिनी॥गजानांबृंहितैश्चापिशंखदुंदुभि

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

निस्वनैः॥२१॥कृत्स्नंतुनगरंतत्तुनंदिग्रामसुपागमत्॥समीक्ष्यभरतोक्यमुवाचपवनात्मजं॥कच्चिन्नखलुकापेयीसेव्यतेचलचि
त्तता॥नहिपश्यामिकाकुत्स्थरामसार्थेपरंतप॥२३॥कच्चिन्नचानुदृश्यंतेकपयःकामरूपिणः॥अथैवमुक्तेवचनेहनूमानिद
मब्रवीत्॥२४॥अर्थ्यंविज्ञापयन्नेवभरतंसत्यविक्रमं॥सदाफलान्कुसुमितान्वृक्षान्प्राप्यमधुस्रवान्॥२५॥भरद्वाजप्रसादेन
मत्तभ्रमरनादितान्॥तस्यचैषवरोदत्तोवासवेनपरंतप॥२६॥ससैन्यस्यतदातिथ्यंकृतंसर्वगुणान्वितं॥निस्वनःश्रूयतेभीमप्र
हृष्टानांवनौकसां॥२७॥मन्येवानरसेनासानदीतरतिवालुकां॥रजोवर्षसमुद्भूतंपश्यसालवनंप्रति॥२८॥मन्येसालवनंरम्यं
लोलयंतिप्लवंगमाः॥तदेतद्दृश्यतेदूराद्विमानंचंद्रसंनिभं॥२९॥विमानंपुष्पकंदिव्यमनसाब्रह्मनिर्मितं॥रावणंबांधवैःसार्धं
हत्वालब्धंमहात्मना॥३०॥तरुणादित्यसंकाशंविमानंरामवाहनं॥धनदस्यप्रसादेनदिव्यमेतन्मनोजवं॥३१॥एतस्मिन्भ्रातरौवी
रौवैदेह्यासहराघवौ॥सुग्रीवश्चमहातेजाराक्षसश्चविभीषणः॥३२॥ततोहर्षसमुद्भूतोनिस्वनोदिवमस्पृशत्॥स्त्रीबालयुववृद्ध
नांरामोयमितिकीर्तिते॥३३॥पृथक्कुंजरवाजिभ्यस्तेवतीर्यमहींगताः॥ददृशुस्तंविमानस्थंनरा॥रासोमभिवांबरे॥३४॥प्रांजलिर्भरतो
भूत्वाप्रहृष्टोराघवो[illegible]मुखः॥स्वागतेनार्घपाद्याद्यैस्ततोराममपूजयत्॥३५॥मनसाब्रह्मणासृष्टेविमानोभरताग्रजः॥रराजपृथु
दीर्घाक्षोवज्रपाणिरिवामरः॥३६॥ततोविमानाग्रगतंभरतोभ्रातरंतदा॥ववंदेप्रणतोराममेरुस्थमिवभास्करं॥३७॥ततोरामाभ्य

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नुज्ञातंतद्विमानमनुत्तमं॥हंसयुक्तंमहावेगंनिपपातमहीतलं॥३७॥आरोपितोविमानंतद्भरतःसत्यविक्रमः॥राममासाद्यमु
दितःपुनरेवाभ्यवादयत्॥३८॥तंसमुत्थायकाकुत्स्थश्चिरस्याक्षिपथंगतं॥अंकेभरतमारोप्यमुदितःपरिषस्वजे॥३९॥ततोलक्ष्म
णमासाद्यवैदेहीचपरंतपः॥अथाभ्यवादयत्प्रीतोभरतोनामचाब्रवीत्॥४०॥सुग्रीवंकैकयीपुत्रोजांबवंतमथांगदं॥मैंदंचद्विवि
दंनीलमृषभंचैवसस्वजे॥४१॥सुषेणंचनलंचैवगवाक्षंगंधमादनं॥शरभंपनसंचैवपरितःपरिषस्वजे॥४२॥तेकृत्वामानुषंरू
पंवानराःकामरूपिणः॥कुशलंपर्यपृच्छंस्तेप्रहृष्टाभरतंतदा॥४३॥अथाब्रवीद्राजपुत्रःसुग्रीवंवानरर्षभं॥परिष्वज्यमहातेजा
भरतोधर्मिणांवरः॥४४॥त्वमस्माकंचतुर्णांवैभ्रातासुग्रीवपंचमः॥सौहृदाज्जायतेमित्रमपकारोरिलक्षणा॥४५॥विभीषणंचभ
रतःसांत्ववाक्यमथाब्रवीत्॥दिष्ट्यात्वयासहायेनकृतंकर्मसुदुष्करं॥४६॥शत्रुघ्नश्चतदाराममभिवाद्यसलक्ष्मणं॥सीतायाश्चरणौ
वीरोविनयादभ्यवादयत्॥४७॥रामोमातरमासाद्यविवर्णांशोककर्शितां॥जयाहृष्टमणतःपादौमनोमातुःप्रहर्षयन्॥४८॥अभिवाद्य
सुमित्रांचकैकेयींचयशस्विनी॥समातृश्चततःसर्वाःपुरोहितमुपागमत्॥४९॥स्वागतंतेमहाबाहोकौसल्यानंदवर्धन॥इतिप्रांज
लयःसर्वेनागरैराममब्रुवन्॥५०॥तान्प्रांजलिसहस्राणिप्रगृहीतानिनागरैः॥आकाशनीवपद्मानिददर्शभरताग्रजः॥५१॥पादुकेते
रामस्यगृहीत्वाभरतःस्वयं॥चरणाभ्यांनरेंद्रस्ययोजयामासधर्मवित्॥५२॥अब्रवीच्चतदारामंभरतःसकृतांजलिः॥एतत्तेसक॰

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

लंराज्यन्यासंनिर्यातितंमया॥५४॥अद्यजन्मकृतार्थंमेसंवृत्तश्चमनोरथः॥यत्त्वांपश्यामिराजानमयोध्यांपुनरागतं॥५५॥अवेक्षतांभ
वान्कोशंकोष्ठागारंगृहंबलं॥भवतस्तेजसासर्वंकृतंदशगुणंमया॥५६॥तथाब्रुवाणंभरतंदृष्ट्वातंभ्रातृवत्सलं॥मुमुचुर्वानरा
वाष्पंराक्षसश्चविभीषणः॥५७॥ततःप्रहर्षाद्भरतमंकमारोप्यराघवः॥ययौतेनविमानेनससैन्योभरताश्रमं॥५८॥भरताश्रममा
साद्यससैन्योराघवस्तदा॥अवतीर्यविमानाग्राद्वनस्थेमहीतले॥५९॥अब्रवीत्तुतदारामस्तद्विमानमनुत्तमं॥वहवैश्रवणंदेवम
नुजानामिगम्यतां॥६०॥ततोरामाभ्यनुज्ञातंतद्विमानमनुत्तमं॥उत्तरांदिशमुद्दिश्यजगामधनदालयं॥६१॥विमानंपुष्पकंदिव्यंस
गृहीतंतुरक्षसा॥अगमद्गुनदंवेगाद्रामवाक्यप्रचोदितं॥६२॥पुरोहितस्यात्मसमस्यराघवोबृहस्पतेःशक्रइवामराधिपः॥निषीद्य
पादौपृथगासनेशुभेसहैवतेनोपविवेशवीर्यवान्॥६३॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेमधुसितपक्षषष्ठ्यामभिराम
रामभरतसमागमेसरामानुमित्रवर्गसहितस्यरामस्यभरताश्रमप्रवेशोनामत्रिंशोत्तरशततमःसर्गः॥१३०॥शिरस्यंजलिमाधाय
कैकेय्यानंदवर्धनः॥बभाषेभरतोज्येष्ठंरामंसत्यपराक्रमं॥१॥पूजितामामिकामातादत्तंराज्यमिदंमम॥तद्ददामिपुनस्तुभ्यंयथात्व
मददाःमम॥२॥मधुरमेकाकिनान्यस्तामृषभेणबलीयसा॥किंशोरीवगुरुंभारंनवोढुमहमुत्सहे॥३॥वारिवेगेनमहताभिन्नसेतु
रिवक्षरन्॥दुर्बंधनमिदंमन्येराज्यछिद्रमसंवृतं॥४॥गतिंखरइवाश्वस्यहंसस्येववचवायसः॥नान्वेतुमुत्सहेवीरतवमार्गमरिंद

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

मा॥८॥यथाचारोपितवृक्षोजातनिवेशने॥महानपिदुरारोहोमहास्कंधःप्रशाखवान्॥९॥शीर्यतपुष्पितोभूत्वानफलानिप्रद
र्शयन्॥तस्यनानुभवेदर्थंयस्यहेतोःसरोपितः॥१०॥एषोपमामहाबाहोत्वमर्थंवेत्तुमर्हसि॥यद्यस्मान्मज्जेनुद्रत्वंभर्तीभृत्यान्
शाधिहि॥११॥जगदद्याभिषिक्तंत्वामनुपश्यतुराघव॥प्रतपंतमिवादित्यंमध्याह्नेदीप्ततेजसं॥१२॥तूर्यसंघातनिर्घोषैःकांचीनू
पुरनिस्वनैः॥मधुरैर्गीतशब्दैश्चप्रतिबुध्यस्वरोचय॥१३॥यावदावर्त्ततेचक्रंयावतीचवसुंधरा॥तावत्त्वमिहलोकस्यस्वा
मित्वमनुवर्त्तय॥१४॥भरतस्यवचःश्रुत्वारामःपरपुरंजयः॥तथेतिप्रतिजग्राहनिषसादासनेशुभे॥१५॥ततःशत्रुघ्नवचना
न्निपुणाःश्मश्रुवर्धनाः॥सुखहस्ताःसुशीघ्राश्चराघवंपर्यवारयन्॥१६॥पूर्वंतुभरतेस्नातेलक्ष्मणेचमहाबले॥सुग्रीवेवान
रेंद्रेचराक्षसेंद्रेविभीषणे॥१७॥विशोधितजटःस्नातश्चित्रमाल्यानुलेपनः॥महार्हवसनोपेतस्तस्थौतत्रश्रियाज्वलन्॥१८॥प्र
तिकर्मचरामस्यकारयामासवीर्यवान्॥लक्ष्मणस्यचलक्ष्मीवान्इक्ष्वाकुकुलवर्द्धनः॥१९॥प्रतिकर्मचसीतायाःसर्वादशर
थस्त्रियः॥आत्मनैवतदाचक्रुर्मनस्विन्योमनोहरं॥२०॥ततोवानरपत्नीनांसर्वासामेवशोभनं॥चकारयत्नात्कौसल्याप्रहृष्ट
पुत्रवत्सला॥२१॥ततःशत्रुघ्नवचना[illegible]त्सुमंत्रोनामसारथिः॥योजयित्वाभिचक्रामरथंसर्वांगशोभनं॥२२॥अग्न्यर्कामलसंका
शंदिव्यंदृष्ट्वारथंस्थितं॥आरुरोहमहाबाहूरामःपरपुरंजयः॥२३॥सुग्रीवोहनुमांश्चैवमहेंद्रसदृशद्युती॥स्नातौदिव्यनिभैर्वस्त्रै

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

र्जग्मतुः शुभकुंडलौ॥२४॥सर्वाभरणजुष्टाश्च ययुस्ताः शुभकुंडलाः॥सुग्रीवपत्न्यः सीताच दृष्टुं नगरमुत्सुकाः॥२५॥अयोध्यायांच स
चिवाराज्ञो दशरथस्य च॥पुरोहितं पुरस्कृत्य मंत्रयामासुरर्थवत्॥२६॥अशोको विजयश्चैव सिद्धार्थश्च समाहिताः॥मंत्रयन्ति राम
वृद्ध्यर्थं वृत्यर्थं नगरस्य च॥२७॥सर्वमेवाभिषेकार्थं जयार्हस्य महात्मनः॥कर्तुमर्हथ रामस्य यद्यन्मंगलपूर्वकं॥२८॥इति ते मंत्रिणः
सर्वे संदिश्य च पुरोहितं॥नगरान्निर्ययुस्तूर्णं रामदर्शनबुद्धयः॥२९॥हरियुक्तं सहस्राक्षो रथमिंद्रमिवानघः॥प्रययौ रथमास्थाय रा
मो नगरसुत्तमं॥३०॥जग्राह भरतो रश्मीछत्रुघ्नः छत्रमाददे॥लक्ष्मणो वाजनं तस्य मूर्ध्नि संविजयं तदा॥३१॥श्वेतं च वालव्यजनं जग
हे परितः स्थितः॥अपरं चंद्रसंकाशं राक्षसेंद्रो विभीषणः॥३२॥ऋषिसंघैस्तदाकाशे देवैश्च समरुद्गणैः॥स्तूयमानस्य रामस्य शुश्रुवु
र्मधुरध्वनिः॥३३॥ततः शत्रुंजयं नाम कुंजरं पर्वतोपमं॥आरुरोह महातेजाः सुग्रीवः प्लवगर्षभः॥३४॥नवनागसहस्राणि ययुरास्था
य वानराः॥मानुषं विग्रहं कृत्वा सर्वाभरणभूषिताः॥३५॥शंखशब्दप्रणादैश्च दुंदुभीनां च निस्वनैः॥प्रययौ पुरुषव्याघ्रास्तां पुरीं हर्म्यमा
लिनीं॥३६॥दृष्ट्वा सुस्ते समायातं राघवं सपुरःसरं॥विराजमानं वपुषा रथेनातिरथं तदा॥३७॥ते वर्द्धयित्वा काकुत्स्थं रामेण प्रतिनंदिताः॥अ
नुजग्मुर्महात्मानं भ्रातृभिः परिवारितं॥३८॥अमात्यैर्ब्राह्मणैश्चैव तथा प्रकृतिभिर्वृतः॥श्रिया विरुरुचे रामो नक्षत्रैरिव चंद्रमाः॥३९॥स
पुरोगामिभिस्तुर्यैस्तालस्वस्तिकपाणिभिः॥प्रत्याहरद्भिर्मुदितैर्मंगलानि वृतो ययौ॥४०॥अक्षतं जातरूपं च गावः कन्याः सद्विजाः॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

नरामोदकहस्ताश्चरामस्यपुरतोययुः॥३९॥सरभंचरामःसुग्रीवेप्रभावंचानिलात्मजे॥वानराणांचतत्कर्मत्वाचचक्षेथमंत्रिणां॥
३९॥श्रुत्वाचविस्मयंजग्मुरयोध्यापुरवासिनः॥वानराणांचतत्कर्मराक्षसानांचतद्बलं॥४०॥द्युतिमानेतदाख्यायरामोवानरसंवृतः॥
हृष्टपुष्टजनाकीर्णामयोध्यांप्रविवेशसः॥४१॥ततोत्वभ्युच्छ्रयन्पौराःपताकाश्चगृहेगृहे॥ऐक्ष्वाकाध्युषितंरम्यमाससादयितुंगृहं
४२॥अथाब्रवीद्राजपुत्रोभरतंधर्मिणांवरं॥अर्थोपहितयावाचामधुरंरघुनंदनः॥४३॥पितुर्भवनमासाद्यप्रवेश्यचमहात्मनः॥कौस
ल्यांचसुमित्रांचकैकेयीमभिवादयन्॥४४॥यच्चमद्भवनंश्रेष्ठंसाशोकवनिकंमहत्॥मुक्तावैडूर्यसंकीर्णंसुग्रीवायनिवेदय॥
४५॥तस्यतद्वचनंश्रुत्वाभरतःसत्यविक्रमः॥हस्तेगृहीत्वासुग्रीवंप्रविवेशतमालयं॥४६॥ततस्तैलप्रदीपांश्चपर्यंकास्तरणानि
च॥गृहीत्वाविविशुःक्षिप्रंशत्रुघ्नेनप्रचोदिताः॥४७॥उवाचचमहातेजाःसुग्रीवंराघवानुजः॥अभिषेकायरामस्यदूतानाज्ञापयप्रभो॥
४८॥सौवर्णान्वानरेंद्राणांचतुर्णांचतुरोघटान्॥ददौक्षिप्रंससुग्रीवःसर्वरत्नविभूषितान्॥४९॥यथाप्रत्यूषसमयेचतुर्णांसागरांभ
सां॥पूर्णैर्घटैःप्रतीक्षध्वंतथाकुरुतवानराः॥५०॥एवमुक्तामहात्मानोवानरावारणोपमाः॥उत्पेतुर्गगनंशीघ्रंगरुडाइवशिघ्रगाः ५१
जांबवांश्चहनूमांश्चवेगदर्शीचवानरः॥ऋषभश्चैवकलशान्जलपूर्णानथानयन्॥५२॥नदीशतानांपंचानांजलंकुंभैरुपाहरन्
पूर्वात्समुद्रात्कलशंजलपूर्णमथानयत्॥५३॥सुषेणःसत्वसंपन्नःसर्वरत्नविभूषितं॥ऋषभोदक्षिणात्तूर्णंसमुद्राज्जलमानयत्॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

५४॥रक्तचंदनकर्पूरैःसंवृतंकांचनंघटं॥गवयःपश्चिमातोयमाजहारमहार्णवात्॥५५॥रत्नकुंभेनमहता शीतंमारुतविक्रमः
उत्तराच्च जलंशीघ्रंगरुडानिलविक्रमः॥५६॥आजहारसधर्मात्मानलःसर्वगुणान्वितः॥ततस्तैर्वानरश्रेष्ठैरानीतंप्रेक्ष्यतज्ज
लं॥५७॥अभिषेकायरामस्यशत्रुघ्नःसचिवैःसह॥पुरोहितायश्रेष्ठायसुहृद्भ्यश्चन्यवेदयत्॥५८॥ततःसप्रयतोवृद्धोवसिष्ठो
ब्राह्मणैःसह॥रामंरत्नमयेपीठेससी[illegible]तंसन्यवेशयत्॥५९॥वसिष्ठोविजयश्चैवजाबालीरथकाश्यप॥कात्यायनोगौतमश्च
वामदेवस्तथैवच॥६०॥अभ्यषिंचन्नरव्याघ्रंप्रसन्नेनसुगंधिना॥सलिलेनसहस्राक्षंवसवोवासवंयथा॥६१॥ऋत्विग्भिर्ब्राह्म
णैःपूर्वंकन्याभिर्मंत्रिभिस्तथा॥योधैश्चैवाभ्यषिंचंस्तेसंप्रहृष्टैःसनैगमैः॥६२॥सर्वौषधिरसैश्चापिदैवतैर्नभसिस्थितैः॥चतुर्भि
र्लोकपालैश्चसर्वैर्देवैश्चसंगतैः॥६३॥ब्रह्मणानिर्मितंपूर्वंकिरीटंरत्नशोभितं॥अभिषिक्तपुराथेनमनुस्तंदीप्ततेजसं॥६४॥त
स्यान्ववायेराजानःक्रमाद्येनाभिषेचिताः॥सभायांहेमकृष्णायांशोभितायांमहाधनैः॥६५॥रत्नैर्नानाविधैश्चैवचित्रितायांसु
शोभनैः॥नानारत्नमयेपीठेकल्पयित्वायथाविधि॥६६॥किरीटेनततःपश्चाद्वसिष्ठेनमहात्मना॥ऋत्विग्भिर्भूषणैश्चैवसमयो
क्षतराघवः॥६७॥छत्रंतस्यचजग्राहशत्रुघ्नःपांडुरंशुभं॥श्वेतंचवालव्यजनंसुग्रीवोवानरेश्वरः॥६८॥अपरंचंद्रसंकाशंराक्षसे
न्द्रोविभीषणः॥मालांज्वलंतींवपुषाकांचनींशतपुष्करां॥६९॥राघवायददौवायुर्वासवेनप्रचोदितः॥सर्वरत्नसमायुक्तंमणिभिश्च

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

विभूषितं॥७॥मुक्ताहारं नरेंद्राय ददौ शक्रप्रचोदितः॥ऋजगुर्देवगंधर्वा ननृतश्चाप्सरोगणाः॥७२॥अभिषेके तदर्हस्य तदा रामस्य धीमतः॥भूमिः सस्यवती चैव फलवंतश्च पादपाः॥७३॥पुष्पवंति च पुष्पाणि बभूवुर्राघवोत्सवे॥सहस्रं शतमश्वानां धेनूनां च गवां तथा॥७३॥ददौ शतसहस्रान् पूर्वं द्विजेभ्यो मनुजर्षभः॥त्रिंशत्कोटीर्हिरण्यस्य ब्राह्मणेभ्यो ददौ पुनः॥७४॥नानाभरणवस्त्राणि महार्हाणि च राघवः॥अर्करश्मिप्रतीकाशां काञ्चनीं मणिविग्रहां॥७५॥सुग्रीवाय स्रजं दिव्यां प्रायच्छन्मनुजाधिपः॥वैडूर्यमयचित्रे च चंद्ररश्मिविभूषिते॥७६॥बालिपुत्राय धृतिमान्नंगदायांगदे ददौ॥मणिप्रवरजुष्टं तं मुक्ताहारमनुत्तमं॥७७॥सीतायै प्रददौ रामश्चंद्ररश्मिसमप्रभं॥अरजे वाससी दिव्ये शुभान्याभरणानि च॥७८॥अवेक्षमाणो वैदेहीं प्रददौ वायुसूनवे॥अवमुच्यात्मनः कंठाद्धारं जनककन्दिनी॥७९॥अवेक्षत हरीन्सर्वान् भर्तारं च मुहुर्मुहुः॥तामिंगितज्ञः संप्रेक्ष्य बभाषे जनकात्मजां॥८०॥प्रदेहि सुभगे हारं यस्य तुष्टासि भामिनि॥तेजो धृतिर्यशो दाक्ष्यं सामर्थ्यं विनयो नयः॥८१॥पौरुषं विक्रमो बुद्धिर्यस्मिन्नेतानि नित्यदा॥ददौ सा वायुपुत्राय तं हारमसितेक्षणा॥८२॥हनूमांस्तेन हारेण शुशुभे वानरर्षभः॥चंद्रांशुचयगौरेण श्वेताभ्रेण यथाचलः॥८३॥सर्वे वानरवृद्धाश्च ये चान्ये वानरोत्तमाः॥वासोभिर्भूषणैश्चैव यथार्हं प्रतिपूजिताः॥८४॥विभीषणोथ सुग्रीवो हनुमान् जांबवांस्तथा॥सर्वे वानरमुख्याश्च रामेणाक्लिष्टकर्मणा॥८५॥यथार्हं पूजिताः सर्वे कामैरत्नैश्च पुष्कलैः॥प्रहृष्ट

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

मनसः सर्वे जग्मुरेव यथागतं ॥८८॥ ततो द्विविदमैंदाश्च नीलाय च परंतप ॥ सर्वान्कामान्गुणान्वीक्ष्य प्रददौ वसुधाधिपः ॥
॥८९॥ दृष्ट्वा सर्वे महात्मानस्ततस्ते वानरर्षभाः ॥ विसृष्टाः पार्थिवेंद्रेण किष्किंधां समुपागमन् ॥ ९० ॥ सुग्रीवो वानरश्रेष्ठो दृष्ट्वा रा-
माभिषेचनं ॥ पूजिताश्चैव रामेण किष्किंधां प्राविशत्पुरीं ॥ ९१ ॥ विभीषणोपि धर्मात्मा सहितैर्नैर्ऋतर्षभैः ॥ लब्ध्वा कुलवैधनं राज्य-
लंकां प्रायान्महायशाः ॥ ९२ ॥ स राज्यमखिलं शासन्निहतारिर्महायशाः ॥ राघवः परमोदारो रराज परया मुदा ॥ ९३ ॥ उवाच लक्ष्मणं
रामो धर्मज्ञो धर्मवत्सलः ॥ भ्रातिष्ठ धर्मज्ञ मया सहेमां गां पूर्वराजाध्युषितां बलेन ॥ तुल्यं मया त्वं पितृभिर्वृतायां त्वं यौवराज्ये धुर
मुद्वहस्व ॥ ९४ ॥ सर्वात्मना पर्यनुनीयमानो यदा न सौमित्रिरुपैति योगं ॥ नियुज्यमानो भुवि यौवराज्ये ततोभ्यषिंचद्भरतं महात्मा
९५ ॥ पौंडरीकाश्वमेधाभ्यां वाजिमेधेन चासकृत् ॥ अन्यैश्च विविधैर्यज्ञैरयजत्पार्थिवात्मजः ॥ ९६ ॥ राज्यं दशसहस्राणि प्राप्य व
र्षाणि राघवः ॥ दशाश्वमेधानाजह्रे सदश्वान्भूरिदक्षिणान् ॥ ९७ ॥ आजानुलंबिबाहुः स महावक्षाः प्रतापवान् ॥ लक्ष्मणानुचरो
रामः शशासपृथिवीमिमां ॥ ९८ ॥ राघवश्चापि धर्मात्मा प्राप्य राज्यमनुत्तमं ॥ ईजे बहुविधैर्यज्ञैः ससुतः भ्रातृबांधवः ॥ ९९ ॥ न पर्यदेव
न्विधवा न च व्यालकृतं भयं ॥ न व्याधिजं भयं चासीद्रामे राज्यं प्रशासति ॥ ९९ ॥ निर्दस्युरभवल्लोको नानर्थकश्चिदस्पृशत् ॥ न
चासन्वृद्धबालानां प्रेतकार्याणि कुर्वते ॥ १०० ॥ सर्वं मुदितमेवासीत्सर्वो धर्मपरोभवत् ॥ राममेवानुपश्यंतो नाभ्यहिंसन्परस्परं ॥

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

१०१॥आसन्वर्षसहस्राणितथापुत्रसहस्रिणः॥निरामयाविशोकाश्चरामेराज्यंप्रशासति॥२॥नित्यपुष्पानित्यफलास्त
रवस्तत्रपुष्पिताः॥कालवर्षीचपर्जन्यःसुखस्पर्शश्चमारुतः॥३॥स्वकर्मसुप्रवर्त्तंतेतुष्टा स्वैरेवकर्मभिः॥आसन्प्रजाधर्म
परारामेशासतिनानृताः॥४॥सर्वेलक्षणसंपन्नाःसर्वेधर्मपरायणाः॥दशवर्षसहस्राणिरामोराज्यमकारयत्॥५॥धर्म्यंय
शस्यमायुष्यंराज्ञांचविजयावहं॥आदिकाव्यमिदंचार्षंपुरावाल्मीकिनाकृतं॥६॥यःशृणोतिसदालोकेनरःपापात्प्रमुच्य
ते॥पुत्रकामश्चपुत्रान्वैधनकामोधनानिच॥७॥लभतेमनुजोलोकेश्रुत्वारामाभिषेचनं॥महींविजयतेराजारिपूंश्चाप्यधि
तिष्ठति॥८॥राघवेणयथामातासुमित्रालक्ष्मणेनच॥भरतेनचकैकेयीजीवपुत्रास्तथास्त्रियः॥९॥श्रुत्वारामायणमिदंदीर्घ
मायुश्चविंदति॥रामस्यविजयंचेमंसर्वमक्लिष्टकर्मणः॥१०॥शृणोतियइदंकाव्यंपुरावाल्मीकिनाकृतं॥श्रद्दधानोजित
क्रोधोदुर्गाण्यतितरत्यसौ॥११॥समागमंप्रवासांतेरमंतेसहबांधवैः॥शृण्वंतियइदंकाव्यंपुरावाल्मीकिनाकृतं॥१२॥तेप्रार्थि
तानवरान्सर्वान्प्राप्नुवंतीहराघवात्॥श्रवणेनपुराःसर्वेप्रीयंतेसंप्रशृण्वतां॥१३॥विनायकाश्चसाम्यंतिगृहेतिष्ठंतियस्यवै॥विज
येतमहींराजाप्रवासीस्वस्तिमान्भवेत्॥१४॥स्त्रियोरजस्वलाश्चश्रुत्वापुत्रान्सूयुरनुत्तमान्॥पूजयंश्चपठंश्चैवमितिहासंपुरात
नं॥१५॥सर्वपापैःप्रमुच्येतदीर्घमायुरवाप्नुयात्॥प्रणम्यशिरसानित्यंश्रोतव्यंक्षत्रियैर्द्विजात्॥१६॥ऐश्वर्यंपुत्रलाभश्चभविष्य

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

तिनसंशयः॥रामायणमिदंकृत्स्नंशृण्वतःपठतःसदा॥१७॥प्रीयतेसततंरामःसहिविष्णुःसनातनः॥आदिदेवोमहाबाहु
र्हरिर्नारायणःप्रभुः॥१८॥एवमेतत्पुरावृत्तमाख्यानंभद्रमस्तुवः॥प्रब्राहरतविस्तब्धंबलंविष्णोःप्रवर्द्धता॥१९॥देवाश्चसर्वेतुष्यं
तिग्रहणाच्छ्रवणात्तथा॥रामायणस्यश्रवणेतुष्यंतिपितरःसदा॥२०॥भक्त्यारामस्ययेचेमांसंहितामृषिणाकृताम्॥येलिखंति
हचनरास्तेषांवासस्त्रिविष्टपे॥२१॥कुटुंबवृद्धिंधनधान्यवृद्धिंस्त्रियश्चमुख्याःसुखमुत्तमंच॥श्रुत्वाशुभंकाव्यमिदंमहा
र्थंप्राप्नोतिसर्वांभुविचार्थसिद्धिं॥२२॥आयुष्यमारोग्यकरंयशस्यंसौभ्रातृकंबुद्धिकरंशुभंच॥श्रोतव्यमेतन्नियमेनसद्भि
रारख्यानमोजस्करमृद्धिकामैः॥२३॥इत्यार्षेश्रीरामायणेवाल्मीकीयेयुद्धकांडेसर्वजनपरिवृतस्यराजाधिराजस्यश्री
रामभद्रस्यपट्टाभिषेकभद्राख्यानंनामएकत्रिंशोत्तरशततमःसर्गः॥१३१॥ग्रंथसंख्या॥६२००॥एवंपूर्वतः॥२०२१॥सर्गसंख्या
२३२॥इतिश्रीगोमतीतीरनैमिषारण्याश्वमेधसप्ततंतुवाटगतमुनींद्रद्विजेंद्रवानरेंद्रऋक्षेंद्रगोपुच्छेंद्रराक्षसेंद्रपरिवृतस्य
जनककेकयेंद्रादिवसुधाधिपेंद्रपरिवृतस्यमुनिवृंदारकवृंदवंद्यमानकोरकाकारचरणयुगलस्यसद्भ्रातृसन्मित्रस
न्मंत्रिसहितस्यसाकेतपुरवराधीश्वरस्यदीनानांदैन्यनिर्हरणस्यउदीर्णवीर्योत्सिक्तरावणवधार्थंदेवैःप्रार्थितस्यरघुकु
लतिलकसंभूतस्यश्रीसीताविशेषकस्यलक्ष्मीपतेःसाम्यात्रास्यलक्ष्मीवतोराजाधिराजस्यलोकाभिरामस्यनिकटाक्त

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

रा०वा०यु०
२९४

योः श्रीरामात्मजयोरादिकवेः शिष्ययोः कुशलवयोराख्याने श्रीमद्रामायणे चतुर्विंशत्सहस्रिकायां संहितायां श्रीमद्युद्ध
कांडे पंचविंशे द्विवर्त्तमानकथाप्रसंगः समाप्तः॥ इति युद्धकांडः समाप्तः॥ अतः परं उत्तरकांडः तस्यायमाद्यश्लोकः॥ आप्तरा
ज्यस्य रामस्य राक्षसानां वधे कृते॥ आजग्मुर्मुनयः सर्वे राघवं प्रतिनंदितुं॥१॥ छ॥ ॥ श्रीसं० १८ द्वा ज्ये ए० शु० १३॥ भृगु०

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri

CC-0.Courtesy Shri K.S.Parihar Librarian Government District Library Varanasi. Digitized by eGangotri